Tanjore Saraswathi Mahal Series No. 15.

ANANDAKANDAM

A TREATISE ON MERCURY AND OTHER HEAVY METALS — AND THEIR USES IN MEDICINE AND ALCHEMY (ATOMIC PHENOMENA)

VOL. I - SANSKRIT TEXT.

MADRAS GOVERNMENT ORIENTAL SERIES
NO. LIX.

आनन्दकन्दः

1952

TANJORE SARASWATHI MAHAL SERIES No. 15.

ANANDAKANDAM

Edited with Translation in Tamil, and Introduction in Tamil and Sanskrit

BY

SRI. S. V. RADHAKRISHNA SASTRI,
VAIDYAVISARADA, AYURVEDA SIROMANI,
Bharat Ayurveda Sala, Trichinopoly.

Published by:

S. GOPALAN, B. A., B. L.,
Honorary Secretary, for the Administrative Committee,
T. M. S. S. M. LIBRARY, TANJORE.

1952 [Price Rs. 15.
Also in 2 Parts. Text 10—8—0
Tamil Summary 5—8—0

तञ्जापुर सरस्वतीमहालय ग्रन्थमाला— पुष्पम् १५.

आनन्दकन्दः

(रसवादग्रन्थः)

त्रिशिरःपुरस्थ भारत आयुर्वेदशालाध्यक्षेण
वैद्यविशारद आयुर्वेदशिरोमणि
एस्. वि. राधाकृष्णशास्त्रिणा
संशोधितः
द्राविडानुवाद-संस्कृतद्राविडोपोद्धातादियोजनेन
परिष्कृतश्च ।

तञ्जापुर सरस्वतीमहाल्ग्रन्थालयनिर्वाहकसमितेः कृते,
गौरवकार्यदर्शिभिः,
एस्. गोपालन्, बी. ए. बी. एल्. एतैः
प्रकाशितः

1952 [मूल्यम् रू. १५

PREFACE

This publication "ANANDAKANDAM" is a very exhaustive treatise on Chemistry and Atomic Science which had been developed in our country from earliest times. The British rulers in their early days of the Empire were keenly aware of the greatness and value of our Cultural treasures and started the Asiatic Society, in which great Orientalists like Jones revealed to amazed Englishmen the achievements of Indians in the field of Arts and Sciences. But they gradually lost their respect for the greatness of the conquered country, and the encouragement to the pursuit of Eastern knowledge which began under Warren Hastings, gradually limited itself to a study of Literature and Philosophy.

Now, after the advent of Independence, we naturally turn to our own priceless heritage in arts and science The publication of this work with an abridged translation in Tamil and an introduction in English, is a step in the resuscitation of our neglected lore. It is for the scientists to study this work carefully and verify the chemical and atomic reactions described in detail herein. Though we have a number of works on the various rare properties of mercury in medicine and alchemy, none is so clear or so full as this, our present publication. We hope that this publication will inspire students of research to new fields of discovery and help in the

growth of science as a means of making man more happy.

This work has been edited with great care by *Sri S. V. Radhakrishnan, Ayurveda Visharada* who has spared no pains in getting at the correct text and making its meaning clear in his translation and introduction. Our thanks are due to him for his valuable services. The English introduction by *Sri K. Vasudeva Sastri* will, it is hoped, help modern students of science to appreciate the worth of our ancient achievements in science. We are thankful to *Sri K. Vasudeva Sastri* for his valuable services in this direction.

We thank the Government of Madras for their timely grants that have enabled us to publish this and other valuable manuscripts of our Library

Saraswathi Mahal,
Tanjore,
25—7—1952

S. GOPALAN,
Honorary Secretary.

INTRODUCTION.

"ANANDAKANDAM" or the 'ROOT of BLISS' as the present work is called, is a part of Tantric literature Tantras cover not only the modes of worship of deities, but also several arts and sciences. These are Architecture, Sculpture, Painting, Music and Dance, which are necessary adjuncts of worship, as also Medicine, Anatomy, Chemistry and Atomic Science, Science of Breath, and Higher Psychology, for producing rare powers of protecting and prolonging life, and acquiring superhuman powers called Siddhis. The main object in view is of course spiritual progress which all these powers subserve. The present treatise has for its object the promotion of health and longevity with the help of medical recipes chiefly metallic preparations, and treatment with atomic energy from mercury. The transmutation of baser metals into gold and various chemical processes dealing with metals are by-products in the processes.

Appropriately to the name "*Anandakandam*", this work is divided into two "Visranties" or places of restful peace. Peace, as every one knows, is a preliminary requisite of Ananda or Bliss.

The first part is called "AMRITEEKARANA VISRANTI". and deals with "Amriteekarana", or the art of defying old age, disease and death. This is sought to be achieved by what is known as Rasa Vedha or tapping atomic energy from mercury.

enrgy who are familiar with the process known 'boring of the atom'. "*Deha Vedha*" is unknown to modern Science which has directed its attention in the first instance to the means of destruction, instead of to the means of protection of the human body. "*Deha Vedha*" can appropriately be called boring of the cell.

Mercury in the state of *Vedha* or 'boring state' is thus capable of boring into the atom and boring into the cell. The 18 Samskaras or processes to which mercury is subjected before it reaches the 'Vedha' state, yields mercury with different properties, at the end of each process. The names of the processes suggest that in the different processes, mercury is treated as if it were a living entity. The names are:—

1. Swedana or causing it to perspire by exposing it to medicated steam.
2. Mardana: Giving it blows.
3. Murchhana: Making it lose conciousness and stop breath.
4. Utthapana: Reviving it.
5. Patana: Making it fall down.
6. Nirodhana: Confining it.
7. Niyamana: Bringing it under discipline.
8. Deepana: Increasing its appetite.
9. Anuvasana: Making it more energetic.
10. Charana: Feeding it with morsels (of mica).
11. Jarana: Helping it to digest the morsels.

12. Garbhadruti: Causing the food to become part and parcel of its body by liquifying it.
13. Bahyadruti: Feeding it with chemically digested food (of mica).
14. Ranjana: Adding to it colour and lustre.
15. Sarana: Preparing it for moving at will in all directions (by providing a vehicle of Diamond).
16. Anusarana: Further repetition of Sarana.
17. Pratisarana: Further repetition of Sarana.
18. Vedha: Helping it to bore through atoms and cells.

Special Chemical apparatus called *Yantras* for carrying out the several processes are also described in detail, as also the methods of preparing oils, decoctions and other ingredients for the several processes.

An extraordinary provision in this treatise is the disciplined life and propitiation of deities prescribed as a preliminary to the undertaking of the chemical and atomic processes described in this work. Their relevance and necessity are a matter for investigation. It must be mentioned that the subject of using mercury for tapping atomic energy is dealt with by numerous ancient treatises both in Sanskrit and Tamil, and in all these treatises, the preliminary discipline and propitiation called "*Rasa Deeksha*" is uniformly prescribed. Transmutation of metals is carried out by modern science by a process involving the use of electricity. And it must be expected that if such transmutation

should be possible by means of mercury in t. Vedha state, electricity must play a necessary part in the process. And how did the ancients get this electricity ? As in everything else undertaken by the men of the East, the process has been subjective rather than objective. Electric energy is to be found in the human body, and the discipline prescribed, it may be safely guessed, has been intended to increase the quantity and power of human electricity so that anything touched by those who have undergone the discipline may be charged sufficiently for starting the atomic process that is involved in the process resulting in the Vedha state.

This explains the failure of many alchemists who have taken the trouble to get the details of the processes from books and men of the ascetic order who are known to have succeeded in the transmutation, but have not cared to observe the discipline necessary for storing up the electric energy for starting the process. Celibacy is the first requisite in the descipline for storing up electric energy, and it is no wonder that those who are known to have succeeded in alchemy have all lived an ascetic life.

Although the processes and the books containing them in more or less detail have been public property all along, in our country, Alchemy has in most cases proved a dangerous speculation resulting in the ruin of many a rich man. The reason is to be found in the neglect of the subjective process for storing up electricity which is uniformly prescribed in all the books. It is just possible that if either the discipline is undergone as a preliminary to the performance of the experiments resulting in

च। एतन्मातृकात्रयसंवादेन मुद्रितामुद्रित[illegible] प्रकाशन-
मिदं प्रस्तुतम्॥

चिराय पाश्चात्यैः संपर्कलोभेन प्रवर्तित[illegible] स्वर्ण-
रजताद्युत्तमधातुरूपतया परिणामनेन संपन्न[illegible] क्रमा-
च्चिकित्सायां कलासु चान्यासु लब्ध[illegible] [illegible]
निकविज्ञानानामाविष्करणे प्राभवन्निति [illegible]

भारते रसशास्त्रस्य उत्पत्तिः।

प्रत्यक्षम्। भारतीय [illegible] मन्यते-
स्पष्टमिदं, यद्भारते [illegible] प्रवर्तक-
मन्यदेव [illegible] [illegible] हि
शास्त्रत्वं साक्षात्परंपरया वा- आत्मदर्शनोप[illegible] रस-
शास्त्रमपि प्रकृतमात्मनः शास्त्रत्वे भारतीयत्वे च [illegible] साक्षात्कारं
हेतूकृत्य प्रतितिष्ठति। तत एव चास्य रसेश्वरदर्शन[illegible]॥

भारते शैवाः पाशुपता भैरवा अन्ये च [illegible] सामा-
न्यतो माहेश्वरसामयिका इति व्यपदिश्यन्ते। [illegible] स्थायि
शरीरं संपाद्य,- अर्थात्पिण्डस्थैर्यं संपाद्य, ततो [illegible] तत्त्वज्ञान-
संपादनेन इहैव जीवत एव मुक्तिलाभो मोक्ष इति [illegible] सुधियः
पिण्डस्थैर्यलाभे रसमेकमेव शरणमुपलभ्य[illegible] [illegible]
लाभाय प्रायतन्त। रसस्य वेधबन्धादिसंस्काराणां [illegible] सिद्धि-
सौष्ठवं परीक्षितुमेव लोहवेधे तेषामानुषङ्गिकी प्रवृत्ति[illegible] न पुरुषार्थ-
बुद्ध्या। न हि लोहवेधसिद्धौ तन्निष्पन्नधनादिलाभ[illegible] तेषा-
मभिसन्धिः। यथा च रसार्णवे—

लोहवेध इति ख्यातो विस्तरेण सुरेश्वरि!।
यथा लोहे तथा देहे कर्तव्यः सूतकः सदा॥
समानं कुरुते देवि! प्रविशन् देहलोहयोः।
पूर्वं लोहे परीक्षेत ततो देहे प्रयोजयेत्॥ इति।

[पटल १७.]

यदि सिद्धिमाकांक्षमाणेन लोहवेधे चापलं प्रदर्श्यते तर्हि सिद्धिनाशः इत्युप-
लभ्यते प्रमाणशतं प्रसिद्धेष्वसंख्यानां भारतदेशीयानां सिद्धानां चरित्रेषु।

अत एव रसतन्त्राविष्कारकाः सर्वे सिद्धा विरक्ता योगिनो व्याडिनागार्जुन-गोविन्दभगवत्पादादिमप्रभृतयः[1]। तैरेतद्रसशास्त्रं जीवन्मुक्तिसाधनोपायतया प्रणीतं प्रमाणितं प्रचारितञ्च।

दृश ज्ञानसामान्य इति पाणिनीयो धातुपाठः। तत उत्पन्नो दर्शनशब्दश्चेतनानामचेतनानां च पदार्थानां मूलतत्त्वानुसन्धाने शक्तः। मूलतत्त्वानुसन्धानं चामुष्मिकं मोक्षसाधनं सर्वेषामिष्टम्। न त्वैहिकमात्रम्। शास्त्रेष्वैहिकतत्त्वानुसन्धानमपि प्रासङ्गिकं परोक्षात्मसाक्षात्कारपर्यवसाय्येव। तत्त्वानुसन्धानं च प्रमाणैकसाध्यं; प्रमाणं च प्रत्यक्षादिभिदाभिन्नं संस्कारैरात्मगुणै रुचिभिश्च द्रष्टारो भिन्ना इति दर्शनान्यपि भिन्नानि। अत एव हि कस्यचित्क्वचिद्दर्शने पक्षपातः, दर्शनान्तरे चाप्रामाणिकताबुद्धिश्चोपजायते। केचिदध्यक्षं (प्रत्यक्षं) अन्येऽनुमानं (तर्कं) अपरे च शब्दं (श्रुतिं) प्रमाणमामनन्ति। प्रमाणानुसारेण दार्शनीकानां वर्गीकरणमप्येवं सम्भवति। यथा—आध्यक्षिकाः चार्वाकाः, तार्किका रसेश्वरवादिप्रभृतयः, श्रौता अद्वैतिनश्चेति।

दर्शनानि तल्लक्षणं भेदाश्च

तार्किका द्विविधा नास्तिका आस्तिकाश्च। नास्तिका द्विविधा बौद्धा जैनाश्च। आस्तिकाश्च द्विविधाः सगुणात्मवादिनो निर्गुणात्मवादिनश्च। सगुणात्मवादिनः प्रच्छन्नतार्किकाः स्पष्टतार्किकाश्चेति द्विप्रकाराः। स्पष्टतार्किका भोगसाधनादृष्टवादिन उत्पत्तिसाधनादृष्टवादिनश्चेति द्विविधाभवन्ति। भोगसाधनादृष्टवादिनश्च जीवन्मुक्तिवादिनो विदेहमुक्तिवादिनश्चेति द्वेधा भवन्ति। विदेहवादिनश्च त्रिविधाः—

रसेश्वरदर्शनस्य दर्शनगोष्ठ्यां स्थानम्।

१. कर्मनिरपेक्षेश्वरवादिनः आत्मभेदवादिनो नकुलीशपाशुपताः,

२. कर्मसापेक्षेश्वरवादिनः आत्मभेदवादिनः शैवाः।

३. आत्मैक्यवादिनः प्रत्यभिज्ञादर्शिन इति।

जीवन्मुक्तिवादिनो रसेश्वरदर्शनानुयायिनः। सर्वेऽप्यमी भोगसाधनादृष्टवादिनः शैवसामयिकाः। तत्र प्रत्यभिज्ञावादिनो जीवेश्वरयोरैक्यमभि-

---

1. आदिमो हि द्रविडदेशे तिरुमूलरिति श्री मूलनाथ इति च प्रसिद्धो नन्दिशिष्यः सिद्ध इति केचित्।

मन्वत इति असंभावितमुदाहरन्तो जघन्याः। जीवेश्वरभेदमङ्गीकुर्वन्तोऽपि ईश्वरस्य जगत्सृष्टौ कर्मानपेक्षितामङ्गीकुर्वाणा न तथा युक्तदर्शनाः, यत ईश्वरस्य वैषम्यनैर्घृण्यदोषपरिहाराय कर्मसापेक्षित्वमवश्यमभ्युपगन्तव्यम्। शैवास्तु कर्मसापेक्षत्ववादिनो देहपातात्परं मुक्तिमभिमन्यन्ते, यस्मान्मतो दुरुपपादः। जीवन्मुक्तिवादिनां रसेश्वरवादिनां तु दर्शनं निर्दोषं सोपपत्तिकं चेति दर्शनेभ्योऽन्येभ्यो ज्यायस्त्वमपि रसेश्वरदर्शनस्य निरूप्यते निपुणैश्च-द्भिर्माहेश्वरैस्तीर्थकारैः। माहेश्वरसामयिका द्राविडाः सिद्धाः प्रायो रसेश्वर-दर्शनमनुसरन्तीत्येतदपि चिन्तनीयमत्र। इति रसेश्वरदर्शनस्य दर्शनगोष्ठ्यां स्थानं सङ्ग्रहेण प्रदर्शितम्॥

रसेश्वरदर्शन स्वरूपम्।

अथ रसेश्वरदर्शनस्वरूपमीषद्विवृणुमः। केचन माहेश्वराः पिण्डस्थैर्ये सर्वाभिमता जीवन्मुक्तिः सेत्स्यतीति मतमास्थाय पिण्डस्थैर्योपाये पारदाख्य-पदवेदनीयं रसमेव सङ्गिरन्ते। श्रवणमननाभिनिध्या-सनादिनाऽवधारितात्मतत्त्वस्य अभ्यासातिशयापहृत-मिथ्याज्ञानस्य जीवतः सत एव या मुक्तिस्सा जीव-न्मुक्तिः। दर्शनेष्वन्येषु देहपातानन्तरमेव मुक्तिः प्रतिपाद्यमाना न प्रत्ययाय साधकानाम्। अत्र तु न तथेति निर्विचिकित्सा प्रवृत्तिरिति मतमिदमभ्युपेयं मन्यन्ते। यदुक्तं आनन्दकन्दे :—

"देहान्तेषु तु मुक्तिर्या प्राणिनां साऽप्रयोजना।
देहान्ते देहिनस्सर्वे मुक्तिं यान्ति न संशयः॥"

"सर्वस्मिन्समये शास्त्रे मुक्तिरस्त्यन्तकालजा।
न दृश्यते करान्तःस्थमणिवत् सा च शांभवि!॥"

[अमृतीकरणविश्रान्तौ उल्लास २०. श्लो. २४ २८.]

पिण्डस्थैर्यसंपादनं जीवन्मुक्तौ नान्तरीयकमित्यपि तत्र प्रपञ्चितं यथा—

देहं विना न किञ्चित्स्याद्देहोऽयं सर्वसाधनम्।
तस्माद्देहं प्रयत्नेन रक्षयेत्सर्वतः सदा॥
देह पाते धर्मनाशो धर्मनाशे क्रियाच्युतिः।
क्रियाच्युतौ कुतो योगो योगभ्रंशे क चिद्भवेत्।

चिदभावे कुतो मोक्षो मोक्षे भ्रष्टे न किञ्चन ॥"

[अमृतीकरणविश्रान्तौ उल्लास २०. श्लो ३०-३२.)

जीवन्मुक्तिसाधनतया संपिपादयिषिते देहस्थैर्ये देहस्य रसरक्तादिमयत्वेन यन्नश्वरत्वं तस्य रसाभ्रकगन्धाख्यहरगौरीसृष्टिसंयोगादपोहनं दिव्यत्वप्राप्ति-र्नित्यत्वं चेत्यवसीयते। तादृशहरगौरीसृष्टिसिद्धिश्च रसस्याष्टाविधसंस्कारा-धानेन संपद्यते। सच्चिदानन्दपरतत्त्वस्फुरणेनैव मुक्तिसिद्धौ किमनेन दिव्यदेहसंपादनप्रयासेन? नैवम्। नित्यशरीरालाभे मुक्तिवार्तैव नोपपद्यते। यथाहुर्गोविन्दभगवत्पादाचार्याः—

न हि देहेन कथञ्चिद्व्याधिजरामरणदुःखविधुरेण।
क्षणभङ्गुरेण सूक्ष्मं तद्ब्रह्मोपासितुं शक्यम्॥
गलितानल्पविकल्पः सर्वाध्वविवक्षितश्चिदानन्दः।
स्फुरितोऽप्यस्फुरिततनोः करोति किं जन्तुवर्गस्य॥
यज्जरया जर्जरितं कासश्वासादिदुःखविशदं च।
योग्यं तन्न समाधौ प्रतिहतबुद्धीन्द्रियप्रसरम्॥

[रसहृदये प्रथमेऽवबोधे]

जीवन्मुक्तिस्वरूपव्यवच्छेदश्चेत्थमानन्दकन्दे प्रतिपाद्यते पिण्डस्थैर्येण अमरत्वं, प्रत्यगात्मसाक्षात्कारेण पूर्णज्ञानवत्त्वं च जीवन्मुक्तिरिति। यदुक्तं—

"न केवलामरत्वाच्च न शिवत्वाद्भवेत्तथा।
तद्द्वयोर्मेलनाच्च स्याज्जीवन्मुक्तिरियं स्मृता॥" इति।

[अमृतीकरणविश्रान्तौ उल्लास २०. श्लो २७.]

अस्तु। यदि जीवत एव मुक्तिरभिप्रेयते तर्हि कथं जीवत्व (संसारित्व) मुक्त-त्वयोः परस्परविरुद्धयोर्धर्मयोरेकत्र समावेशः। अतो जीवन्मुक्तिशब्दः शश-शृङ्गादिवदसंभवदर्थक एवेति केचिदाशङ्केरन्। तत्रोच्यते— मुक्तिस्ताव-त्सर्वतीर्थकरसंमता। सा किं ज्ञानविषया स्वीक्रियत उत न? मुक्तेर्ज्ञेयत्वे ज्ञेयत्वस्य ज्ञातृसापेक्षत्वान्मुक्तस्य ज्ञातृत्वमवर्जनीयम्। तच्च हि जीवत एव संभवति। अत एव जीवन्मुक्तिरेव मुक्तिर्न तु विदेहमुक्तिरित्यभ्युपेयमिति। यथा चोक्तं रसेश्वरसिद्धान्ते—

"रसाङ्कमेयमार्गोक्तो जीवमोक्षोऽन्यथा न तु ।
प्रमाणान्तरवादेषु युक्तिभेदावलम्बिषु ॥
ज्ञातृज्ञेयमिदं विद्धि सर्वतन्त्रेषु संमतम् ।
नाजीवञ्ज्ञास्यति ज्ञेयं यदतोऽस्त्येव जीवितम् ॥" इति ।

तस्मादेतद्दर्शनोक्तया रीत्या पिण्डस्थैर्यसंपादनेन योगाभ्यासवशात्परतत्त्वे दृष्टे पुरुषार्थप्राप्तिर्भवतीति सिद्धम् । यथाहुर्गोविन्दभगवत्पादाः -

"भ्रूयुगमध्यगतं यच्छिखिविद्युत्सूर्यवज्जगद्भासि ।
केषाञ्चित्पुण्यदृशामुन्मीलति चिन्मयं ज्योतिः ॥
परमानन्दैकरसं परमं ज्योतिः स्वभावमविकल्पम् ।
विगलितसकलक्लेशं ज्ञेयं शान्तं स्वयं वेद्यम् ॥
तस्मिन्नाधाय मनः स्फुरदखिलं चिन्मयं जगत्पश्यन् ।
उत्सन्नकर्मबन्धो ब्रह्मत्वमिहैव चाप्नोति ॥
अस्तं हि यान्ति विषयाः प्राणान्तःकरणसंयोगात् ।
स्फुरणं नेन्द्रियतम(मन)सां नातः स्फुरतश्च सुखदुःखे ॥
रागद्वेषविमुक्ताः सत्याचारा नरा मृषारहिताः ।
सर्वत्र निर्विशेषा भवन्ति चिद्ब्रह्मसंस्पर्शात् ॥
तिष्ठन्त्यणिमादियुता विलसद्देहाः सदानन्दाः ।
ये ब्रह्मभावममृतं संप्राप्ताश्चैव कृतकृत्याः ॥"

[रसहृदये प्रथमेऽवबोधे श्लो. २१-२६.]

इति प्रतितन्त्रसिद्धान्तस्वरूपेण आत्मस्वरूपं मोक्षस्वरूपं मोक्षसाधनोपायः शरीरात्मसंबन्धश्चेत्यादीनि दर्शनौपयिकानि तत्त्वानि विवृण्वदिदं रसेश्वरदर्शनं दार्शनिकेषु लब्धादरम् ॥

रसतन्त्रप्रवृत्तिः ।

एतावदुपवर्णितं रसेश्वरदर्शनमुपजीव्य रसतन्त्रस्य प्रवृत्तिरुद्भूद्भारते वर्षे । देशान्तरेषु पुनरैहिकसुखाभाससाधनमात्रोपयुक्तधातुवादैकलक्ष्यतया तन्त्रमिदं प्रवृत्तम् । धातुवादश्च लोहवेधप्रयोजकः पिण्डस्थैर्यसाधने देहवेधे सिद्धिं परीक्षमाणेन योगिनोपकरणत्वेनोपबृंहितः— यथा जीवच्छरीरगततत्त्वान्वेषकैः परीक्षार्थं मृतशरीरे तत्तत्त्वविवेचनं उपकारकतया उपबृंह्यते । अतो रस-

तन्त्राविष्करणे प्रचारे उपयोगे च त एव सिद्धिमन्तो बभूवुः, ये नित्यानित्यविवेकिनो निगृहीतान्तःकरणाः कामक्रोधाद्याधिविनिर्मुक्ता योगिनो जीवन्मुक्ताः। ते सिद्धाख्यया नाथाख्यया च प्रसिद्धिमापुः। एष रसेश्वरदर्शनानुगः रसतन्त्रमार्गो प्रथमं कदा केन कुत्र वाऽऽरब्धो दृष्टस्स्मृतो वेति एतन्न नो युक्तिस्मृतिगोचरम्। परमेष संप्रदायः प्रायः सर्वत्र शिवपार्वतीनन्दीशमुखादवगत इति तन्त्रान्तरसामान्यतया अस्या अप्युत्पत्तिर्वर्ण्यते। एवं बौद्धैरपि मतमेनमवलंब्य कृतानि तन्त्राण्युपलभ्यन्ते प्रज्ञापारमिताऽभयङ्करादितीर्थङ्करमुखादवगततया प्रसिद्धानि ॥

रसतन्त्रप्रवर्तकाः सिद्धा नाथाश्च।

अत्र केषाञ्चिद्विदुषामयमभिसन्धिः। ऋगादित्रय्यां प्रतिपादितानां कर्मणां विषयाणां च सत्वदमश्रद्धाद्यात्मगुणसंपन्नेन ऋजुमार्गावलंबिना अनुष्ठेयत्वेन अलसानामथर्ववेदोपदिष्टो मार्गो लघुः क्षिप्रफलदः ऐहिकसुखसंपादकः क्वचित्सांसारिकशत्रुमथन–स्त्रीवशीकरणाद्यभीप्सितसंपादनोपायभूयिष्ठ इति तत्र रक्तिरधिकाऽभूत्। तदभिचिन्त्य विद्वद्भिर्वैदिकैः क्रमेणाथर्वण्यादरोऽभिनिवेशः प्रचारश्च क्षपितो येनाथर्वणः प्रचारो लुप्तः। पुनः कालवशादृगादिष्वपि भक्तौ हीयमानायां भैरवादिमाहादेवमार्गावलंबिनः, वज्रयानशाखावलंबिनो बौद्धाश्च रूपान्तरेणाथर्वणीं तामेव सिद्धिपद्धतिं गृहीत्वा भक्त्युपरञ्जितां तां जनेषु प्रचारयामासुः। स्वमतख्यापनाय खेचरी, तिरस्करिणी, विण्मूत्रसङ्गेनाधमलोहस्योत्तमलोहतापादनं इत्यादि सिद्धिप्रकारैः तन्त्रैर्लोकं स्ववशे चक्रुश्च। त एव गोरक्षनाथादयो नाथपथानुसारिणः, मन्थानभैरवादयः सिद्धाः, नागार्जुनादयो बौद्धाश्च। तेषां च न कश्चित्क्रमबद्ध इतिहासः क्वाप्युपलभ्यते। यद्यपि बौद्धा न वैदिकाः, अथापि सिद्धगोष्ठीषु तेषां समकक्षता वर्ण्यते। उत्तरापथे च बौद्धमतस्य वज्रयानीयशाखायां चतुरशीतिसिद्धमण्डलं गण्यते, तदन्तर्गतश्च गोरक्षनाथः नाथपथप्रवर्तक इति। परं नामावलीपरिशीलने केषाञ्चिच्छैवत्वेनाभिमतानामपि सिद्धानां तत्रान्तर्भाव इति तस्य प्रामाणिकत्वे संशयग्रस्तम्। दक्षिणापथे च शैवपाशुपतादितन्त्रानुयायिनो माहेश्वरसिद्धा रसग्रन्थेषु भिन्नभिन्नयाऽऽनुपूर्व्या तत्र तत्र प्रतिपादिता इति तेषामपि इतिहासो नूनं दुरवगमः। यथाऽऽनन्दकन्दे नव नाथा नव सिद्धाश्चोद्दिष्टाः ॥

"आदिनाथं मीननाथं गोरक्षं कोङ्कणेश्वरम् ।
जालन्ध्रेशं कन्थनीशमोड्डीशं चिञ्चिणीश्वरम् ॥
चौरङ्गिमेतान्नाथाख्यान्नत्र सन्तर्पयेत्ततः ।
चौरङ्गिं चर्पटं घोडाचूलिं रामद्वयं ततः ॥
भोलगोविन्दसिद्धं च व्याडिं नागार्जुनं तथा ।
कोरण्डं शूर्पकर्णं च मुक्तार्यं रेवणं तथा ॥
सिद्धं कुक्कुरपादं च शूर्पपादं कर्णरिकम् ।
सिद्धं किङ्कणिकाख्यं च सिद्धान्षोडश तर्पयेत् ॥"

[अ. वि. उल्ला. ३. श्लो ४७-५१.]

अन्ये च केचन रसरत्नसमुच्चये पठ्यन्ते ।

आदिमश्चन्द्रसेनश्च लङ्केशश्च विशारदः ।
कपाली मत्तमाण्डव्यो भास्करः शूरसेनकः ॥
रत्नघोषश्च शंभुश्च तथाऽर्को नरवाहनः ।
इन्द्रदो गोमुखश्चैव कंबलिर्व्याडिरेव च ॥
नागार्जुनस्सुरानन्दो नागबुद्धिर्यशोधनः ।
चण्डः कापालिको ब्रह्मा गोविन्दो लंपको हरिः ॥
सप्तविंशतिसंख्याका रससिद्धिप्रदायकाः ।
रसाङ्कुशो भैरवश्च नन्दी स्वच्छन्दभैरवः ॥
मन्थानभैरवश्चैव काकचण्डीश्वरस्तथा ।
कामदेव ऋश्यशृङ्गः क्रियातन्त्रसमुच्चयी ।
रसेन्द्रतिलको योगी भालुकिर्मलयाह्वयः ॥
महादेवो नरेन्द्रश्च वासुदेवो हरीश्वरः ।

[प्रथमेऽध्याये ।]

द्रविडेषु चागस्त्यादयोऽष्टादश सिद्धाः प्रकीर्त्यन्ते ।

१. नन्दी ।
२. श्रीमूलनाथः ।
३. कालाङ्गनाथः ।
४. भोगः ।
५. कोङ्कणः ।
६. अगस्त्यः ।

७.	पुलस्त्यः ।	१३.	कण्वः ।
८.	भुशुण्डः ।	१४.	पिङ्गिनाक्कीशः ।
९.	रोममुनिः ।	१५.	गोरक्षः ।
१०.	धन्वन्तरिः ।	१६.	तेरयर् ।
११.	शट्टैमुनिः (घोडाचूलिः ?)	१७.	यूहिमुनिः ।
१२.	मत्स्यमुनिः ।	१८.	इडैक्काडर् ।

तत्र शिवात्पार्वती सिद्धसंप्रदायमधिजगे पार्वत्या नन्दी नन्दिनश्चाश्विनी, अश्विन्या विश्विनी, विश्विन्या धन्वन्तरिः, धन्वन्तरेरगस्त्यः, अगस्त्यात्पुलस्त्यः, पुलस्त्यात्तेरयर्, तेरयात् यूहिरित्येनां संप्रदायानुवृत्तिं यूहिमुनिः स्वीये वाद-साहस्र्यां (யூகி வாதகாண்டம்) स्मरति । नन्दिनस्साक्षादधिगत विद्यमात्मानं स्मरति श्रीमूलनाथः । इत्थं सिद्धसंप्रदायाविष्कर्तॄणां मध्ये न कस्यापि कालो निश्चयेन वक्तुं शक्यते । श्रूयन्ते ह्यनेके नागार्जुनाः प्राचीनेतिहासप्रसिद्धाः । चक्रपाणिः स्वकीये चक्रदत्ते रसायनाध्याये—

"नागार्जुनो मुनीन्द्रः शशास यल्लोहशास्त्रमतिगहनम् ।"

इति स्मरति । अन्यः कश्चिद्बौद्धनरपतिः काश्मीरीयो राजतरङ्गिण्यां कल्हणेन कीर्त्यते । अपरश्च बौद्धभिक्षुर्महायानाख्यबौद्धमतप्रतिष्ठापको माध्यमिको बौद्धेतिहासप्रसिद्धः । अन्यश्च सिद्धनागार्जुनः कक्षपुटरसरत्नाकरादिग्रन्थकर्ता प्रज्ञापारमितेति बौद्धमतप्रसिद्धदेवीनामस्मरणाच्च बौद्धत्वेन गण्यमानः । इतरश्च "प्रतिसंस्कर्ताऽपीह नागार्जुन एवे"ति डल्हणेन सुश्रुतसंहिताप्रतिसंस्कर्तृत्वेन व्यवह्रियमाणः । अत्र को वा नागार्जुनः सिद्धसंप्रदायानुवर्ती ? किमु सर्वे एकामेव व्यक्तिं परिचाययन्ति इतीदं क्षोदक्षमम् । अत एतत्संप्रदायस्य संप्रदायद्रष्टॄणां वा कालनिर्णये न प्रभवाम इत्येव वक्तुमर्हामः ।

रसतन्त्रस्य परिनिष्ठितिः कदा ?

चरकसुश्रुतयोः काले प्रायः सर्वेषां रसोपरसमहारसादीनां मुख्यतः—पारदस्य, गन्धक-माक्षिकाभ्रक-मल्ल-ताल-शिलानां महारसानां, गैरिक-कासीस-तुत्थ-स्रोतोऽञ्जन-सौवीराञ्जन-पुष्पाञ्जन-शिलाजतु-सिन्दूर-सौराष्ट्री-कङ्कुष्ठानामुपरसानां वज्र-मुक्ता-प्रवाल-स्फटिक-वैडूर्य-मरकत-कर्केतन-गोमेदकानां रत्नानां, सुवर्ण-रजत-ताम्र-त्रपु-सीस-रीत्ययो-मण्डूराणां लोहानां शङ्खसमुद्रफेनादीनां च बाह्य आभ्यन्तरश्चोपयोगविधिश्चिकित्सायां लब्ध-

दृश्यमानतया श्रूयमाणस्य ग्रन्थस्यास्य प्रणेता, कालो वा न सुवचः । उल्लासोपसंहारेषु भैरवकृत इति स्मरणमुपलभ्यते । कोऽसौ भैरव इत्यत्र न किमपि दृढतरं प्रमाणमुपलभ्यते । [1]असिताङ्गादयो बहवो भैरवाः श्रूयन्ते "भैरवानसिताङ्गादीन्" इत्यादिना (आ. क. पृ. ३६) प्रत्याख्यायमानाः । रसरत्नसमुच्चय उल्लिख्यमानेषु सिद्धेष्वन्यतमो भैरव एव आनन्दकन्दस्य कर्ता स्यादित्यपि न निश्चयेन वक्तुं पार्यते । अतो रचनायां स्वरूपे च रसार्णवाख्यं सुप्रसिद्धमाकरतन्त्रग्रन्थमनुसरन्नानन्दकन्दोऽपि भैरवमतानुयायिना केनापि तान्त्रिकया शैल्या निर्मित इत्येतावदेवानुमातुं शक्यते ॥

ग्रन्थकर्तुर्नामाज्ञाने ग्रन्थनिर्माणकालस्यापि निश्चयो न सुकरः । परं ग्रन्थप्रतिपाद्यवस्तुपरामर्शो ग्रन्थान्तरसंवादानुपलब्धिमवलंब्य पौर्वापर्यविमर्शो वा ग्रन्थनिर्माणकालनिर्णये बहूपकरोति । तत्र प्रतिपाद्यवस्तुपरामर्शः प्रथमं संक्षेपेण निर्दिश्यते ।

१) रसार्णवरसरत्नाकराद्याकरग्रन्थेषु विशकलिततयोपलभ्यमानानां विषयाणां क्रमं कञ्चनावलंब्य प्रतिपादने, तत्राप्रतिपादितरसोपरसादिशोधनमारणादिविविधनव्यविषयप्रस्तावश्च ॥

२) प्राचीनतमतया संप्रतिपन्नाद्रसार्णवादेकादशं पटलमारभ्य पञ्चदशपटलपर्यन्तं प्रतिपादितो रसस्य विशेषजारणाक्रमो मूलिकोदकरत्नादिबन्धविशेषश्च आनन्दकन्दे उपनीकरणविश्रान्तौ पञ्चमोल्लासत्वेन त्रयोविंशचतुर्विंशोल्लासत्वेन शब्दतोऽर्थतश्च स्वीकृत्य सङ्ग्रथितः ॥

३) विजयाहिफेनादीनामुपयोगविधिः, यश्चैतिहासिकैरतिप्राचीने काले प्रचारे नासीदिति आमन्यते ॥

४) पेरोजसाबुणीत्यादीनां रसार्णवादिष्वदृष्टानां प्राकृतपदानां अत्रोपलब्धिः ॥

इतीमानि चत्वारि प्रमाणानि भवन्ति आनन्दकन्दस्य रसार्णवादिभ्य अर्वाक्कालिकत्वे । रसरत्नसमुच्चय-रसप्रकाशसुधाकर— रससङ्केतकलिकादि-

1. किरातमेव कालाङ्ग इति द्रविडसंप्रदायप्रसिद्ध इति विमर्शनीयम् ।

भ्यो निबन्धग्रन्थेभ्य आयुर्वेदप्रकाश-रसकामधेन्वादिभ्यस्सङ्ग्रहग्रन्थेभ्य-श्चास्यानर्वाचीनता चाधोनिर्दिष्टैः प्रमाणैरुपबृंहयितुं शक्यते ।

१) द्रुतीनां शास्त्रोपदिष्टानां दुष्करत्वं, तत्प्रयोगाणामनभिज्ञत्वं च कारणत्वेनोपजीव्य तन्निरूपणमेव त्यक्तं रसरत्नसमुच्चयकारेणायुर्वेदप्रकाशकारेणान्यैश्च । तत्र तत्काले द्रुतिप्रकाराणां लुप्तप्रचारता कारणं स्यात् । आनन्दकन्दे च तेषां प्रयोगा नैके प्रकीर्त्यन्ते ॥

२) रसरत्नसमुच्चयादाविवात्र महारसोपरसभेदानिर्णयः ।

३) अर्वाचीनग्रन्थेषु लोहतया परिगणितस्य यशदस्य परामर्शाभावः । यद्यपि खर्परात्सत्वाकर्षणं निरूप्यते, खर्परसत्वमेव यशद इति तत्राऽश्चाशेरते, अथापि खर्परसत्वमेव यशद इति, खर्परसत्वं लोहः इति वा न प्रतिपादितं कुतश्चित् । अन्यथाऽभ्रकसत्वस्यापि लोहेष्वन्तर्गणना कृता भवेत् ॥

अतश्च रसार्णवादिभ्य आकरग्रन्थेभ्योऽर्वाचीनो रसरत्नसमुच्चयादिभ्यो निबन्धग्रन्थेभ्यः, आयुर्वेदप्रकाशादिभ्यस्सङ्ग्रहग्रन्थेभ्यश्च प्राक्तन आनन्दकन्द इति सिद्ध्यति । यद्यप्यायुर्वेदप्रकाशे रसकामधेनौ च ग्रन्थान्तरवदस्योद्धारो न क्वचिदप्युपलभ्यते । तौ हि सङ्ग्रहग्रन्थावर्वाचीनौ विषयमेकैकमवलंब्य तत्र तत्रान्येषामाचार्याणां ग्रन्थान्तराणां चाशयानुपबृंहणतया एकत्र सङ्गृह्य प्रस्तवीतः । तथाऽपि तत्र तद्ग्रन्थकर्त्रोरानन्दकन्दापरिज्ञानमेव कारणं स्यात् । अतोऽस्य कालो वैक्रमदशमत्रयोदशशताब्द्योर्मध्यपाती भवेदिति विश्वसिमः ॥

अथ ग्रन्थान्तरसंवादमीपत्परामृशामः । आनन्दकन्दे उपनिबद्धा बहवो विषया रसरत्नाकरादिषु बहुषु ग्रन्थेषु क्वचित्तेनैव पदसन्दर्भेण क्वचित्तदर्थकसदृक्षपदसन्दर्भेण च निरूप्यन्ते । आनन्दकन्देन तत्र के दत्ताः के गृहीता इति तु न निर्णेतुं शक्नुमः—केचन च भागा ग्रन्थान्तरेभ्यः स्वीकृत्य पश्चात्प्रक्षिप्ता इत्यप्यभ्यूहितुं शक्नुमः । आनन्दकन्दे निबद्धानां विषयाणां पार्वतीपुत्रनित्यनाथसिद्धविरचितस्य रसरत्नाकरस्य रस-रसायन-वादिखण्डेषु क्वचिच्छब्दतः क्वचिदर्थतश्च कमपि भेदं विनैव निबन्धो दृश्यते । तद्यथा :—

विषयाः ।	आनन्दकन्दे । पृ.	रसरत्नाकरे ।		
चारणयोग्यस्याभ्रकस्याभिषेकः	५३	वादिखण्डे	१२	उपदेशे
अभ्रकजारणे संस्काराः	६०	,,	,,	,,
लोहसंस्कारमन्त्रोपदेशः	१२८	रसखण्डे	९	,,
भूतकालान्तकरसः	१७३	रसायनखण्डे	३	,,
श्रीशैले देहसिद्धिः	१७६	,,	८	,,
ब्रह्मवृक्षादीनां कल्पः	२०४	,,	४	,,
उद्वर्तनकेशरञ्जनकल्पः	२६८	,,	५	,,
हिंगुलात्पारदाकर्षणविधिः	३८६	वादिखण्डे	२	,,
पारदमारणप्रकाराः	३८८	रसायनखण्डे	२	,,
गन्धकपिष्टी	४६८	वादिखण्डे	४	,,
जलौकायोगाः	४७९	रसायनखण्डे	७	,,
गन्धकशोधनं	५२३	रसखण्डे	५	,,
तालकशोधनभस्मविधिः	५२७	,,	७	,,
माक्षिकशोधनभस्मविधिः	५३२	,,	७	,,
अभ्रकभस्मविधिः	५३८	,,	६	,,
स्वर्णशोधनभस्मविधिः	५६२	,,	८	,,
रजतशोधनभस्मविधिः	५६८	,,	,,	,,
ताम्रशोधनभस्मविधिः	५७२	,,	,,	,,
लोहशोधनभस्मविधिः	५८१	,,	९	,,
वङ्गनागशोधनभस्मविधिः	५८७	,,	८	,,
वज्रमारणविधिः	६०९	,,	५	,,
,,		वादिखण्डे	३	,,

रसार्णवस्य एकादशं पटलमारभ्य पञ्चदशं पटलं यावत्प्रायः ७४० श्लोकास्तथैवानुपूर्व्याऽत्रापि पठ्यन्त इति इदं पूर्वमेवोक्तम्। मध्ये मध्येऽस्माद्रसार्णवे केचन बन्धा अधिका इति त्वकिञ्चित्करम्। एवं कान्तग्रहणविधिर्यन्त्रविशेषाः, जीवन्मुक्तिस्वरूपं, रसपूजाविशेषः, वज्रादि-मारणद्रुतिप्रकारादयश्च यथायथमर्थतोऽनूदिता भिन्नैः पदसन्दर्भैः। लोह-

संस्कारविधिस्तदुपयोगी मन्त्रभागश्च चक्रदत्ते नोपलभ्यते। एवं सं-वादनिरीक्षणेनेदमत्र निर्णेतुं शक्यते यदानन्दकन्दो रसरत्नाकरादप्यर्वाचीन इति।

ग्रन्थस्य मौलिकत्वमभिज्ञापयितुं चान्यत्रानुपलभ्यमानाः केचिदंशा आनन्दकन्दे विशिष्य वर्ण्यन्ते। यथाः—

१. आचार्यशिष्ययोर्दीक्षाविधिः।
२. रससन्ध्याविधिः।
३. अमरीकल्पः।
४. आरोटरससेवाक्रमः, तदर्थं क्षेत्रीकरणाय रसायनोपयोगश्च
५. पञ्चदशघुटिकाप्रकाराः।
६. विजयादिदिव्यमूलिकाकल्पाः।
७. उषःपानरसायनकल्पः।
८. वन्दाककल्पः।
९. दिनचर्या ऋतुचर्या च।
१०. योगरसायनम्।
११. कुटीनिर्माणम्।

अत्र चाचार्यदीक्षाविधिः, रससन्ध्याविधिः, अमरीकल्पः, वन्दाक-कल्पश्च द्रविडसंप्रदाये भूयसा परिदृश्यन्ते। दिनचर्या ऋतुचर्या च चरकसुश्रुतादिसंहितानुसारिण्यौ भवतः॥

धन्वन्तरिनिघण्टौ राजनिघण्टौ च तत्र तत्र पठ्यमानो हिमजादि-महौषधिविवरणात्मको भाग आनन्दकन्दे क्रियाकरणविश्रान्तौ दशमा-ध्यायत्वेनैकत्र सङ्कलितस्तेनैव पदसन्दर्भेण; यश्च नोपलभ्यते मैसूर

प्रक्षिप्तत्वेन संभाव्यमानाः केचिदंशाः।

ग्रन्थागारालब्धे निखिलायुर्वेदमहामण्डलपत्रिकाप्रका-शिते चानन्दकन्दे। अतः प्रक्षिप्त एषोऽध्याय इति वक्तुं शक्यते। एवमेव क्रियाकरणविश्रान्तेर्नवमोऽ-ध्यायः, दिव्यौषधिवर्णनपरः तन्माहात्म्यात्प्रक्षिप्त इति भाति, यतस्स पूर्णतः स्वीकृतो रसेन्द्रचूडा-मणितः। एवमेव अमृतीकरणविश्रान्तेरन्तिमावध्यायौ– परिभाषाध्यायः

यन्त्रादिवर्णनाध्यायश्च प्रक्षिप्ताविति शङ्क्यते, यतस्तावध्यायौ सोमदेवस्य रसेन्द्रचूडामणावुपलभ्येते । तस्मादपरिगृहीताविति प्रतिज्ञाय रसरत्नसमुच्चये कीर्त्येते । परं रसरत्नसमुच्चय इव तयोः सोमदेवोपज्ञता न स्मर्यते आनन्दकन्दे । प्रक्षिप्तत्वे चोपबृंहणतया कारणान्तराणि चाधो दीयन्ते ।

१) स्वग्रन्थेऽनुपयुक्तानामपि परिभाषाणां यन्त्रमूषादीनां चोद्देशो लक्षणं च निर्दिश्यते । यथा— ग्रासमानोत्पाटनपिञ्जरीप्रभृतीनां आन्तरालिकतापिकाप्रस्तादियन्त्राणां च ।

२) ग्रन्थे समुल्लिखितानां परिभाषाणां यन्त्राणां च तत्रानुद्देशोऽनिर्वर्णनञ्च । यथाऽनुवासन-वासनामुखचारणाम्लवर्ग-श्वेतपीतकृष्णवर्ग-नियामकयन्त्रमारणायन्त्रादीनाम् ॥

३) निरूपणीयार्थविरोधेनापि क्वचित्परिभाषणं दृश्यते । यथा मूर्च्छनाख्यः संस्कारो " मर्दनादिष्टभैषज्यैः कर्तव्य " इति (पृ. ४९०) परिभाषाध्याये पठ्यते, तद्विरुद्धं च संस्काराध्याये मूर्च्छनार्थं राजिकादीनि पृथगेव द्रव्याण्युपदिष्टानि दृश्यन्ते (पृ. ४६) । परिभाषाध्याये च जारणस्य प्रपञ्चितौ द्वौ समुखनिर्मुखात्मकौ भेदौ । बीजप्रदानेन जारणं समुखमिति, बीजस्यादानेन जारणं निर्मुखमिति तयोः स्वरूपं च व्याख्यातम् । संस्काराध्याये तु जारणस्य समुखनिर्मुखात्मना भेद एव नोल्लिखितः । नाप्येतद्द्वयं जारणावान्तरसंस्कारस्य चारणस्य भेदतयाऽभ्युपगन्तुं शक्नुमः । यतश्चारणे रसमुखकरणाय गन्धकस्यैव दानमनुमतं, न तु बीजभूतयोः स्वर्णरजतयोः ।

४) मैसूरलब्धमातृकायां यन्त्राध्याय एव नोपलभ्यते ।

अतः संभाव्यते केनापि भैषज्ययोगाचार्येण स्वज्ञानवैशिष्ट्यापादनाय कारिकासमुच्चयवद्ग्रन्थान्तरेभ्यः समुच्चितो भागः पुनर्गच्छता कालेन ग्रन्थान्तर्भूततया केनापि संभावित इति ।

इतः परं ग्रन्थान्तरोक्तेभ्यो विषयेभ्य एतद्ग्रन्थप्रतिपादितानां विषयाणां वैशिष्ट्यमस्ति वा ? अस्ति चेत्कीदृशम् ? इतीषद्विमृश्यते । इदमेकमादाववधेयं यद्रसहृदयादिभ्यो ग्रन्थान्तरेभ्यः सङ्कलिता दुरूहा अपि विषयाः केचन विन्यासविशेषेणात्र सुलभावगाह्या भवन्ति ।

ग्रन्थस्य मुख्यं हि प्रतिपाद्यं रसस्वरूपं, तत्संस्काराः, संस्कारप्रयोजनं, तत्फलं देहवेधो, जीवन्मुक्तिस्तत्प्रापणसमर्थो योगादि-

ग्रन्थान्तरेभ्यो-ऽस्य वैशिष्ट्यम्।

श्चेत्येतत्। तत्रादौ रसोत्पत्तिः प्रथमं चिन्तनामर्हति। शिवपार्वत्योः सुरते वह्निमुखेनाधानेन विगते विलक्षाच्छिवाच्च्युतश्च रसो धातुरभिमतः, तस्मा-

रसोत्पत्तिः।

द्गङ्गया च नीतः पञ्चसु कूपेषु स्थापितः, पञ्चधा चा-भजद्वर्णस्वरूपभेदेनेत्ययमितिहासः सर्वत्र रसतन्त्रेषु समान एवोपलभ्यते। द्रविडसंप्रदायप्रवक्तृभिरप्ययमाद्रियत एव। द्रविडदेशे किल शिवगणगुप्तेभ्यो देशेभ्यस्तत्प्रसादेनैव रसः प्राप्य इत्यभ्युदीर्यते। परं, इतिहासोऽयं नव्यैरन्यथा संभाव्यते — यत् रसस्योत्पत्तिर्निसर्गतः प्रकृतिसिद्धा। तस्याश्च रूपणविधयाऽऽख्यायिकाद्वारा प्रकाशनं भारतीयानां निसर्गसिद्धम्। आध्यात्मिका अपि बहवोंऽशा एवमेव कामपि व्यावहारिकीं कथामन्तरा कृत्वा प्रतिपाद्यन्त इति प्रसिद्धम्। तत्रायं वास्तविको रसोत्पत्तिक्रमो भवितुमर्हति। यथा— शैवमतप्रचारकैः क्रमाद्धिमवन्तमतिक्रम्य चीन-तिब्बत-ब्रह्मदेश-ईरानादिदेशानटद्भिः, तत्र तत्र देशान्तरदुर्लभान् दुरवगाहानध्येयान्बहून्विषयानधिगतवद्भिः सिसिलीनित्यत-देशादिषु पारद उपलब्ध उष्णोदकस्रोतसां समीपे। ततस्तदुत्पत्तिस्थलं निरूपयद्भिः ज्वालामुख्याः प्रकोपाद्विदारितायाः भूमेस्तदुत्पत्तिरभ्युपगता। ज्वालामुख्या उत्पत्तेः प्राक् प्रथमं भूकंपः ततो विदारणं, विदीर्णाया भुवो मध्याद्धूमोत्पत्तिस्ततो भूकंपशमनं, धूमाविर्भावानन्तरं गिरेरन्तःस्थद्रुतगन्धकादिद्रव्यैस्साकं वह्नेरुज्जृंभणं, द्रुतानां धातूनां शीतेषु नदीमुखेषु मिलितानां कुत्रचित्खाते संभरणं, इत्यादि वस्तुतत्त्वं क्रमादवगतं तैः। तदनुसृत्य रसोत्पत्तौ शिवपार्वतीसुरतकल्पना कृता तैः इति। वस्तुतः कथायास्तस्या एवं समन्वयो रुचिर एव। सेयं रसस्योत्पत्तिरभिहिता।

रसः स्वाभाविकैरौपाधिकैर्यौगिकैश्च दोषैर्दुष्टो भवतीति दोषापाकरणाय संस्काराः क्रियन्ते। संस्कारैर्दोषापनयने सत्येव शुद्धो रसो योगेषु

रसगता दोषाः।

वेधेषु च योज्यो भवति। अतो दोषस्वरूपविज्ञानं नान्तरीयकम्। पार्थिवादयो नैसर्गिका दोषाः पञ्चदश सप्रपञ्चं निरूपिताः (पृ. ४)। सर्वस्यापि भेषजोपयोगिनो द्रव्य-

जातस्य वैयक्तिकतया गुणदोषपरामर्शे द्रव्यगुणविज्ञानेन अंशांशतो दोषवत्त्वं निसर्गसिद्धं ज्ञायते। ते च दोषा द्विविधाः सहजाः कृत्रिमाश्च। सहजा हि नैसर्गिकाख्यया पृथक्कीर्त्यन्ते। कृत्रिमाश्चौपाधिका यौगिकाश्चेति पृथक्कीर्त्यन्ते। एते नैसर्गिकाः पञ्चदश रसस्था दोषाः कुष्ठादिना फलेनानुमीयन्ते। रसपद्धतौ तु विष-वह्नि-चापल्य-मलाख्याश्चत्वारः, रसहृदये विषवह्निमलचापल्याख्याश्चत्वारः, रससङ्केतकलिकायां रसेन्द्रमङ्गले च विषवह्निचपलतामलगौरवाख्याः पञ्च, रसप्रकाशसुधाकरे मलविषवह्निमदद्‌र्पाख्याः पञ्च, रसमञ्जर्यामायुर्वेदप्रकाशे च वह्निचाञ्चल्यासह्याग्निविषमलाख्याः पञ्च चेति दोषा आम्नायन्ते। वस्तुतः पञ्चदशसु आनन्दकन्दोक्तेषु दोषेषु एषामन्तर्भावः सुकरः। विषदोषस्त्वानन्दकन्दे यौगिकेषु गण्यते इति विशेषः। यौगिका औपाधिकाश्च दोषास्ते भवन्ति, ये गिरिपाषाणजलवङ्गनागताम्रलवणादीनां योगेनोपाधिना जायन्ते। आनन्दकन्दे औपाधिका इति सप्त, यौगिका इति त्रयश्च दोषाः पृथगाम्नायन्तेऽन्यत्र ग्रन्थेषु न तथा, यतो यौगिका इति क्वचिदौपाधिका इति क्वचिच्च ते पठ्यन्ते। एषामुद्देशः स्वरूपं निरुक्तिश्च रसग्रन्थेषु बहुविधं प्रपञ्चयत इति तन्निरूपणे मतिमीषद्वितरामः।

रसस्यौपाधिका दोषाः सप्त कालिका मलिनी कपोती रक्तकञ्चुका सलोमी गिरिजा पिङ्गलेति च कञ्चुकाख्यामौपाधिकाख्यां च भजन्ते।

कञ्चुकाः। कञ्चुकानां भेदविनिर्णयोऽन्यविध उपलभ्यते परिभाषाध्याये (पृ. ४९०-४९१) 'वार्यद्रिभूजकञ्चुकनाशनं' इति 'वङ्गाहिसंपर्कजकञ्चुकघ्न'मिति च कञ्चुकानां वार्यद्रिभूनागवङ्गौपाधिकतां व्यावृण्वन्निव। कञ्चुकाख्या कञ्चुकवत्पटलवत् पारदमावृणोतीति स्वरूपविकृतिज्ञापकतया, औपाधिकाख्या च वार्यद्रिभूनागवङ्गाख्योपाधिज्ञापकतया च प्रवृत्तेत्यध्यवसेयमाभाति। रसपद्धतौ तु—

... ... सप्तात्र दोषा अमी
नागो वङ्गविषौ मलश्चपलता वह्निर्गिरेर्जन्मजाः।
गण्डश्वित्रकमृत्युवान्तिचलतासन्तापजाड्यादयः
चैतेभ्यः क्रमशो भवन्ति विविधा रोगा दुराराधनाः॥

इति सप्तदोषस्वरूपप्रतिपादकं श्लोकं व्याख्यातवता श्रीमहादेवेन रसाचार्येण इयं कल्पना कृता, "नागवङ्गौ यौगिकौ दोषौ। चपलता विषवह्निमलजाश्च नैसर्गिका दोषाः गिरिर्भूमिजाश्चौपाधिका" इति। पश्चात्स दोषं वारिजमप्यौपाधिकं पठति। रसहृदये तु नागवङ्गौ द्वावेव यौगिकौ दोषौ कथितौ। रसेन्द्रमङ्गले रससङ्केतकलिकायां च भूगिरिजलनागवङ्गजास्सप्त कञ्चुकाः कीर्त्यन्ते। रसप्रकाशसुधाकरे तु— मृच्छैलजलशुल्बायोनागवङ्गसमुद्भवाः सप्त कञ्चुकाः पठ्यन्ते। रसेन्द्रचूडामणौ तु त एव सप्तौपाधिका दोषा मृण्मयः पाषाणमयो जलज इति मृदादिसंपर्कं, कापाली कालीति वङ्गौपाधिकं वर्णभेदं, श्यामा कपालिकेति नागौपाधिकं वर्णभेदञ्च निमित्तीकृत्योद्दिश्यन्ते। दोषाणां कञ्चुकाख्यसाधारणनाम्ना व्यपदेशश्च कृतः। श्यामाख्यदोषस्य पञ्चवर्णत्वं कापाल्याख्यस्य सप्तवर्णत्वं च निर्दिश्यते। "पयसो यादृशी सरा विज्ञातव्या कपालिका" इति कपालिकामात्रे च कञ्चुकस्वरूपं निगमितं दृश्यते। तत्रैव सकञ्चुकस्य मलिनस्य रसस्य सेवने दोषाश्च निरूपिताः। रसरत्नसमुच्चये तु नागवङ्गाख्यौ द्वौ यौगिकौ दोषौ, कञ्चुकाख्याश्च सप्त— पर्पटी पाटिनी भेदिनीति त्रयं भूगिरिवारिसंपर्कं, द्रावी मलकारीति द्वयं नागसंपर्कं, अन्धकारी ध्वांक्षीति द्वयं वङ्गसंपर्कं, चोपाधीकृत्याम्नायन्ते। अत्र कञ्चुकानां व्यपदेशो दोषशक्तिं निमित्तीकृत्य प्रवृत्त इति विशेषः। तथा च कञ्चुकदुष्टस्य रसस्य सेवने दोषाः क्रमात्— पर्पटीवच्छोषः, विदारणं, मलभेदः, धातूनां द्रवीकरणं, दोषवर्धनं, अन्धत्वजननं, काकवत्कर्कशस्वरोत्पादनं (कृष्णवर्णता वा) चेति नाम्नैवाम्नातं दोषस्वरूपमित्यभिप्रयन्ति केचन व्याख्यातारस्तत्र। नवीनतमो रसतरङ्गिणीनामको ग्रन्थो दोषगणनायां रसरत्नसमुच्चयं रससङ्केतकलिकाञ्चानुसरति। परं कञ्चुकव्यपदेशमेवं व्याख्याति—

"धातवो रससंश्लिष्टा यदा विष्णुपदामृतम्[1]।
गृह्णन्ति हि तदा तेषां कश्चिद्भागोऽवशीर्यते।
ततश्चूर्णत्वमापन्ना रसमाच्छादयन्ति ते।
तेनावरणसाम्येन धातवः सूतसङ्गताः।

1. Oxygen.

कञ्चुकाख्यां भजन्तीति प्राच्यपाश्चात्यसंमतिः[1]।
केश्चिदेते कञ्चुकाख्या दोषा औपाधिकाः स्मृताः" इति।
औपाधिकशब्दं च तत्रैव विवृण्वानि तद्व्याख्याता हरदत्तः— औपाधिका
णिग्भिरच्छलनार्थं मिश्रितैर्धातुभिः समुत्पन्ना एवैते दोषा इति।

अत्र सामञ्जस्यं समन्वयो वा विदुषां गंभीरां गवेषणां प्रतीक्षते।
आनन्दकन्दोक्तं नैसर्गिकयौगिकौपाधिकत्वाख्यं दोषभेदकमुपाधित्रयमपि
न्थान्तरोक्तैरस्माकं समन्वयितुं दुष्करं प्रतिभाति। एतद्दोषजत्वेन निरू-
पिता विकाराश्च किमु ग्रन्थान्तरोपदिष्टैश्यस्समाना इत्यपि विचारणीय-
मेवैतत्। परमेतावन्मात्रमत्र समन्वयितुं शक्यते यत्– रसस्य नैसर्गिक-
दोषतयाऽभिहितौ पञ्चदशतु अग्निमलश्च प्रधानौ। अत्र यौगिकत्वेना-
भिहितौ विषद्रव्ययोगोत्पन्नो विषदोषश्च ताम्रवङ्गादिवत्पृथग्वस्तुत्वेना-
पृथक्करणीयत्वात्, नैसर्गिकतयाऽन्यत्र कथितः। वङ्गनागताम्रायःपाषा-
णादियोगजन्यदोषस्वरूपमेव कञ्चुकत्वेनोपाधिभेदाद्भिन्नं कीर्त्यते बहुधा।
कालिका मलिनीत्याद्यानन्दकन्दोक्तं नामजातं संपृक्तदोषानुरूपंवर्णभेद-
मभिलक्षयति। पाटिनी भेदिनीत्यादि तु दोषशक्तिमभिव्यञ्जयति।
मृण्मयपाषाणजेत्यादि तु दोषपार्थिवं व्यञ्जयति॥

अयञ्च विषयो भूयो भूयोऽनुसन्धेयस्तत्त्वान्वेषणाय।

संस्काराः॥

संस्कारा द्विविधाः शोधनार्था वेधार्थाश्च। शोधनार्थाः संस्कारा नव आनन्दकन्देऽभिधीयन्ते।

स्वेदनं	उत्थापनं	नियमनं
मर्दनं	पातनं	दीपनं
मूर्च्छनं	निरोधनं	अनुवासनं चेति।

---

1. Impure mercury, when shaken with air yields a black powder caused by the oxidation of the metallic impurities, and the film of the oxide incloses a small globule of the liquid metal.
(Chemistry by H. E. Roscoe and C. Schorlemmer, F. R. S.)

रसरत्नाकरे (वादिखण्डे) रसेन्द्रचूडामणावपीमे नैव निर्दिश्यन्ते। रसहृदये रसपद्धतौ चानुवासनमेकमुज्झित्वा पठिता अष्टौ संस्काराः। रसहृदये च पातनमूर्ध्वपातनाख्यमेकविधमेव। रसार्णवे स्वेदनं मर्दनमिति द्वावेव संस्कारावभिहितौ। पातनं नियामनं चाभिहितमपि न तयोः शोधनाङ्गतया निरूपणमुपलभ्यते। रससारे तु द्वादश संस्काराः कथ्यन्ते–

पट्टसारणं	मर्दनं	वीर्यानयनं
मर्दनं	मूर्च्छनं	दीपनं
धावनं	उत्थापनं	नियमन
स्वेदनं	पातनं	निरोधनमिति।

मर्दनञ्च द्विविधं; पातनमूर्ध्वपातनाख्यमेकविधमेव। वीर्यानयनं च बोधनमित्यपि व्यवह्रियते। नियमनानन्तरं निरोधनमिति तु विशेषः। रसमार्तण्डे सप्तदश संस्काराः कथ्यन्ते—

पट्टसारणं	मूर्च्छनं	वीर्यानयनं
मलापकर्षणं	उत्थापनं	नियामनं
स्वेदः	तिर्यक्पातनं	निरोधनं
शुद्धिः	ऊर्ध्वपातनं	दीपनं
मर्दनं	अधःपातनं	मुखीकरणमिति।
धावनं	शुचिः	

एवं ग्रन्थकाराणां संस्कारोद्देशे मतभेदो भूयान्दृश्यते। आनन्दकन्दस्य प्रकृतत्वात्तद्वर्णितातिरिक्तानां संस्काराणां ग्रन्थान्तरोद्दिष्टानां तद्वर्णितैश्चरितार्थतानिरूपणमात्रमस्माकं कर्तव्यं भवति। तद्यथा— पट्टसारणं मलापकर्षणं च स्वेदनात्प्राक्कर्तव्यत्वेन स्वेदाङ्गे भवतः। पट्टसारणं वस्त्रगालनापरपर्यायं स्थूलद्रव्यसंपर्कपृथक्करणाय क्रियते। मलापकर्षणं च धूमसारादिद्रव्यैस्साकं रसस्य पेषणेन संपाद्यते– नैसर्गिकमलशैथिल्यतापादनाय, यच्चोद्दिष्टमानन्दकन्द एव स्वेदपूर्वाङ्गतया (पृ. ४४-४५) न तु पृथक्तया। धावनशुचिशुद्ध्याख्यास्तु स्वेदनमर्दनाद्यविक्लिष्टानां विशिथिलितानां दोषाणां काञ्जिकोष्णोदकादिना प्रक्षालनमेवेति तेषामपि मलापोहनार्थकतया स्वेदनमर्दनाद्युत्तराङ्गत्वेन निर्देशः कृत एव। (पृ. ४५)

तिर्यगूर्ध्वाधःपातनानि तु पातनभेदाः पातनप्रकारत्वेन निर्दिश्यन्त एवात्र। (पृ. ४६-४८) बोधनापरपर्यायं वीर्यानयनं स्वेदभेदो निरोधनेऽन्तर्भवति। मुखीकरणं च दीपनस्यैवावान्तरभेदश्चारणसंस्कारोपयोगी। इति नवभिरेव तदनिरुक्तानां चरितार्थता संपन्ना। अनुवासनं चातपस्वेदात्मको दीपनभेद एवेति क्वचिन्न पृथग्लक्षितं तत्। यत्तु परिभाषाध्याये स्वेदनं सन्न्यास इति संस्कारद्वयमन्यदेव निरुक्तं, तन्नियमनस्यैव रूपभेदः॥

वस्तुतः संस्काराणाममीषां स्वरूपं त्रिधा परिगणयितुं शक्यते— स्वेदनं मर्दनं पातनं चेति। अन्ये सर्वे भेदा अत्रैवान्तर्भवन्ति। संस्कारव्यापारस्यैकरूपत्वेऽपि कस्यचित्संस्कारस्य पूर्वभावितां पश्चाद्भावितां च, संस्कारोपयोगिद्रव्यभेदश्चोपजीव्य नामभेदः सुवचः। इतीयान्शोधनाङ्गसंस्कारपरामर्शः।

अथ वेधार्थाः संस्काराः। ते च नवधा कथ्यन्त आनन्दकन्दे।

चारणं	बाह्यद्रुतिः	अनुसारणं
जारणं	रञ्जनं	प्रतिसारणं
गर्भद्रुतिः	सारणं	वेध इति।

रसरत्नाकरे चैवमेव। रसार्णवे तु—

चारणं	द्रावणं	सारणं
जारणं	रञ्जनं	क्रामणं इति

वेधस्तु लक्ष्यं फलमिति न संस्कारकोटौ गणना कृता तत्र। रसहृदये रसेन्द्रचिन्तामणौ च दश निर्दिश्यन्ते—

गगनग्रासप्रमाणं	बाह्यद्रुतिः	रञ्जनं
चारणं	जारणं	क्रामणं
गर्भद्रुतिः	सारणं	वेधः
		भक्षणमिति।

रसपद्धतौ तु चारणा जारणा सारणा मुखबन्धो वेधश्चेति पञ्चैव। रससारे जारणं रञ्जनं सारणं चेति चत्वारः संस्काराः। अत्रेदमवधेयं समन्वये। अभ्रकस्य चतुष्षष्टितमांशादारभ्य चतुःषष्टिगुणपर्यन्तं क्रमेण चारणाक्रम एव गगनग्रासप्रमाणमिति व्यपदिश्यते यश्च संस्कारश्चारणस्वरूप

एव। क्रामणं मुखबन्धश्च वेधाङ्गे। भक्षणं तु रसस्य सेवनप्रकारः, न तु पृथक्संस्कारः। मारणं त्वन्यः कोऽपि संस्कारो रसायनोपयोगी क्वचिच्च वेधोपयोगी।

वस्तुतस्तु जारणसारणवेधाख्यास्त्रय एव संस्काराः प्रधानाः। चारणगर्भद्रुतिबाह्यद्रुतिरञ्जनाख्या जारणावान्तरप्रक्रियाभेदाः, अनुसारण-प्रतिसारणे सारणाख्यावृत्त्या संपद्यमाने, क्रामणं वेधप्रक्रियान्तर्गतमिति समासः।

अथैतेषां संस्काराणां पृथग्विवेचना क्रियते। तप्ते खल्वे चूर्णगृह-धूमादीन्पृथग्रसषोडशांशान् दत्वा रसं च शोध्यं तत्र क्षिप्त्वा धान्या-म्लेन दिनत्रयं मर्दयेदुष्णारनालेन प्रक्षालयेच्च, येन **स्वेदनं मर्दनं च।** स्थूला मला अपयान्ति। ततः प्रत्येकं रसषोड-शांशान् पटु-राजी-त्रिकटुकादी-धान्याम्लपिष्टान्वस्त्रे-ऽङ्गुलिमात्रं प्रलिप्य, तन्मध्ये रसं निक्षिप्य दोलामाबध्य धान्याम्ल-पूरिते ताम्रजे पात्रे स्वेदयेत्पूर्णं दिनमेकं; तत उद्धृत्य रसं शरावके निक्षिप्य उष्णारनालेन प्रक्षालयेत्। पुनः पूर्ववत्स्वेदयेत्क्षालयेच्च। एवं एकविंशतिवारकरणेन स्वेदनाख्यः संस्कारः कृतो भवति। अनेन यौगिको विषाख्यो नैसर्गिकाश्चान्ये दोषाः शिथिलतामुपयान्ति। [पृ. ४४-४५]

शिथिलितस्य बहिर्मलस्य प्रणाशाय मर्दनाख्यो द्वितीयः संस्कारः क्रियते। स्थूलमलापोहनायोपदिष्टैश्चूर्णादिभिः साकं त्रिफलाराजवृक्षादीनां प्रत्येकं रसषोडशांशानां योगेन रसस्य तप्तखल्वे मर्दनं; दिवारात्रं, तत उष्णारनालेन क्षालनञ्चेत्येतत्कर्म एकविंशतिवारं करणान्मर्दनाख्यः संस्कारः संपादितो भवति। अयमेव च संस्कारः पश्चात् रसे स्वर्णरजता-भ्रकादीनां जारणात्परं जीर्णग्रासस्य रसमयतासिद्ध्यै रसस्य पुनर्ग्रासग्रहण-पाटवसिद्ध्यै चोपदिश्यते। [पृ. ४५-४६]

मूर्च्छनमपि मर्दनस्वरूपमेव। तथाऽपि मूर्च्छने महोपयोग्यानि राजिकादीनि द्रव्याणि भिन्नानि। मर्दने सामान्येन मर्दनं, मूर्च्छने तु रसो नष्टपिष्टः— नष्टस्वरूप औषधतुल्यो— यथा भवति तथा खल्वे पेषणमिति विशेषः। एवं नष्टपिष्टतामापादितं रसं, मूषायां निक्षिप्य मुखं

निरुध्य, भूधरयन्त्रे निधायोपरि कुक्कुटकपोतान्यतरपुटविधानेन स्वेदात् पुनः रसस्य स्वस्वरूपप्राप्तिः भवति। ततः

मूर्च्छनं उत्थापनं च

पुनः राजिकाद्यौषधिभिरेवं मर्दनं भूधरे पाकश्चैकविंशतिवारं क्रियते येन मूर्च्छनाख्यः संस्कारः संपादितो भवति। भूधरयन्त्रे पाकश्च उत्थापनाख्यः संस्कारो भवति मूर्च्छितस्य नष्टस्वरूपस्य पुनः स्वरूपप्राप्त्युपकारी। उत्थापितं च रसं काञ्जिकेनोष्णोदकेन वा क्षालयेत्। [पृ. ४६]

क्वचिन्मर्दनादिष्टभैषज्यैरपि मूर्च्छनोपदिश्यते [पृ. ४९०]। क्वचिच्च विषवह्निमलादीनां पृथक्पृथग्दोषविनाशाय चित्रक-त्रिफला-कुमार्यादिभिः पृथक् मूर्च्छना अभिधीयते [पृ. ३८५]। रसहृदयादावपि भूयांसः प्रकाराः मूर्च्छनाविधावभिधीयन्ते। अत्र च विशेषः कश्चिद्रससारे दृश्यते यथा—

त्रिपिस्त्रिफलया पूर्वं त्रिविषोपविषैस्तथा।
कर्कोटीक्षीरकन्दाभ्यां चित्रकैर्गृहकन्यया॥

एकैकेनापि संमर्द्य याममेकं तु पारदम्।
किन्नरं यन्त्रमादाय औषध्या लेपयेत्तलम्॥

नवसारयुतं तोयं यन्त्रमध्यगतं न्यसेत्।
दद्याद्रसोपरि श्रावं सन्धिलेपं दृढं मृदा॥

लवणेन च संपूर्य द्वारं संरुध्य यत्नतः।
चुल्लिकोपरि संस्थाप्य दीपाग्निं ज्वालयेद्बुधः॥

यामैकाद्य समुत्तार्य कर्तव्यः शीतलो रसः। इति।

[पञ्चमे पटले]

अद्यसीयकिन्नरयन्त्रस्वरूपं स्पष्टतया न कुत्राप्युपलभ्यते। अतस्तदधिकृत्य भूयो गवेषणा कर्तव्या भवति।

मूर्च्छना त्वन्योपदिश्यते 'मूर्च्छित्वा हरति रुज'मित्यादिना प्रघुष्यमाणा। सा तु रसे विशिष्टगुणस्वरूपाधानार्था न तु शोधनार्था। [पृ. ४०५] यस्याः स्वरूपं पृथक्तयाग्रे विवेचयामः। उत्थापनं अनन्तरमेवाभिधास्य-

मानेन पातनाविधानेनापि संपादयितुं शक्यते, यदा न तस्य पृथक् संस्कार-कोटौ गणना।

स्वेदनाद्याश्चेमे संस्काराः केषुचिद्ग्रन्थेषु त्रिवारं, सर्वाण्यन्यसप्तवारं च करणीया इत्यभिधीयते। तद्विधानं तु भेषजयोगेषु योजनाय रससाधने प्रयुज्यते प्रायः। वेधान्तसंस्काराङ्गत्वेन त्रिर्वा सप्तवारं वा तत्करणं नोद्दिष्ट-फलदं भवेदिति ध्येयम्।

आभ्यां संस्काराभ्यां, रसस्य स्वरूपनाशं यावन्मर्दनेन अणुशः अति-सूक्ष्मतया रसस्वरूपविभेदेन, तद्गतदोषाणां औषधिकल्केषु योगे संपन्ने स्वेदात्तेषां पृथक्करणं संपद्यते। वारिगिरिभूमिजकञ्चुकनाशने फल-मनयोरभिधीयते।

पातनं त्रिविधमभिधीयते ऊर्ध्वाधस्तिर्यक्पातनाख्यप्रकारभेदेन।

पातनम्।

ऊर्ध्वपातनं च— पाठादीनां रसैः पिष्टं पादांशशुद्धताम्ररजोयुक्तं रसमूर्ध्व-पातनयन्त्रे दत्वा दिनमेकं विपचेत। ततः स्वाङ्ग-शीते यन्त्रे ऊर्ध्वलग्नं रसमादाय पुनश्चतुर्थांशताम्र-रजोयोगेन पाठादीनां स्वरसैः पिष्ट्वा ऊर्ध्वपातन-विधानेन विपचेत्। एवं सप्तधा ऊर्ध्वपातनेन मर्दनेन च नागवङ्गाख्य-यौगिकदोषापकरणं क्रियते। यतः नागवङ्गाद्या लोहा रसे मिश्रिताः, ताम्र-संपर्केण रसात्पृथक्कृताः, अधः पातनायन्त्रे तिष्ठन्ति, रसश्चाग्नितापमसह-मानः ऊर्ध्वमुत्पतति शीते चौर्ध्वतले लगते इति यौगिकदोषपृथक्करणं सम्यग्जायते। [पृ. ४७)। क्वचिदर्धांशताम्ररजोयोगेनोर्ध्वपातनमुपदिश्यते, क्वचिच्चायोरजोयोगेनेति विशेषः। क्वचिच्च विद्याधरे डमरुयन्त्रे चक्र-यन्त्रे दीपिकायन्त्रे वा पातनमुपदिश्यते।

अधःपातनं च त्र्यूषणादीन् पृथक् सूतसमांशान् तप्ते खल्वे पिष्ट्वा रसञ्च दत्वा मर्दयेत्। तं कल्कमधःपातनयन्त्रस्योर्ध्वतले प्रलिप्य ऊर्ध्व-भाण्डोपरि लघुपुटं दद्यात्, यत उत्थितं तापमसहमानो रसः शीतस्थला-न्वेषी यन्त्राधो लगति। सप्तवारं चैवं पातनं कुर्यात्।

तिर्यक्पातनं च समधान्याभ्रयोगेन नष्टपिष्टतां यावत् धान्याम्लेन मर्दितस्य रसस्य तिर्यक्पातनयन्त्रगतस्य चण्डाग्निना पाकः क्रियते। पाति-

तच्च रसस्य पुनरेवं अभ्रकमेलनेन पातनं त्रिवारं क्रियते। अनेन रसस्याग्निसहता संपद्यते। (पृ. ४६-४८)। एवं पातनेषु ताम्राभ्रकस्थाने शुद्धानां माक्षिकविमलस्वर्णरजतकान्ततीक्ष्णानामन्यतमस्य पादांशेन योगात्पातनं संयुक्ततत्तद्द्रव्यविशेषगुणाधायकत्वेन विशेषतया कीर्त्यते आनन्दकन्दे। रसहृदये रससारे च पातनमेकविधमेव पठ्यते ऊर्ध्वपातनाख्यम्। क्वचिच्च ऊर्ध्वपातनं त्रिवारं अधःपातनं सप्तवारं च करणीयमिति विशेषो दृश्यते। भेषजयोगोपयुक्ता अन्ये च पातनाप्रकारा बहव आनन्दकन्दे (पृ. ३८५) पठ्यन्तेऽन्यत्र च ‥जयोगग्रन्थेषु।

निरोधनम्। स्वेदनान्मर्दनात्पातनाच्च कदर्थितस्य नष्टवीर्यस्य अत एव षण्डस्य रसस्य वीर्यानयनाय निरोधनं क्रियते। तच्च घटयन्त्रे आप्यायनाख्ये सलवणजलमध्ये रसं निक्षिप्य घटमुखं निरुध्योर्ध्वं लघुपुटनेन स्वेदात्संपाद्यते। तच्च सप्तवारं करणीयम्। सृष्ट्यंबुजाख्यवस्तुद्वययोगेन रोधनं रसहृदयेऽभिधीयते। तत्र सृष्टिर्नाम गोऽजाविमूत्रं नरशुक्रं नारीशोणितञ्चेति त्रयं वा स्त्रीपुंसोः शुक्रयुगलमप्रसूतारजस्तथा वेति मतद्वैविध्यं वर्तते। स्त्रीशुक्रस्य पृथगनुपलभ्यस्य संपादनं तु चिन्त्यमेव। अत एव सृष्ट्यंबुजशब्दस्य लवणार्थकत्वं चूडामणिरभिदधाति। रसपद्धतौ तु काचकूप्यां नारिकेलान्तर्वा सलवणजलं रसं निरुध्य भूमौ त्रिदिनं रोधनमेव निरोधनाख्ययाऽभिधीयते। सौषधस्य भाण्डस्य भूमौ निखनितस्योपरि स्वेदः स्वेदनाख्यया, मन्दाग्नियुतचुल्यन्तःक्षेपेण स्वेदः सन्यासाख्यया च निरोधनस्यान्यौ प्रकाराविमावभिधीयेते परिभाषाध्याये। रससारे चास्य वीर्यानयनं बोधनमिति च सार्थकं नाम दीयते। तत्र च काचकूप्यां सटङ्कणस्य रसस्य निरोधः, भूगर्भे निधानमूर्ध्वं करीषाग्निना पाकः इति विधानं पठ्यते; यच्च रसहृदयव्याख्याता चतुर्भुजमिश्रो नियमनाख्यया वदति। वस्तुतश्चतुर्भुजमिश्रोक्तिश्चिन्त्यैवात्र। नियमनं च निरोधभेद एव।

नियमनम्। स्वेदनद्रवस्य स्वेदने सहोपयोज्यस्य ओषधिकल्कस्य च भिन्नता विशेषः। नियामकं यन्त्रं न यन्त्राध्याये विवियते। परं परिभाषाध्याये 'क्रियते यो घटे स्वेदः प्रोक्तं नियमनं हि तत्' इति निर्देशेन घटयन्त्रमेव नियामकयन्त्र

तयाऽभिप्रेतं स्यादिति भाति। रसपद्धतावन्यत्र च घटयन्त्रे स्वेदनमेव नियमनं इति निर्दिश्यते। यथा—

"यद्वा मृण्मयभाजनान्तरगतं पूर्वोक्तवारा रसं
रुद्ध्वा भूवलये तुषानलपुटैरूर्ध्वं नियच्छेद्रसम्।
भूगे पूरितपूर्ववारिणि रसं निक्षिप्य वस्त्रावृतं
भाण्डे योजितलोहखर्परमुखे चोर्ध्वं पुटे रोधयेत्॥" इति।

रससारे तु नियमनमन्यविधमुपदिश्यते। यथा—

रक्तसैन्धवखोटेन (व्योषैश्च) मूषाद्वन्द्वं प्रकल्पयेत्।
तत्संपुटे रसं क्षिप्त्वा नवसारं सनिंबुकम्॥

संपुटस्य प्रयत्नेन लेपयेत्सन्धिमुत्तमाम्।
वस्त्रमृत्स्नां समादाय वेष्टयेत्तत्प्रयत्नतः॥

छायाशुष्कं च तत्कृत्वा भूगर्ते स्थापयेत्ततः।
अष्टाङ्गुलप्रमाणेन मूषोर्ध्वे तत्र पूरणम्॥

त्रिसप्तदिनपर्यन्तं करीषाग्निं च कारयेत्।
दिने दिने प्रकर्तव्या मूषा सैन्धवनूतना॥

स्वेदयेत्तत्प्रयत्नेन भूगर्भे स्थापयेत्ततः।
अथवा कूपिकामध्ये सूतं सैन्धवसंयुतम्॥

भूगर्भे च ततः स्थाप्यमेकविंशद्दिनावधि।
अयं नियामको नाम्ना महासुखकरो रसे॥ इति।

अत्रापि प्रकारममुं निरोधकाख्यया व्यवहरति चतुर्भुजमिश्रो रसहृदयव्याख्याता इमानेव श्लोकान्पठित्वाऽन्तिममर्धे "अयं निरोधको नाम्ना" इति भिन्नेन पाठेनोदाहरन्। चिन्त्य एव पाठभेदः। रसार्णवे तु रसे स्वर्णं दत्वा मर्दयित्वा नियामकगणेन पिष्ट्वा स्वेदनमुपदिश्यते।

पातनेन रोधनेन च रसे सञ्जायमानं तारल्यं, स्वाभाविकीं वह्न्यसहतां धूमगतिं कणिकाबुद्बुदाभतां चायमपाकरोति संस्कारः।

दीपनमनुवासनं च संस्कारद्वयं जारणकर्मणि बहूपकुरुतः। रसस्य जारणीयग्रासग्रहणपाटवं, तज्जरणाय दीपनञ्चाभ्यां संपद्यते। एवं संस्कृतो रसो दीपितो ग्रासं प्रतीक्षते। स्वर्णपुष्प्यादिद्रव्य-

दीपनम् ।

कल्केनाम्लगणपिष्टेन साकं मर्दितस्य पारदस्य दोलायन्त्रे स्वर्णपुष्प्यादिद्रवे स्वेदो रसदीपनाय प्रभवति। क्वचिच्च दीपनद्रवे स्वेदमात्रं, क्वचिच्च दीपनद्रवैर्मर्दनमात्रमिति संस्कारव्यापारेषु विशेषोऽभिधीयते। चारणसंस्कारमध्योपदिष्टो मुखीकरणसंस्कारश्च दीपनभेद एव। दीपितस्य रसस्य मृत्पात्रस्थस्य

अनुवासनम् ।

सजंबीररसस्य सप्तदिनानि यावद्धर्मे भावनाऽनुवासना भवति। अयं च दीपन एवान्तर्भवति। क्वचिच्च दीपनाख्ययाऽस्यैव व्यवहारः। अत एव रसहृदये रसपद्धतौ चास्य पृथग्गणना न क्रियते। प्रतिदिनं भावनाद्रवस्य नूतनस्य दानमावश्यकम्।

इत्येते नव संस्काराः शोधनार्थाः कीर्त्यन्ते। अथ चैतान्नव संस्कारान्कर्तुमशक्तः स्वेदनमर्दनपातनाख्यैस्त्रिभिः संस्कारैः, अथवा मर्दनपातनाभ्यामेव रसं रसायनयोगेषूपयोगार्हतया शोधयितुं शक्नोति इति प्रकाशयितुमेव. पश्चात् रसायनार्हरससंस्कारविधानकाले (पृ. १३८) विशिष्टरससंस्कारोपदेशकाले (पृ. ३८५) च रसशोधनाय बहवः प्रकारा उपदिश्यन्ते।

अत्र केचिदेवं संशेरते। उक्ते संस्कारनवके ग्रासग्रहणपाटवसाधकं दीपनमनुवासनं च विनाऽन्ये सप्त रसगतनैसर्गिकौपाधिकयौगिकादिबहुविधदोषापसारणाय क्रियन्ते। तेषां करणे

वेधान्तसंस्कारसिद्धौ स्वेदादिसंस्कारनवकस्य नान्तरीयकतविमर्शः ।

यद्यशक्तिस्तर्हि संस्कारत्रिकेणापि इष्टापूर्तिरभिमतेति प्रागनुमतञ्च। एवमेव क्वचिद्धिङ्गुलाकृष्टं रसं संस्कारनवकसंस्कृतादप्युत्तमतयाऽभिप्रयन्ति केचित्। यथा चानन्दकन्द एव हिंगुलाद्रसाकर्षणविधौ (पृ. ३८६) लघुनैव प्रकारेण रसस्य दोषकञ्चुकवर्जनं उपदिश्यते। रसेन्द्रसारसङ्ग्रहे च—

"अथ वा हिंगुलात्सूतं ग्राहयेत्तन्निगद्यते।"

"कञ्चुकैर्नागवङ्गाद्यैर्निर्मुक्तो रसकर्मणि ॥
विना कर्माष्टकेनैव सूतोऽयं सर्वकर्मकृत् ।"

इति कर्माष्टकेन समकक्षतामारोपितं हिङ्गुलाद्रसाकर्षणविधानम् । परं हिङ्गुलादाकृष्टस्य शुद्धौ योगवाहित्वे च मतभेदोऽपि दरीदृश्यते । यदि हिंगुलं कृत्रिमं अशुद्धरसगन्धकयोगमूर्च्छनात्संपाद्यते, तर्हि रसगन्धकगतदोषाणामपसारणमशक्यसंपादनमिति, कृत्रिमहिंगुलाकृष्टस्य दोषकञ्चुकवर्जितता न निश्चिता इति केचनाभिप्रयन्ति । ते हि तदुत्थस्य रसस्य पुनः शोधनमभिमन्वते । खनिजहिङ्गुलादुत्थितस्यैव रसस्य सर्वकर्मक्षमत्वं शुद्धत्वं चोपदिश्यते न तु कृतकहिंगुलादिति च केचिदत्र समादधते । अन्ये तु रसगतान्सर्वान्दोषानपनेतुं गौरीतेजो गन्धक एक एव शक्नोति इति तत्संयोगेन मूर्च्छितात्खनिजात्कृत्रिमाद्वा हिंगुलादाकृष्टो रसः सर्वथा शुद्ध एवेति विवदन्ति । अपरे तु प्राज्ञमानिनः, उपलभ्यमानमशुद्धमेव रसं शुद्धेन गन्धकेन मूर्च्छित्वा रससिन्दूरविधानेन सिन्दूरितं हिंगुलं संपाद्य पुनस्तस्मात्पातयन्ति रसं अधिकशुद्धिसंपादनसंभावनया । अपरे च नव्यैर्वैज्ञानिकरीत्या त्रिधा सप्तधा वा तिर्यक्पातनेन शोधितं, तैः केवलं रसपरमाणुमात्रघटिततयोद्घुष्यमाणं पारदं दोषकञ्चुकवर्जितं स्वीकुर्वन्ति, गुणाधानाय योगानुसारेण दीपनमनुवासनं वा समाचरन्ति । क्वचिच्च भेषजयोगग्रन्थेषु रसपुष्पात्तथा रसकर्पूराच्च हिंगुलाकृष्टविधानेनोद्भ्रियमाणो रसोऽनल्पवीर्यतया तीक्ष्णतया च क्वचनोत्तमभेषजयोगेषु ग्राह्यतयोपदिश्यते ।

अत्र चिन्त्यमेतत् । एवं बहुभिः प्रकारैः साध्यमानो रसः किमु एकगुण एव ? किमु तत्र दोषशुद्धिरेकप्रकारिका ? किमु ते सर्वे रसाः समानाः वीर्ये दोषराहित्ये वेधरसायनबन्धाद्युपयोगित्वे च ? अल्पसंख्याकै रससंस्कारैः सिद्धे रसे सर्वफलदे सर्वकर्मकरणयोग्ये च कुतो वा बहुसाधनसंपदेकसाध्ये बहुतरश्रमदे संस्कारनवकेऽभिमानः ? इति ।

अत्र ब्रूमः । विषयमिमं द्वेधा विभजामः । रसशोधनं रससंस्कार इति च । उभावपि भिन्नप्रस्थानौ । रसशोधनं तु अन्यलोहोपरसादिवद्रसस्य तद्गतदोषापनुत्त्यर्थं क्रियते । तदधिकृत्य भूयानुपदेशग्रामो नव्य-

ग्रन्थेपु कश्चिच्च प्राचीनेपु ग्रन्थेपूपलभ्यते । सुलभास्सुकराश्च मार्गा उपदिश्यन्ते । रससंस्कारस्तु प्रस्थानमन्यदेव । संस्कारशब्दश्च तत्रैवोपयुज्यते यत्र न केवलं बाह्या शुद्धिरिष्यते, परमन्तरात्मनि गुणाधानमपि चौलोपनयनादिवत् । अत्र न केवलया बाह्यशुद्ध्या अभीप्सितोऽर्थः सेत्स्यति । अतः संस्काराणां बहुविधानां आचार्योपदिष्टमार्गेणैवानुष्ठानं फलदं स्यात्, यत्र विचिकित्सा निरर्थिका । सिद्धार्थोपबृंहणतयैव हि तत्र गवेषणा फलं दद्यात् । यत्र योगे शुद्धस्य रसस्य दानमुपदिश्यते, तत्र पूर्वोक्तेन लघुना प्रकारेण शोधितस्य रसस्य दानं न दोषाय । यदि तत्रैव संस्कृतो रसो दीयेत, गुणानल्पता सिद्ध्येत् । यत्र संस्कृतस्यैव दानमिष्यते, तत्र लघुप्रकारशोधितरसदाने न सिमार्धयिषितार्थसिद्धिः । अत एव वेधान्तसंस्कार प्रतिपादकेपु तन्त्रेपु संस्कारनवकमधिकृत्योपदेशः पूर्णो दृश्यते । यत्र केवलं भेपजयोगा उपदिश्यन्ते, तत्र शोधनप्रकाराः कतिचनैवोपदिश्यन्तेऽल्पश्रमसाध्याः । इति समाधिः । वस्तुतः स्वेदादीनाममीषां नवानां संस्काराणामुत्तमगुणाधायकता युक्तियुक्तेति तत्त्वविदोऽभ्युपगच्छेयुरेव ।

हिङ्गुलोद्धृतस्यापि रसस्य यदि वेधान्तकर्मण्युपयोग इष्यते तर्हि स्वेदाद्या नव संस्काराः करणीया एवेत्यत्र न सन्देहः । केवलपातनेन तादृशस्य गुणाधानस्यासंभाव्यमानत्वात् । कृते संस्कारनवके स रसो न केवलं वेधे, योगेपु चाचिन्त्यप्रभावो विलसेदेव । नव्यैर्वैज्ञानिकैः पातनेन सर्वशुद्धतयाऽभिमते पारदेऽपि कामं रसतन्त्रख्याता नागवङ्गौपाधिका दोषाः नश्यन्तु नाम; नैसर्गिकास्तु नैवापेयुरिति तस्य स्वेदाद्याः शुद्धिप्रकाराः करणीया एव । हिंगुलोत्थिते रसेऽपि समानोऽयं न्यायः । अन्यच्च, रसकर्पूरात्, रसपुष्पात्, हिंगुलाद्वा संपन्नो रसो नैकगुणो भवितुमर्हति । गन्धकलवणादिविविधमूर्च्छनोपयोगिद्रव्यसंपर्कवशादाहितानां गुणभेदानामनिवार्यत्वात् । कदाचिन्नव्यवैज्ञानिकरीत्या विविधविभिन्नखनिजेभ्यो युक्त्या पातितो रसो रसाणुमात्रघटित इति न तद्रीत्या भूयान्विभेदो द्रव्ये संभाव्येत । परं संपर्कवशादाधीयमानो गुणभेदो रसगतो नापलपितुं शक्यते । योगानुसारेण तेषामुपयोगनिर्देशो, न तु सर्वत्र सर्वस्य । अत एव रसतन्त्रेपु मुख्यतया रसग्रहणाय, केवलरसखनिं दर्दुराख्यं रससिन्दूरं हिंगुलं वा श्रेष्ठं उपदिशन्ति । अथवा यदि रसमूलखनिपरिज्ञानमसंभवि, तर्हि

संस्काराष्टककरणं विना वेधोपयोगिता, स्वेदनपातनमर्दनाख्यान्विना योगोपयोगितया रसशुद्धिर्वा न संभवेदित्यध्यवसेयम् ।

अथानुवासनान्तसंस्कारसंसिद्धे रसेऽभ्रकाद्या धातूपधातुरत्नादयः चार्यन्ते जार्यन्ते च ग्रासात्मकतया । तेषां ग्रासात्मकानामभ्रकादीनां ग्रहणाय रसे मुखमुत्पाद्यते । तत्र मुखीकरणं दीपनभेदः

चारणं जारणं च ।

संस्कारः, गन्धकस्येष्टिकायन्त्रे रसे जारणेन, रसेन साकं भूनागस्य पुटनेन, दीपनतया दोलास्वेदेन, गन्धकाभ्रकयोरिष्टिकायन्त्रेण जारणेन वा संपाद्यते । एवं मुखीकृते रसे चारणं समुखचारणमित्यभिधीयते । गन्धकस्य तुलायन्त्रे जारणेन रसे वासनामुखता संपद्यते, यस्मिंश्चारणं वासनामुखचारणमित्यभिधीयते विशेषेण । विनाऽपि मुखीकरणं वज्रवैक्रान्तभस्मसहितस्य रसस्य दिव्यौषधीभिः पेषणेन ग्रासग्रहणपाटवं संपाद्यते । एवं निर्मुखे चारणं निर्मुखचारणमित्यभिधीयते । एवं समुखनिर्मुखवासनामुखात्मना चारणोऽयं त्रिधाऽभिधीयते । [पृ. ५०. ५३] रसे गन्धकस्य तुलायन्त्रे जारणेन जायमाना वासनामुखताऽपि समुखताया अभिन्ना इति प्रायोऽन्येषु ग्रन्थेषु नास्याः पृथगुपदेशः । एवं रसे मुखीकरणाय च बहवः प्रकारभेदा उपदिष्टा अन्यत्रोपलभ्यन्ते ।

रसे अभ्रकं, गन्धकः, कान्तसत्त्वं, तीक्ष्णं, द्वन्द्वानि, बीजानि, पक्वबीजानि, रञ्जकबीजानि, सारणबीजानि— इत्येतानि जार्यन्ते रसस्य बलाधानाय रागग्रहणाय वेधपाटवसिद्ध्यै च । एतेषु कस्यचिद्बलाधाने, कस्यचित्स्थिररागग्रहणे, कस्यचिद्वेध इत्येवं विशिष्य प्रतिद्रव्यं शक्तिं निर्दिशन्त्याचार्याः । तेषां चारणे जारणे च क्रम एषोऽनुसन्धीयते । तत्र प्रथममभ्रकचारणा निर्दिश्यते ।

चारणीयोऽभ्रको प्रथममभिषेकाख्येन संस्कारेण संस्कार्यः । [पृ. ५३] संशुद्धे द्रुते च गन्धके शुद्धमभ्रकं समांशं दत्वा विमर्द्य पिष्टीकुर्यात् दशनिष्कके चारणीये रसे द्विनिष्कमितां गन्धकाभ्रकपिष्टिं दत्वा मर्दयित्वा, तदुपरि हेमकर्मणि लक्ष्ये नागपिष्ट्या, रजतकर्मणि वङ्गपिष्ट्या, देहसिद्धौ ताम्रपिष्ट्या च वेष्टयेत् । तां पिष्टिं त्रिद्रुते गन्धे दिवसत्रयं विपचेत्

चारणक्रमः ।

एष तु गर्भक्रमनामकः प्रकारः। दीपिकायन्त्रेण पुनरधः पातितं पिष्टीगतं रसं, पूर्ववद्गन्धाभ्रकपिष्ट्या सह विमर्द्य विद्रुते गन्धे दिनत्रयं विपचेत्। एष तु पिष्टीक्रमनामकः प्रकारः। ततो दीपिकायन्त्रे पुनरधः पातितं रसं, चारणीयमभिपिक्तं रसाच्चतुष्षष्टितमांशं अभ्रकं च दिनं दिव्यौषधैर्विमर्द्य चारणायन्त्रे चपककल्कं जंबीररसान्विते निधाय दिनमेकमातपे तीव्रे स्थापयेत्। अयं च ग्रासक्रमः। एवं गर्भपिष्टीग्रासक्रमात्मकावस्थात्रय-निवर्त्यं चारणम्।

एवं चारिताभ्रकं सूतं त्रिक्षारपञ्चलवणभूखगाम्लवेतसैः रसषोडशांशैः सह जंबीरवारिणा याममात्रं विमर्द्य विडान्विते कच्छपयन्त्रे निक्षिप्य दिनमेकं विपचेत्। तेन रसो जीर्णग्रासो भवति।

जारणम्।

जीर्णाद्ग्रासाच्छिष्टं मलभूतं किट्टमपाकर्तुं, इष्टिकागृहधूम सैन्धवान् रसषोडशांशान् दत्वाऽम्लवर्गेण मर्दयित्वा प्रक्षाल्य वस्त्रेण शोषयेत्। एवं जीर्णे ग्रासे पुनर्ग्रासग्रहणाय पिण्डीभूतं तं रसं वस्त्रे पोट्टलीकृत्याम्लवर्गेण भरिते भाण्डे दोलायन्त्रे स्वेदयेत्। यदि वस्त्रेण गालितेऽजीर्णो ग्रासो दृश्यते, पुनः कच्छपयन्त्रे रसस्य पाक इष्यते। एवं चारितस्याभ्रकस्य जारणं संपद्यते।

एवं चतुष्षष्टितमांशेऽभ्रके जीर्णे, पुनर्द्वात्रिंशतांशेनाभ्रकग्रासश्चार्यते जार्यते च। एवं पुनः षोडशांशेनाष्टमांशेन चतुर्थांशेनार्धांशेन च ग्रासस्य चारणा जारणा निर्वर्त्यते। ततश्च क्रमेण रसात्

अभ्रकग्रास-प्रमाणम्।

द्विगुण चतुर्गुणाष्टगुण षोडशगुण द्वात्रिंशद्गुण चतु-ष्षष्टिगुणाभ्रकस्य चारणा जारणा च निर्वर्त्यते। चतु-ष्षष्टितमांशेऽभ्रके जीर्णे रसो दण्डधरो भवति, वस्त्रान्न क्षरति च। द्वात्रिंशांशे तु जलौकाभः, षोडशांशे काकविष्ठातुल्यः, अष्टमांशे दधितुल्यः, चतुर्थांशे नवनीतसमः, द्वितीयांशे गोलाभश्च भवति। जीर्णस्याभ्रकस्य सितपीतासितादिवर्णभेदे रसेऽपि तद्वर्णसङ्क्रान्तिर्भवति।

एवं गन्धकस्याभ्रकस्य चारणेन जारणेन च रसस्य उत्पतनशीलता अग्नितापासहिष्णुता गौरवं चापाक्रियते। रसो रागग्राही लघुर्निर्दुष्टश्च जायते। जारणीयेषु अभ्रकादभ्रकसत्वं वरीयः तदभावे कान्तसत्वं तीक्ष्णं

वा जारणीयम्। तदपेक्षया द्वन्द्वानि ततः पक्वबीजानि बीजानि च। जारणाक्रमस्तु पूर्वोक्त एव।

एवं जीर्णे ग्रासे प्रतिग्रासं शिलारुचकमाक्षिकादिना सह चणकाम्लेन मर्दितं रसं अपामार्गादिकल्केन लिप्तायां मूषायां निक्षिप्य कृत्वा स्वेदयेत्, येन गर्भस्थो ग्रासो द्रुतो विलीनो रसगतो भवति। य एष गर्भद्रुतिनामकसंस्कारः। (पृ. ८६) अथवा जारणीयानां बीजानां — यथा गर्भद्रुतिः सुकरा भवेत्तथा जारणापूर्वमेव संस्कारः कर्तुं शक्यते।

गर्भद्रुतिः वाह्यद्रुतिश्च।

[पृ. ८३-८४] अथवा जारणीयानभ्रकस्वर्णरत्नादीन्बहिरेव द्रवीकृत्य द्रुतानामेव तेषां जारणा कर्तुं शक्यते। पृथग्वा द्रुतीनां मेलनेन द्वन्द्वीकृत्य वा। [पृ. ८७-८८]।

एवं चारणं जारणं गर्भद्रुतिः वाह्यद्रुतिश्चेति चत्वारः संस्काराः व्याख्याताः।

विशेषश्चात्र। जारणा द्विविधाऽभिधीयते बालजारणा वृद्धजारणा चेति। वृद्धजारणा च बद्धजारणेत्यप्यभिधीयते यतो बद्धस्यैव रसस्य जारणा तत्र प्रकीर्त्यते। बालजारणा चाबद्धस्यैव रसस्य क्रियते। जारणे च द्वेधा क्रमोऽनुसन्धीयते।

"गगनं जारयेत्पूर्वं सर्वसत्वान्यतः परम्।
द्वन्द्वानि सर्वलोहानि पक्वबीजानि भैरवि !।
पद्मरागादि रत्नानि जारयेच्च यथाक्रमम्॥" [पृ. ९०]

इति कश्चन क्रमोऽनुसन्धीयते। पश्चाच्च

"गन्धकं जारयेदादौ सर्वसत्वान्यतः परम्।
ततः सर्वाणि लोहानि द्वन्द्वानि विविधानि च।
पक्वबीजानि रत्नानि द्रुतिसत्वे च जारयेत्॥" [पृ. १०४]

इति च कश्चन क्रमो विधीयते। पूर्वत्र गगनजारणा प्रथमं क्रियते उत्तरत्र तु गन्धकजारणा प्रथममित्यनयोर्भेदः। अत्र च रसकामधेनुकारो

ऽमुमेव सन्दर्भमुदाहरन्, पूर्वतनस्य क्रमस्य बालजारणापरत्वेन उत्तरतनस्य च वृद्धजारणापरत्वेन च समन्वयमभिलपति। विमर्शयोग्योऽयं विषयः।

जारणाया अन्यत् भेदकमुपाधिद्वयमपि वर्ण्यते— अभ्रकादिबीजानां जारणेन बीजैः रञ्जनेन च साध्या जारणा भूचरीति, रत्नजारणया रञ्जकरत्नबीजजारणेन च साध्या खेचरीति च।

रसेऽभ्रकादीनां ग्रासचारणात्परं चारितमभ्रकादिकं गालनेन न पृथक्कर्तुं शक्यते। परं पातनेन पृथक्करणं शक्यसंपादमेव। जारणे च संपन्ने ग्रस्तं वस्तु पातनेनापि न पृथक्कर्तुं शक्यते। गर्भद्रुत्या द्रुते ग्रासे जीर्णग्रासप्रयुक्तमानाधिक्यमपि न संभवति।

जारणस्य चेदं लक्षणं रसेन्द्रचिन्तामणौ पठ्यते। 'जारणा नाम गालनपातनव्यतिरेकेण घनहेमादिग्रासपूर्वकपूर्वावस्थाप्रतिपन्नत्वं' इति। आयुर्वेदप्रकाशकारेण तदेव लक्षणं व्याकुर्वता च जारणस्वरूपमित्थमभिधीयते— जारणा हि नाम गालनपातनव्यतिरेकेण ग्रस्तघनहेमादिरसस्य पूर्वावस्थाप्रतिपन्नत्वं' इति। अर्थाच्च वस्त्रपावनेन, ऊर्ध्वाधस्तिर्यक्पातनेन वा जीर्णस्याभ्रकादेः पृथक्करणं न शक्यते। न तावताऽपि समीहितार्थलाभः। जीर्णस्य द्रव्यस्य मानमपि नाधिकतयोपलभ्येत। अत एवोच्यते आयुर्वेदप्रकाशे—

"अधिकस्तोलितश्चेत्स्यात्पुनः स्वेद्यः समावधि" रिति।

यथा बहु मिष्टं भुक्तवतो भुक्ते जीर्णे न स्वाभाविकमानवृद्धिरुपलभ्यते। परिभाषाध्याये च—

"ग्रासः पिण्डः परिणामस्तिस्रश्चाख्याः पराः पुनः"

इति प्रतिपादिताश्च त्रयो भेदाः— ग्रासश्चारणं, पिण्डः गर्भद्रुत्या रसमयतापादनं, परीणामः ग्रस्तघनहेमादीनां पृथक्करणानर्हतया रसात्मकतापादनं— इत्यर्थकतया व्याख्येयाः।

जारणा च पुनर्द्विविधा भेषजयोगोपयोगिनी, वेधोपयोगिनी चेति। भेषजयोगोपयोगिनी च मूर्च्छित्वा हरति रुजमित्यादिन्यायानुसारेण केवलरोगहननेच्छया, क्वचिच्च रसायनेच्छया गन्धतालमल्लशिलास्वर्णरजतादीनां

जारणेन संपाद्यते। सा च मूर्च्छनाधिकारे (पृ. ४०५) जारितरसमारण-विधानाधिकारे (पृ. १४१) च प्रपञ्च्यते। वेधोपयोगिनी तु पूर्वमेव प्रपञ्चिता।

चारणीया जारणीयाश्चात्र महारसोपरसादयः शुद्धा एव स्वीकार्याः, अन्यथाऽव्यापकः पतङ्गी रसो रसायने वेधे वा नोपयोगी भवति। अभ्रकादभ्रकसत्वस्य तस्मादभ्रकद्रुतेः, ततो द्वन्द्वस्य बीजानां चोत्तमता स्मर्यते। अभ्रकादीनां चतुष्षष्टितमांशादारभ्य समांशपर्यन्तं चारणं जारणं च वेधपाटवसिद्ध्यै चावश्यकत्वेन कीर्त्यते। ततो यथोक्तं शतसहस्रलक्ष-नियुतकोटिवेधादिसमीहितफलानुसारेण द्विगुणादि चतुष्षष्टिगुणावधि चारणं जारणं चोपदिश्यते। (पृ. १०३)

अभ्रकसत्वस्य च रसेन मेलनार्थं माक्षिकसंयोगोऽतीवोपकारको भवति। अत एव केवलाभ्रकजारणाद्द्वन्द्वजारणाया वरीयस्त्वं प्रख्याप्यते। यतो द्वन्द्वानि अभ्रकस्य हेम-रजत-वङ्ग-नाग-ताम्र-तीक्ष्णाख्यलोह-षट्केन साकं, ताप्य-रसक-सस्यक-शिला-तालकादि- भिर्विषधारिवर्गमेलना द्ध्मानेन संपाद्यते। माक्षिकाद्यरिवर्गमेलनाद्रसे गर्भद्रुतिः सुकरा भवति। (पृ. ६२)।

द्वन्द्वीभूतानां चाभिषेको हेमकर्मणि नागद्रवे, रजतकर्मणि वङ्गद्रवे च विधीयते। देहवेधे च नायं अभिषेको युक्तः, शुद्धे रसे पुनर्नाग-वङ्गजौपाधिकदोषसंपर्कभयात् इति रसहृदयकार आशेते।

अथ बीजानां स्वरूपविवरणं क्रियते। बीजेषु विशिष्य हेमबीजं रजत-बीजं च प्रधाने। अत्र च स्वर्णेन रजतेन वा संयोजितानामन्येषां महारसोपरसादीनां माक्षिकरसकादियोगेन ध्मानात्स्वर्णरजतावशेषं यथा-इतरेषां क्षयापादन संपाद्यते। द्वन्द्वेषु तु केवलं मेलनमात्रम्। अतो द्वन्द्वापेक्षया बीजानामुत्तमता शास्त्रेषु निरूप्यते। एतानि बीजानि हेमबीजं रजतबीजं वङ्गबीजं नागबीजं चेति चतुर्धा कथ्यन्ते। तत्र वङ्गनागबीजे तारकनकबीजयोरन्तर्हित एव। यतो नागे वङ्गे वाऽभ्रकरसकादीनां निर्वहणेन ध्मानान्नागे वङ्गे वाऽवशिष्टे तयोः स्वर्णे रजते वा यथायोगं निर्वहणं स्वर्णरजतावशेषतया क्रियते। पर नागवङ्गसंयोगान्न तयोर्बीजयोः

रसायनोपयोगिता, परं लोहवेधमात्रे उपयोगः इति विशेपदर्शनार्थं नामभेदः । [पृ. ७६]

काष्ठौषध्यो नागे वङ्गेऽथ वङ्गमपि शुल्बे ।
शुल्बं तारे तारं कनके कनकं च लीयते सूते ॥

इति गोविन्दभगवत्पादोपदिष्टरीत्या सर्वेषां धातूपधातूनां हेम्नि निर्वहणेन विलयनं संपाद्यतेऽनेन बीजविधानेन । तादृशं च हेमबीजं रसे जार्यते इति महान्गुणोऽनेन रसस्य संपद्यते ।

रसस्य भ्रम-चिटिचिटि-मण्डूकगति-सकंपाख्याश्चतस्रोऽवस्थाः बीज-जारणान्तेन रससंस्कारेणापयान्ति । रसो निष्कम्पो भवति ।

रसहृदये जारणाक्रमस्त्वित्थं वर्ण्यते । चारितग्रासं रसं लवणक्षाराम्ल-सुरभिमूत्रक्लृप्तलेपे वस्त्रे भूर्जपत्रान्तर्निक्षिप्य दोलां बध्वा सौवीरक्षारजल मूत्राम्लतमद्रवैरापूरिते कुंभे दोलायन्त्रे पचेत्, येन चारितो ग्रासो जीर्यते । तत उद्धृत्योष्णेन काञ्जिकेन प्रक्षाल्य, वस्त्रेण गालयित्वा तद्गतजलांशशोषणायोष्णे लोहपात्रे दत्वा मर्दयेत् । पश्चाच्च चतुर्गुणेन वस्त्रेण पीडयेद्गालयेच्च । यत्राजीर्णो ग्रासो वस्त्रगालनेन पृथग्भूतोऽग्रस्तो लक्ष्येत, तर्हि जीर्णग्रासप्रमाणाज्ञानात्पातनायन्त्रे पातयेत् । येनाजीर्णो ग्रासः पृथक्क्रियेत ।

जारणे ग्रन्थान्तर-संवादः ।

अनेन क्रमेण चतुष्षष्टितम-चत्वारिंशत्तम-त्रिंशत्तम-विंशतितमांशान् यावच्चतुरो ग्रासान् दोलायन्त्रे जारयेत् । ततः षोडशांशप्रभृति अर्धांशपर्यन्तं ग्रासं कच्छपे यन्त्रे जारयेत् । षोडशांशादारभ्य विना गर्भद्रुतिं ग्रास-चारणं न साधयितुं शक्यते । यतः षोडशांशे जीर्णमात्र एव कठिनो रसः छुरिकया विच्छिद्य पृथक्कर्तव्यो भवति । गर्भद्रुत्या द्रुते द्रव्ये वस्त्रगालने-नानवशिष्टे, ग्रासं समरसतां यातमवगच्छेदिति ।

रससारे तु जारणाक्रमोऽन्यविध उपदिश्यते । रसे चतुष्षष्टितमांशं ग्रासं, द्वात्रिंशांशं क्षाराम्लबिडादिकं च दत्वा, टङ्कणहयलालादिद्रावकद्रव्य-सहितं तं रसं यामद्वयं तप्ते खल्वे विमर्दयेत् । येन ग्रासो द्रुतो रसेन

संमिलितो भवेत्। ततः सोमानले यन्त्रे स्वेदयन्त्रे दोलायन्त्रे वा स्वेदनेन ग्रासो जीर्यते।

एवं चतुष्षष्टितमांशतो द्वौ ग्रासौ, चत्वारिंशांशेन चत्वारो ग्रासाः, त्रिंशांशकेन षट्, विंशांशकेनाष्टौ इति चतुर्विधा ग्रासाः स्वेदयन्त्रे जार्यन्ते; षोडशांशेन दश ग्रासाश्चक्रयन्त्रे कच्छपे वा; द्वादशांशेन दश स्थलकच्छपे चक्रयन्त्रे वालुकायन्त्रे कूपीयन्त्रे वा; अष्टमांशेन नव जलकूर्मे स्थलकूर्मे वा; पादांशेन षोडश मूषायन्त्रे पुटनेन च इत्येवं ग्रासमानानुसारेण जारण-प्रकारेषु भेदो निरूप्यते रससारे। अनेन क्रमेणाभ्रकादीनां जारणा याव-न्मानेनापेक्ष्यते तावत्साधयितुं शक्यते।

जारणायामुपयुज्यमानानां धातूपधातुरत्नादीनां जारणवशाद्रसे दृश्य-माना विभिन्ना विशेषा निरूप्यन्ते रससारे। नागजारणाद्रसे स्नेहो जायते, अभ्रकजारणाद्रसस्य बलं पक्षच्छेदश्च, तीक्ष्णजारणेन रागः, ताम्रजारणेन स्नेहबलरागाश्चेति। एवं नागेन जारितः सूतः खोटभावं द्रुतं व्रजति, लोहतां च परित्यजति।

जारितबीजवशाद्वेधे च विशेष एवं लक्ष्यते। यदि कठिनानि बीजानि जार्यन्ते तर्हि नागं वङ्गं च वेधयितुं प्रभवति रसः। मृदुषु बीजेषु जीर्णेषु आरं शुल्बं च विध्यति। रागाधिकेषु बीजेषु जीर्णेषु तारं विध्यति स्वर्णतया परिणमयति च। रसोपरसादयो मौक्तिकवज्रादीनि रत्नानि श्वेतानि यदि जार्यन्ते तर्हि तस्य रसस्य तारकर्मण्युपयोग उपदिश्यते। एवं तत्र तत्र खोटबन्धरञ्जनादिबहुविधसंस्कारविशेषोपकारका जारणभेदा उपदिश्यन्ते।

द्वैधां रञ्जनमुपदिश्यते रक्तरञ्जनं श्वेतरञ्जनं चेति। रक्तरञ्जनं हेम-कर्मणि, श्वेतरञ्जनं रजतकर्मणि चोपयुज्यते। हेमकर्मणि नागबीजं, रजत-कर्मणि वङ्गबीजं च रञ्जनविधानेन रञ्जयित्वा,

रञ्जनम्।

रञ्जितस्य बीजस्य रसे चतुष्षष्टितमांशमारभ्य षड्गुणं यावज्जारणेन रसे राग आधीयते। रसरञ्जक-बीजयोगा नैकेऽभिधीयन्ते।

रससारे तु रंगाकृष्टिविधानं नाम पृथक् रञ्जकवस्तुनिर्माणविधि-रभिधीयते— यच्चात्रैव परिशिष्टे [पृ. ६९६] प्रदीयते। रङ्गाकृष्टिविधानेन

गन्धकविद्रुमादीनां रागमाकृष्य, तेन रागेण शतवारं सहस्रवारं वा यथा-योगं जारणेन रसस्य नियतरागतासिद्धिर्भवतीति प्रपञ्च्यते रससारे। रागस्वरूपविज्ञानं, खनिजेभ्यो वस्तुभ्यः स्थिराणां रागाणां प्राप्तिः, अख-निजेभ्यः खनिजानां रञ्जनसाधनानां रागस्थिरीभावे श्रेष्ठता इत्यादि विषय-जातं हिमवत्पर्यन्तवासिभ्यो बौद्धेभ्योऽवगतं प्रथमत इत्यत्र रससारगतो रङ्गाकृष्टिविधिः प्रमाणीभवति। आधुनिकाश्चैतिहासिका भारते स्थिर-रञ्जनसाधनपरिचये बौद्धानेवाग्रगण्यानभिमन्वते।

अभ्रकादीनां रञ्जितबीजानां जारणेन रसे जायमाना गुणभेदा एवं निरूप्यन्ते। कृष्णाभ्रके जीर्णे कृष्णां छायां प्राप्नोति रसः। एवं सिताभ्रके सितां, पीते पीतां, रक्ते रक्तां चेति जारितवस्त्वनुरूपिणी छाया रसे संपद्यते। ताम्रजारणे तीक्ष्णजारणे च रसरक्तिः स्थिरा भवति· रसश्च रागं शीघ्रं गृह्णाति। अतः तीक्ष्णताम्रयोरेकत्र मिलितयोः पृथग्वा रक्तरञ्जनविधिना रञ्जितयोः जारणं रसे स्थिररागसिद्ध्यै प्रभवति। उपरसेषु च, रञ्जिते गन्धके जीर्णे रागो बहिःप्रदेशमात्रव्यापी भवति; मनःशिलातालकजस्तु रागश्चञ्चलो भवति; माक्षिकसत्वेन रसकसत्वेन वा जायमानो रागः स्थिरत्वाच्छ्रेष्ठतया गण्यते।

एवं जारणेन बन्धं प्राप्ते रसे, देहलोहवेधसिद्ध्यै सर्वत्र प्रसृमरशक्तिः संपादनाय सारणा क्रियते। सारणार्थे साधनतया विशिष्टं वज्रबीजविधानं सारणोपयोगितैलविधानञ्चोपदिश्यते। [पृ. ९२.]

सारणा। गोस्तन्याकारान्धमूषा अन्या च नालमूषेति मूषाद्वयं सारणायन्त्राख्यया व्यवह्रियते। (पृ. ५१५)

गोस्तन्याकारायां मूषायां रसं ससारणातैलं निक्षिप्य, नालमूषायां बीजं द्रावयित्वाऽस्मिन् ढालयेत्। ततश्चोद्धृत्य जारणाविधानेन पुनर्जारयेत् इति सारणायाः क्रमः। अत्र बीजस्य रसाच्चतुष्षष्टितमांशादारभ्य षड्गुणं यावत्प्रक्षेपः क्रमेण विधीयते।

रसहृदये तु विशेष एवमभिधीयते सारणाविधौ। सतैले रसे द्रुतस्या-त्युष्णस्य बीजस्य सद्य एव निवापादुच्छलनं भवेदिति भिया सद्य एव

सारणातैलसिक्तेन पटेन रसस्योपर्याच्छादनं विधीयते। प्रकारान्तरमपि सुकरं तत्रैवोपदिश्यते— यत् धत्तूरकुसुमाकारायां मूषायां मनेनं रसं निक्षिप्य, तस्या मूषाया अन्तरन्यां तादृशीं तन्वीं मूषां सार्धच्छिद्रां सुपिधेयां निक्षिप्य, तस्या मध्ये द्रुतं बीजं ढालयेत्, तैलार्द्रपटेनाच्छादयेच्चेति।

रससारे तु सारणायन्त्रविधानमेवमुपदिश्यते—

"मूषोर्ध्वं संपुटं दत्वा सन्धिलेपं च कारयेत्।
सच्छिद्रे संपुटे नालमुन्मत्तकुसुमप्रभम्॥
अतियत्नेन तां मूषां करीषाग्नौ निधापयेत्।
हेमरक्तसमं नागं गालयित्वा विचक्षणः॥
मूषानाले विनिक्षिप्तं इत्थं सरति सूतकः।
सप्तवारं प्रकर्तव्यं सारणं च महारसे॥" इति।

क्वचिच्च बीजजारणकालेऽरुणसितरञ्जनोपयोगितया नागवङ्गयोरपि दानमुपदिश्यते।

प्रतिसारणं ऽनुसारणं च।

सारणस्यैव द्विवारं करणं प्रतिसारणं इति, त्रिवारं करणं अनुसारणमिति च व्यपदेश आनन्दकन्दे दृश्यते। अन्यत्र रसहृदयादौ द्विगुणबीजजारणेन प्रतिसारणमिति, त्रिगुणबीजजारणेनानुसारणमिति च व्यपदेशो भूयसा दृश्यते। प्रति सारणेऽनुसारणे च कृते कच्छपयन्त्रादौ जारणं कार्यमेव। सारणाकाले सारणायन्त्रस्य ससारणातैलरसस्य बीजप्रक्षेपात्पूर्वं करीषाग्नौ तापः कार्यः सारणायास्सुकरतासिद्धये।

शृङ्खलिकाक्रमः।

शृङ्खलिका नाम कश्चन व्यपदेशः— एकवारं सारणं, सारितबीजस्य जारणमिति सारणजारणाख्यक्रियासमुच्चयस्य निर्देशकः प्रयुज्यते तत्र तत्र। अनेन क्रमेण दशशृङ्खलिकाविधानमिति [पृ. ४४५] सप्तशृङ्खलिकाविधानमिति च प्रयोगा बहवो रसतन्त्रेषु दृश्यन्ते। शृङ्खलिकाया अपरं नाम सङ्कलिकेति। शृङ्खलिकाविधाने कश्चन रुचिरः प्रकारभेदो रसहृदये दृश्यते।

तत्र प्रथमं सारणा ततः प्रतिसारणा ततोऽनुसारणा एवं पुनरनुसारितस्य सारणा प्रतिसारणाऽनुसारणा च, एवं पुनः सारणा प्रतिसारणाऽनुसारणा चेति त्रिः सारणानन्तरम् कल्पनान्तरशृङ्खलिकाविधिः वेधे शतसहस्रायुत-कोट्यादिवेधोपयोगो विधीयते सारणावबोधे। प्रतिसारणाभेदं च जारणा करणीया। शृङ्खलिकाश्च रसस्य वेधे सामर्थ्यमभिवर्धयन्ति।

सारणानन्तरं मुखबन्धः रसस्य खोटबन्धश्च विधीयते। [पृ. ९३] बालजारणायां खोटबन्धः सारणानन्तरं क्रियते, वृद्ध (बद्ध) जारणायां तु जारणातः पूर्वमेवेत्ययं विशेषः। [पृ. ४४२] बद्ध-

बन्धः।

जारणोपयोगिनो बन्धविशेषास्तु अमृतीकरणविश्रान्तौ त्रयोविंशच्चतुर्विंशोल्लासयोः कीर्त्यन्ते। रसस्य खोटत्व-सिद्धौ वेधोपयोगिता भवति॥

वेधश्च द्विविधो लोहवेधो देहवेधश्चेति। तत्र लोहवेधः देहवेधार्थं सिद्धस्य रसस्य स्थिरत्वसौष्ठवं परीक्षितुं प्रवर्तितोऽपि, देहवेधानुपयोगितया लोहवेधमात्रसाधकतया च रसतन्त्रप्रवर्तकैः बहुधा-

वेधः।

ऽङ्गीकृतः। आनन्दकन्दे तु तस्य लोहवेधमात्रोपयोगितयोपदेशोऽत्यल्प एव। उपदिष्टाश्च लोहवेधोपयोगिनो योगाः देहवेधसिद्धिपरीक्षार्थका एव।

प्रतिक्षणं शीर्यते नश्यति इति शरीरमिति पदविदः। शरीरगताः अणुशो विभिन्नास्सर्वे भावा नश्वराः, प्रतिक्षणं नश्यन्ति। आपूर्यते च शरीरं प्रतिक्षणं नवनवतयोत्पद्यमानैर्भावैः। तदेत-

वेधसिद्धिस्वरूपम्

दुज्जीवनं नाम। तदिदं न स्थूलदृशां प्रत्यक्षम्। यदा शारीरभावनाश आपूर्यमाणापेक्षयाऽधिको भवति तदा जरा मरणं चान्ततः; यदा न्यूनो भवति तदा पुष्टिर्यौवनं च भवति। अजरामरणं हि शरीरं सपाद्यं जीवन्मुक्तिमभीप्सता। ततः शारीराणां अणुमात्राणां सर्वेषां भावानां विशरणं यथा न भवति तथा प्रवृत्तिः कार्या मुमुक्षुणा। ततश्च प्रत्यणु विशरणविघटनं कर्तव्यमापतति। न हि क्वचिच्छरीरैकदेशे विशरणविघटने पिण्डस्थैर्यं संपद्येत। प्रत्यणुविशरण-विघटनं च तदैव संभवति, यदा शरीरघटकानामणूनां स्वभावनियतो

विशरणस्वभावो विहन्येत, स्वभाव एव विपरिणम्येत । तादृशाणु-स्वभावविपर्यास एव वेधान्तानां संस्काराणां परमं लक्ष्यम् ।

लोहवेधे च सिद्धिरीदृश्येव । प्रतिलोहं लोहस्वरूपगुणघटकानां लोह-परमाणूनां स्वभावो नियतसिद्धः । अतो लोहस्य लोहान्तरतापत्तिः न संभाव्यते । जघन्यास्ताम्रवङ्गनागादयो लोहाः स्वर्णापेक्षया नश्वरस्वभावाः । अत एव स्वर्णमनर्घं भवति । ताम्रवङ्गादीनां स्वर्णावृत्तमलोहता तदैव संभवेत्, यदैतल्लोहघटकानां परमाणूनां स्वरूपगुणपरिवर्तनं संपद्येत । स्वरूपपरिवर्तनं च क्वचिदेकदेशे संपद्यमानं न फलाय कल्पेत । अतः सेवनकाल एव सर्वं लोहावयवं शरीरावयवं वाऽऽक्रम्य तत्स्वरूपगुणपरिवर्तनं संपाद्यते-ऽनेन वेधाख्येन संस्कारेण ।

लोहवेधे देहवेधे वा वेधिरसस्य प्रत्यवयवं क्रामणाय क्रामणयोगाः उप-दिश्यन्ते । तत्र देहवेधे दिव्यौषधयो गन्धकं वा मुख्यतया क्रामणायोपयुज्यन्ते [पृ. ९४] लोहवेधे तु कर्कटमण्डूकादीनां वसा, भेकमहिष्यादीनां मलं स्त्रीस्तन्यं रक्तं चान्यदन्यदेवं-विधमुपदिश्यते इति विशेषः [पृ. ९५] ।

क्रामणम् ।

देहवेधार्थं शरीरशुद्ध्यर्थं दोषशोधका योगाः [पृ. १०६] शरीरस्य क्लेदीकरणायाभ्रक-कान्तहेमवज्ररससिद्धरसायनोपयोगः [पृ. १३७] पथ्यापथ्यविधानं च [पृ. ११३] उपदिश्यन्ते यथाक्रमम् ।

दिव्यदेहसिद्धौ वेधिरसोपयोगमन्तरा प्रकारान्तराण्यप्युपदिश्यन्ते ; यत्र प्राथम्यमावहति भूतकालान्तकरसोपदेशः । [पृ. १७२.] । यत्स्वरूपं तु न विविच्य वक्तुं शक्यते । सर्वसिद्धिप्रदाश्च घुटिकाः पञ्चदश कान्तहेम-वज्राभ्रकरसानां यथायोगं मेलनेन सिद्धाः उपदिश्यन्ते । [पृ. १६०] श्रीशैले सिद्धिलाभ इत्यधिकारे [पृ. १७६] तीर्थक्षेत्रमाहात्म्यान्सिद्धिलाभ ब्रह्मवृक्षनिर्गुण्ड्यादिदिव्यौषधिरसायनानि च दिव्यदेहसाधकानि बहूनि सिद्धिप्रदैर्मन्त्रैस्साकमाख्यायन्ते । [पृ. २०४]

सत्स्वपि प्रशस्तेषु रसायनेषु, धर्म्यस्य आचारस्य देहसिद्धावतुल प्रभावो दृष्ट आचार्यैः । तदर्थमेव दिनचर्यायाः ऋतुचर्यायाः योगाचार-

रसायनस्य च तावता विस्तरेण प्रतिपादनमुपलभ्यतेऽत्र। उषःपान-रसायनं चात्र विशिष्य दोषशोधकतया रसायनतयोपदिश्यते।

एतावता वेधान्तानां संस्काराणामानन्दकन्दे प्रतिपादितानां ग्रन्थान्तर-संवादसमालोचनपूर्वकं स्वरूपपर्यालोचना कृता। वेधान्ताष्टादशसंस्कारकरणेऽशक्तस्य, अथवा दिव्यदेहत्वपर्यन्तां सिद्धिमप्रतीक्षमाणस्य वा रोगहनन-मात्रोपयोगिनो रसशुद्धि-मारण-बन्ध-मूर्च्छाप्रकाराः कतिचन सविशेष-मभिधीयन्ते त्रयोविंशोल्लासे। अमृतीकरणविश्रान्तावन्ते च द्वावध्यायौ परिभाषा-यन्त्र-मूषा-स्वरूपादिवर्णनपरौ प्रक्षिप्तौ भवत इतीदमुक्तं प्रागेव।

क्रियाकरणविश्रान्तौ च उपरसाः लोहा रत्नान्युपरत्नानि च स्वरूप-शुद्धिमारणसत्वपातनादिप्रक्रियाप्रदर्शनपूर्वकं वर्ण्यन्ते। दिव्यौषधि-महौ-षधिवर्णनपरौ च द्वावध्यायावन्ते प्रक्षिप्तौ। तत्र महारसा उपरसा इति च ग्रन्थान्तरेषु वर्गीकृतानां समेषामत्रोपरसा इत्येव गणना कृता। तत्रापि छगणवालुकाकाचाम्लवेतस-गोरोचन-सर्जगुग्गुलु-लाक्षादीनां अन्यत्र रसोप-रसमहारसवर्गेष्वगणितानां परामर्शोऽत्र विशेषः। लोहेषु अभ्रकसत्वस्य गणना तस्य लोहतापरिचयमन्यत्रादृष्टं प्रख्यापयति। सस्यकविमलयोर्ग्रन्था-न्तरेषूपरसतया प्रख्यातयोरत्र उपरत्नतया गणनं तु तयोः स्वरूपविनिर्णये भूयो विभ्रममावहति।

इत्येतावता आनन्दकन्दे प्रतिपादिताः सर्वेऽप्यंशा ग्रन्थान्तरसंवाद-पूर्वकं सङ्ग्रहेण समालोचिताः।

अथ रसशास्त्रे गवेषणा कथं कर्तव्या इत्यत्र किञ्चित्प्रस्तूयते। अत्र नव्यैरनेके मार्गाः प्रस्तूयन्ते। परं प्राच्यैः रसशास्त्रे विस्तारमाकलयद्भिः कीदृशः पन्थाः आदृत इति समीक्षणं प्राप्तकालम्।

रसशास्त्रे गवेषणा। सर्वरोगनिहन्तृत्वं देहदार्ढ्यप्रदत्वमेवमन्यान्यं च रसोपरसादिगतं प्रभावमाकलयन्तः प्राचीनाः तत्र द्रव्यगत-रस-वीर्य-विपाक-प्रभावानेव नियामकानि कारणानि ददृशुः; रसवीर्यादिभिरेव दोषदूष्यविकाराभिनिर्वृत्तिं चाभ्युपागमन्। अतश्चायु-र्वेदस्य त्रिदोषरस-वीर्य-विपाक-प्रभाव—सिद्धान्तमाधारीकृत्यैव सर्वत्र विस्तारः

समाकलित आचार्यैः । अतो द्रव्यगतरस-वीर्य-विपाक-प्रभावनिर्धारणं तु कथं संपाद्यमित्यत्र प्रथमं गवेषणा कर्तव्या भवति । विना त्रिदोषरसादि-समन्वयं, कृता गवेषणाऽऽयुर्वेददृशा निष्फलैव भवेत् ।

रसशास्त्रविषयकान्वेषणारंभात्पूर्वं, अद्योपलभ्यमानं सर्वं रसशास्त्र-विषयकं साहित्यं एकत्र संपादनीयं भवति । तद्धि द्विधा संपाद्यम् । प्रथमं तत्र तत्रोपलभ्यमाना रसग्रन्थास्तथैव शोधयित्वा मुद्रापयितव्याः । अपरं च तथा संपादितानां ग्रन्थानां एकत्र विषयानुसारं समन्वयस्य ग्रहणाभ्यां प्रसिद्धिः । रसग्रन्थगता विषयास्त्रेधा विभक्तुं शक्यन्ते ।

१) रसोपरसलोहादीनां स्वरूपवर्णनं शोधनमारणादिप्रक्रिया च ।

२) वेधान्तसंस्कार-घुटिका-खेचर्यादिसिद्धिप्रतिपादको भागः ।

३) रसोपरसादिभेषजयोगप्रतिपादको भागः ।

तत्र तृतीयभागगतो विषयः प्रायस्सङ्कलित एव महामहिम्ना श्रीहरि-प्रपन्नशर्मणा स्वकीये रसयोगसागरे । तत्रासङ्कलितानां भेषजयोगानामन्यत्रो-पलभ्यमानानां परिशिष्टतया प्रकाशनं सुकरमेव । आद्यौ द्वौ विभागा-विदानीं विषयानुसारं सङ्कलनामर्हतः प्रथमम् । एष शास्त्रे गवेषणारूपः प्रथमः प्रकारः ।

द्वितीयस्तु कर्मपरिचयरूपः । द्रव्यसङ्ग्रहे, द्रव्यनिर्णये, शोधन-मारणादिविविधसंस्कारेषु शास्त्रोक्तमार्गेण परिचयस्य संपादनं, प्रक्रिया-निर्धारणं चेति गवेषणामार्गोऽयं श्रममधिकमनुभावयेदेव । यथा वा—

१) द्रव्यनिर्णये— शोधनाद्यर्थं आदेयस्य द्रव्यस्य, स्वरूप-निर्णये, कृत्रिमाकृत्रिमता-उत्तमाधमता-सांकर्यादि निर्णये च आयुर्वेदोप देशस्य परीक्षा, तत्प्रयोगपरिचयश्च । तत्र नव्यविज्ञानोपदिष्टानां प्रकाराणां चोपयोगितानुपयोगितानिर्धारणं च ।

२) द्रव्यशोधने— पूर्वोक्तप्रकारेण श्रेष्ठतया निश्चितस्य यौगिक-नैसर्गिकदोषापाकरणाय शास्त्रोक्तविधानेन शोधने क्रियमाणे, तत्रोपयुज्य-मानानां विविधानामोषधीनां, शोधनप्रक्रियाणां वा परस्परं तारतम्यविमर्शः ।

शोधने चलनि, मध्ये मध्ये द्रव्यगतकाठिन्यमार्दवादिस्वरूपे वर्णकाठिन्यादौ चान्तरावेक्षणं, भिन्नभिन्नाभिः प्रक्रियाभिः शोधने जायमानः स्वरूपगुणभेद-विमर्शः शोधनानन्तरं संपिपादयिषितानां मारणादिसंस्काराणां सौष्ठवापादने सौकर्ये श्रेष्ठत्वापादने चात्यन्तमुपयोगिनः शोधनप्रकारस्य विनिर्णयः, तत्र च नव्यपद्धत्या परीक्ष्य स्वरूपगुणभेदपरामर्शः इत्येतावान्विषयविमर्शो-ऽपेक्ष्यते ।

३) मारणविषये— ग्रन्थोक्तैर्भिन्नैः प्रकारैः, भिन्नभिन्नास्व-ग्निमात्रासु भिन्नभिन्नैः पुटविशेषैर्मारितानां, तत्र तत्रोल्लिखिताभिः परी-क्षाभिः, सुमारितामारितत्वादिनिर्धारणं फलदाने विशेषाः, मारणेन मूल-द्रव्ये जायमानपरिणामस्य विमर्शः, तस्य शरीरस्यान्तर्बहिर्वा परिमार्जने जायमानः शारीरो द्रव्यगतश्च परिणामः, नव्यपद्धत्या मारितामारितस्वरूप-परामर्शश्चेत्येते विचार्याः ।

४) सत्त्वपातनद्रुतिविषये— परीक्षितोत्तमखनिजद्रव्यादानेन-भिन्नभिन्नविधानैः सत्वपातने कृते कस्य वा प्रकारस्य अधिकोत्तमसत्व-पातनशक्तिः सुकरता चेति निर्धारणं, पतितस्य सत्वस्य स्वरूपनिश्चयः, द्रुतस्य सर्वदा द्रवतासंपादनं, नव्यपद्धत्या द्रुतस्य सत्वस्य च स्वरूप-विनिश्चयः,

५) दिव्यौषधिविनिर्णये— विनाप्यग्निसंपर्कं रसादिमारणे प्रसिद्धानां दिव्यौषधीनां स्वरूपशक्तिविनिर्णयः,

६) देहवेधधातुवेधविषये— तत्र लघूनामलघूनां बहु प्रका-राणां वेधविधानानां स्वरूपविमर्शः, देहवेधानुपयोगिनां धातुवेधप्रकाराणां विशेषाः, तत्र दिव्यौषधीनां प्रभावपर्यालोचना, वेधेन संपाद्यमानस्य स्वभाव-नियतस्वरूपपरिवर्तनस्य वस्त्वन्तरेऽपि प्रयोगौचितीविनिर्णयः, नव्य-विज्ञानप्रसिद्धस्य अणुविभेदस्य समन्वयविचिन्ता इत्येते विचार्याः ।

इत्येवं कर्मपरिचये गवेषणैव रसशास्त्रस्य गवेषणायां मुख्यं स्थान-मावहेत् । भौतिक-रसायनविज्ञानयोः भारतीयं स्वरूपमाविष्कर्तुमियं गवेषणा बहूपकुर्यात् ।

दक्षिणभारते चास्त्यायुर्वेदस्य कश्चन संप्रदायः अगस्त्य-श्रीमूलनाथ-यूहि-भोग-तेरयर्-कालाङ्गादिभिः सिद्धैराविष्कृतः द्रविडभाषामयेषु ग्रन्थेषु प्रतिपादितः। सर्वे चैते सिद्धाः शैवसामयिकाः। तान्त्रिकसमुदाचारा-विशिष्टतया च तत्संप्रदायस्य क्रिया-चर्या-योग-ज्ञानाभिधचतुर्विधसोपानाधिरूढैरेतैः, साक्षान्नन्दि-भगवन्मुखादवगतः संप्रदाय एष इति जोघुष्यते तैः। त्रिदोष-पञ्चभूत-रस-वीर्य-विपाकादिसिद्धा-न्तान्, लोकोत्पत्तिव्याध्युत्पत्तिर्तान्निवृत्तिविषयेषु सर्वात्मनाऽनुसरन्तस्ते सिद्धाः, द्रविडदेशमात्रसुलभानां बहूनां दिव्यौष-धीनां साहाय्येन वेधान्तस्य रससंस्कारगणस्य करणे लघून्सुलभांश्च प्रकारान्ददृशुः।

रसशास्त्रगवेषणायां द्रविडसंप्रदायस्य मुख्यं स्थानम्

अथ च किञ्चिद्द्रविडसंप्रदायस्य स्वरूपं पर्यालोचयामः। सङ्गृह्णीमश्च तद्गतान्विशेषान्। धातु-मूल-जीवात्मना त्रिधा भिद्यते कृत्स्नो हि लोकः। धातवो हि द्वादशोत्तरद्विशत (२१२) संख्याकाः ये षोढा वर्गीक्रियन्ते, लवणानि पाषाणा उपरसाः लोहाः रसो गन्धकश्चेति। लवणानि नाम ते ये जले विली-यन्ते, अग्नावुत्पतन्ति, स्फुटन्ति धूमायन्ते दह्यन्ते च। पाषाणा नाम ते येऽग्नौ धूमायन्ते, जले न विलीयन्ते। उपरसाश्च न जले विलयनशीला न वाऽग्नौ दह्यन्ते धूमायन्ते उत्पतन्ति वा। लोहाश्च अग्नौ द्रवन्ति स्थिरीभवन्ति च ततः, न जले विलीयन्ते वा। रसश्च मृदावग्नावप्युत्पतनशीलः, अण्वाकारतया विभजनशीलः, सप्तभिः कञ्चुकैरावृतः पौरुषसत्वसमेतश्च। गन्धकस्तु वह्नौ धूमायते, दह्यते, उदुत्पतति च, जले न विलीयते, स्त्रीसत्वसंयुक्तश्च भवति। लवणानि पञ्चविंशतिः, पाषाणाश्चतुष्षष्टिः, उपरसा द्वादशोत्तरशतं, लोहा नव, रस एको, गन्धक एक इत्याहृत्य ते द्वादशोत्तरद्विशतसंख्याका भवन्ति। मूल-वर्गस्तु ओषधिवर्गाभिधः– षोढा विभिन्नो मधुरादिषड्रसाधारतया, पुन-ष्षोढा, वृक्ष-गुल्म-लता-रस-नीरस-सक्षीर भेदेन। ते च त्रिशतोत्तरत्रि-सहस्रसंख्याका उत्पत्तिवैचित्र्येण। जीववर्गस्तु उत्पत्तिवैचित्र्येण चतुरशीति-लक्षसंख्याकस्वरूपभेदयुक्तः योनिभेदेषु चतुर्षु, षड्भिर्बीजविशेषैरुत्पन्नः।

द्रविडसंप्रदाय-समीक्षा।

अमीषां धातूनां प्रत्येकं स्वभावनियतो गुणविशेषः पृथक् जागर्त्येव। सिद्धस्तु तादृशस्वाभाविकगुणस्वरूपपरिवर्तनेन प्रयतते। यथा वा— लवणवर्गो जले विलयनशीलोऽग्नावुत्पतनशीलश्च, यस्य जलेऽविलयोऽग्नौ विद्रुत्य जलाकारता च संपाद्यते। पाषाणाश्चाग्नौ क्षयिष्णवः जलेऽविलयनशीलाश्च, येषामग्निसहता जले विलयनं च संपाद्यते। उपरसाश्च स्वभावतो नाग्नौ क्षीयन्ते न वा जले विलीयन्ते, अतस्तेषां लवणस्वरूपविनिमयः कर्तव्यः। एवं स्वाभाविकस्वस्वरूपविनिमय एव सिद्धैः क्रियते। बद्धस्य धातोः पुनर्मारणं क्षारीकरणं वा क्रियते देहोपयोगसिद्ध्यै॥

धातूनां बन्धे ततो मारणे च ओषधीनामुपयोग उपदिश्यते। तासां चौषधीनां ग्रहनक्षत्रसंपर्कवशादुत्तमगुणाधायकता विशिष्टा दृश्यते। एवं स्वभावसिद्धगुणपरिवर्तनेनाधमानां धातूनामुत्तमता संपद्यते, तथैव शीर्यतः शरीरस्य धारणं च। स्वभावविनिमयेन शरीरे तेषां धातूनां क्रामणं सुकरं भवति। नश्वरस्य कायस्य स्थैर्यं कामयन् सिद्धपुरुषो वेधान्तां सिद्धिं तत्रोपयोगिनीं विज्ञाय, तत्सिद्धिपरीक्षायै धातुवेधे (वादे) प्रावर्तत। स्वर्णकरणं च तेन, विनैव याच्ञां, धनसंपादने श्रमं वा शरीरधारणोपयोग्याहारादिवस्तुसंपादनाय स्वीकृतमेव। ताल-मनःशिला-माक्षिक-स्वर्णरसादीनामन्योन्यबन्धसामर्थ्यं, तेन रसे वेधशक्त्युत्पत्तिं च ज्ञातवद्भिः सिद्धैः स्पर्श-नाडीवेधपर्यन्ता सिद्धिः प्राप्ता। वेधिरससंपन्ना गुटिका आस्ये मणिबन्धे कण्ठे च धरतां तेषां मनोविजितिः, सर्वसिद्धिप्राप्तिश्च सुलभा सुकराऽभूत्। येन सच्चिदानन्दात्मकशिवतत्त्वस्फुरणं च जातं तेषाम्।

धातु-तदाकरगवेषणपराः सिद्धाः, क्वचिच्च देशविशेषे जलस्यौषधिविशेषस्य वा धातुसंपर्कात् द्वैधोपयोगितां पश्यन्तः, कृत्रिमधातुनिर्माणेऽपि प्रयतन्तस्तत्रापि सिद्धिमापुः। धातुषु कस्यचिद्भावस्य संश्लेषणेन विश्लेषणेन वा जायमानान्भेदानसकृदालोकयन्तः कृत्रिमानेव धातून्, युक्त्या स्वाभीष्टसिद्धिसाधकान्संपादयामासुः। क्वचिच्च कृत्रिमाद्धातोरकृत्रिमस्य ज्यायस्त्वं सिद्ध्या परीक्ष्य, तदाकरान्वेषणे प्रयत्नमकुर्वन्त।

तान्त्रिकसमुदाचारसहजपरिभाषाजटिलतया, उपदेशपरंपराया लुप्तत्वेन चाद्यत्वे तेषां बहवो ग्रन्था दुरूहार्था भवन्ति, अत एव लुप्तप्रचारा अपि।

सन्ति चाङ्गुलिगणनीयाः कतिपये तत्संप्रदायविदः। 'यूरेनियं' प्रभृतीनां नव्यवैज्ञानिकावगतानां बहूनां धातूनां स्वरूपपरिचयः, तन्मूलकधातुदेह-वेधाणुविभेदादिप्रक्रियाजातोपदेशश्च सिद्धग्रन्थेषु तत्र तत्र प्रतिपाद्यते, यत्र भूयान्विमर्शश्चोपलभ्यते। परं क्रिया-चर्या-ज्ञानयोगादिबह्वर्थविषया-न्तरसाहचर्यवशान्न तेषां विषयाणां सुकरोऽवगमः। अतस्तत्रापि विषयानु-सारं ग्रन्थसङ्कलनेन मार्गशोधनं भूयसा कर्तव्यमापतति।

द्राविडसंप्रदाये गवेषणायां कृतायां, तल्लब्धज्ञानाधारेण रसशास्त्रस्य प्रतिसंस्कारश्च संपादनीयः। तादृशे प्रतिसंस्कारे कृत एव गवेषणाऽपि पूर्णा भवेत्। तत्र शैवसंप्रदायविद्भिरायुर्वेदविद्भिः आयुर्वेदीयद्राविड-संप्रदायविद्भिश्च संभूय बहु श्रान्तव्यमासिद्धिलाभम्।

एतादृशे गवेषणाप्रसङ्गे, प्रथमसंपाद्ये रसशास्त्रविषयकसाहित्यस्य प्रकाशने बहूपक्रियते सरस्वतीमहालयग्रन्थागारनिर्वाहाधिकृतैः मद्रासराज्या-धिकृतैश्चाख्यानन्दकन्दस्य प्रकाशनेन। सन्त्यन्ये च बहवो ग्रन्थाः सरस्वती-महालयग्रन्थागारे रसतन्त्रप्रस्थाने प्रकाशनीयाः, येषामचिरेण प्रकाशने तद-धिकारिणामतुलं उत्साहो दिने दिने समेधत एव।

अस्य ग्रन्थस्य संपादनेनायुर्वेदस्य परमां सेवामाचरितुमवकाशं दत्तवते सरस्वतीमहालयमाननीयसचिवाय श्रीगोपालार्यमहोदयाय, गवेषणाचार्याय श्रीवासुदेवशास्त्रिमहोदयाय, समये समये पर्यालोचनाय स्वकीयग्रन्था-गारगतरसग्रन्थजातप्रदानेन, अनर्घेणोपदेशजातेन च बहूपकृतवते मम प्रयोगाचार्याय श्री वा. वां. नटराजशास्त्रिमहोदयाय, महान्ति कुर्वतेऽस्मि-न्ग्रन्थसंपादने द्रविडभाषानुवादे (प्रूफ्) पत्रशोधने च श्रमलघूकरणेन मह्यं बहूपकृतवते श्रीरङ्गस्थ श्रीविलासमुद्रणालयाधिपतये पण्डित श्री सुन्दर-राजाचार्यमहोदयाय च मदीयां हार्दीं कृतज्ञतां निवेदयन्, सर्वगतं धिषणोन्मेषमनारतमाशंसद्भ्यो गुरुचरणेभ्यो मदीया अनन्ताः सविनति-नतिततीः समर्पये।

भारत आयुर्वेदशाला
तेप्पकुलं, तिरुचिरापल्ली
१६—३—१९५२

इत्थं
भिषजां विधेयः
शे. वे. राधाकृष्णशास्त्री।

॥ श्रीः ॥

॥ आनन्दकन्दस्य विषयानुक्रमणिका ॥

अमृतीकरणविश्रान्तिः ।

पृष्ठसंख्या

पृष्ठसंख्या

क्रियाकरणविश्रान्तिः।

विषयानुक्रमणिका ।

पृष्ठसंख्या

नवम उल्लासः ।

दशम उल्लासः ।

॥ श्रीः ॥

महाभैरवोक्तः

॥ आनन्दकन्दः ॥

अमृतीकरणं नाम प्रथमा विश्रान्तिः ।

कैलासशिखरासीनं कालकन्दर्पनाशनम् ।
प्रसन्नं परमेशानं जगदानन्दकारणम् ॥ १ ॥
प्रणम्य परया भक्त्या भैरवी स्तुतिमातनोत् ।

देव्युवाच—

देवदेव महादेव जन्मदारिद्र्यनाशन ॥ २ ॥
प्रसीद करुणामूर्ते प्रसन्न परमेश्वर ।
दिव्यागमरहस्यानि कुलकौळादिकानि च ॥ ३ ॥
जाने तव प्रसादेन मायामङ्गळविग्रह ।
श्रोतुमिच्छामि सर्वेश तव दिव्यरसायनम् ॥ ४ ॥
जराजन्मामयघ्नं च खेचरत्वादिसिद्धिदम् ।
दारिद्र्यदुःखशमनं ब्रह्मत्वादिवरप्रदम् ॥ ५ ॥

ईश्वर उवाच—

साधु साधु महाभागे सर्वलोकोपकारिणि ।
तत्सर्वं जायते सूताच्छुद्धात्प्राणवल्लभे ॥ ६ ॥
सर्वलोकोपकारार्थं गुह्यात् गुह्यतमं हितम् ।
रसेन्द्रस्य समुत्पत्तिं लक्षणं च सुरार्चिते ॥ ७ ॥
तत्सर्वं संप्रवक्ष्यामि शृणु भैरवि सम्प्रति ।

रसोत्पत्तिः ॥

सुरेन्द्रैर्मुनिभिर्दिव्यैः गन्धर्वोरगकिन्नरैः ॥ ८ ॥
प्रार्थितोऽहं भवत्यां तु कुमारोत्पत्तिमिच्छुभिः ।
तारकासुरनाशाय लोकानां रक्षणाय च ॥ ९ ॥
तदा हिमालयगिरेः गुहायां सुचिरं प्रिये ।
संक्रीडमानयोः कालो गतो नः पुत्रलिप्सया ॥ १० ॥
त्रिजगत्क्षोभि सुरतं त्याजितुं प्रेषितः सुरैः ।
कपोतरूपमास्थाय वह्निः प्रागाद्गवाक्षतः ॥ ११ ॥
तं दृष्ट्वा लज्जया देवि विसृष्टं सुरतं मया ।
निक्षिप्तं वदने वह्नेरावयोस्तेज उज्ज्वलम् ॥ १२ ॥
तेन दन्दह्यमानोऽग्निर्गङ्गायां तन्न्यमज्जयत् ।
तेन गङ्गाऽपि संतप्ता तद्बहिर्विससर्ज च ॥ १३ ॥
तत् द्विधाऽभूद्बहिः प्राप्य चैकं स्कन्दप्रसूतये ।
अन्यच्छुद्धरसो जातो ह्यापदंबुधिपारदः ॥ १४ ॥
शतयोजननिम्नेषु पञ्चकूपेषु संस्थितः ।
तन्मला धातवो जाता मणयो दिव्यवस्तु च ॥ १५ ॥
तत्तत्क्षेत्रविशेषेण नामवर्णादिकान् गुणान् ।
भिन्नः प्राप्तो रसेन्द्रोऽयं जन्मदारिद्र्यभंजनः ॥ १६ ॥
ते कूपाः प्रळये पञ्च संज्ञा जातादि वै मुखाः(?) ।
ससंचवर्णा निवृत्त्या निक्षिप्ता नियुतानि हि(?) ॥ १७ ॥
पञ्चवर्णानि देवेशि ! सर्वसत्वयुतानि च ।
पूर्वस्यां पारदः श्वेतो नानावर्णैर्गदापहः ॥ १८ ॥
चञ्चलो दक्षिणस्यां तु रसेन्द्रो नीलवर्णवान् ।
दोषहीनोऽतिरूक्षश्च सुतरां चपलः प्रिये ॥ १९ ॥
तेन जाता भुजङ्गेन्द्रा जराजन्मगदोज्झिताः ।

पश्चिमस्यां तु सूताख्यः पीतवर्णोऽतिरूक्षकः ॥ २० ॥
सर्वदोषयुतोऽसौ तु शुद्धोऽष्टादशकर्मभिः ।
सर्वसिद्धिप्रदो देवि देहलोहादिसिद्धिदः ॥ २१ ॥
उत्तरस्या दिशो रक्तः सर्वदोषविवर्जितः ।
रसायनं तु तेनैव देवा जन्मजरोज्झिताः ॥ २२ ॥
मध्ये तु मिश्रको ज्ञेयः सर्ववर्णसमन्वितः ।
बहिश्चन्द्रार्कसच्छायो रसो दोषसमन्वितः ॥ २३ ॥
स चाष्टादशसंस्कारैः शुद्धस्सिद्धिप्रदो भवेत् ।
अमराणां स्वरूपं तु रसेन्द्रो हि महेश्वरः ॥ २४ ॥
पूरयामासतुस्तौ च स्तोकतो ह्यतिदुर्लभौ ।
अन्येषु सर्वकार्येषु सिद्धिदोऽपि हि कर्मभिः ॥ २५ ॥
अष्टादशभिरत्यन्तं शुद्धः सिद्धिप्रदो द्रुतम् ।
रसावतारं यो वेत्ति स तु धार्मिकसत्तमः ॥ २६ ॥
आयुष्यसुखसंतानश्चारोग्यमवाप्नुयात् ।

रसपर्यायाः—तन्निरुक्तिश्च ॥

जन्मरोगजरामृत्युदारिद्र्यांभोनिधेः परम् ॥ २७ ॥
पारं ददाति तेनैव पारदः परिकीर्तितः ।
रसोपरसलोहादिकर्तृत्वाच्च रसेन्द्रकः ॥ २८ ॥
मम प्रत्यङ्गसूतत्वात् सूत इत्यभिधीयते ।
सूते यस्मात्सर्वसिद्धिं तस्मात्सूत इति स्मृतः ॥ २९ ॥
मम देहरसो यस्मात् रसस्तस्मात्प्रकीर्तितः ।
जरामरणदारिद्र्यरोगनाशाय शस्यते ॥ ३० ॥
तस्माद्रस इति प्रोक्तो धातुत्वाच्च वरानने ।
सर्वधातून्रसत्येषः तस्माच्च रस ईरितः ॥ ३१ ॥
मित्रकारी सवर्णत्वात्सर्वसिद्धिप्रदायकः ।

पारदो व्याधिसंहर्ता रसेन्द्रो रसकर्मणि ॥ ३२ ॥
धातुकर्मसु सूतस्स्यात् रसेन्द्रो रससाधने ।
सर्वकर्मार्हिततया सर्वरूपतया प्रिये ॥ ३३ ॥
सर्वसिद्धिप्रदो देवि मिश्रकोऽयमुदाहृतः ।

रसगता दोषाः ॥

अमोघसिद्धिममलं सर्वसिद्धिप्रदं रसम् ॥ ३४ ॥
आलोक्य त्रिदशास्सर्वे ब्रह्मविष्णुपुरोगमाः ।
मामभिप्रार्थयामासुः स्तोत्रैश्च विविधैः प्रिये ॥ ३५ ॥
" रसेन्द्रदर्शनादेव नरपक्षिमृगादयः ।
सिद्धिं नानाविधां यांति तन्निवारय शंकर " ॥ ३६ ॥
तस्मात् त्रिधा कञ्चुकाभिर्दोषैश्चासौ नियोजितः ।
तदा प्रभृति दोषैश्च कञ्चुकाभिश्च वर्जितः ॥ ३७ ॥
शुद्धोऽष्टादशसंस्कारैस्सूतो भवति सिद्धिदः ।

रसावस्थाः ॥

धूमश्चिटिचिटिश्चैव मण्डूकप्लुतिरेव च ॥ ३८ ॥
सकंपश्च विकंपश्च पञ्चावस्था रसस्य तु ।

रसगतयः ॥

रसस्य गतयः पञ्च जले स्याज्जलवद्गतिः ॥ ३९ ॥
धूमे धूमगतिस्सूतः स्तरणे हंसवद्गतिः ।
किट्टे किट्टनिभा देवि पञ्चमी जीववद्गतिः ॥ ४० ॥
चतस्रो गतयो दृश्याः अदृश्या पंचमी गतिः ।
यन्त्रौषधाद्यै रोद्धव्याश्चतस्रो गतयः प्रिये ॥ ४१ ॥
ध्यानमन्त्रौषधाद्यैश्च रोद्धव्या पञ्चमी गतिः ।

नैसर्गिका दोषाः ॥

पार्थिवश्च तथैवाप्य आग्नेयश्चानिलस्तथा ॥ ४२ ॥

नाभसो गजचर्माख्यः पुण्डरीको विसर्पकृत् ।
हारिद्रो रक्तचर्माख्यो नारङ्गो रक्तबिन्दुकः ॥ ४३ ॥
असह्याग्निश्च मण्डूको मला नैसर्गिकाः स्मृताः ।

औपाधिका दोषाः ॥

कालिका मलिनी चैव कपोती रक्तकञ्चुका ॥ ४४ ॥
सलोमी गिरिजा चैव पिङ्गली सप्त कञ्चुकाः ।
औपाधिका इमा ज्ञेयाः पारदे कीर्तिताः प्रिये ! ॥ ४५ ॥

यौगिका दोषाः ॥

विषं नागश्च वङ्गश्च यौगिकश्च त्रयः स्मृताः ।

दोषाणां स्वरूपम् ॥

भौमः कुष्ठकरश्चाप्यो दोषोद्रेकं करोति सः ॥ ४६ ॥
आग्नेयः कुरुते दाहं वायव्यश्शूलकृद्भवेत् ।
बाधिर्यं नाभसो दोषो गजत्वग्गजचर्मकृत् ॥ ४७ ॥
पुण्डरीको दद्रुकरो विसर्पश्च विसर्पकृत् ।
हारिद्रः पाण्डुकृत् प्रोक्तो रक्तचर्माक्षिपाटलम् ॥ ४८ ॥
नारङ्गो दुम्बरं कुष्ठं रक्तबीजो मसूरिकाः ।
असह्याग्निर्मोहकारी मण्डूकश्चर्मकीलकृत् ॥ ४९ ॥
मलो मूर्च्छाकरो देवि ! ख्याता दोषोद्भवास्तथा ।
कालिका कृष्णवर्णं च मलिनी मलसंग्रहम् ॥ ५० ॥
कपोती स्वरसादं च विस्फोटं रक्तकञ्चुका ।
सलोमी वमनं कुर्यात् गिरिजा जाड्यकारिणी ॥ ५१ ॥
पिङ्गली नेत्ररूपघ्नी दोषाः कंचुकजास्स्मृताः ।
विषं मृत्युप्रदो नागो जाड्यं वङ्गस्सुरार्चिते ! ॥ ५२ ॥

कुरुते पूतिगन्धत्वं गदा यौगिकसम्भवाः ।

रसस्य स्थानान्तरगतिः ॥

प्रथमार्तवसुस्नाता सुरूपा शुभलक्षणा ॥ ५३ ॥
शुद्धाम्बरधरा माल्यगन्धलिप्ता सुभूषिता ।
उत्तमाश्वसमारूढा रतिसङ्गविवर्जिता ॥ ५४ ॥
अभ्यर्च्य गणनाथं च भैरवं च गुरुं पुरा ।
रसेन्द्रभैरवं ध्यात्वा कूपस्थं पारदं प्रिये ! ॥ ५५ ॥
पश्येच्छीघ्रं ततो गच्छेत् न पुनः पृष्ठमीक्षयेत् ।
एकयोजनमात्रेण कुमारी हयसाधना ॥ ५६ ॥
तदानीमाहरेत्तत्तु कुमारीसंजिघृक्षया ।
कूपमध्यात्समुत्पत्य सोऽनुधावति तां प्रति ॥ ५७ ॥
यावद्योजनमागत्य पुनः कूपे विशेत्क्षणात् ।
परितः कृतगर्तेषु तेषु तेषु च संस्थितम् ॥ ५८ ॥
तं रसेन्द्रं शुचिर्भूत्वा गृह्णीयाद्रसदेशिकः ।
गौरवादग्निवदनात् पतितो दरदाह्वये ॥ ५९ ॥
देशे स सूतो भूलीनः तन्त्वज्ञै रसकोविदः ।
निक्षिप्य मृत्तिकायन्त्रे पातनाख्ये समागतः ॥ ६० ॥
पारदो गृह्यते देवि ! दोषहीनस्स उच्यते ।
एवमेवं तत्र तत्र सिद्धविद्याधरैस्सदा ॥ ६१ ॥
निक्षेपितः पारदेन्द्रो विद्यते देवि ! सिद्धिदः ॥

॥ इति श्रीभैरवोक्ते आनन्दकन्दे अमृतीकरणविश्रान्तौ प्रथमोल्लासः ॥

॥ द्वितीयोल्लासः ॥

श्रीभैरवी—

रसोपदेशदातारं तच्छिष्यं काकिनीस्त्रियम् ।
रसपूजां तु पृच्छामि यथावत् कथयस्व मे ॥ १ ॥

श्रीभैरवः—

रसोपदेशकलक्षणम् ।

शृणु भैरवि ! तत्सर्वमपूर्वं कथयामि ते ।
आचार्यो ज्ञानवान्दक्षः शीलवान्गुणवाञ्शुचिः ॥ २ ॥
धर्मज्ञस्सत्यसन्धश्च रसशास्त्रविशारदः ।
वेदवेदान्ततत्वज्ञो निर्मलश्शिववत्सलः ॥ ३ ॥
देवीभक्तस्सदा शान्तो रसमण्डपकोविदः ।
मन्त्रसिद्धो महावीरो देवतायागतत्परः ॥ ४ ॥
रसदीक्षाविधानज्ञो मन्त्रौषधमहारसान् ।
रागसंख्यां बीजकल्पं द्वन्द्वमेलापनं बिडम् ॥ ५ ॥
रञ्जनं सारणां तैलं दळानि क्रामणानि च ।
वर्णोत्कर्षं मृदुत्वं च जारणं बालवृद्धयोः ॥ ६ ॥
खेचरीं भूचरीं चैव यो वेत्ति स गुरुर्भवेत् ।

शिष्यलक्षणम् ।

गुरुभक्तस्सदाचारो लोभमायाविवर्जितः ॥ ७ ॥
निस्पृहो निरहङ्कारो सत्यवाङ्नियमस्थितः ।
निरालस्यस्स्वधर्मज्ञः षट्कर्मनिरतस्सुधीः ॥ ८ ॥
डम्भहिंसादिनिर्मुक्तः शिवाचारेषु दीक्षितः ।
अत्यन्तसाधकश्शान्तो मन्त्रानुष्ठानतत्परः ॥ ९ ॥

दान्तश्शिष्यस्स विज्ञेयः शक्तिमान् गतमत्सरः ।

काकिनीलक्षणम् ।

आकुञ्चितस्निग्धकेशा पद्मपत्रायतेक्षणा ॥ १० ॥
दीर्घोत्तुङ्गघ्राणकेशा विद्रुमाधरशोभिता ।
दाडिमीबीजदशना कम्बुग्रीवोन्नतस्तनी ॥ ११ ॥
शिरीषमालामृदुलबाहुपाशविराजिता ।
सङ्कीर्णोरस्थला निम्ननाभिः सूक्ष्मा चलाङ्गका ॥ १२ ॥
तलोदरी रोमराजिवलित्रयविभूषिता ।
विशालजघनोपेता रम्भोरुः सुभगा प्रिया ॥ १३ ॥
कादळोपमजङ्घा च पाटलांघ्रिसरोरुहा ।
शोणामलनखोपेता राजहंसगतिश्शुभा ॥ १४ ॥
कलकोकिलनिध्वानकलकण्ठादिमंजुला ।
पिप्पलच्छदसङ्काशस्मरमन्दिरमण्डिता ॥ १५ ॥
युवती श्यामला स्निग्धा सुरूपा शुभलक्षणा ।
चुम्बनस्पर्शनाश्लेषरतिकर्मविचक्षणा ॥ १६ ॥
बहुले या पुष्पवती पक्षे सा काकिनी स्मृता ।
स्वस्ववर्णसमुद्भूता ग्राह्या वाऽप्यन्यवर्णजा ॥ १७ ॥
रसकर्मणि दीक्षायां प्रयोगे च रसायने ।

काकिनीत्वापादनम् ।

काकिन्यभावे तरुणी सुरूपाऽन्याऽथवा भवेत् ॥ १८ ॥
गन्धकं गोघृतोपेतं निष्कं त्रिस्सप्तवासरम् ।
प्रातर्दद्यात्तु सा नारी काकिनीसदृशा भवेत् ॥ १९ ॥
धार्मिकः पापभीरुश्च बलवान् ज्ञानवित्तमः ।

न्यायश्रेष्ठस्सर्वसमो रसागमविशारदः ॥ २० ॥
भूपतिश्चास्य मन्त्री च सर्वशास्त्रविशारदः ।
सर्वधर्मरतः श्रेष्ठो न्यायमार्गप्रवर्तकः ॥ २१ ॥

रसशालानिर्माणम् ।

रसशालां प्रवक्ष्यामि रसेन्द्रस्य वरानने ।
निर्णयेच्च निरातंके देशे च निरुपप्लवे ॥ २२ ॥
आम्लिकप्राणिसुभगे धनधान्यसमाकुले ।
सौराज्ये पूर्णविभवे निरपाये ह्यनिन्दके ॥ २३ ॥
नगरे सर्ववर्णाढ्ये महामाहेश्वरावृते ।
तत्रापि विजये स्थाने पवित्रे च सुरक्षिते ॥ २४ ॥
सव्यालपशुपक्ष्यादिसंबाधपरिवर्जिते ।
समस्थले च प्राकारपरिघार्गळभूषिते ॥ २५ ॥
नारङ्गदाडिमडह(?)जंबीरफलपूरके ।
तालहिन्तालवकुलनारिकेलाम्लपाटले ॥ २६ ॥
अशोकजंबूपनससालपुन्नागमण्डिते ।
कपित्थपूगसरळदेवदारुसुबिल्वके ॥ २७ ॥
धात्रीन्यग्रोधवरणमधूकाम्रातमण्डिते ।
केतकीमल्लिकाजातीयूथिकामालतीयुते ॥ २८ ॥
मागधीकुन्दकुरवतिलके शतपत्रके ।
कुमुदोत्पलकल्हारपुण्डरीकांबुजोत्पलैः ॥ २९ ॥
हंससारसकारण्डचक्रवाकविराजितैः ।
सरोभिश्शीतळजलै परितः परिवेष्टिते ॥ ३० ॥
शीतानिलाभिलुळितललितप्रसवाञ्चिते ।
चित्रोद्यानेऽतिरुचिरे रसशालां प्रकल्पयेत् ॥ ३१ ॥
षोडशस्तम्भरुचिरां चतुरश्रां समायताम् ।

मनोज्ञां देवदेवेशि! मत्तवारणसंयुताम् ॥ ३२ ॥
वातायनसमोपेतां कवाटार्गलरक्षिताम् ।
कक्षापताकासंयुक्तां सर्वोपकरणोज्ज्वलाम् ॥ ३३ ॥
समालिखितदिक्पालां समर्चितविनायकाम् ।
प्रतिष्ठितोमामाहेशां द्वारपालैश्च रक्षिताम् ॥ ३४ ॥
भेरीकाहलघण्टादिदिव्यवाद्यविनादिताम् ।
वास्तुलक्षणसंयुक्तां रसशालां प्रकल्पयेत् ॥ ३५ ॥
शालायां वेदिका कार्या सुदृढा दर्पणोपमा ।
इष्टकैः खचिता रम्या ससोपाना सलक्षणा ॥ ३६ ॥
कपिलागोमयालिप्ता हिरण्यकलशावृता ।

रसेन्द्रपूजाविधिः ।

वेदिकायां रसेन्द्रस्य भद्रपीठं प्रकल्पयेत् ॥ ३७ ॥
भद्रपीठे लिखेत्सम्यक् सिन्धूरेण द्विहस्तकम् ।
षट्कोणं वसुपत्रं च तद्बहिश्चाष्टपत्रकम् ॥ ३८ ॥
कमलं चतुरश्रं च चतुर्द्वारोपशोभितम् ।
रसलिङ्गं न्यसेद्यन्त्रे पुष्पाद्यैश्च समर्चयेत् ॥ ३९ ॥

रससन्ध्या ॥

अथ सन्ध्यां प्रवक्ष्यामि रसकर्मफलप्रदाम् ।
प्रविशेद्रसशालां च स्नातश्शुद्धोऽनुलेपितः ॥ ४० ॥
शुक्लमाल्याम्बरधरः संयतात्मा जितेन्द्रियः ।
यतवाग्गुरुभक्तश्च सत्यवादी दृढव्रतः ॥ ४१ ॥
उपविश्य समाचामेत् मृदुले चित्रकम्बले ।
वाङ्मयाशीर्युतं तोयमात्मविद्याशिवात्मकम् ॥ ४२ ॥
तत्त्वं च शोधयामीति त्रिवारं विधिवत्पिबेत् ।
ध्यायेद्रुद्रगायत्रीं त्रिवारं प्रजपेत्प्रिये ॥ ४३ ॥

रसभैरवगायत्रीं शृणु भैरवि ! तत्वतः ।
" ॐ रसेश्वराय विद्महे रसाङ्कुशाय धीमहि ।
तन्नस्सूतः प्रचोदयात् ॥ "
कोटिसूर्यप्रतीकाशं दशकोटीन्दुसन्निभम् ॥ ४४ ॥

शुभ्रं पञ्चमुखं देवं त्रिणेत्रं चन्द्रशेखरम् ।
अष्टादशभुजं शान्तं पञ्चकृत्यपरायणम् ॥ ४५ ॥

शुक्लमाल्यांबरधरं नागयज्ञोपवीतिनम् ।
शुद्धस्फटिकसङ्काशं प्रेतारूढं रसेश्वरम् ॥ ४६ ॥

नीलकण्ठं च सर्वज्ञं सर्वाभरणभूषितम् ।
वरदं रसशास्त्रं च पारदं भुजगं सुधाम् ॥ ४७ ॥

शङ्खभैषज्यकोदण्डशूलखट्वाङ्गसायकम् ।
डमरुं करवालं च गदां पावकमीश्वरि ! ॥ ४८ ॥

आरोग्यं दिव्यमालां च अभयं द्विनवैः करैः ।
रसाङ्कुशीं निजोत्सङ्गे बिभ्राणं वृषवाहनम् ॥ ४९ ॥

कपर्दभाररुचिरं मन्दहासाननं शिवम् ।
रसभैरवमाचिन्त्य तस्योत्सङ्गे रसांकुशीम् ॥ ५० ॥

अङ्कुशं चाक्षमालां च दधतीं दक्षहस्तयोः ।
पाशाभयं च बिभ्राणां दक्षिणेतरहस्तयोः ॥ ५१ ॥

चतुर्भुजां रक्तवर्णां त्रिणेत्रामिन्दुशेखराम् ।
रक्ताम्बरधरां देवीं कम्बुग्रीवां कृपामयीम् ॥ ५२ ॥

रत्नालङ्काररुचिरां मन्दहासविराजिताम् ।
ध्यायेद्रसाङ्कुशीं देवीं देवस्याभिमुखीं शिवाम् ॥ ५३ ॥

ततो भस्म समादाय वामहस्तेन धारयेत् ।
नैवाधःपतितं पात्रे गृहीत्वा गोमयं सुधीः ॥ ५४ ॥

विशोष्य प्रदहेत्कुण्डे क्रमेण धारयेत्प्रिये ! ।
पुनरुद्धारणं चैव सद्योजातादिभिर्भवेत् ॥ ५५ ॥
निरीक्षणं प्रोक्षणं च ताडनाभ्युक्षणं तथा ।
सद्योजातादिभिर्मन्त्रैरभिमन्त्र्य च तत्पुनः ॥ ५६ ॥
मूर्ध्नि वक्त्रे च हृदये गुह्ये चरणयोः क्रमात् ।
ईशानाद्यैः पञ्चमन्त्रैस्तत्तत्स्थानेषु निक्षिपेत् ॥ ५७ ॥
सर्वाङ्गोद्धूलनं कुर्यात् भस्मना पञ्चभिश्च तैः ।
संकल्पं विधिवत्कुर्यात् रसाचार्यो महेश्वरः ॥ ५८ ॥
प्राणायामत्रयं कृत्वा मूलमन्त्रेण पार्वति ! ।
प्रोक्षयेन्मन्त्रितं तोयं मूर्ध्नि वामकरस्थितम् ॥ ५९ ॥
आचम्य च पुनस्तोयं मूलमन्त्रेण मन्त्रितम् ।
त्रिधा दक्षिणहस्तस्थं पिबेदाचमनं ततः ॥ ६० ॥
अर्घ्यं मूलेन दत्वा त्रिः पुनराचम्य पार्वति ! ।
अष्टोत्तरशतं जप्त्वा मूलमन्त्रमुदारधीः ॥ ६१ ॥
समर्पयेच्च सूताय रससन्ध्येयमीश्वरि ! ।
त्रिकालमेवं कुर्वीत सन्ध्यां सर्वाघनाशिनीम् ॥ ६२ ॥

रसांकुशरसांकुशी- मूलमन्त्रोद्धारः ॥

वक्ष्येऽहं मूलमन्त्रस्य शृणूद्धारक्रमं प्रिये ! ।
वाङ्मायाकमला चाथ चतुर्थ्यन्तो रसेश्वरः ॥ ६३ ॥
ततो महाकालपदं महाबलपदं ततः ।
अघोरभैरवपदं वज्रवीरपदं ततः ॥ ६४ ॥
क्रोधकालपदं चैतत्सर्वं संबुद्धिसंयुतम् ।
कषष्टवर्गात्युतस्साद्यो(स्यादौ ?)दन्तस्सबिंदुकः ॥ ६५ ॥
इदं पञ्चाक्षरं कूटं ततः कर्णसंयुतः ।
सविसर्गोऽप्ययं कूटश्चतुर्वर्णात्मकः प्रिये ॥ ६६ ॥

रसेन्द्रभैरवस्यायं मन्त्रो द्वात्रिंशदर्णकः।
गोपितस्सर्वतन्त्रेषु रहस्योऽत्यन्तदुर्लभः॥ ६७ ॥
रसांकुशामन्त्रमहं वक्ष्यामि शृणु भैरवि!।
वाङ्माया भुवनेशी च रमा मकरकेतनः॥ ६८ ॥
रसांकुशा चतुर्थ्यां च नमोन्तो द्वादशार्णकः।
मन्त्रो रसाङ्कुशायाश्च तव देव्याः प्रकीर्तितः॥ ६९ ॥
रसभैरवमन्त्रस्य छन्दोऽनुष्टुप् प्रकीर्तितः।
नन्दिकेश ऋषिः प्रोक्तो देवः श्रीरसभैरवः॥ ७० ॥
रं बीजं लं भवेत्कीलं अन्त्यार्णश्शक्तिरीरितः।
रसांकुशायास्स्कन्दस्स्याद्दं बीजं कीलकं रसः॥ ७१ ॥
नमश्शक्तिरिति ख्यातं रहस्यं मन्त्रमुत्तमम्।

रसलिङ्गार्चना।

रसलिङ्गार्चनं वक्ष्ये भैरवि! शृणु तत्वतः॥ ७२ ॥
वामपादं पुरस्कृत्य प्रविशेद्यागमन्दिरम्।
आसने मृदुले स्थित्वा शुचिस्संयतमानसः॥ ७३ ॥
प्राणानायम्य संकल्प्य श्रीगुरुं शिरसि स्थितम्।
शुद्धस्फटिकसंकाशं प्रशान्तं वरदाभयम्॥ ७४ ॥
स्मरेत्तन्नाम पूर्वं च तदनुज्ञामवाप्य च।
दिवि स्थिताश्च ये भूताः भूमिस्था विघ्नकारिणः॥
पाताळे ये महाभूताः ते नश्यन्तु शिवाज्ञया।
अनेनैव च मन्त्रेण दिग्विदिक्ष्वक्षतान् क्षिपेत्॥ ७६ ॥
पुष्पमस्त्राय फडिति निक्षिपेदन्तरिक्षके।
सर्वशत्रुप्रमथनी चेति दक्षिणपार्ष्णिकाम्॥ ७७ ॥
त्रिवारं घातयेद्भूमौ प्राणायामो भवेत्पुनः।
रसेन्द्रभद्रपीठस्य दक्षिणे चतुरश्रकम्॥ ७८ ॥

मण्डलं हस्तमात्रं च सार्धं कुर्यात्सुशोभनम् ।
त्रिकोणवृत्तषट्कोणचतुरश्रं भवेत्क्रमात् ॥ ७९ ॥
इन्द्रादिलोकपालांश्च तत्तत्क्रमपुरस्सरम् ।
प्रणवादिनमोऽन्तैश्च पूजयेत्कुसुमाक्षतैः ॥ ८० ॥
वाङ्मायाकमलाबीजैर्हृदयादीन्प्रपूजयेत् ।
प्राच्यामवाच्यां क्रमशः प्रतीच्योत्तरयोश्शिवे ! ॥ ८१ ॥
ईशानलासुरमरुत्कोणे नेत्रे प्रपूजयेत् ।
अस्त्रं सर्वासु काष्ठासु चतुर्थ्यन्तं फडन्तकम् ॥ ८२ ॥
छोटिका दर्शयेदष्ट पश्चादाधारमाहरेत् ।
तत्रैवावाहयेदग्निमण्डलं बीजमूलकम् ॥ ८३ ॥
अग्नेर्दश कलास्तत्र पूज्या गन्धाक्षतैः क्रमात् ।
ततः पात्रं समादाय भावयेत्सूर्यमण्डलम् ॥ ८४ ॥
मार्तण्डद्वादशकलास्तत्राच्याश्चन्दनाक्षतैः ।
गन्धोत्तमान्वितं तोयं पूरयेदर्घ्यपात्रकम् ॥ ८५ ॥
चिन्तयेदैन्दवं बिम्बं तत्कलास्तत्र पूजयेत् ।
मध्ये त्रिकोणमालिख्य शक्तिबीजं समुल्लिखेत् ॥ ८६ ॥
तत्र क्षिपेत् गन्धपुष्पं मूलमन्त्रं त्रिधा जपेत् ।
पूर्वादिदिक्षु चतसृषु चतुष्पात्राणि धारयेत् ॥ ८७ ॥
पूरयेत्पूर्ववत्तानि गन्धपुष्पाक्षतैर्यजेत् ।
प्रोक्षयेन्मूलमन्त्रेण मध्यपात्रोदकेन च ॥ ८८ ॥
पात्राणि निजगात्राणि पूजाद्रव्याणि सर्वतः ।
स्वागतश्चतुरश्रं च मण्डलं परिकल्पयेत् ॥ ८९ ॥
पूर्ववत्पञ्चपात्राणि पूरयेच्छुद्धवारिणा ।
निक्षिपेन्मध्यमे सूतं रत्नं दक्षिणके क्षिपेत् ॥ ९० ॥

स्वर्णं तद्भागपात्रे च तत्समीपे कुशं न्यसेत् ।
रत्नपात्रसमीपस्थे पात्रे स्यादष्टगन्धकम् ॥ ९१ ॥
प्रतिपात्रे त्रिकोणं च लिखेन्मायासमन्वितम् ।
न्यसेद्गन्धाक्षतं पुष्पं त्रिधा मूलेन मन्त्रयेत् ॥ ९२ ॥
सप्तधा रसपात्रं च मूलमन्त्रेण मन्त्रयेत् ।
रसपात्रोदकेनैव पूजाद्रव्याणि चात्मनः ॥ ९३ ॥
शरीरमुत्तमाङ्गं च प्रोक्षयेत्पीठदीपकम् ।
आसनस्य ऋषिर्मेरुः सुतलं छन्द ईरितम् ॥ ९४ ॥
कूर्मरूपी तु भगवान् देवता परिकीर्तिता ।
“ पृथ्वि ! त्वया धृता लोका देवि ! त्वं विष्णुना धृता ॥
त्वं च धारय मां देवि ! पवित्रं कुरु चासनम् ” ।
अनेनैव तु मन्त्रेण चासने कुसुमं क्षिपेत् ॥ ९६ ॥

॥ भूतशुद्धिः ॥

भूतशुद्धिं प्रवक्ष्यामि पृथ्वी पीता सवज्रका ।
कठिना लंबीजयुता जान्वन्ताङ्गुष्ठमूलतः ॥ ९७ ॥
ध्येया जान्वादिकट्यन्तं उपर्यस्यार्धचन्द्रका(गा) ।
शुभ्रा वं बीजसहिता विचिन्त्या द्रवरूपिका ॥ ९८ ॥
कट्यादि हृदयान्तं च वह्निर्ध्येयस्त्रिकोणगः ।
रं बीजं रक्तवर्णश्च स्वस्तिकेन विभूषितः ॥ ९९ ॥
हृदादिकण्ठपर्यन्तं वायुः स्मर्योऽञ्जनप्रभः ।
यं बीजसहितो देवि ! षड्बिन्दुपरिभूषितः ॥ १०० ॥
षट्कोणः कर्णदेशाच्च ब्रह्मरन्ध्रान्तमीश्वरि ! ।
वर्तुलं हंबीजयुतं महाकृष्णं वियत्स्मरेत् ॥ १०१ ॥
पृथिवीमप्सु च तास्त्वग्नौ स च वायौ स सोऽम्बरे ।
मेळयित्वा द्वादशान्ते स्थापयेत्परमेश्वरि ! ॥ १०२ ॥

यं बीजेनात्मनो देहं मूलाधाराद्विशोषयेत् ।
षडाधाराणि निर्भिद्य यावत् ब्रह्मबिलं प्रिये ! ॥ १०३ ॥
रं बीजेन दहेद्देहं सर्वमाप्लावयेत्ततः ।
वंबीजेन द्रवीभूतं ब्रह्मरन्ध्रेन्दुमण्डलात् ॥ १०४ ॥
स्यन्दमानामृतेनैव तनुमाप्लावयेच्छिवे ! ।
आकाशाद्वायुमादद्यात्तस्माद्वह्निं समाहरेत् ॥ १०५ ॥
वह्नेरापस्समादेयास्ताभ्यो भूमिं समाहरेत् ।
एवं पञ्च च भूतानि स्वस्वस्थाने नियोजयेत् ॥ १०६ ॥
वामकुक्षिस्थितं पापपुरुषं कृष्णरूपिणम् ।
ध्यायेत्तं निर्गतं देवि ! खड्गचर्मधरं परम् ॥ १०७ ॥
न्यासं रसांकुशेनैव कृत्वाऽङ्गुलिहृदादिषु ।

" ऐं ह्रीं श्रीं क्ष्मौं क्ष्मं ह्रां ह्रीं ह्रुं ह्रैं ह्रौं ह्रः फट् रसेश्वराय महाकालभैरवाय शिखायै वषट् । रौद्ररूपाय कृष्णपिङ्गललोचनाय अवतर (२) अवतारय (२) जल्प (२) जल्पय (२) शुभाशुभं कथय (२) कथापय (२) मम महारक्षां कुरु कुरु कारय (२) मम रससिद्धिं देहि देहि ॥ ८८ ॥

महाकालभैरवाय हृदयाय नमः । पूर्ववन्महाबलभैरवाय शिरसे स्वाहा । पूर्ववत् अघोरभैरवाय शिखायै वषट् । पूर्ववत् वज्रवीरभैरवाय कवचाय हुं । पूर्ववत् क्रोधभैरवाय नेत्रत्रयाय वौषट् । पूर्ववत् कालभैरवाय अस्त्राय फट् । एवमङ्गुलिन्यासः ॥

प्रतिबीजैस्समुच्चार्य चतुर्थ्यन्तं रसांकुशम् ॥ १०८ ॥
हृदादिपञ्चस्थानेषु विन्यसेद्बीजपञ्चकम् ।
ततश्चास्त्राय फडिति चोटिकां दिक्षु दर्शयेत् ॥ १०९ ॥
मातृकां च कलान्यासं पाज्यो(बीज ?)न्यासं च कोळकम् ।
प्रकुर्वीत ततो देवि ! चान्तर्यजनमाचरेत् ॥ ११० ॥

कुम्भकेन हृदम्भोजं संफुल्लं विदधाति हि ।
तत्पद्मकर्णिकायां च रसमूर्तिं च चिन्तयेत् ॥ १११ ॥

मानसैर्गन्धपुष्पाद्यैरुपचारैः प्रपूजयेत् ।
स्वदेहं गन्धपुष्पाद्यैरलंकुर्याद्यथासुखम् ॥ ११२ ॥

अन्तर्यजनमेवं स्याद् बहिर्यजनमाचरेत् ।
अस्त्रेण लिङ्गं संप्रोक्ष्य लिङ्गशुद्धिं विधाय च ॥

मन्त्रपूतेन तोयेन पूरितां वर्धनीं प्रिये ! ।
स्वपार्श्वे संनिवेश्य पूजयेत्तां विधानतः ॥ ११४ ॥

पीठे सिन्दूररजसा विदध्याच्चतुरस्रकम् ।
षट्कोणं विलिखेत्तस्मिन् ऋजुं स्वर्णशलाकया ॥

वसुपत्रं चाष्टपत्रं सचतुर्द्वारभूगृहम् ।
चतुरस्रं बहिर्भागे दिक्पालान्पूजयेत्प्रिये ! ॥ ११६ ॥

नन्दिनं च महाकालं भृङ्गिं रिटिं महाबलम् ।
कुम्भकर्णं च सुग्रीवं भृङ्गकं च हलायुधम् ॥ ११७ ॥

चतुर्द्वारे तु चिन्त्यस्य द्वौ द्वौ प्रागादिपूजितौ ।
हेमं रौप्यं ताम्रसीसं वङ्गकान्तशठं ह्ययः ॥ ११८ ॥

प्रागादिद्वार्षु संपूज्य क्रमाद्द्वे द्वे महेश्वरि ।
भूगृहाभ्यन्तरे प्राच्यां शुक्रमग्नौ ग्रहं यजेत् ॥ ११९ ॥

दक्षिणस्यां यजेद्रुद्रमासुरे च समीरणम् ।
पश्चिमस्यां शिवं वह्निं वायव्यामुत्तरे हनुमान् ॥ १२० ॥

यजेत्पावकमैशान्यां ततश्चाष्टदलाग्रके ।
प्रागादौ गन्धकं ताळं कासीसं च मनश्शिलाम् ॥

कंकुष्टं माक्षिकं चैव नृपावर्तं च गैरिकम् ।
लेपिका क्षेपिका चैव क्रामिका रंजिका तथा ॥ १२२ ॥

यं बीजेनात्मनो देहं मूलाधाराद्विशोषयेत् ।
षडाधाराणि निर्भिद्य यावत् ब्रह्मबिलं प्रिये ! ॥ १०३ ॥
रं बीजेन दहेद्देहं सर्वमाप्लावयेत्ततः ।
वंबीजेन द्रवीभूतं ब्रह्मरन्ध्रेन्दुमण्डलात् ॥ १०४ ॥
स्यन्दमानामृतेनैव तनुमाप्लावयेच्छिवे ! ।
आकाशाद्वायुमादद्यात्तस्माद्वह्निं समाहरेत् ॥ १०५ ॥
वह्नेरापस्समादेयास्ताभ्यो भूमिं समाहरेत् ।
एवं पञ्च च भूतानि स्वस्वस्थाने नियोजयेत् ॥ १०६ ॥
वामकुक्षिस्थितं पापपुरुषं कृष्णरूपिणम् ।
ध्यायेत्तं निर्गतं देवि ! खड्गचर्मधरं परम् ॥ १०७ ॥
न्यासं रसांकुशेनैव कृत्वाऽङ्गुलिहृदादिषु ।

" ऐं ह्रीं श्रीं क्ष्मौं क्ष्मं ह्रां ह्रीं ह्रुं ह्रैं ह्रौं हः फट् रसेश्वराय महाकालभैरवाय शिखायै वषट् । रौद्ररूपाय कृष्णपिङ्गललोचनाय अवतर (२) अवतारय (२) जल्प (२) जल्पय (२) शुभाशुभं कथय (२) कथापय (२) मम महारक्षां कुरु कुरु कारय (२) मम रससिद्धिं देहि देहि १८८८ ॥

महाकालभैरवाय हृदयाय नमः । पूर्ववन्महाबलभैरवाय शिरसे स्वाहा । पूर्ववत् अघोरभैरवाय शिखायै वषट् । पूर्ववत् वज्रवीरभैरवाय कवचाय हुं । पूर्ववत् क्रोधभैरवाय नेत्रत्रयाय वौषट् । पूर्ववत् कालभैरवाय अस्त्राय फट् । एवमङ्गुलिन्यासः ॥

प्रतिबीजैस्समुच्चार्य चतुर्थ्यन्तं रसांकुशम् ॥ १०८ ॥
हृदादिपञ्चस्थानेषु विन्यसेद्बीजपञ्चकम् ।
ततश्चास्त्राय फडिति चोटिकां दिक्षु दर्शयेत् ॥ १०९ ॥
मातृकां च कलान्यासं पाज्यो(बीज ?)न्यासं च कोळकम् ।
प्रकुर्वीत ततो देवि ! चान्तर्यजनमाचरेत् ॥ ११० ॥

कुम्भकेन हृदम्भोजं संफुल्लं विदधाति हि ।
तत्पद्मकर्णिकायां च रसमूर्तिं च चिन्तयेत् ॥ १११ ॥

मानसैर्गन्धपुष्पाद्यैरुपचारैः प्रपूजयेत् ।
स्वदेहं गन्धपुष्पाद्यैरलंकुर्याद्यथासुखम् ॥ ११२ ॥

अन्तर्यजनमेवं स्यात् बहिर्यजनमाचरेत् ।
अर्घ्येण लिङ्गं संप्रोक्ष्य लिङ्गशुद्धिं विधाय च ॥

वस्त्रपूतेन तोयेन पूरितां वर्धनीं प्रिये ! ।
रसपार्श्वे संनिवेश्य पूजयेत्तां विधानतः ॥ ११४ ॥

पीठे सिन्दूररजसा विदध्याच्चतुरश्रकम् ।
षट्कोणं विलिखेत्तस्मिन् ऋजुं स्वर्णशलाकया ॥

वसुपत्रं चाष्टपत्रं सचतुर्द्वारभूगृहम् ।
चतुरश्रं बहिर्भागे दिक्पालान्पूजयेत्प्रिये ! ॥ ११६ ॥

नन्दिनं च महाकालं भृङ्गिं रिटिं महाबलम् ।
कुम्भकर्णं च सुग्रीवं भूतकं च हलायुधम् ॥ ११७ ॥

चतुर्द्वारे तु विन्यस्य द्वौ द्वौ प्रागादिपूजितौ ।
रुक्मं रौप्यं ताम्रसीसं वङ्गकान्तशठं ह्ययः ॥ ११८ ॥

प्रागादिद्वारेषु संपूज्य क्रमाद्वै महेश्वरि ।
भूगृहाभ्यन्तरे प्राच्यां शुक्रमग्नौ ग्रहं यजेत् ॥ ११९ ॥

दक्षिणस्यां यजेद्रुद्रमासुरे च समीरणम् ।
पश्चिमस्यां शिवं वह्निं वायव्यामुत्तरे हनुमाम् ॥ १२० ॥

यजेत्पावकमैशान्यां ततश्चाष्टदलाग्रके ।
प्रागादौ गन्धकं तालं कासीसं च मनश्शिलाम् ॥

कंकुष्टं माक्षिकं चैव नृपावर्तं च गैरिकम् ।
लेपिका क्षेपिका चैव क्रामिका रंजिका तथा ॥ १२२ ॥

लोहटी बन्धकारी च भूचरी मृत्युनाशिनी ।
विभूतिः खेचरी चैव दश दूत्यः क्रमेण च ॥ १२३ ॥

पूज्यास्त्वष्टदले पद्मे ह्यूर्ध्वाधस्ताद्दलेषु च ।
माणिक्यमुक्तावैडूर्यनीलगारुडविद्रुमाः ॥ १२४ ॥

गोमेदः पुष्परागश्च मणयस्सर्वसिद्धिदाः ।
द्वितीयवसुपत्रस्य दलाग्रेषु प्रपूजयेत् ॥ १२५ ॥

अष्टादशभुजा रुद्राः पञ्चवक्त्रास्त्रियम्बकाः ।
चन्द्रार्धशोभिमकुटाः नीलग्रीवा वृषध्वजाः ॥ १२६ ॥

स्वस्ववर्णधरास्सर्वे त्वष्टविद्येश्वरास्तु ते ।
पूजनीया महेशानि ! द्वितीयेऽष्टदलाम्बुजे ॥ १२७ ॥

रसकं विमलं ताप्यं चपलं तुत्थमञ्जनम् ।
षट्कोणस्य दलाग्रेषु सख्यस्स्युस्सर्वसिद्धिदाः ॥ १२८ ॥

वज्रवैक्रान्तवज्राभ्रकान्तपाषाणटङ्कणम् ।
मूनागश्शक्तयश्चैताः षडश्रेषु प्रपूजयेत् ॥ १२९ ॥

हिंगुळं सस्यकं चैव शिलाजत्वग्निजारकम् ।
तत्कर्णिकायां पूर्वादौ पराशक्तिचतुष्टयम् ॥ १३० ॥

हिंगुळं मालिनी शक्तिः परा शक्तिश्च सस्यकम् ।
शिलाजत्वपरा शक्तिरग्निजारः परापरा ॥ १३१ ॥

प्रणवादिनमोऽन्तैश्च तत्तन्नामपुरस्सरम् ।
सचतुर्थ्या यजेदेतान् रसावरणसंस्थितान् ॥ १३२ ॥

मध्ये तु दिव्यशक्तीनां पूजयेद्रसभैरवम् ।
सप्तविंशतिनिष्के तु द्राविते शुद्धहाटके ॥ १३३ ॥

नवनिष्कं सूतराजं विन्यसेच्चैकमानसः ।
मधूच्छिष्टकृते यन्त्रे लिङ्गाकारे सुलक्षणे ॥ १३४ ॥

निष्टप्ते हाटके सूतं प्रतप्ते प्रक्षिपेच्छिवे ! ।
मुहूर्तात्स्वाङ्गशीतं तं रसलिङ्गं पयोऽन्तरे ॥ १३५ ॥

स्थापयेत् पुनरादाय ह्युपरिस्थं मलं हरेत् ।
संघृष्य च समीकृत्य लिङ्गं संप्रोक्षयेत्ततः ॥ १३६ ॥

एवं रौप्यादिलोहैर्वा व्यस्तैर्वाऽथ समस्तकैः ।
अभ्रकादिमसत्वैर्वा लिङ्गं कुर्यात्स्वशक्तितः ॥ १३७ ॥

रसलिङ्गं द्विधा प्रोक्तं सकलं निष्कलं प्रिये ! ।
पूर्वोक्तं सकलं लिङ्गं निष्कलं केवलो रसः ॥ १३८ ॥

बुभुक्षूणां हि सकलं निष्कलं मोक्षमिच्छताम् ।
रसलिङ्गं हेमबद्धं ब्रह्मविष्ण्वीशवह्नयः ॥ १३९ ॥

अपूजयन् रूप्यबद्धं गणेशस्कन्दनन्दिनः ।
त्वयाऽभ्रसत्वसंबद्धं रसलिङ्गं प्रपूजितम् ॥ १४० ॥

ताम्रबद्धं रमावाणीकुबेरेन्द्रजलाधिपाः ।
कान्तबद्धं यममरुन्नैरृतास्समपूजयन् ॥ १४१ ॥

वङ्गबद्धं सिद्धसाध्यविद्याधरमहर्षयः ।
नागबद्धं नागवसुगन्धर्वोरगकिन्नराः ॥ १४२ ॥

तीक्ष्णबद्धं भद्रकाळीयक्षभूतपिशाचकाः ।
मुण्डबद्धं च दुर्गाम्बा चाप्सरोगुह्यकासुराः ॥ १४३ ॥

निष्कळं रसलिङ्गं तु भृङ्ग्याद्या योगिनोऽच्चयन् ।
उक्तानि रसलिङ्गानि मानवा फलकांक्षिणः ॥ १४४ ॥

पूजयेयुः प्रयत्नेन नित्यं सर्वार्थसिद्धये ।
उक्तानां रसलिङ्गानां प्राणसंस्थापनं शृणु ॥ १४५ ॥

प्राणानायम्य विधिवत् प्राणशक्तिं सरेच्छिवे ! ।
शोणिताम्भोधिमध्यस्थरक्ताम्भोजासनां पराम ॥ १४६ ॥

रक्तांबरधरां रक्तां नानारत्नकिरीटिनीम् ।
विमलेन्दुकलाजूटां रविवह्नीन्दुलोचनाम् ॥ १४७ ॥

कर्णताटङ्ककिरणारुणीकृतकपोलकाम् ।
श्रीपर्णीकुसुमाकारनासावंशविराजिताम् ॥ १४८ ॥

प्रवाळपद्मरागाभबिम्बाधरविराजिताम् ।
कुरुविन्ददलाकारश्लक्ष्णदन्ताभिशोभिताम् ॥ १४९

शङ्खाभिरामकण्ठस्थमुक्ताहारविराजिताम् ।
अङ्गुलीयककेयूरकटकादिविभूषिताम् ॥ १५० ॥

पाशांकुशेक्षुकोदण्डपुष्पबाणाभयप्रदाम् ।
रुधिरापूर्णपात्रेण शोभमानकराम्बुजाम् ॥ १५१ ॥

पीनस्तनतटोद्भासिहारकुङ्कुममण्डिताम् ।
काञ्चीमञ्जीरकटकपादाङ्गुलिविभूषिताम् ॥ १५२ ॥

प्राणप्रतिष्ठां लिङ्गस्य कुर्वीतैकाग्रमानसः ।
सृणिं म(णिं ?)ञ्च पाशञ्च हंसः सोहमिति प्रिये ! ॥

अमुष्य लिङ्गस्य प्राण इह प्राणः । अमुष्य लिङ्गस्य जीव इह स्थितः । अमुष्य लिङ्गस्य सर्वेन्द्रियाणि वाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्राणा इहागत्य सुखं चिरं तिष्ठन्तु सोऽहं हंसः स्वाहा । यरलवशषसहों ॥ क्रों ह्रीं आं ॥

एतन्मन्त्रं समुच्चार्य प्राणानावाहयेत्प्रिये ! ।

"अस्य श्रीप्राणप्रतिष्ठामन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः । ऋग्यजुस्सामानि छन्दांसि । श्रीपराशक्तिर्देवता । आं बीजम् । ह्रीं शक्तिः । क्रों कीलकम् । अमुष्य लिङ्गस्य प्राणप्रतिष्ठायां विनियोगः ॥

आसनं पूजयेत्पूर्वं गन्धपुष्पाक्षतादिभिः ॥ १५४ ॥

ह्रां आधारशक्त्यै नमः। ह्रीं कूर्माय नमः। ह्रूं अनंताय नमः। ह्रैं पृथिव्यै नमः। ह्रौं कन्दाय नमः। अंकुराय नाळाय कर्णि(न्द)केभ्यः दलेभ्यः केसरेभ्यः कर्णिकायै तन्मध्ये धर्माय ज्ञानाय वैराग्याय ऐश्वर्याय अधर्माय अज्ञानाय अवैराग्याय अनैश्वर्याय नमः॥

हृदंभोजस्थितं देवं सह देव्या महेश्वरि!।
आवाहयेत्सावरणं स्वाङ्गशक्तिसमन्वितम्॥ १५५॥
पीठे संस्थापयेल्लिङ्गं मूलेनार्घ्यं कुशोदकैः।
पाद्यं गन्धोदकैर्दद्यात् हैमेनाचमनं भवेत्॥ १५६॥
रत्नोदकैर्भवेत्स्नानं सर्वं मूलेन शांभवि!।
एकादशेन रुद्रेण पवमानेन पार्वति!॥ १५७॥
चमकैः पुरुषसूक्तैश्च फलैः पञ्चामृतैरपि।
नाळिकेरेक्षुसलिलैः सुगन्धोदकवारिणा॥ १५८
संस्नाप्य च ततो लिङ्गं पीठे संस्थापयेच्छिवे!।

लिङ्गस्य परितः— ॐ वामदेवाय नमः, ज्येष्ठाय, रुद्राय, कालाय, कलविकरणाय, बलाय, बलविकरणाय, बलप्रमथनाय, सर्वभूतदमनाय इत्यष्टासु दिक्षु मनोन्मनाय इति शिवसन्निधौ पुष्पैरभ्यर्च्य। ॐ ह्रां हृदयाय नमः। ॐ ह्रीं शिरसे स्वाहा। ॐ ह्रूं शिखायै वषट्। ॐ ह्रैं कवचाय हुं॥ ॐ ह्रौं नेत्रत्रयाय वौषट्। ॐ ह्रः अस्त्राय फट्। ह्रां ईशानाय नमः। ह्रीं तत्पुरुषाय नमः। ह्रूं अघोराय नमः। ह्रैं वामदेवाय नमः। ह्रौं सद्योजाताय नमः॥

मूलमन्त्रेण देवाय दद्यात्पुष्पांजलिं प्रिये!॥ १५९॥
मूलमन्त्रषडङ्गेन न्यासं कुर्याच्छिवस्य च।
लिङ्गस्य दक्षिणे भागे ऋगादीन्निगमानपि॥ १६०॥
ब्रह्माणं पृथिवीं तोयं विष्णुं रुद्रं हुताशनम्।
ईश्वरं पवनं चैवमाकाशं च सदाशिवम्॥ १६१॥

रक्तांबरधरां रक्तां नानारत्नकिरीटिनीम् ।
विमलेन्दुकलाजूटां रविवह्नीन्दुलोचनाम् ॥ १४७ ॥

कर्णताटङ्ककिरणारुणीकृतकपोलकाम् ।
श्रीपर्णीकुसुमाकारनासावंशविराजिताम् ॥ १४८ ॥

प्रवाळपद्मरागाभबिम्बाधरविराजिताम् ।
कुरुविन्ददलाकारश्लक्ष्णदन्ताभिशोभिताम् ॥ १४९ ॥

शङ्खाभिरामकण्ठस्थमुक्ताहारविराजिताम् ।
अङ्गुलीयककेयूरकटकादिविभूषिताम् ॥ १५० ॥

पाशांकुशेक्षुकोदण्डपुष्पबाणाभयप्रदाम् ।
रुधिरापूर्णपात्रेण शोभमानकराम्बुजाम् ॥ १५१ ॥

पीनस्तनतटोद्भासिहारकुङ्कुममण्डिताम् ।
काञ्चीमञ्जीरकटकपादाङ्गुलिविभूषिताम् ॥ १५२ ॥

प्राणप्रतिष्ठां लिङ्गस्य कुर्वीतैकाग्रमानसः ।
सृणिं म(णिं ?)श्च पाशश्च हंसः सोऽहमिति प्रिये ! ॥

अमुष्य लिङ्गस्य प्राण इह प्राणः । अमुष्य लिङ्गस्य जीव इह स्थितः । अमुष्य लिङ्गस्य सर्वेन्द्रियाणि वाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्राणा इहागत्य सुखं चिरं तिष्ठन्तु सोऽहं हंसः स्वाहा । यरलवशषसहों ॥ क्रों ह्रीं आं ॥

एतन्मन्त्रं समुच्चार्य प्राणानावाहयेत्प्रिये ! ।

"अस्य श्रीप्राणप्रतिष्ठामन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः । ऋग्यजुस्सामानि छन्दांसि । श्रीपराशक्तिर्देवता । आं बीजम् । ह्रीं शक्तिः । क्रों कीलकम् । अमुष्य लिङ्गस्य प्राणप्रतिष्ठायां विनियोगः ॥

आसनं पूजयेत्पूर्वं गन्धपुष्पाक्षतादिभिः ॥ १५४ ॥

ह्रां आधारशक्त्यै नमः। ह्रीं कूर्माय नमः। ह्रूं अनंताय नमः। ह्रैं पृथिव्यै नमः। ह्रौं कन्दाय नमः। अंकुराय नाळाय कर्णि(न्द)केभ्यः दलेभ्यः केसरेभ्यः कर्णिकायै तन्मध्ये धर्माय ज्ञानाय वैराग्याय ऐश्वर्याय अधर्माय अज्ञानाय अवैराग्याय अनैश्वर्याय नमः॥

हृदंभोजस्थितं देवं सह देव्या महेश्वरि!।
आवाहयेत्सावरणं स्वाङ्गशक्तिसमन्वितम्॥ १५५॥
पीठे संस्थापयेल्लिङ्गं मूलेनार्घ्यं कुशोदकैः।
पाद्यं गन्धोदकैर्दद्यात् हैमेनाचमनं भवेत्॥ १५६॥
रत्नोदकैर्भवेत्स्नानं सर्वं मूलेन शांभवि!।
एकादशेन रुद्रेण पवमानेन पार्वति!॥ १५७॥
चमकैः पुरुषसूक्तैश्च फलैः पञ्चामृतैरपि।
नाळिकेरेक्षुसलिलैः सुगन्धोदकवारिणा॥ १५८
संस्नाप्य च ततो लिङ्गं पीठे संस्थापयेच्छिवे!।

लिङ्गस्य परितः—ॐ वामदेवाय नमः, ज्येष्ठाय, रुद्राय, कालाय, कलविकरणाय, बलाय, बलविकरणाय, बलप्रमथनाय, सर्वभूतदमनाय इत्यष्टासु दिक्षु मनोन्मनाय इति शिवसन्निधौ पुष्पैरभ्यर्च्य। ॐ ह्रां हृदयाय नमः। ॐ ह्रीं शिरसे स्वाहा। ॐ ह्रूं शिखायै वषट्। ॐ ह्रैं कवचाय हुं॥ ॐ ह्रौं नेत्रत्रयाय वौषट्। ॐ ह्रः अस्त्राय फट्। ह्रां ईशानाय नमः। ह्रीं तत्पुरुषाय नमः। ह्रूं अघोराय नमः। ह्रैं वामदेवाय नमः। ह्रौं सद्योजाताय नमः॥

मूलमन्त्रेण देवाय दद्यात्पुष्पांजलिं प्रिये!॥ १५९॥
मूलमन्त्रषडङ्गेन न्यासं कुर्याच्छिवस्य च।
लिङ्गस्य दक्षिणे भागे ऋगादीन्निगमानपि॥ १६०॥
ब्रह्माणं पृथिवीं तोयं विष्णुं रुद्रं हुताशनम्।
ईश्वरं पवनं चैवमाकाशं च सदाशिवम्॥ १६१॥

श्रीकण्ठममृतांशुं च भैरवं भास्करं तथा ।
परं शिवं परात्मानं पूजयेन्मतिमान् क्रमात् ॥ १६२ ॥

लिङ्गस्य वामपार्श्वे तु ब्राह्म्यादीस्सप्त मातरः ।
महालक्ष्मीं महाकाळीं दुर्गां स्कन्दविनायकौ ॥ १६३ ॥

योगिन्यः क्षेत्रपालाश्च शक्तयश्चादिपीठकाः ।
ओड्याणशक्तिर्जालन्ध्री तथा पूर्णा गिरिः प्रिये ! ॥

कामेश्वरीति संपूज्या रुद्रशक्तिस्सुरार्चिते ! ।
लोपामुद्रा कुब्जिका च कालसंकर्षणी तथा ॥ १६५ ॥

मधुरादिरसा गन्धाः सर्वधान्यानि पार्वति ! ।
दिव्यौषध्यस्सुधा हाला विषं चर्मादिधातवः ॥ १६६ ॥

इन्द्रियाणि मनो बुद्धिरहङ्कारश्च चेतनः ।
शब्दाद्या विषयाः पूज्या देहाङ्गानि च शाम्भवि ! ॥

लिङ्गस्य पश्चिमे भागे समुद्रास्सरितो नदाः ।
पर्वता मेरुमुख्याश्च भास्कराद्या नव ग्रहाः ॥ १६८ ॥

ज्योतिश्चक्रं ध्रुवश्चैव शिशुमारः प्रजापतिः ।
कलाः काष्ठाश्च घटिका मुहूर्ताः प्रहरा दिनम् ॥ १६९ ॥

रात्रिः पक्षश्च मासश्च ऋतुकालायनानि च ।
संवत्सरा युगाः कल्पा दिशस्तारास्तिथिश्शिवे ! ॥

पाताळानि च नागेन्द्रास्तथा कालाग्निरुद्रकाः ।
यक्षाः पिशाचभूताश्च राक्षसा दनुजास्तथा ॥ १७१ ॥

गुह्यका दुष्टवेताला राजयक्ष्मादयो गदाः ।
मन्त्राश्शस्त्राणि चास्त्राणि संपूज्य क्रमशः प्रिये ! ॥

लिङ्गस्य पूर्वभागे तु संपूज्या गुरुपंक्तयः ।
सिद्धास्साध्याश्च मुनयो योगिनो ब्रह्मवादिनः ॥ १७३ ॥

विद्याधराः किन्नराश्च गन्धर्वश्चाश्विनौ तथा ।
वसवोऽप्सरसां मुख्या श्रृङ्गारादिरसा नव ॥ १७४ ॥

गीतं नृत्तानि तद्भेदाः काश्यपाद्यास्तथा दश ।
रुद्राः समनवः पूज्या भास्करा वह्नयस्त्रयः ॥ १७५ ॥

विश्वे देवाश्च पितरो मातरः पितृदेवताः ।
कुलाचार्या रसाचार्याः पूर्वाचार्याः शिवार्चकाः ॥ १७६॥

मत्स्यादिदशजन्मानि जिनो लोकायतस्तथा ।
नरकाद्यास्सर्वलोका गरुडा गरुडाण्डकाः ॥ १७७ ॥

ब्रह्माण्डाः खेचरास्सर्वे भूचराश्च जलेचराः ।
सम्पूज्य देवतास्सर्वाः प्रणवादिनमोऽन्तकैः ॥ १७८ ॥

तत्तन्नामचतुर्थ्यंतैः पुष्पगन्धाक्षतैः प्रिये ! ।
देवाय वस्त्रयुगलं उपवीतद्वयं तथा ॥ १७९ ॥

मधुपर्कं दिव्यगन्धमक्षतान् कुसुमानि च ।
सदा कैतकवर्ज्यानि दिव्यानि विदलानि च ॥१८०॥

तत्पुष्पाणि च कह्लारकमलोत्पलकैरवम् ।
जातीचंपकपुन्नागपूगनारङ्गचूतकैः ॥ १८१ ॥

मागधीमाधवीमल्लीयूथिकाप्रभृतीनि च ।
दमनी मरुवं चैव रसेन्द्राय समर्पयेत् ॥ १८२ ॥

धूपं दशाङ्गं दीपञ्चापूपान्नं घृतपायसम् ।
सषड्रसानि शाकानि शुद्धगन्धोत्तमान्वितम् ॥ १८३ ॥

लेह्यं चोप्यादि नैवेद्यं पारदेन्द्राय दर्शयेत् ।
हस्तप्रक्षालनं देवि ! दद्याद्गन्धोदकेन च ॥ १८४ ॥

सुवासितानि पूगानि घनसारयुतानि च ।
अवदातानि साम्राणि नागवल्लीदलानि च ॥ १८५ ॥

मुक्ताफलोद्भवं चूर्णं ताम्बूलं च समर्पयेत् ।
दर्पणं चामरद्वन्द्वं छत्रं नृत्तं च गीतकम् ॥ १८६ ॥
उपचारेषु सर्वेषु दद्यादाचमनं प्रिये ! ।
सर्वोपचारान्मूलेन दद्यात्स्तोत्रं जपेच्छिवे ! ॥ १८७ ॥
रसेन्द्रभैरवं देवं ध्यात्वा देवीं रसांकुशाम् ।
माहेश्वरांश्च विनतां गन्धपुष्पादिभिर्यजेत् ॥ १८८ ॥
अङ्गुष्ठानामिकाभ्यां च दद्याद्गन्धोत्तमान्वितम् ।
बिन्दुमूलेन देवाय देव्यै च गुरुपंक्तये ॥ १८९ ॥
क्रमादावरणस्थेभ्यो देवीभ्योऽपि च तर्पयेत् ।

"ह्रीं आनन्दशिवमूर्तिमाराधयामि । ह्रीं परानन्दशिवमूर्तिमाराधयामि । ह्रीं परापरानन्दशिवमूर्तिमाराधयामि । श्रीं आनन्दसिद्धमूर्तिमाराधयामि । श्रीं परानन्दसिद्धमूर्तिमाराधयामि । श्रीं परापरानन्दसिद्धमूर्तिमाराधयामि । क्लीं आनन्दगुरुमूर्तिमाराधयामि । क्लीं परानन्दगुरुमूर्तिमाराधयामि । क्लीं परापरानन्दगुरुमूर्तिमाराधयामि ॥"

तेभ्यो दत्वा प्रसादं च तैरनुज्ञापितस्स्वयम् ॥ १९० ॥
कुण्डल्यामात्मतत्वं च विद्यातत्वं च नाभिगम् ।
हृदये शिवतत्वं च सर्वतत्वं हि तालुगम् ॥ १९१ ॥
त्रितत्वमेवं सञ्चिन्त्य प्रसादं च समन्त्रकम् ।
ततः प्रज्वलितं स्मृत्वा ज्योतिरन्तर्गतं प्रिये ! ॥ १९२ ॥
स्वीकुर्वीत प्रसादं च यथेष्टं सुरसेविते ! ।
प्रीणन्ति पितरो, हर्षान्मूर्छया सर्वदेवताः ॥ १९३ ॥
अज्ञाना ? वप्रीतिः स एवाहं न संशयः ।

॥ रसेन्द्रबलिक्रमः ॥

गन्धोत्तमौदनं शुद्ध(ा)क्षतजं च, घृतं मधु ॥ १९४ ॥

संयोज्य पञ्चखण्डं च कृत्वा दद्यात्क्रमेण च ।
दक्षिणोत्तरपूर्वासु पश्चिमायां च मध्यमे ॥ १९५ ॥
तांस्तान्मन्त्रान्समुच्चार्य बलिं दद्यात्ततो नरः ।
प्रणवं मायां कमलां देवीं पुत्रप्रदं ततः ॥ १९६ ॥

ततो वटुकनाथाख्यं, कपिलं जटाभारभासुरं च, ततः पिंगळ त्रिणेत्र
ां बलिं पूजां गृह्ण गृह्ण स्वाहा । ॐ ह्रीं श्रीं सिद्धयोगिनीभ्यस्सर्वमातृ-
ो नमः । ॐ ह्रीं श्रीं सर्वभूतेभ्यस्सर्वभूतपतिभ्यो नमः । ॐ ह्रीं श्रीं
नक्षेत्रपाल इमां बलिं पूजां गृह्ण गृह्ण स्वाहा । ॐ ह्रीं श्रीं रसेन्द्र क्षेत्रपाल
नराजेश्वर इमां बलिं पूजां गृह्ण गृह्ण स्वाहा ॥

बलिं दद्यादिति शिवे सर्वविघ्नोपशान्तये ।
ततश्चाष्टोत्तरशतं जपेन्मूलं रसाग्रतः ॥ १९७ ॥
ततः स्तोत्र जपेद्देवि रसभैरवतुष्टये ।
संतुष्टाः सर्वदेवाः स्युः तुष्टे तु रसभैरवे ॥ १९८ ॥
अयं नित्यार्चनविधिः प्रोक्तस्सर्वत्र दुर्लभः ।

पारदपूजाफलम् ।

विद्धि मां पारदं देवि तत्स्मर्ता मत्समः प्रिये ॥
पारदस्त्वधिको मत्तो मदीयत्वाच्च सारतः ।
रसस्य स्मरणं पुण्यं दर्शनं स्पर्शनं तथा ॥ २०० ॥
पूजनं भक्षणं दानं षोढा पुण्यमुदीरितम् ।
सात्विकं राजसं चैव तामसं त्रिविधं वपुः ॥ २०१ ॥
सात्विकं मुक्तिदं शुभ्रं बालं द्विभुजमण्डितम् ।
पूर्णपात्रं सूक्ष्मदण्डं द्विनेत्रं किंकिणीस्रजम् ॥ २०२ ॥
राजसं भुक्तिदं रक्तं किरीटशशिशेखरम् ।
चतुर्भुजं च तरुणं नीलकण्ठं त्रिलोचनम् ॥ २०३ ॥

सर्वैश्वर्यप्रदं ध्यायेत् शूलपात्रवराभयम् ।
तामसं कृष्णवर्णं च ज्वलदूर्ध्वशिरोरुहम् ॥ २०४ ॥

अष्टादशभुजं त्र्यक्षं पूर्वोक्तं चिन्तयेद्रसम् ।
सर्वसिद्धिप्रदं देवि सर्वकामफलप्रदम् ॥ २०५ ॥

स्मरणं रसराजस्य सर्वोपद्रवनाशनम् ।
हृदम्भोजस्थितं ध्यायेन्नश्यन्त्येनांसि भैरवि ॥ २०६ ॥

दर्शनं पारदेन्द्रस्य हन्ति पापं त्रिकालजम् ।
सेतुकेदारपर्यन्तदिव्यलिंगौघदर्शने ॥ २०७ ॥

यत्पुण्यं लभते मर्त्यः तत्कोटिगुणितं भवेत् ।
पृथिव्यां सर्वतीर्थेषु सागरान्तेषु दर्शनात् ॥ २०८ ॥

स्नानपानादिभिः पुण्यं तत्कोटिगुणितं भवेत् ।
गोहत्यानियुतं देवि भ्रूणहत्याशतानि च ॥ २०९ ॥

ब्रह्महत्यासहस्राणि नश्यन्ति रसदर्शनात् ।
गवां कोटिप्रदानेन स्वर्णकोटिशतेन च ॥ २१० ॥

अश्वमेधसहस्रेण यत्पुण्यं तच्च दर्शनात् ।
रसस्य स्पर्शनं हन्यादगम्यागमनं प्रिये ॥ २११ ॥

परद्रव्यापहारं च पापं प्राणिवधार्जितम् ।
सप्तद्वीपे धरण्यां च पाताळे गगने दिवि ॥ २१२ ॥

यान्यर्चयंति लिंगानि तत्पुण्यं रसपूजया ।
स्वायंभुवेषु लिङ्गेषु दिव्येषु कृतपूजया ॥ २१३ ॥

यत्पुण्यं रसलिङ्गस्य पूजया तत्फलं भवेत् ।
योगिनोऽष्टाङ्गनिरता यत्पदं ब्रह्मवादिनः ॥ २१४ ॥

तत्पदं समवाप्नोति रसलिङ्गस्य पूजया ।
कुंकुमागरुकस्तूरीकर्पूरान्तर्गतं रसम् ॥ २१५ ॥

मूर्छितं रसलिङ्गाय दद्यादिष्टार्थसिद्धये ।
भक्षणाद्रसराजस्य सर्वपापं विनश्यति ॥ २१६ ॥

अनादिमायामलिनमात्मानं च विशोषयेत् ।
भवरोगं हरेच्छीघ्रं त्रितापं च विनाशयेत् ॥ २१७ ॥

रसराजस्य दानेन चतुरब्ध्यंतमेदिनीम् ।
महामेरुसमं स्वर्णं दत्वा यत्तत् फलं भवेत् ॥ २१८ ॥

ब्रह्मरूपी शुद्धरसो विष्णुरूपी स मूर्छितः ।
भस्मीकृतो रुद्ररूपी बद्धस्सूतस्सदाशिवः ॥ २१९ ॥

कामरूपी जलूकाभः कालरूपी च दोषवान् ।
मूर्छितो भस्मितो बद्धः पारदेन्द्रो महेश्वरि ॥ २२० ॥

व्याधिमृत्युदरिद्रत्वं हरतेऽसौ कृपाकरः ।

रसेन्द्रस्तोत्रम् ।

ददासि त्वं रसेन्द्राशु शब्दस्पर्शनधूमतः ॥ २२१ ॥

स्वर्णमर्बुदकोट्यन्तं त्राहि खेचरसिद्धिद ।
नमस्ते कालकालाय नमस्सर्वगुणात्मने ॥ २२२ ॥

वलीपलितनाशाय महावीर्यप्रदायिने ।
नमश्शस्त्रास्त्रहन्त्रे च मायांभोनिधिपारद ॥ २२३ ॥

पारदेन्द्र नमस्तुभ्यं कामिनीकेळिमन्मथ ।
सुधारूप त्रिदोषघ्न नमस्ते षड्रसात्मने ॥ २२४ ॥

घनत्वात्पृथिवीरूप द्रवत्वाज्जलरूपिणे ।
तेजोऽधिकत्वात्तेजस्विन् चाञ्चल्याद्वायुरूपिणे ॥

सूक्ष्मत्वाद्रसरूपाय नमस्ते भूतरूपिणे ।
नमस्ते योगयोग्याय प्रसीदामरवन्दित ॥ २२६ ॥

वेदगोद्विजराजेन्द्रगुरुवीरादिहिंसया ।
सम्भूतक्षयकुष्ठादीन् रोगान् हरसि पावन ॥ २२७ ॥

नष्टेन्द्रियार्थानज्ञानान् त्राता त्वमसि पारद ।
सर्वौषधीभ्योऽप्यधिको ह्यणुमात्रोपयोगतः ॥ २२८ ॥

एकोऽपि सर्वदोषघ्नोऽरुचिनाशन ते नमः ।
त्वया सृष्टा महेन्द्राद्या सुरा ब्रह्मादयः कलाः ॥

चन्द्रार्कग्रहनक्षत्रशिवभैरवशक्तयः ।
ज्ञानाज्ञानगुणा लोका गन्धर्वोरगराक्षसाः ॥ २३० ॥

दिव्यौषधानि सर्वाणि सर्वसिद्धिकराण्यपि ।
सूतेन्द्र भवतः श्रीमन् कलां नार्हन्ति षोडशीम् ॥

प्रत्यक्षशंभो सूतेन्द्र किमन्यैर्भवति स्थिते ।
अणिमादिगुणोपेते नानासिद्धिप्रदायके ॥ २३२ ॥

योगिनो हेममुख्यानि लोहान्यक्षयतां सदा ।
अमृतत्वं प्राप्नुवन्ति सेवया तत्र कोज्वल(?) ॥

दृश्यादृश्यस्वरूपं त्वां भोगमोक्षप्रदं परम् ।
यो न जानाति सूतेन्द्र स मां वेत्ति कथं नरः ॥

गुरुर्माता पिता भ्राता धनं विद्या गतिस्सुहृत् ।
रस त्वमेव भूतानां त्वत्तः कोऽन्यो हितंकरः ॥

रसेन्द्र तव योगे च शास्त्रे स्तोत्रे रसायने ।
यस्तु भक्तियुतो लोके स एवाहं न संशयः ॥ २३६ ॥

ब्रह्मज्ञानेऽपि निष्णातो यस्त्वां निन्दति पारद ।
त्याज्योऽसौ सर्वलोकेषु नैवाहं रक्षितुं क्षमः ॥ २३७ ॥

यस्त्वां नास्तीति च वदेत् तस्य सिद्धिर्न कुत्रचित् ।
यस्त्वामस्तीति च वदेत्तस्य सिद्धिर्भवेत्सदा ॥ २३८ ॥

रसेन्द्रं यस्तु लोकेऽस्मिन्कुलीनो वाऽधमान्वयः ।
संस्कृतं कुरुते सूत त्वामष्टादशकर्मभिः ॥ २३९ ॥

स पुण्यस्स व्रती धन्यः स श्लाघ्यस्स च बुद्धिमान् ।
स पुमान्स च सर्वज्ञः स सिद्धस्स च दैवतम् ॥

तत्कुलं पावनं भूमिः पुण्या राजा जयान्वितः ।
तत्पुरं सोत्सवं नित्यं कृतार्था च तदम्बिका ॥ २४१ ॥

तस्य सन्दर्शनं पुण्यं स्पर्शनं भाषणं तथा ।
प्रत्यक्षादिप्रमाणेन पारद त्वं सदाशिवः ॥ २४२ ॥

त्वत्तो देहादि लोहानि वज्रत्वं यान्ति हेमताम् ।
रसेन्द्र त्वत्प्रसादेन मानिन्यो मृगलोचनाः ॥ २४३ ॥

चक्रवाकसमोत्तुङ्गपीनवृत्तस्तनोज्ज्वलाः ।
चञ्चला मन्मथासक्ता विद्रुमाधरशोभिताः ॥ २४४ ॥

शुकतुण्डप्रतीकाशवक्रतीक्ष्णनखांकुराः ।
शिरीषमालासुभुजाः चम्पकस्रक्समप्रभाः ॥ २४५ ॥

निम्ननाभिसमुद्भूतरोमराजिविराजिताः ।
सर्वांगसौष्ठवाः कान्ताः स्निग्धा वश्या भवन्ति च ॥

सूतेन्द्र शुष्ककाष्ठानां राशिमग्निर्यथा दहेत् ।
तथैव जन्मदारिद्र्यमृत्युदुःखमहामयान् ॥ २४७ ॥

जारणार्थेऽग्निमध्ये त्वां धारयेत्कति वासरान् ।
तावत्कल्पसहस्राणि शिवलोके सुखं वसेत् ॥ २४८ ॥

तव कार्येषु सूतेन्द्र किंचिद्द्रव्यं व्ययेन्नरः ।
तेषां ददासि तद्वित्तं कोटिकोटिगुणाधिकम् ॥ २४९ ॥

परमा पारदी विद्या सर्वलोकेषु दुर्लभा ।
भोगमोक्षप्रदा पुण्या पुत्रारोग्यप्रवर्धनी ॥ २५० ॥

ये त्वां निन्दन्ति सूतेन्द्र मार्जालखरवायसाः ।
जम्बूका ऋषभाः श्वानः क्लीबान्धबधिरा जडाः ॥

मूकाः कुब्जाः पङ्गवश्च व्यङ्गा वन्ध्याश्च रोगिणः ।
कैवर्ताः पापकर्माणो जायन्तेऽनेकजन्मसु ॥ २५२ ॥

भवतो निन्दकैस्सार्धं भाण्डपक्वान्नमिश्रणम् ।
यः कुर्यादासनं शय्यां भोजनालापसंगतिम् ॥ २५३ ॥

स पापिष्ठो भवेत्त्याज्यः सर्वधर्मबहिष्कृतः ।
इति स्तोत्रं मया प्रोक्तं पारदेन्द्रस्य भैरवि ॥ २५४ ॥

यः पठेत् शृणुयाद्भक्त्या त्रिसन्ध्यं रससिद्धये ।
ब्रह्महत्यादिपापैश्च पातकैरुपपातकैः ॥ २५५ ॥

त्रिकर्मकलिभिर्देवि मुच्यते नात्र संशयः ।
घोरे युद्धे महारण्ये दिग्भ्रमे शत्रुसंकटे ॥ २५६ ॥

नदीप्रतरणे देवि चोरव्याघ्रादिसङ्कटे ।
जपेत्स्तोत्रमिदं देवि ध्यात्वा श्रीरसभैरवम् ॥ २५७ ॥

इति स्तुत्वा सूतराजं सर्वं कर्म समर्पयेत् ।
रसो दाता रसो भोक्ता रसः कर्ता च कारणम् ॥

रसो होता च हव्यं च सर्वव्यापी रसः सदा ।
अनेनैव च मन्त्रेण रसेन्द्राय समर्पयेत् ॥ २५९ ॥

ततो न्यासं च मूलेन कुर्याद्ध्यात्वा च पूर्ववत् ।
संहारमुद्रां कृत्वाऽथ वहेन्नयां रसेश्वरम् ॥ २६० ॥

हृत्पद्मे स्थापयेद्देवं सांगावरणशक्तिकम् ।
शिवोऽहमिति सद्भावं चिन्तयेद्रसदेशिकः ॥ २६१ ॥

पूजास्थानं च संमार्ज्य प्रोक्षयेदुदकेन च ।
ततो होमालयं प्राप्य समाचम्य च देशिकः ॥ २६२ ॥

शालायामग्निदिग्भागे योनिकुण्डे त्रिमेखलम् ।
दर्भैः प्रागुदगग्रैश्च परिस्तीर्णे यथाविधि ॥ २६३ ॥

न्यासं मूलेन संकल्प्य प्राणायामं विधाय च ।
पञ्चभूसंस्कृतं कृत्वा स्वस्त्रिया वा द्विजेन वा ॥ २६४ ॥

आनीय वह्निं निक्षिप्य कुण्डे प्रज्वालयेत्ततः ।
वह्निं पिङ्गजटाजूटं त्रिणेत्रं शुक्लवाससम् ॥ २६५ ॥

रक्ताम्भोजस्थितं देवं माल्याभरणभूषितम् ।
सप्तहस्तं चतुश्शृङ्गं द्विशीर्षं च त्रिपादकम् ॥ २६६ ॥

त्रिधा बद्धं च ऋषभं शक्त्याद्यायुधधारिणम् ।
ध्यात्वा तस्यार्घ्यपाद्यादि कुर्यात्सर्वोपचारकम् ॥ २६७ ॥

गन्धाक्षतसुपुष्पैश्च पूजयेज्जातवेदसम् ।
तस्मिन्नावाहयेद्देवं संचिन्त्य रसभैरवम् ॥ २६८ ॥

न्यासं देवस्य कुर्वीत मूलमन्त्रेण होमयेत् ।
तिलाज्यव्रीहिभिर्मन्त्रं शतमष्टोत्तरं प्रिये ॥ २६९ ॥

अष्टाविंशति वा कुर्यात् मूलात्पूर्वाहुतिं हुनेत् ।
प्राणायामं ततो न्यासं कृत्वा च हृदि धारणम् ॥
एवं नित्यार्चनविधिः प्रोक्तस्तव सुरार्चिते ॥ २७० ॥

। इति श्रीभैरवोक्ते आनन्दकन्दे अमृतीकरणविश्रान्तौ द्वितीयोल्लासः ॥

॥ तृतीयोल्लासः ॥

रसदीक्षाक्रमः ।

अथ दीक्षां प्रवक्ष्यामि सर्वसिद्धिप्रदायिनीम् ।
सा च पञ्चविधा प्रोक्ता समयादिविभेदतः ॥ १ ॥

समया प्रथमा दीक्षा साधकाख्या द्वितीयका ।
निर्वाणाख्या तृतीया च चतुर्थ्याचार्यसंज्ञका ॥ २ ॥

पञ्चमी सिद्धसंज्ञा च प्रायशो दुर्लभा नृणाम् ।
पूर्वोक्तलक्षणोपेतः शिष्यो भक्तिनतश्शुचिः ॥ ३ ॥

गुरुं प्रणम्य चाष्टाङ्गं स्तुत्वा च बहुधा ततः ।
अनुगृह्णीष्व मे दीक्षामिति विज्ञापयेद्गुरुम् ॥ ४ ॥
दीक्षां च विधिवत्प्राप्य शिष्यस्सर्वार्थदृग्भवेत् ।

दीक्षायोग्याः शुभतिथ्यादयः ।

अश्विनीमूलरेवत्यो मृगः पुष्यः पुनर्वसुः ॥ ५ ॥

रोहिणी श्रवणो मैत्रं हस्तस्स्यादुत्तरात्रयम् ।
मघाश्विनी श्रेष्ठतमा दीक्षाकर्मणि तारकाः ॥ ६ ॥

तृतीया पञ्चमी नैव सप्तमी च चतुर्दशी ।
अष्टमी पौर्णमासी च दशमी च त्रयोदशी ॥ ७ ॥

एतास्तु तिथयो मुख्याः सौम्येन्दुगुरुभार्गवाः ।
आदित्य इति वारेषु रसदीक्षा सुशोभना ॥ ८ ॥

समयादीक्षाक्रमः ।

शुक्लपक्षे सुयोगे च करविष्टिविवर्जिते ।
चन्द्रताराबलोपेतविषुवायनसंक्रमे ॥ ९ ॥

ग्रहणे शिवरात्रे च जन्मर्क्षे सुमुहूर्तके ।
शुभग्रहे सिद्धयोगे दद्याद्दीक्षां गुरूत्तमः ॥ १० ॥

रसशालां प्रविश्याथ सर्वोपकरणोज्ज्वलाम् ।
पुष्पमालासमाकीर्णामुत्तोरणपताकिनीम् ॥ ११ ॥

नित्यपूजाग्निकार्यं च कृत्वा दीक्षाक्रमं भजेत् ।
देवस्य दक्षिणे पार्श्वे विस्तरे तण्डुलान् श्रितान् ॥ १२ ॥

चतुरश्रं च तन्मध्ये क्षिपेत्प्रस्थं सुतण्डुलम् ।
तदूर्ध्वं विन्यसेत्कुम्भं सितसूत्रेण वेष्टितम् ॥ १३ ॥

वासोभ्यां वेष्टितं सूतपंचरत्नसमन्वितम् ।
पञ्चमृत्पल्लवत्वग्भिः पावितं जलपूरितम् ॥ १४ ॥

दूर्वागन्धोत्तमतिलहेमदर्भाक्षतान्वितम् ।
शिवसंज्ञमिदं कुम्भं शिवरूपं विचिन्तयेत् ॥ १५ ॥

तद्वामभागे संस्थाप्य वर्धनीसंज्ञकं घटम् ।
शक्तिरूपं च पूर्वोक्तसर्वद्रव्यसमन्वितम् ॥ १६ ॥

परितस्सर्वतोभद्रं श्रीगौरीतिलकं लिखेत् ।
नन्द्यावर्तं स्वस्तिकं च पञ्चवर्णविराजितम् ॥ १७ ॥

प्रक्षाल्य पादौ पाणी च समाचम्य गुरूत्तमः ।
निजासनं समासाद्य प्राणायामत्रयं तथा ॥ १८ ॥

शिष्यस्यास्यायुरारोग्यसंपत्सन्तानवृद्धये ।
मुक्तये चाष्टसिद्ध्यै च सङ्कल्प्याभ्यर्चयेच्छिवम् ॥ १९ ॥

गन्धपुष्पाक्षतैर्धूपैर्दीपै र्नैवेद्यदर्शनैः ।
शिवकुम्भं वर्धनीं च पूजयेत्सोपचारकम ॥ २० ॥

रसांकुशीं मूलमन्त्रं प्रजपेच्च सहस्रकम् ।
तद्दशांशं हुनेत्कुण्डे त्रिकोणे लक्षणान्विते ॥ २१ ॥

फलं त्रिमधुसंयुक्तं ततो गन्धोत्तमान्वितम् ।
क्रमादावृतिदेवांश्च चतुर्थ्यां स्वस्वनामकम् ॥ २२ ॥

स्वाहान्तं प्रणवादिं च समुच्चार्य हुनेद्धविः ।
शिवत्रयं पुरा देवि ततस्सिद्धत्रयं यजेत् ॥ २३ ॥

ततो गुरुत्रयं देवि कुलवृद्धान् गुरूत्तमः ।
योगिनीं पूजयित्वा तु लब्धानुज्ञो गुरुस्ततः ॥ २४ ॥

स शक्तिमानन्दशिवमूर्तिमाराधयामि च ।
तथा परानन्दशिवमूर्तिमाराधयामि च ॥ २५ ॥

एवं त्रिसिद्धमूर्तिं च श्रीबीजसहितं यजेत् ।
एवं त्रिगुरुमूर्तिं च मारबीजयुतं यजेत् ॥ २६ ॥

तत्वत्रयं गृहीत्वा च पुनर्न्यासं समाचरेत् ।
स्वयं शिवतनुर्भूत्वा शिवोऽहमिति भावयेत् ॥ २७ ॥

हृष्टं शक्तियुतं शिष्यं शिवदृष्टा विलोकयेत् ।
स्ववामपार्श्वे संस्थाप्य तन्मूर्धनि विनिक्षिपेत् ॥ २८ ॥

मूलाभिमन्त्रितं भस्म तन्नेत्रं वस्त्ररोधितम् ।
कृत्वा तन्मूर्ध्नि संप्रोक्ष्य शिववर्धनिवारिणा ॥ २९ ॥

त्रिधा स्वदक्षिणे हस्ते शिवं सावरणं यजेत् ।
विज्ञेयशिवहस्तोऽयं भवपाशनिकृन्तनः ॥ ३० ॥

अङ्कुशीमूलमन्त्रं च त्रिवारं च समुच्चरेत् ।
शिष्यदक्षिणकर्णे च कुर्यान्मन्त्रोपदेशकम् ॥ ३१ ॥

पूर्वं गणपतेर्मन्त्रं क्षेत्रपालमनुं ततः ।
ऋषिस्तु गणकश्छन्दो न्यृचिद्गायत्रिका स्मृतम् ॥ ३२ ॥

देवो गणपतिर्ज्ञेयो न्यासं बीजाक्षरेण च ।
आदिवर्गतृतीयार्णं सार्धचन्द्रं गणाख्यकम् ॥ ३३ ॥

पतिं चतुर्थ्या संयुक्तं नमोऽन्तं मनुमुच्चरेत् ।
पाशांकुशं मोदकं च बिभ्राणं स्वविषाणकम् ॥ ३४ ॥

गजाननं प्रवाळाभं मकुटेन्दुकलाधरम् ।
तुन्दिलं गणनाथं च ध्यात्वा लक्षं जपेन्मनुम् ॥ ३५ ॥

दशांशं तर्पणं होमं सगुडं सतिलं हुनेत् ।
कषबिन्दुयुतं क्षेत्रपालं च सचतुर्थिकम् ॥ ३६ ॥

नमोऽन्तं मनुमुच्चार्य न्यासं बीजाक्षरेण च ।
छन्दः पंक्तिर्मुनिर्ज्ञेयो भृगुर्देवश्च भैरवः ॥ ३७ ॥

चतुर्भुजं शूलपात्रवरदाभयशोभितम् ।
कालाम्बुदनिभं नागभूषणं किंकिणीस्रजम् ॥ ३८ ॥

त्रिणेत्रं वक्रदंष्ट्रं च ध्यात्वा लक्षं जपेन्मनुम् ।
दशांशं तर्पणं होमं पायसं त्रिमधुप्लुतम् ॥ ३९ ॥

हुनेदिति समादिश्य सामयाचारिकं भजेत् ।
देवतापरिचर्यां च शुश्रूषां च गुरोः कुरु ॥ ४० ॥

अतन्द्रितो जपं कुर्यात् शास्त्रश्रवणमादरात् ।
पूर्वोक्ताचारमार्गेण निरतो भव संततम् ॥ ४१ ॥

प्रह्वः कृतांजलिर्भूत्वा करिष्यामि तथा प्रभो ।
धन्योऽहं कृतकृत्योऽस्मि श्रीनाथ त्वत्प्रसादतः ॥ ४२ ॥

इति विज्ञापयेच्छिष्यः सनयाचारबृंहितः ।
प्रातस्तरां समुत्थाप्य गुरूंश्च शिरसि स्मरेत् ॥ ४३ ॥

निवेद्यावश्यकं कर्म स्नातस्संध्यां समाचरेत् ।
नद्यास्तीर्थे तटाके वा पुष्करिण्यां शुचौ जले ॥ ४४ ॥

उपस्पृश्य च संकल्प्य नित्यतर्पणमाचरेत् ।
आदौ शिवत्रयं विघ्ननाथं क्षेत्राधिपं हरिम् ॥ ४५ ॥

ब्रह्माणं भास्करादींश्च ग्रहान् दुर्गां च मातृकाः ।
भैरवानसितांगादीन् ततस्सिद्धत्रयं वदेत् ॥ ४६ ॥

आदिनाथं मीननाथं गोरक्षं कोंकणेश्वरम् ।
जालन्ध्रेशं कन्धनीशमोड्डीशं चिंचिणीश्वरम् ॥ ४७ ॥

चौरङ्गिमेतान्नाथाख्यान्नव संतर्पयेत्ततः ।
चौरङ्गिं चर्पटिं घोडाचूळिं रामद्वयं ततः ॥ ४८ ॥

भोलगोविन्दसिद्धं च व्याडिन्नागार्जुनं तथा ।
कोरण्डं शूर्पकर्णं च मुक्तार्यीं रेवणं तथा ॥ ४०. ॥

सिद्धं कुक्कुरपादं च शूर्पपादं कणेरिकम् ।
सिद्धं किंकिणिकाख्यं च सिद्धान् षोडश तर्पयेत् ॥

ततो गुरुत्रयं तर्प्य मातरं पितर गुरुम् ।
आचार्यं भ्रातरं मित्रं तर्प्य चान्यान्कुलोद्भवान् ॥ ५१ ॥

तर्पयेद्विधिनाऽऽचम्य देवताराधनं ततः ।
नद्यास्तीरे तटाके वा गोष्ठे देवालये तथा ॥ ५२ ॥

शुचिस्थले वा संस्तीर्य सैकतं वर्तुलाकृतिम् ।
आवाहयेद्दिनाधीशं पाटलं शिवरूपिणम् ॥ ५३ ॥

द्विनेत्रपद्मयुगळधारिणं द्विभुजं परम् ।
रक्तस्रगम्बरालेपभूषापद्मासनोज्ज्वलम् ॥ ५४ ॥

ध्यात्वार्चयेद्रक्तपुष्पैस्ततो विघ्नेशभैरवौ ।
ध्यात्वा पूर्वोक्तवत्तौ द्वौ रक्तपुष्पैस्समर्चयेत् ॥ ५५ ॥

अष्टाङ्गदण्डप्रणतिं कुर्यात् द्वादशवारकम् ।
पुनस्संस्थापयेत्स्वान्ते सेवायै स्वगुरोर्व्रजेत् ॥ ५६ ॥

इत्युक्ता समया दीक्षा

साधकदीक्षा ।

साधका कथ्यतेऽधुना ।
समयाचारनिरतं सच्छिष्यं पक्कमानसम् ॥ ५७ ॥
दीक्षयेत्सुदिने लग्ने दीक्षया साधकाख्यया ।
कुर्यान्नैमित्तिकीं पूजां शिष्यमावाहयेद्गुरुः ॥ ५८ ॥
स्वयं शिवतनुश्शिष्यं गौरीगर्भगतं स्मरेत् ।
भूमौ विभूतिं संस्तीर्य तस्मिन्कोणत्रयं लिखेत् ॥
तत्रोपवेश्य शिष्यं च बन्धयित्वा विलोचने ।
गर्भाधानं पुंसवनं सीमन्तोन्नयनं ततः ॥ ६० ॥
जातकर्म च दीक्षाङ्गं नामधेयं च कल्पयेत् ।
व्रतकर्मणि सम्प्रोक्ष्य मूलमन्त्रेण भस्मना ॥ ६१ ॥
गौरीपुत्रं भावयित्वा तस्य दीक्षां प्रकल्पयेत् ।
शिवदृष्ट्या विलोक्यामुं शिवभस्म च मूर्धनि ॥ ६२ ।
निधाय मूलमन्त्रञ्च पूजयेद्दशवारकम् ।
तस्य दक्षिणकर्णे च उपदिश्याद्दशाक्षरम् ॥ ६३ ॥

रसगायत्री ।

रसेन्द्रभैरवं मन्त्रं गायत्रीं रससंज्ञिकाम् ।
स बिन्दुहुतभुग्बीजं रसेन्द्रस्य पदं ततः ॥ ६४ ॥
भैरवं च चतुर्थ्यन्तं कर्मास्त्रं च दशांशकम् ।
वह्निबीजं दीर्घयुक्तं करन्यासं समाचरेत् ॥ ६५ ॥
अघोराख्यो ऋषिश्छन्दो विराड्देवो महेश्वरः ।
पूर्वसेवाजपं लक्षं दशांशं होमतर्पणम् ॥ ६६ ॥
तिलाज्यव्रीहिभिः कुर्याद्धोमं निश्चलमानसः ।
पूर्वोक्तां रसगायत्रीं जपेल्लक्षं च तर्पणम् ॥ ६७ ॥

हुनेद्दशांशमाज्येन सतिलव्रीहिभिः प्रिये ।
दद्याच्छिष्यायाक्षमालां रसलिङ्गं रसागमम् ॥ ६८ ॥

पूर्वोक्ताचारवान् भूत्वा रसलिङ्गं समर्चयेत् ।
स्वशास्त्रार्थावगमनं कुर्यात्सूतेन्द्रसंस्कृतिम् ॥ ६९ ॥

गुरुसेवारतं नित्यं शिष्यमाज्ञापयेदिति ।
शिष्यो बद्धाञ्जलिर्नम्रस्तवाज्ञामाचराम्यहम् ॥ ७० ॥

इत्युक्ता साधका दीक्षा

निर्वाणदीक्षा ।

निर्वाणाख्या प्रशस्यते ।
कृतनित्यक्रियः पूर्वं कृतनैमित्तिकार्चनः ॥ ७१ ॥

पूर्ववच्छिवकुम्भादि वर्धनीं स्थापयेत्क्रमात् ।
स्ववामे भस्म संस्तीर्य षट्कोणं भूगृहं लिखेत् ॥

शिष्यं संवेश्य कुम्भस्थजलैः संप्रोक्षयेद्गुरुः ।
मूलाभिमन्त्रितं भस्म तस्य मूर्धनि निक्षिपेत् ॥ ७३ ॥

गन्धपुष्पाक्षतं दद्यात् बध्नीयाद्दक्षिणे करे ।
कङ्कणं चरणाङ्गुष्ठब्रह्मरन्ध्रान्तमानकम् ॥ ७४ ॥

सूत्रं तन्मूलमन्त्रेण मन्त्रितं सुरभीकृतम् ।
शिवहस्तं च तन्मूर्ध्नि निधाय गुरुसत्तमः ॥ ७५ ॥

रसांकुशां द्वादशार्णां उपदिश्यान्मनुं परम् ।
रसभैरवदैवत्यं दद्याच्छिष्याय देशिकः ॥ ७६ ॥

ऋषिश्छन्दो देवता च न्यासं पूर्वोक्तवत्प्रिये ।
तर्पणं चाथ होमं च ध्यानं कुर्याच्च पूर्ववत् ॥ ७७ ॥

उत्थाय च गुरुं नत्वा बहुशस्स्तोत्रमुच्चरेत् ।
गुरुश्शिष्याय वै दद्याद्व्याघ्रचर्मासनं च यत् ॥ ७८ ॥

भस्त्रिकां वस्त्रसंपूर्णां दद्याद्भैषज्यभस्त्रिकाम्।
रसागमं पाठयित्वा भव शिष्य चिकित्सकः ॥ ७९ ॥
रुद्ररूपी भवान् जातः सर्वभूतहितो भव।
इत्यादिशेद्गुरुश्शिष्यं शिष्यो हृष्टमनास्ततः ॥ ८० ॥
कृतकृत्योऽस्मि पूतोऽस्मि तीर्णसंसारसागरः।
इति विज्ञापयेच्छिष्यः स्तुत्वा च बहुधा गुरुम् ॥ ८१ ॥
प्रोक्ता निर्वाणदीक्षेयं

आचार्यदीक्षा।

अथाचार्याभिषेचनम्।

निर्वाणदीक्षितस्यास्य शिष्यस्यापि महात्मनः ॥ ८२ ॥
आचार्यदीक्षां कुर्वीत यथावद्गुरुसत्तमः।
यथा निर्वाणदीक्षायास्तथा सर्वं प्रकल्पयेत् ॥ ८३ ॥
विशेषाच्छिववर्धन्योः पुरतस्स्थापयेद्धटम्।
रूप्यगन्धादिलोहाशा(?)दिव्यौषधगणान्वितम् ॥ ८४ ॥
शिवकुम्भवदन्यच्च सर्वमस्मिन्विनिक्षिपेत्।
गुरुकुम्भं जपेत्स्पृष्ट्वा मूलमष्टोत्तरं शतम् ॥ ८५ ॥
गुरुकुम्भमिमं विद्धि गुरुमन्त्रेण पूजयेत्।
आवाहनासनार्घ्याद्यैरुपचारैश्च षोडशैः ॥ ८६ ॥
शिवादिपंक्तिं तत्रैव पूजयेद्गुरुणा सह।
यथापूर्वं समासीनं शिष्यं चैकाग्रमानसम् ॥ ८७ ॥
पूर्ववच्छिववर्धन्योरम्बुना परिषेचयेत्।
पूर्ववच्छिवहस्तं च मूलमन्त्रोपदेशकम् ॥ ८८ ॥
कृत्वा तदुत्तमाङ्गे च गुरुपंक्तिं गुरुं तथा।
आवाहनाद्यैस्संपूज्य गन्धस्रग्धूपदीपकैः ॥ ८९ ॥

फलगन्धोत्तमोपेतैर्नैवेद्यैः पूजयेत्क्रमात् ।
गुरुः कुम्भजलैः कुर्यात्प्रोक्षणं पञ्चपल्लवैः ॥ ९० ॥
मूलमन्त्रेण शतधा शिवपंक्त्या त्रिसप्तधा ।
तथैव सिद्धपंक्त्या च गुरुपंक्त्या तथैव च ॥ ९१ ॥
शिष्याय गुरुभक्ताय शक्तियुक्ताय धीमते ।
हारकेयूरकटकमुद्रिकामकुटानि च ॥ ९२ ॥
वाहनासनसच्छत्रचामरव्यजनानि च ।
मणिकुण्डलयुग्मं च भूत्याढ्यं पात्रमक्षयम् ॥ ९३ ॥
सशिरस्त्राणमुष्णीषं पट्टकूर्पासमुत्तमम् ।
योगपट्टं योगदण्डं तथैवोड्याणबन्धनम् ॥ ९४ ॥
दद्यात्तस्मै तथैवाज्ञां त्वमाचार्योऽसि संप्रति ।
ईश्वरोऽस्यद्य धन्योऽसि सर्वेषां देशिको भव ॥ ९५ ॥
रसागमानां दिव्यानां व्याख्याता भव तत्ववित् ।
इत्यादिशेद्गुरुश्शिष्यं प्रणतं गुरुवत्सलम् ॥ ९६ ॥
इति चाचार्यदीक्षेयं

सिद्धदीक्षा ।

सिद्धदीक्षाद्य कथ्यते ।
नवाहं सप्तरात्रं वा पञ्चरात्रं त्रिरात्रकम् ॥ ९७ ॥
वीराः शक्तियुताः पूज्याः एकविंशति चान्वहम् ।
तत्संख्या योगिनः पूज्याः कुमाराः कन्यकाः स्त्रियः ॥
गन्धपुष्पाक्षतैः पुष्पैः फलगन्धोत्तमार्पणैः ।
तोषयित्वा प्रदद्याच्च वस्त्राभरणदक्षिणाः ॥ ९९ ॥
अथासनसमासीनं शिष्यं भक्तियुतं शुचिम् ।
स्पृष्ट्वा कराभ्यां तच्छीर्षं दक्षिणे श्रवणे मनुम् ॥ १०० ॥

वह्निं सबीजं शीतांशुं सविसर्गं च दीक्षयेत्।
मूलाधारात्समुद्भूतं रेफं वह्निशिखोपमम् ॥ १०१ ॥

षडाधाराम्बुजं तीर्त्वा ब्रह्मरन्ध्रान्तगं स्मरेत्।
ब्रह्मरन्ध्राद्द्रवीभूतं सकारं सोमरूपिणम् ॥ १०२ ॥

आप्लावयन्तं सर्वाङ्गं सिद्धस्सञ्चिन्तयेन्मनुम्।
उच्छ्वासनिश्वासभवं संहारस्थितिकारणम् ॥ १०३ ॥

ज्ञात्वेत्थं मनसा नित्यं सर्वमन्त्रात्मकं सदा।
सर्वदेवमयं पुण्यं सर्वसिद्धिप्रदायकम् ॥ १०४ ॥

जीवतो मुक्तिदं शुद्धं शिवशक्त्यात्मकं परम्।
रसमन्त्रमिमं विद्धि चाग्नीषोमात्मकं भज ॥ १०५ ॥

एकविंशतिसाहस्रषट्शताधिकसंख्यकम्।
प्रवर्तितं दिवारात्रं मनस्तत्र निधेहि च ॥ १०६ ॥

मन्त्रस्यास्य ऋषिर्जीवश्छन्देत्युक्ताः(?)प्रकीर्तिताः।
रसो देवस्तु रं बीजं सं शक्तिस्तु प्रकीर्तितः ॥

रेफदीर्घयुतं कुर्यात्कराङ्गन्यासमाचरेत्।
ध्यायेद्हृदम्बुजे देवि कोटिसूर्येन्दुसन्निभम् ॥ १०८ ॥

शुद्धस्फटिकसंकाशं रसं संसारपारदम्।
एवं निष्कलरूपं तं ध्यात्वा तन्मयतां व्रजेत् ॥ १०९ ॥

निष्कलरसस्तोत्रम् ॥

त्वं रसस्त्वं शिवस्त्वं हि शक्तिस्त्वं भैरवेश्वरः।
त्वं ब्रह्मा त्वं हि रुद्रश्च सूर्यस्त्वं शीतदीधितिः ॥

त्वं भूस्त्वं सलिलस्त्वं च वह्निस्त्वं च सदा गतिः।
त्वं व्योम त्वं पराकाशः त्वं जीवस्त्वं परा गतिः ॥

त्वं सिद्धस्त्वं प्रबुद्धस्त्वं सुगन्धस्त्वं च मन्मथः ।
त्वं लोकपालस्त्वं तारा मातृकास्त्वं गजाननः ॥ ११२ ॥

त्वं स्कन्दस्त्वं गुरुस्त्वं च त्वं सर्वजनकः शुचिः ।
त्वं यज्वा त्वं हरिस्त्वं च त्रेताग्निस्त्वं च ऋत्विजः ॥

येन त्वमर्च्यसे तेन पूजितास्सर्वदेवताः ।
त्वयि तुष्टे च सन्तुष्टा ब्रह्मविष्णुमहेश्वराः ॥ ११४ ॥

त्वत्पादोदकपानेन सर्वतीर्थफलं लभेत् ।
यस्त्वां पश्यति सद्भक्त्या तमालोकयते शिवः ॥

यस्त्वां संकीर्तयेत्तस्य सर्वमन्त्रफलं भवेत् ।
यत्र त्वं क्षणमात्रे च पुण्यक्षेत्रं तदुच्यते ॥ ११६ ॥

त्वं यं पश्यति सिद्धेन्द्र ! स ब्रह्मा विष्णुरीश्वरः ।
यत्र भुंक्षेऽन्नकबळ तत्र त्रैलोक्यमत्ति हि ॥ ११७ ॥

येन त्वं स्त्रि(भ्रि?)यसे नाथ त्वयायं स्त्रि(भ्रि?)यतेक्षणम् ।
स एव चित्सदानन्दः परमात्मा ध्रुवं भवेत् ॥ ११८ ॥

एवं निश्चितचित्तस्य सिद्धस्य तव योगिनः ।
वर्णाश्रमसदाचाराः कृत्याकृत्यविवेकतः ॥ ११९ ॥

पापं पुण्यं सुखं दुःखं शीतमुष्णं प्रियाप्रिये ।
स्नानास्नान हानिवृद्धी शुद्धाशुद्धं भयाभयम् ॥

ग्राह्याग्राह्यं क्षुधा तृष्णा न किंचिदिह विद्यते ।
स्वेच्छाहारविहारश्च सुखी संहृष्टमानसः ॥ १२१ ॥

निर्ममस्सर्वकार्येषु कलत्रादिषु बन्धुषु ।
एवमाचार्यवचनमङ्गीकृत्य च दीक्षितः ॥ १२२ ॥

अद्य प्रभृति वन्द्यस्त्वं मा कुरु प्रणतिं क्वचित् ।
मत्समानोऽसि सिद्धोऽसि जीवन्मुक्तोऽसि संप्रति ॥

इत्युक्त्वाऽऽचार्यवर्योऽपि सिद्धमालिङ्ग्य च क्षणम् ।
सिद्धदीक्षेयमाख्याता शिवसायुज्यदायिनी ॥ १२४ ॥

दुर्लभा सर्वतन्त्रेषु तव प्रीत्या प्रकाशिता ।
देवीत्थमेव मन्तव्यं दुर्लभं समयेषु च ॥ १२५ ॥

॥ इति श्रीभैरवोक्ते आनन्दकन्दे अमृतीकरणविश्रान्तौ तृतीयोल्लासः ॥

॥ चतुर्थोल्लासः ॥

रससंस्काराः ॥

श्री भैरवी—

रससंस्कारमीश त्वं यथावत्कथयस्व मे ।

श्री भैरवः—

अष्टादश स्युस्संस्कारा रसस्य परमेश्वरि ! ॥ १ ॥

तान्सिद्धसाधकाभ्यर्च्ये यथावत्कथयामि ते ।
अथादौ स्वेदनं कर्म द्वितीयं मर्दनं प्रिये ॥ २ ॥

मूर्छा तृतीयमुत्थानं चतुर्थं पातनं शिवे ।
पञ्चमं रोधनं षष्ठं नियामं सप्तमं स्मृतम् ॥ ३ ॥

दीपनं चाष्टमं देवि नवमं चानुवासनम् ।
दशमं चारणं देवि जारणं रुद्रसंख्यकम् ॥ ४ ॥

गर्भद्रुतिर्द्वादशी स्यात् बाह्यद्रुतिस्त्रयोदशी ।
चतुर्दशं स्याद्रागाख्यं सारणा दशपञ्चमी ॥ ५ ॥

अनुसारणा षोडशी च विख्याता प्रतिसारणा ।
सप्तदशी चाष्टदशं वेधनं देहलोहयोः ॥ ६ ॥

रससंस्कारप्रकारः ।

अथ वक्ष्यामि संस्कारान् रसराजस्य पार्वति ! ।
लिङ्गस्य दक्षिणे भागे लिखेत् षट्कोणमण्डले ॥ ७ ॥

तद्बहिश्चाष्टपत्रं च कमलं चतुरश्रकम् ।
दिग्द्वारशोभितं तस्य कर्णिकायां न्यसेच्छिवे ! ॥ ८ ॥

ताम्रजं कान्तजं वाऽपि खल्वं तु स्वर्णरेखितम् ।
तन्मध्ये रसराजं तु पलानां शतमात्रकम् ॥ ९ ॥

तदर्धं वा तदर्धं वा क्षिप्त्वा भक्त्या प्रपूजयेत् ।
साधको रसराजस्य ततस्संस्कारमाचरेत् ॥ १० ॥

१. स्वेदनम् ।

धान्याम्लसन्धानप्रकारः ।

यवगोधूमकलममाषमुद्गचणादिभिः ।
श्यामाककोद्रवाद्यैश्च नानाधान्यैश्च निस्तुषैः ॥ ११ ॥

धान्यं चतुर्गुणजले मृद्घटे निक्षिपेत्प्रिये ।
प्राप्नोति यावदम्लत्वं तावद्यत्नेन रक्षयेत् ॥ १२ ॥

तन्मध्ये हंसपादीं च मीनाक्षीं द्विपुनर्नवाम् ।
चित्रकं भृङ्गराजञ्च विष्णुकान्तां शतावरीम् ॥ १३ ॥

सर्पाक्षीं गिरिकर्णीं च मुण्डीञ्च सहदेविकाम् ।
त्रिफलां खण्डशः कृत्वा सर्वानेतान्विनिक्षिपेत् ॥ १४ ॥

धान्यस्य च चतुर्थांशान् धान्याम्लमिदमुत्तमम् ।
स्वेदनादिषु कार्येषु पारदस्य विशिष्यते ॥ १५ ॥

आतप्ते कान्तजे खल्वे रसराजं विनिक्षिपेत् ।
चूर्णं च गृहधूमं च चित्रकं त्रिफलां गुडम् ॥ १६ ॥

दग्धोर्णामिष्टकां कन्यां लवणं बृहतीद्वयम् ।
मागधीं राजिकां चैव बन्ध्यां कर्कोटकीं तथा ॥ १७ ॥

एतान्कलांशान्सूतस्य तस्मिन्निक्षिप्त्वा विमर्दयेत् ।
दत्वा दत्वाऽथ धान्याम्लमेवं कृत्वा दिनत्रयम् ॥ १८ ॥

सम्यक् सोष्णारनालेन रसं प्रक्षालयेत्प्रिये ।
पटुं राजीं त्रिकटुकं मूलकं चित्रकं वराम् ॥ १९ ॥

पुनर्नवां मेषशृङ्गीं मेघनादं दुरालभाम् ।
आर्द्रकं रजनीं नागबलां च नवसारकम् ॥ २० ॥

समं धान्याम्लकैः पिष्ट्वा श्लक्ष्णं वस्त्रे प्रलेपयेत् ।
यावदङ्गुलिमात्रं च तस्मिन्पूर्वरसं क्षिपेत् ॥ २१ ॥

तद्बध्वा ताम्रजे पात्रे क्षिप्त्वा धान्याम्लपूरिते ।
घटे दोलाख्ययन्त्रे च स्वेदयेत्तमहर्निशम् ॥ २२ ॥

तमुद्धृत्य पुनस्सोष्णैरारनालैश्शरावके ।
प्रक्षालयेत्सूतराजमेवं कुर्यात्त्रिसप्तधा ॥ २३ ॥

प्रस्वेदितं सूतराजं ततस्संमर्दयेत्प्रिये ! ।

२. मर्दनम् ।

अथातो मर्दनं कर्म वक्ष्यामि शृणु भैरवि ! ॥ २४ ॥

चूर्णादिपूर्ववद्द्रव्यं विशालां राजवृक्षकम् ।
अङ्कोलं कृष्णधुत्तूरं त्रिकटुं च समं समम् ॥ २५ ॥

सर्वं सूतकलांशं च तप्तखल्वे रसं क्षिपेत् ।
मर्दयेत्पूर्वधान्याम्लैर्दिवारात्रं पुनश्च तम् ॥ २६ ॥

क्षालयेन्मृण्मये पात्रे ततः सोष्णारनालकैः ।
मर्दनं क्षालनं चैवमेकविंशतिवासरम् ॥ २७ ॥

एवं विमर्दितं सूतं समादायाथ मूर्छयेत् ।
अभ्रजीर्णोऽथवा बीजजीर्णस्सूतोऽपि मर्द्यते ॥ २८ ॥

चूर्णादिपूर्वद्रव्यैश्च रागान् गृह्णाति निर्मलः ।

३. मूर्छा ।

अथ मूर्छां प्रवक्ष्यामि शृणु त्वं सावधानतः ॥ २९ ॥

राजिका मेषशृङ्गी च चित्रकं च फलत्रयम् ।
क्षीरकन्दं सूरणं च सर्पाक्षी काकमाचिका ॥ ३० ॥

नीला वचा बला कन्या कृष्णोन्मत्तस्तथाकुली ।
श्वेताऽपराजिताङ्कोलं गोजिह्वा गरुडी तथा ॥ ३१ ॥

एतेषां स्वरसैर्मर्द्यो रविक्षीरेण पारदः ।
व्यस्तानां वा समस्तानां रसैरेषां दिनावधि ॥ ३२ ॥

मर्दयेत्तप्तखल्वे च मूषायां तं रसं क्षिपेत् ।
निरुध्य भूधरे यन्त्रे विपचेत्तं पुनः प्रिये ॥ ३३ ॥

राजिकाद्यौषधभवै रसैस्त्रिस्सप्तवासरम् ।
मर्दनं भूधरे पाकं कुर्यात्संमूर्छितो रसः ॥ ३४ ॥
भवेत्तदुत्थानविधिं प्रकुर्वीत सुरार्चिते ।

४. उत्थापनविधिः ।

एवं संमूर्छितं सूतं क्षालयेत्कांजिकेन च ॥ ३५ ॥

सोष्णेन वारिणा वाऽपि सूतमुत्थापयेत्प्रिये ।
पातनायन्त्रयोगे वा रसस्योत्थापनं भवेत् ॥ ३६ ॥

५. पातनम् ॥

पातनं त्रिविधं प्रोक्तं रसराजस्य पार्वति ! ।
ऊर्ध्वपातमधःपातं तिर्यक्पातनमुच्यते ॥ ३७ ॥

ऊर्ध्वपातनविधिः ।

रसस्य पातनं वक्ष्ये पाठा ब्राह्मी च चित्रकम् ।
शार्ङ्गेरी काकमाची च मण्डूकी गिरिकर्णिका ॥ ३८ ॥

कुमारी च जया भृङ्गी गोजिह्वा शङ्खपुष्पिका ।
भूपाटली च निर्गुण्डी काकजङ्घा शतावरी ॥ ३९ ॥

आर्द्रकं देवदाली च तिलपर्णी च नीलिका ।
आरग्वधः क्षीरकन्दम्रङ्कोलो देवदारु च ॥ ४० ॥

एषां रसैस्समस्तानां व्यस्तानां वा दिनं रसम् ।
मर्दयेत्तप्तखल्वे तत् शुल्बं सूतचतुर्थकम् ॥ ४१ ॥

तं पिष्ट्वा पातयेद्यन्त्रे ह्यूर्ध्वपातनके दिनम् ।
ऊर्ध्वलग्नं रसं शुद्धं तमादायाथ मर्दयेत् ॥ ४२ ॥

पूर्वोदितौषधरसैः पूर्ववत् शुल्बसंयुतम् ।
पातयेन्मर्दयेदेवं सप्तधैवं पुनः पुनः ॥ ४३ ॥

ऊर्ध्वपातनसंशुद्धं पारदं पातयेदधः ।

अधःपातनविधिः ।

अथाधःपातनं वक्ष्ये त्र्यूषणं लवणं वराम् ॥ ४४ ॥

चित्रकं राजिकां शिग्रुं सर्वं सूतसमं क्षिपेत् ।
मर्दयेत्तप्तखल्वे च रसं धान्याम्लकेन च ॥ ४५ ॥

तत्कल्केन लिपेदूर्ध्वं भाण्डं सम्यक् निरोधयेत् ।
ऊर्ध्वभाण्डस्य पृष्ठे तु दद्याल्लघुपुटं ततः ॥ ४६ ॥

इत्यधःपातनं कुर्यात्सप्तवारं पुनः पुनः ।
अधःपातनशुद्धस्य तिर्यक्पातनमाचरेत् ॥ ४७ ॥

तिर्यक्पातनविधिः ।

वक्ष्यामि तिर्यक्पतनं सूतं धान्याभ्रकं समम् ।
धान्याम्लैर्मर्दयेद्यामं तिर्यक्पातनयन्त्रके ॥ ४८ ॥

चण्डाग्निना पचेदेवं सप्तवारं पुनः पुनः ।
एवं त्रिधा पातितं च ततस्सूतं निरोधयेत् ॥ ४९ ॥

अभ्रकं वाऽथ गन्धं वा माक्षिकं विमलामपि ।
स्वर्णं वा रजतं वाऽपि कान्तं वा तीक्ष्णमेव वा ॥ ५० ॥

प्रत्येकं शोधितं देयं ताम्रवत्पादमात्रकम् ।
पाठादिकरसैः कुर्यान्मर्दनं पातनं क्रमात् ॥ ५१ ॥

यद्यद्द्रव्यान्वितस्सूतस्तत्तद्द्रव्यगुणप्रदः ।
पातने ताम्रयोगेन नागवङ्गौ त्यजेद्रसः ॥ ५२ ॥

अथवा दीपिकायन्त्रे शुद्धः स्यात्पातितो रसः ।

६. निरोधनम् ।

कदर्थितो भवेत्सूतः स्वेदाद्यैः पञ्चकर्मभिः ॥ ५३ ॥

आप्यायनार्थं सूतस्य कर्म कुर्यान्निरोधनम् ।
अथ कर्म निरोधाख्यं पेषयेल्लवणं जलैः ॥ ५४ ॥

स्थालीमध्ये रसं क्षिप्त्वा तदूर्ध्वं लवणं क्षिपेत् ।
किंचिज्जलं च निवपेत्तं शरावेण रोधयेत् ॥ ५५ ॥

कुर्यात्सम्यक् सन्धिलेपं तदूर्ध्वञ्च पुटेल्लघु ।
एवं निरोधनं कर्म विदध्यात्सप्तधा प्रिये ॥ ५६ ॥

आप्यायितो भवेत्सूतोऽनेन षंडत्ववर्जितः ।
निरोधकर्मसिद्धोऽसौ वीर्यवान्सुनियम्यते ॥ ५७ ॥

७. नियामनम् ।

अथो नियामनं कर्म कथयामि वरानने ।
यवचिञ्चा क्षीरकन्दं सर्पाक्षी पट्टु भृङ्गराट् ॥ ५८ ॥
बन्ध्या कर्कोटकी चिंचः सर्वं धान्याम्लपेषितम् ।
कृत्वाऽऽलोड्यारनाळेन तद्द्रवैः स्वेदयेद्दिनम् ॥ ५९ ॥
यन्त्रे नियामके सप्तवासरं तच्च दीपयेत् ।

८. दीपनम् ।

अथातो दीपनं कर्म वदामि तव पार्वति ॥ ६० ॥
स्वर्णपुष्पी च मरीचं त्रिक्षारं पञ्चपुष्पिका[1] ।
भूखगः पञ्चलवणं राजिका शिग्रुमूलकम् ॥ ६१ ॥
कासीसं विजया कन्या पाताळगरुडी कणा ।
क्षीरकन्दं च कर्कोटी गिरिकर्णी जया मधु ॥ ६२ ॥
चित्रकं काकजंघा च सर्वमम्लगणेन च ।
कल्कयेत्पारदं तेन मर्दयेत्तद्द्रवैरपि ॥ ६३ ॥
दोलायन्त्रे पचेदेकदिनमेवं च सप्तधा ।
मर्दनं पाचनं कुर्यात् ग्रासार्थी दीपितो रसः ॥ ६४ ॥
एवं प्रदीपितं सूतं शुद्धं तमनुवासयेत् ।

९. अनुवासनम् ।

अथानुवासनं कर्म मृत्पात्रे दीपितं रसम् ॥ ६५ ॥
क्षिप्त्वा जम्बीरजद्रावैस्तीव्रघर्मेऽनुवासयेत् ।
एवं सप्तदिनं कुर्यात्ततश्चारणमाचरेत् ॥ ६६ ॥

1. 'जाती जयन्ती श्रीदेवी भूकदम्बः कुसुम्भकः' इति पञ्चपुष्पाणि । ... पुष्पीति क्वचित्पठ्यते ।

नवभिस्स्वेदनाद्यैश्च शुद्धः स्यात्कर्मभिः प्रिये ।
पारदस्सर्वरोगघ्नः सप्तकंचुकवर्जितः ॥ ६७ ॥

श्रीभैरवी—

स्वेदनादीनि कर्माणि श्रुतानि वद शङ्कर ।
त्वत्प्रसादादसन्देहं संशृण्वे चारणादिकम् ॥ ६८ ॥

श्री भैरवः—

साधु पृष्टं महाभागे ! शृणु तच्चारणादिकम् ।

१०. चारणविधिः ।

अथाभ्रचारणं कर्म वक्ष्यामि परमेश्वरि ! ॥ ६९ ॥
समुखे वा निर्मुखे वा रसे वा वासनामुखे ।
गगनं चारयेद्गर्भपिष्टिग्रासक्रमैः क्रमात् ॥ ७० ॥

समुखचारणम् ।

अत्रादौ कथ्यते देवि ! समुखं चारणं स्फुटम् ।
समुखो ग्रसति ग्रासं निर्मुखो ग्रसनाक्षमः ॥ ७१ ॥
तस्मात्परं रसेन्द्रस्य मुखीकरणमाचरेत् ।

[प्रथमो मुखीकरणप्रकारः ।]

इष्टकामध्यभागे तु गम्भीरं वर्तुलं समम् ॥ ७२ ॥
गर्तं कृत्वा तत्र सूतं प्रक्षिपेदनुवासितम् ।
निरुन्ध्यात्स्वच्छवस्त्रेण रसस्य दशमांशकम् ॥ ७३ ॥
गन्धं तदूर्ध्वं निक्षिप्य शरावेण निरोधयेत् ।
तत्पृष्ठेऽल्पपुटं दद्यात् गन्धे जीर्णे पुनः पुनः ॥ ७४ ॥
क्षिप्त्वा क्षिप्त्वा शतगुणं चारयेत्पातयेदिति ।
चतुर्गुणे सान्द्रवस्त्रे गालयेत्तं रसेश्वरम् ॥ ७५ ॥

वेणौ क्षिप्त्वा निरुद्ध्यास्यं पचेद्गोमूत्रपूरिते ।
भाण्डे त्रिसप्तदिवसं पुनस्तं तप्तखल्वके ॥ ७६ ॥

जम्बीरमातुलुङ्गाम्लवेतसैर्भृङ्गस्त्र्यहम् ।
भूनागैश्च त्र्यहं मर्द्यं तं पश्चादिष्टकोदरे ॥ ७७ ॥

एकैकं गर्तमादद्याद्धान्याभ्रं गन्धकं तथा ।
प्रत्येकं दशनिष्कं च यामं जम्बीरमर्दितम् ॥ ७८ ॥

अनेन लेपयेद्गर्तद्वयमेकेष्टकान्तरे ।
गर्ते क्षिप्त्वाऽथ तं सूतं विंशन्निष्कं तदूर्ध्वतः ॥ ७९ ॥

अपरामिष्टकान्दद्यात्तत्सन्धिं लोणमृत्स्नया ।
दृढं लिप्त्वाऽथ दीपाग्नौ पचेत्सप्तदिनावधि ॥ ८० ॥

इष्टकां स्वाङ्गशीतां तां अवतार्य हरेद्रसम् ।
किट्टहीनं पुनरपि कुर्यादित्थं त्रिवारकम् ॥ ८१ ॥

एवं कृते रसेन्द्रस्य मुखं स्याद्देवसंज्ञकम् ।

[द्वितीयो मुखीकरणप्रकारः ।]

पुनरन्यं प्रवक्ष्यामि मुखीकरणमुत्तमम् ॥ ८२ ॥

रसेन्द्रं जीविभूनागं समं संमर्दयेत्त्र्यहम् ।
तत्क्षिपेत् भूलतालिप्तमूषायां सन्निवेशयेत् ॥ ८३ ॥

तदूर्ध्वं भूलताकल्कं क्षिप्त्वा रुध्वा विशोषयेत् ।
आर्द्रगोमयलिप्तां तां पादमग्नां निवेशयेत् ॥ ८४ ॥

तद्गर्ते च पुटं देयं तुषकारीषवह्निना ।
दिनान्ते तत्समुद्धृत्य पूर्ववन्मर्दयेत्पचेत् ॥ ८५ ॥

त्रिंशद्वारं पुनः कुर्यादित्थं वह्निमुखो रसः ।
ग्रसते गुह्यसूतोऽयं सर्वसिद्धिप्रदो भवेत् ॥ ८६ ॥

[तृतीयो मुखीकरणप्रकारः।]

पुनरन्यं प्रवक्ष्यामि मुखीकरणमुत्तमम्।
गोमूत्रपूरिते भाण्डे डोलायन्त्रे पचेद्रसम् ॥ ८७ ॥

त्रिस्सप्तवारं सम्यक्च रन्ध्रितं वेणुनाळके।
मुखं भवति सूतस्य चारणार्हं वराङ्गने ॥ ८८ ॥

[चतुर्थो मुखीकरणप्रकारः।]

इष्टकाद्वयमध्ये च गर्तं तु चतुरङ्गुळम्।
दशनिष्कं शुद्धगन्धं धान्याभ्रं दशनिष्ककम् ॥ ८९ ॥

जम्बीरनीरैस्संमर्द्य यामं कल्केन तेन च।
गर्तद्वयं समांशेन लिप्त्वा गर्ते विनिक्षिपेत् ॥ ९० ॥

वासितं रसराजं तं विंशन्निष्कं तदूर्ध्वतः।
इष्टकामपरां न्यस्य श्लक्ष्णमृल्लवणैर्दृढम् ॥ ९१ ॥

लेपयेदथ दीपाग्निमधः प्रज्वालयेत्प्रिये।
अनुस्यूतं सप्तरात्रं स्वाङ्गशीतं समुद्धरेत् ॥ ९२ ॥

किट्टं विहाय तं सूतं पूर्ववच्च त्रिवारकम्।
कुर्यादेवं हि सूतस्य मुखं भवति शोभनम् ॥ ९३ ॥

निर्मुखचारणाप्रकारः।

दिव्यौषधिप्रभावेन रसश्चरति निर्मुखः।
अथवा वज्रवैक्रान्तस्पर्शादभ्रादिकं चरेत् ॥ ९४ ॥

पारदस्य चतुष्षष्टिनिष्कं वैक्रान्तभस्म च।
चतुर्निष्कं वज्रभस्म निष्कं दिव्यौषधिद्रवैः ॥ ९५ ॥

सर्वं सप्तदिनं मद्य स रसोऽभ्रादिकं चरेत्।

वासनामुखचारणम् ।

गन्धकं जारयेत्सूते दोलाख्ये पूर्वभाषिते ॥ ९६ ॥
यन्त्रे च षोडशगुणं रसः स्याद्वासनामुखः ।

॥ अभ्रकाभिषेकः— चारणीयाभ्रकस्य संस्कारः ॥

चारणार्हाभ्रकस्याहमभिषेकं वदामि ते ॥ ९७ ॥

[प्रथमः प्रकारः]

मृतमभ्रं तु रुधिरैः क्षारैर्जलकणैरपि ।
सृष्टित्रयैस्तुंबुरुभिर्मर्दयेदम्लवर्गकैः ॥ ९८ ॥
सप्ताहं तच्चरेत्सूतः समुखो निर्मुखोऽथवा ।

[द्वितीयः प्रकारः]

मृतमभ्रं च कदली मूलकश्च शतावरी ॥ ९९ ॥
पुनर्नवा मेघनादो यवचिञ्चा च शिग्रुकः ।
सूरणं च रसैरेषां मर्दयेद्भावयेत्प्रिये ॥ १०० ॥
सप्ताहं तच्चरेत्सूतः समुखो निर्मुखोऽथवा ।

[तृतीयः प्रकारः]

शुल्बपात्रे तु लवणसर्ज्जिटङ्कणभूखगान् ॥ १०१ ॥
क्षिप्त्वाऽऽरनाळं त्रिदिनं कुर्यात्पर्युषितं यथा ।
तस्मिन्नागं तु विद्राव्य ढालयेच्छतधा प्रिये ॥ १०२ ॥
रौप्यकर्मणि वङ्गस्य तद्द्रवैर्भावयेद्घनम् ।
सप्ताहं तच्चरेत्सूतः समुखो निर्मुखोऽथवा ॥ १०३ ॥

[चतुर्थः प्रकारः]

धान्याभ्रमर्कक्षीरेण मर्दयेदेकवासरम् ।

निरुध्य संपुटे पच्यात्कपोताख्ये पुटे पुनः ॥ १०४ ॥

चतुर्वारं पुटेदेवं मर्दयेच्च पुनस्तथा ।
रम्भाद्रवैस्त्रिधा मर्द्यं मूलकस्य द्रवैस्त्रिधा ॥ १०५ ॥

काकमाची मेघनादो मत्स्याक्षी च पुनर्नवा ।
अपामार्गश्चित्रकं च विदारी भृङ्गराण्मुनिः ॥ १०६ ॥

चतुर्वारं पचेदेवं मर्दयेच्च पुनस्तथा ।
एतैरेकैकधा मर्द्यं पुटपाकं पृथक् पृथक् ॥ १०७ ॥

तदभ्रकं भावयेच्च मुसली यवचिञ्चिकाः ।
तण्डुली कदली शिग्रुर्वरी चार्कः पुनर्नवा ॥ १०८ ॥

एकैकैश्च द्रवैर्भाव्यमेकैकं दिवसं पृथक् ।
तदभ्रकं पारदेन्द्रश्चरत्येव सुरार्चिते ॥ १०९ ॥

[पञ्चमः प्रकारः]

धान्याभ्रं रविदुग्धेन मर्दयेद्याममात्रकम् ।
तदभ्रं संपुटे रुध्वा कपोताख्यपुटे पचेत् ॥ ११० ॥

वारांश्चतुर्दशैवं स्यात्ततो रम्भार्कपीलुकाः ।
नागवल्ली च मुसली कुबेराक्षी च शिग्रुकः ॥ १११ ॥

तुम्बी तुंबुरुरंकोलबलापामार्गकाः प्रिये ।
गृहीत्वैषामेकरसं सव्योषं च सकांजिकम् ॥ ११२ ॥

भाण्डमध्ये विनिक्षिप्य डोलायन्त्रे पचेत्त्र्यहम् ।
पूर्वाभ्रं च ततस्तस्मात्समुद्धृत्याथ साध(शोष ?)येत् ॥

टङ्कणं तुवरी सिन्धु कासीसं च समं समम् ।
अभ्रकस्य दशांशं तु सर्वमेतद्विमर्दयेत् ॥ ११४ ॥

तदभ्रकं चरेत्सूतः समुखो निर्मुखोऽथवा ।

[षष्ठः प्रकारः]

मुण्डीद्रवे तु शतधा द्रुतं नागं प्रढालयेत् ॥ ११५ ॥

तद्द्रवेण च धान्याभ्रं मर्दयेत्संपुटे क्षिपेत् ।
रुध्वा पचेत्कपोताख्ये पुटे चैवं तु सप्तधा ॥ ११६ ॥

आर्द्रकस्य द्रवैरेवं सप्तधा चित्रकद्रवैः ।
तत्समं गन्धकं दत्वा मर्दयेद्भावयेत्क्रमात् ॥ ११७ ॥

प्रागुक्तमुण्डीस्वरसैर्बीजपूरसेन च ।
स्तन्यैरेकदिनं भाव्यं तदभ्रं च चरेद्रसः ॥ ११८ ॥

एवं सर्वाणिबीजानि सत्व(ज)श्चाभ्रकस्य च ।
स्वर्णादिसर्वलोहानि सत्वानि विविधानि च ॥ ११९ ॥

द्वन्द्वानि सर्वरत्नानि यद्यत्स्याच्चारणार्हकम् ।
तत्तत्पिष्टाऽभ्रवत्कार्यं तत्तच्चरति पारदः ॥ १२० ॥

[सप्तमः प्रकारः]

तिलपर्णीरसैः पिष्ट्वा धान्याभ्रं पुटयेत् त्रिधा ।
सप्तधा भावयेदस्य मर्दनेन च पारदः ॥ १२१ ॥

पिष्टतां याति सहसा गगनं चरति क्षणात् ।

[अष्टमः प्रकारः]

त्रिक्षारं पञ्चलवणं कांक्षी कासीसटङ्कणम् ॥ १२२ ॥

भूखगं हेममाक्षीकं सौराष्ट्री वत्सनाभकम् ।
तुवरी वेतसाम्लं च सर्वमेतत्समांशकम् ॥ १२३ ॥

तत्समांशं तु धान्याभ्रं धान्याम्लैर्मर्दयेद्दिनम् ।
अर्कक्षीरं भृङ्गराजो मेघनादः पुनर्नवा ॥ १२४ ॥

मूलकं चित्रकं रंभा काकमाची शतावरी ।
अपामार्गस्तालमूली विदारी तण्डुली मुनिः ॥ १२५ ॥

मीनाक्षी शिग्रु बृहती कुमारी यवचिञ्चिका ।
बला तुम्बी कुबेराक्षी व्योषं तुंबुरुपीलुनी ॥ १२६ ॥

अङ्कोलः फणिवल्ली च सर्वमेतत्समांशकम् ।
संपेष्य कल्कयेद्देवि धान्याम्ले तच्चतुर्गुणे ॥ १२७ ॥

द्रुतं नागं शतं वारान्क्षिपेत्तस्मिन्पुनः पुनः ।
कल्कद्रवेण पूर्वाभ्रं यामं संमर्दयेद्दृढम् ॥ १२८ ॥

कपोताख्ये पुटे पच्यादेवं विंशतिवारकम् ।
तत्तुल्यं गन्धकं दत्वा पूर्वोक्तैरौषधद्रवैः ॥ १२९ ॥

सस्तन्यैर्बीजपूरोत्थैर्द्रवैर्भाव्यं त्रिवासरम् ।
एतदभ्रं तु सूतस्य चारणे परमं हितम् ॥ १३० ॥

द्वन्द्वितं व्योमसत्वं च बीजानि विविधानि च ।
हेमादिसर्वलोहानि रत्नानि विविधानि च ॥ १३१ ॥

द्वन्द्वितं वज्रबीजं च चारणायां विधीयते ।
समस्तमेतत्पूर्वोक्तप्रकारेणैव कारयेत् ॥ १३२ ॥

तदा रसेन्द्रश्चरति तत्सर्वं चारणोचितः ।

[नवमः प्रकारः]

शुल्बपात्रे तु कासीसं कांक्षी माक्षीकगन्धकम् ॥१३३॥

क्षारत्रयं पञ्चलोणमम्लयुक्तं क्षणं क्षिपेत् ।
दिव्याभिषेकयोगोक्तं शतधा ढालयेदहिम् ॥ १३४ ॥

वङ्गं वानेन वस्तूनि चारणार्हाणि भावयेत् ।
वरी पुनर्नवा रंभा गवाक्षी यवचिञ्चिका ॥ १३५ ॥

शिग्रुका मेघनादश्च रसैरेषां विभावयेत् ।
वज्राभ्रकं क्रमेणैव सप्ताहं सुरवन्दिते ॥ १३६ ॥

तदभ्रकं नागवल्या कौबेर्या शिग्रुकस्य वा ।
बाणाङ्कोल्लबलारंभास्फोतानां पीलुकस्य वा ॥ १३७ ॥

अलम्बुषाहिमरु(लमु ?)चामुसलीतुम्बुरोरपि ।
अथवा खरमञ्जर्यास्तिक्तशाकस्य वा प्रिये ॥ १३८ ॥

एकेनैषां रसेनैव व्योषसर्षपसंयुतम् ।
स्विन्नं त्रिदिवसं कुर्यात्तस्मिन् टङ्कणसैन्धवम् ॥ १३९ ॥

कासीसं तुवरीं क्षिप्त्वा पूर्वाभिषवयोगतः ।
एतदभ्रं चरेत्सूतः समुखो निर्मुखोऽथवा ॥ १४० ॥

तदभ्रकप्रभावेन गोळकस्सिद्धिदो भवेत् ।

[दशमः प्रकारः]

धान्याम्लैरम्लवर्गैश्च स्वेदयेदभ्रकं दिनम् ॥ १४१ ॥

ततस्स्नुक्क्षीरतो मर्द्यं कपोताख्ये पुटे दहेत् ।
मुनित्रयं मेघनादं रम्भाकन्दं च मूलकम् ॥ १४२ ॥

मत्स्याक्षी शृङ्गिबेरं च काकमाची पुनर्नवा ।
अपामार्गस्त्वरूपूगश्चैतेषां तु रसेन च ॥ १४३ ॥

एकैकेन पुनर्दद्यादेकैकं पूर्वमभ्रकम् ।
डोलायन्त्रे स्नुहीक्षीरयुक्तमेकदिनं पचेत् ॥ १४४ ॥

ततश्छायागते शुष्के घनेऽस्मिन्नवसारकम् ।
निंब वचाश्च कासीसं चणकाम्लं पृथक्पृथक् ॥ १४५ ॥

अभ्रस्य षोडशांशं च निक्षिपेत्ताम्रभाजने ।
घर्षयेत्तच्चरेत्सूतो लोहपालस्य योगतः ॥ १४६ ॥

[एकादशः प्रकारः]

धान्याभ्रं मर्दयेत्सोमवल्लीतोयैर्दिनं दृढम् ।
पुटेदेवं त्रिधा पश्चात् सोमवल्ल्या रसेन च ॥ १४७ ॥

भावयेत्सप्तधा देवि रसश्चरति तद्घनम् ।

[द्वादशः प्रकारः]

सारनाले तु शतधा निषिच्य तमनेन च ॥ १४८ ॥

शतधा प्लावयेदभ्रं ताम्रवासनया सह ।
स्नल्यां तच्चरेत्सूतो नात्र कार्या विचारणा ॥ १४९ ॥

गन्धकभावना ॥

चारणार्थस्य गन्धस्य भावनां शृणु पार्वति ।
सौराष्ट्रं चाजमोदं च सर्ज्जीं कासीसमेव च ॥ १५० ॥

मर्दयेच्छिग्रुतोयेन गन्धकं तेन भावयेत् ।
सप्ताहं मर्दितं गन्धं चारयेत्पारदस्य च ॥ १५१ ॥

रागं धत्ते रसेन्द्रस्य बीजानां पाकजारणे ।
पक्षच्छेदे रसेन्द्रस्य श्रेष्ठस्स्यात्सर्वकर्मणि ॥ १५२ ॥

पलाशपुष्पस्वरसैः शाकवृक्षच्छदद्रवैः ।
विष्णुक्रान्ताद्रवैर्गन्धं भावयेत्सप्तवासरम् ॥ १५३ ॥

तं गन्धं चारयेत्सूते इष्टकायन्त्रयोगतः ।

अभ्रचारणे श्रेष्ठा दिव्यमूल्यः ॥

अथाभ्रचारणे श्रेष्ठा दिव्यमूलीर्वदामि ते ॥ १५४ ॥

वज्री रंभा हंसपदी चिञ्चिका व्याघ्रपादिका ।
मण्डूकी बृहती पुङ्खा कुमारी लाङ्गली तथा ॥ १५५ ॥

सर्पाक्षी चाग्निधमनी शङ्खपुष्पीन्द्रवारुणी ।
षण्ड(खण्ड)जारी च कार्कोटी विख्याता दिव्यमूलिका ॥

गन्धकाभ्रकचारणम् ।

अथातश्चारणं कर्म प्रवक्ष्यामि समासतः ।
धान्याभ्रकं द्रुते गन्धे समं क्षिप्त्वा नियोजयेत् ॥

ख्यातो गन्धाभ्रयोगोऽयं श्रेष्ठश्चारणकर्मणि ।
समुखं निर्मुखं वापि पारदं दशनिष्ककम् ॥ १५८ ॥

गन्धाभ्रयोगनिष्के द्वे पिष्टं कुर्याद्यथा तथा ।
तं पिष्टं नागपिष्ट्याऽथ समया परिवेष्टयेत् ॥ १५९ ॥

हेमकर्मणि वङ्गस्य पिष्ट्या रजतकर्मणि ।
ताम्रपिष्ट्या देहसिद्धौ वेष्टयेत्परमेश्वरि ! ॥ १६० ॥

तां पिष्टिं विद्रुते गन्धे विपचेद्दिवसत्रयम् ।
तां पिष्टिं दीपिकायन्त्रे पाचयेत्पातयेदधः ॥ १६१ ॥

तं रसं पूर्ववत्पिष्टिं कुर्याद्वेष्टनवर्जिताम् ।
त्रिदिनं विद्रुते गन्धे विपचेत्पातयेदधः ॥ १६२ ॥

तं रसं तप्तखल्वे तु चतुष्षष्टिगुणं क्षिपेत् ।
भागैकमभिषिक्ताभ्रं मर्द्यं दिव्यौषधैर्दिनम् ॥ १६३ ॥

तत्क्षिपेच्चारणायन्त्रे जम्बीररससंयुते ।
तीव्रातपे दिनं स्थाप्यं सूतश्चरति तद्घनम् ॥ १६४ ॥

एवं पुनः पुनर्गर्भपिष्टीग्रासक्रमात्मकम् ।
पत्राभ्रचारणं प्रोक्तमेवं सत्वाभ्रचारणम् ॥ १६५ ॥

एवं कुर्याद्यथाशक्यं चारणं परमेश्वरि ! ।
रसेऽभ्रं चारयेत्पूर्वं चतुष्षष्टितमांशकम् ॥ १६६ ॥

द्वात्रिंशत्तमभागं स्यात्तदेतत्षोडशांशकम् ।
अष्टमांशं चतुर्थांशं द्वितीयांशं समं क्रमात् ॥ १६७ ॥

द्विगुणं चतुर्गुणं चाष्टगुणं षोडशकं गुणम् ।
द्वात्रिंशद्गुणमेवं स्यात् चतुष्षष्टिगुणं क्रमात् ॥ १६८ ॥

पक्षच्छेदस्त्वदोषत्वं लघुता ग्रासयोग्यता ।
मुखिताग्निसहत्वं च व्यापित्वं गतिहीनता ॥ १६९ ॥

रसेन्द्रस्यानवस्थत्वं च भवेदभ्रकचारणात् ।

जारणा ॥

यस्याहमपि तुष्टः स्यां तस्य सूतेन्द्रजारणे ॥ १७० ॥

मतिर्भवेन्न सन्देहो जारणा भुक्तिमुक्तिदा ।
दुर्लभा जारणा देवि विना भाग्यं न लभ्यते ॥ १७१ ॥

जारणा द्विविधा बालजारणा वृद्धजारणा ।

जारणे क्रमः ॥

गगनं जारयेत्पूर्वं सर्वसत्वान्यतः परम् ॥ १७२ ॥

द्वन्द्वानि सर्वलोहानि पक्वबीजानि भैरवि ! ।
पद्मरागादिरत्नानि जारयेच्च यथाक्रमम् ॥ १७३ ॥

जारणाय अभ्रकसत्वनिर्माण प्रकारः ॥

[प्रथमः प्रकारः]

जारणार्हं व्योमसत्वं रसराजस्य वक्ष्यते ।
धान्याभ्रकं च विधिवन्मारयेद्वज्रसंज्ञकम् ॥ १७४ ॥

अभिषेकं पूर्ववत्स्यात्तस्मिंस्ताप्यं दशांशकम् ।
पञ्चमाहिषगव्यैश्च मर्दयेत्कर्षसन्निभाः ॥ १७५ ॥

कुर्वीत वटिकाः कोष्ठीयन्त्रे सत्वं निपातयेत् ।
सत्वस्य च चतुर्थांशं ताप्यं मूषागतं धमेत् ॥ १७६ ॥

एवं कृत्वा चतुर्वारं तत्सत्वं रसजारणे ।
रसायने च भैषज्ये श्रेष्ठं सकलकर्मणि ॥ १७७ ॥

[द्वितीयः प्रकारः]

मृताभ्रं तच्चतुर्थांशं नागं तत्पादमाक्षिकम् ।
पञ्चभिर्माहिषैर्गव्यैः पातयेत्सत्वमुज्ज्वलम् ॥ १७८ ॥

तत्सत्वं तच्चतुर्थांशं माक्षिकं तत्समां शिलाम् ।
धमेत्प्रलिप्तमूषायां सत्वं स्याद्धेमसन्निभम् ॥ १७९ ॥

एवं कुर्याच्चतुर्वारं तत्सत्वं ग्रसते रसः ।

[तृतीयः प्रकारः]

मृताभ्रकं षोडशांशं तच्चतुर्थांशकं त्रपु ॥ १८० ॥

तत्समं तालकं क्षिप्त्वा पञ्चगाहिषगव्यतः ।
सत्वं निपातयेत्तच्च चतुर्थं हरितालकम् ॥ १८१ ॥

क्षिप्त्वा क्षिप्त्वा चतुर्वारं तत्सत्वं ग्रसते रसः ।

[चतुर्थः प्रकारः । अभ्रकसत्वमृदूकरणम्]

वज्रमूषागतं कृत्वा घनसत्वं च तत्समम् ॥ १८२ ॥

काचं च टङ्कणं क्षिप्त्वा रुध्वा तीव्राग्निना धमेत् ।
तत्क्षिपेदम्लवर्गेण चिञ्चाबीजं स्नुहीदलम् ॥ १८३ ॥

पिष्ट्वा तस्मिन्पुनस्तद्वत्काचटङ्कणयोगतः ।
धमेदेवं सप्तवारं सेचनं च पुनः पुनः ॥ १८४ ॥

तदभ्रसत्वं शुभ्रं स्यान्मृदु स्याच्चारणोदितम् ।

[पञ्चमः प्रकारः]

रसेन्द्रं टङ्कणं ताप्यं भागैकैकं पृथक्पृथक् ॥ १८५ ॥

त्रिभागं शोधितं नागं मृताभ्रं दशभागकम् ।
यवक्षारं च दग्धोर्णां सर्जक्षारं च गुग्गुलुम् ॥ १८६ ॥

अजापञ्चाङ्गसंयुक्तं अम्लमूलगणैर्युतम् ।
मर्दयेत्पूर्ववत्सत्वं पातयेन्मृदु निर्मलम् ॥ १८७ ॥

द्वन्द्वमेलापनाय मूषालेपः ॥

[प्रथमः प्रकारः]

द्वन्द्वमेलापने मूषा लेपं वक्ष्यामि पार्वति ! ॥ १८८ ॥

मेषशृङ्गं खुरं गुञ्जा टङ्कणं च विषं समम् ।
स्थूलभेकस्य वसया पिष्ट्वा मूषां प्रलेपयेत् ॥ १८९ ॥

मिलन्ति सर्वसत्वानि मूषायां चूर्णितानि च ।
गुग्गुलुं धातकीपुष्पं गुडं क्षारत्रयं समम् ॥ १९० ॥
स्तन्यैः पिष्ट्वाऽथ मूषायां लेपनं द्वन्द्वमेलनम् ।

[द्वितीयः प्रकारः]

अश्मभेदी लाङ्गली च भूलता च मरीचकः ॥ १९१ ॥

कार्पासस्य फलं शक्रगोपश्चैतांश्च मर्दयेत् ।
नारीस्तन्येन तेनैव मूषामन्तः प्रलेपयेत् ॥ १९२ ॥

तस्यां मिलन्ति सत्वानि सर्वाणि च महारसाः ।
हेममुख्यानि लोहानि चण्डाग्निधमनेन च ॥ १९३ ॥

[तृतीयः प्रकारः]

चुचुन्दर्याश्च पिशितं टङ्कणं च विषं समम् ।
मर्दयित्वा च मूषान्तर्लेपयेत्तत्र निक्षिपेत् ॥ १९४ ॥

द्वन्द्वयोग्यं तु यद्यत्स्यात्तत्सर्वं धमनान्मिलेत् ।

[चतुर्थः प्रकारः]

भस्मीकृतमपामार्गं कङ्गुणीतैलमर्दितम् ॥ १९५ ॥

मूषायां लेपयेत्तेन द्वन्द्वद्रव्यं विनिक्षिपेत् ।
मिलेत्तीव्राग्निधमनात्तन्मारकवापनात् ॥ १९६ ॥

द्वन्द्वमेलापनम् ॥

अत एव प्रवक्ष्यामि द्वन्द्वमेलापनं शृणु ।
वर्षाभूकदलीकन्दकाकमाचीपुनर्नवम् ॥ १९७ ॥

स्वर्णं नरकपालं च गुञ्जा टङ्कणमभ्रकम् ।
सत्वं मूषागतं ध्मातं हेमाभ्रं मिलति क्षणात् ॥१९८॥

अभ्रकं चूर्णयित्वा तु काकमाचीरसप्लुतम् ।
कपित्थतोयसंयुक्तं सूतटङ्कणसंयुतम् ॥ १९९ ॥

वङ्गपत्रान्तरे न्यस्तं ध्मातं वङ्गाभ्रकं मिलेत् ।
आवर्त्य कटुतैलेन भस्मापामार्गजं क्षिपेत् ॥ २०० ॥

हेमाभ्रं नागताप्येन ताराभ्रं हरितालकात् ।
गन्धकेन तु शुल्बाभ्रं तीक्ष्णाभ्रं सिन्धुहिङ्गुलात् ॥

वङ्गाभ्रं हरितालेन नागाभ्रं शिलया मिलेत् ।
लाङ्गली चमरीकेशाः कार्पासास्थि कुलत्थकम् ॥

भूलता चाश्मदमनी स्त्रीस्तन्यं सुरगोपकः ।
द्वन्द्वे प्रलिप्तमूषायां सुध्मातास्तीव्रवह्निना ॥ २०३ ॥

कान्ताभ्रशैलविमलाः मिलन्ति सकलाः क्षणात् ।
अथ चुच्छुन्दरीमांसं विषटङ्कणयोजितम् ॥ २०४ ॥

मूषाप्रलेपात्कुरुते सर्वद्वन्द्वेषु मेलनम् ।
जौर(?)भ्रमरशृङ्गं च मण्डूकस्य वसामिषम् ॥ २०५ ॥

गुञ्जाटङ्कणलेपेन सर्वसत्वेषु मेलनम् ।
टङ्कणोर्णागिरिजतुकर्णाक्षीमलकर्कटैः ॥ २०६ ॥

मिलन्ति सर्वद्रव्याणि स्त्रीस्तन्यपरिपेषितैः ।
धातकीगुग्गुलुगुडसर्जयावकटङ्कणैः ॥ २०७ ॥

स्त्रीस्तन्यपेषितं शस्तं द्वन्द्वं स्यात्तु रसायने ।
सूक्ष्मचूर्णं तु यत्किञ्चित्पूर्वकल्केन संयुतम् ॥ २०८ ॥

अन्धमूषागतं ध्मातं संकरं मिलति क्षणात् ।
वापितं ताप्यरसकसस्यकैर्दरदेन च ॥ २०९ ॥

स सत्वं स्यादनिविडं दृढं ध्मातं मिलेत्ततः ।
रसोपरसलोहानि सर्वाण्येकत्र मेलयेत् ॥ २१० ॥

[प्रथमः प्रकारः]

अन्योन्यं द्वन्द्वतां यान्ति द्रवन्ति सलिलं यथा ।
वज्राभ्रसत्वचूर्णं तु यत्किञ्चिल्लोहचूर्णकम् ॥ २११ ॥

द्वयं समं तयोस्तुल्यमरिवर्गं विनिक्षिपेत् ।
द्वन्द्वमेलनमूषायां धमनान्मेलनं भवेत् ॥ २१२ ॥

[द्वितीयः प्रकारः]

मर्दयेट्टङ्कणं रम्भाकन्दतोयेन लेपयेत् ।
मूषां श्वेताभ्रकं वङ्गं धमनान्मिलति प्रिये ॥ २१३ ॥

[तृतीयः प्रकारः]

वनशिग्रुष्टङ्कणश्च गुञ्जा च नृकपालकम् ।
पिष्ट्वा योषित्स्तन्यनीरैस्तेन मूषां प्रलेपयेत् ॥ २१४ ॥

वङ्गं श्वेताभ्रसत्वं च चूर्णयित्वा क्षिपेद्धमेत् ।
असंशयं मिलन्त्येव श्रेष्ठं रजतकर्मणि ॥ २१५ ॥

[चतुर्थः प्रकारः]

श्वेताभ्रसत्वं सचूर्ण्य तच्चतुर्थांशपारदम् ।
सूततुल्यं टङ्कणं च मर्दयेत्काकमाचिजैः ॥ २१६ ॥
द्रवैस्तद्गोळकं कृत्वा वङ्गपत्रेण वेष्टयेत् ।
श्वेताभ्रसत्वतुल्येन लिप्तमूषागतं धमेत् ॥ २१७ ॥
भवेत्संमेलनं सम्यक् मुख्यः स्याद्रूप्यकर्मणि ।

वज्रहेममेलापने मूषालेपः ॥

[प्रथमः प्रकारः]

अथातो वज्रकनकद्वन्द्वमेलाप्रलेपनम् ॥ २१८ ॥
गुञ्जा कान्तमुखं तुल्यं द्वन्द्वयोर्द्विगुणं बलिम् ।
स्तन्येन योषितां पिष्ट्वा मूषायामन्तरे तथा ॥ २१९ ॥
मेलयेद्वज्रमेलापलेपोऽयं कथितो मया ।

[द्वितीयः प्रकारः]

शिलाधातुः कान्तमुखं शशदन्ताश्च गन्धकः ॥ २२० ॥
अम्लवेतसकं तुल्यं पिष्ट्वा मूषां प्रलेपयेत् ।
हेमवज्रं मिलत्येव मूषायां नात्र संशयः ॥ २२१ ॥

[तृतीयः प्रकारः]

कुलीरास्थि शिलाधातु महिषीकणदञ्जलम् ।
टङ्कणोर्णासमं सर्वं कान्तास्तन्येन मर्दयेत् ॥ २२२ ॥
अनेन लेपयेन्मूषां हेमवज्रं मिलत्यलम् ।

[चतुर्थः प्रकारः]

कान्तास्यं टङ्कणं बालवत्सविड्भ्रमरास्थि च ॥
मनुष्यचिकुरास्थीनि स्त्रीस्तन्येन विमर्दयेत् ।
अनेन लिप्तमूषायां हेमवज्रं मिळेद्ध्रुवम् ॥ २२४ ॥

[पञ्चमः प्रकारः]

ताप्यटङ्कणभूनागकान्तकाचमधूनि च ।
कुलीरास्थि स्नुहीक्षीरमर्कक्षीरं समं समम् ॥ २२५ ॥
स्तन्येन मर्दयेत्सर्वं मूषालेपं तु कारयेत् ।
मूषालेपो भवेदेष वज्रहाटककमेलनः ॥ ॥ २२६ ॥
वज्रं भस्मीभवेद्यैस्तैर्मूषामन्तर्विलेपयेत् ।
धमेत्तीव्राग्निना हेमवज्रमेलापनं भवेत् ॥ २२७ ॥

वज्रहेममेलापनम् ॥

[प्रथमः प्रकारः]

अथातो मेलनं वक्ष्ये वज्रहेम्नोस्सुरेश्वरि ! ।
स्वर्णं द्वादशभागं स्यात्तदर्धं शुद्धपारदम् ॥ २२८ ॥
रसेन्द्रार्धं नागभस्म नागार्धं मृतवज्रकम् ।
एतच्चतुष्टयं चाम्लैर्मर्दयेत्तप्तखल्वके ॥ २२९ ॥
उद्धृत्य द्वन्द्वमेलापे मूषायां रोधयेद्धमेत् ।
हठात्तच्च मिलत्येतन्नात्र कार्या विचारणा ॥ २३० ॥

[द्वितीयः प्रकारः]

भावयेच्छारिबाक्षीरे मृतं वज्रं दिनं ततः ।
मर्दयेद्गोलकं कृत्वा शोषयेच्चैकभागकम् ॥ २३१ ॥
त्रिभागं रसराजं च चतुर्भागं सुवर्णकम् ।
अम्लेन मर्दयेत्पिष्टिं कृत्वा तद्वज्रगोलकम् ॥ २३२ ॥

तत्पिष्टा वेष्टयेत्तच्च भूर्जपत्रेण वेष्टयेत् ।
पक्षं न्यसेद्धान्यराशौ तदुद्धृत्य पुनः पुनः ॥ २३३ ॥
धमेद्धठान्मिलत्येव नात्र कार्या विचारणा ।

[तृतीयः प्रकारः]

वज्रं षोडशभागेन हेमपत्रेण वेष्टयेत् ॥ २३४ ॥
तत्क्षिपेल्लिप्तमूषायां स्वर्णांशं श्वेतकाचजम् ।
चूर्णं वा नृकपालं वा चूर्णं कृत्वा विनिक्षिपेत् ॥
निरुध्य च धमेत्तीव्रमेवं कुर्यात्पुनः पुनः ।
क्षिप्त्वा क्षिप्त्वा श्वेतकाचं नृकपालमथापि वा ॥२३६॥
सप्तधैवं मिलत्येव पुनरेवं विधीयते ।
अस्य हेम्नः षोडशांशं मृतं वज्रं विनिक्षिपेत् ॥
पूर्ववल्लिप्तमूषायां काचं वा नृकपालकम् ।
क्षिप्त्वा क्षिप्त्वा धमेत्तीव्रं सप्तवारं मिलत्यलम् ॥
एवं तृतीयवारं च कुर्यादेवं चतुर्थकम् ।

द्वन्द्वितानामभिषेकः ॥

अथातो द्वन्द्वितानां च प्रवक्ष्याम्यभिषेचनम् ॥ २३९ ॥
कासीसं पञ्चलवणं माक्षीकं गन्धकं तथा ।
कांक्षी क्षारत्रयं तुल्यमारनाळेन मर्दयेत् ॥ २४० ॥
तत्कल्कमातपे ताम्रपात्रे संस्थापयेत्र्यहम् ।
तस्मिन्क्षिपेद्द्रुतं नागं शतधा तद्द्रुतं द्रुतम् ॥२४१॥
ताम्रपात्रस्थसौवीरै र्भावयेच्छतवारकम् ।
द्वन्द्वितं तच्चरेत्सूतो यत्किंचिज्जारणार्हकम् ॥ २४२ ॥
रूप्यकर्मणि वङ्गं स्यान्नागं स्याद्धेमकर्मणि ।

पक्वबीजविधानम् ॥

अथातस्संप्रवक्ष्यामि पक्वबीजं सुरार्चिते ॥ २४३ ॥

[प्रथमं विधानम्]

सुवर्णे विद्रुते तुल्यं नागाभ्रं द्वन्द्वितं प्रिये ।
वाहयेद्द्वादशगुणं स्वर्णशेषं यथा धमेत् ॥ २४४ ॥
पक्वबीजमिदं ख्यातं जारयेत्पारदे क्रमात् ।

[द्वितीयं विधानम्]

पीताभ्रसत्वं स्वर्णं च समांशं द्वन्द्वितं धमेत् ॥ २४५ ॥
वाहयेद्द्वादशगुणं स्वर्णशेषं यथा धमेत् ।
पुनः पीताभ्रसत्वं च वहेद्दशगुणं शनैः ॥ २४६ ॥
स्वर्णशेषं भवेद्यावत्पक्वबीजमिदं भवेत् ।

[तृतीयं विधानम्]

नागार्कव्योमरसकं चतुस्त्र्यब्ध्येकभागिकम् ॥ २४७ ॥
चूर्णयेल्लिप्तमूषायामन्धयेच्च धमेद्दृढम् ।
माक्षिकेण च तत्खोटं संपेष्याम्लैः पुटे पचेत् ॥
पुनस्तत्सममाक्षीकमम्लैः पिष्ट्वा पुटे पचेत् ।
एवं पञ्चपुटं दत्वा तद्द्रुते हेम्नि वाहयेत् ॥ २४९ ॥
धमेद्दशगुणं यावत्तावत्स्यात्पक्वबीजकम् ।

चतुर्बीजक्रमः ॥

अथातस्सम्प्रवक्ष्यामि चतुर्बीजं वरानने ॥ २५० ॥
हेमताराहिकुटिलबीजान्येतानि तत्वतः ।
हेमबीजं नागबीजं शस्यते हेमकर्मणि ॥ २५१ ॥

तारबीजं वङ्गबीजं कथिते रूप्यकर्मणि ।
हेमबीजं तारबीजं भवेतां च रसायने ॥ २५२ ॥

नागबीजं वङ्गबीजं न रसायनकर्मणि ।
चत्वार्येतानि बीजानि भवेयू रोगशान्तये ॥ २५३ ॥

अन्यथा नैव योज्यानि बीजान्येतानि शाम्भवि ।

हेमबीजविधानम् । [प्रथमं हेमबीजम्]

गन्धकं सस्यकं चाऽपि माक्षीकं वाऽथ तालकम् ॥

शिलां च विमलां वापि वैक्रान्तं वाञ्जनं च वा ।
खर्परं वा कान्तमुखं वा चूर्णयित्वा समांशकम् ॥

शतवारान्द्रुते हेम्नि वाहयेच्च पुनः पुनः ।

[द्वितीयं नागभस्मसिद्धं हेमबीजम्]

सूतहिंगुलकंकुष्ठलोहपर्पटिकाभ्रकम् ॥ २५६ ॥

मृतार्कमाक्षीकशिलाविमलांश्च समांशकान् ।
एतान्नागकलाभागान् स्नुह्यर्कपयसा प्रिये ॥ २५७ ॥

मर्दयेत्तेन पत्राणि शुद्धनागस्य लेपयेत् ।
पुटेद्द्वात्रिंशतिपुटे नागो भस्मति तद्भवेत् ॥ २५८ ॥

समं समं च शतधा निद्रुते पूर्ववाहिते ।
सुवर्णे च तथा हेमशेषं तावद्धमेद्दृढम् ॥ २५९ ॥

[तृतीयं वङ्गभस्मसिद्धं हेमबीजम्]

अथवा भस्मयेद्वङ्गं तालशङ्खाभ्रपारदैः ।
चिंचाक्षारैस्त्रपु(स्ताप्य ?)समैः स्नुह्यर्कक्षीरमर्दितैः ॥

पुटेत्षोडशभिस्तच्च शतधा हेम्नि वाहयेत् ।

[चतुर्थं ताम्रभस्मसिद्धं हेमबीजम्]

अथवा मारयेच्छुल्बमूर्ध्वाधो गन्धकं समम् ॥ २६१ ॥
क्षिप्त्वा पुटेदष्टवारं तत्ताम्रं हेम्नि वाहयेत् ।

[पञ्चमं तीक्ष्णभस्मसिद्धं हेमबीजम्]

अथवा मारयेत्तीक्ष्णं तीक्ष्णतुल्यं च हिंगुलम् ॥
स्त्रीस्तन्यैर्मर्दयित्वा तु पुटेदथ कलांशकम् ।
तीक्ष्णस्य हिंगुलं दत्वा मर्दयेत्पुटयेत्क्रमात् ॥ २६३ ॥
एवं तत् षोडशपुटैः तत्तीक्ष्णं हेम्नि वाहयेत् ।
शतधा हेम तदिशं(?) विद्रुते हेम्नि वाहयेत् ॥

[षष्ठं हेमबीजम्]

तद्धेम्नि द्विगुणं ताप्यं चूर्णितं तद्धमेद्दृढम् ।
तच्चूर्णयेद्द्वित्रिपुटैः पञ्चभिर्मारितं भवेत् ॥ २६५ ॥
तद्वाहयेद्दशगुणं द्रुते हेम्नि धमन्धमन् ।
तदेव जायते दिव्यं सर्वसिद्धिप्रदायकम् ॥ २६६ ॥
हेमबीजमिदं ख्यातं हितं स्याद्रसजारणे ।

[सप्तमं हेमबीजम्]

सस्यकाभ्रकवैक्रांतसत्वं स्वर्णमहिं रविम् ॥ २६७ ॥
तीक्ष्णं च चूर्णयेल्लिप्तमूषायां चांघ्रितं धमेत् ।
पुनः प्रकटमूषायां धमेत्तस्मिन्द्रुते सति ॥ २६८ ॥
माक्षिकं निक्षिपेत्किंचित्किंचिद्दत्वा पुनः पुनः ।
यावत्स्वर्णावशेषं स्यात्ततस्तस्मिन्विनिक्षिपेत् ॥ २६९ ॥
स्वर्णं नागं रविं तीक्ष्णं पूर्ववच्च धमेत्क्रमात् ।
वाहयेन्माक्षिकं तद्वद्धमेत्स्वर्णावशेषकम् ॥ २७० ॥

हेमबीजमिदं ख्यातं हितं स्याद्रसजारणे ।

[अष्टमं हेमबीजम्]

समांशं चूर्णयेदभ्रं सत्वं ताम्रमयं शुभम् ॥ २७१ ॥

अभ्रकाद्द्विगुणं धौतं ताप्यं सर्वं धमेद्धठात् ।
मूषायां द्वन्द्वलिप्तायां तत्खोटं चूर्णयेत्ततः ॥ २७२ ॥

मर्द्यं दिव्यौषधिरसैः संपुटे रोधयेद्दृढम् ।
पचेद्गजपुटे तद्वच्चूर्णयेन्मर्दयेत्पुटेत् ॥ २७३ ॥

एवं पञ्चपुटैः पक्वं तद्वद्धेत्कनके द्रुते ।
यावद्दशगुणं तावन्मूषायां प्रकटे धमेत् ॥ २७४ ॥

ततस्तस्मिञ्शुद्धताप्यं क्षिप्त्वा क्षिप्त्वा धमेद्धमेत् ।
यावत्स्वर्णावशेषं स्यात्स्वर्णबीजमिदं प्रिये ॥ २७५ ॥

[नवमं हेमबीजम्]

तीक्ष्णार्कनागभस्मानि ताप्यचूर्णं समं समम् ।
एतद्द्रुते वहेद्धेम्नि यावद्दशगुणं भवेत् ॥ २७६ ॥
तावत्स्वर्णावशेषं स्यात्स्वर्णबीजमिदं प्रिये ।

[दशमं हेमबीजम्]

मृततारार्कतीक्ष्णायः समं सर्वं धमेद्दृढम् ॥ २७७ ॥

मूषायां द्वन्द्वलिप्तायां तत्खोटं चूर्णयेत्ततः ।
तच्चूर्णं द्राविते स्वर्णे वाहयेच्च शनैश्शनैः ॥ २७८ ॥

यावद्दशगुणं पश्चात्ताप्यचूर्णं क्षिपन्क्षिपन् ।
धमेत्स्वर्णावशेषं स्याद्धेमबीजमिदं प्रिये ॥ २७९ ॥

[एकादशं हेमबीजम्]

नागमेकं चतुस्ताम्रं सत्वं रसकसम्भवम् ।
मूषायां द्वन्द्वलिप्तायां सर्वं ध्मातं विचूर्णयेत् ॥ २८० ॥
तच्चूर्णं वाहयेत्स्वर्णे विद्रुते षड्गुणं शनैः ।
स्वर्णशेषं भवेद्यावत्तावत्स्यात्स्वर्णबीजकम् ॥ २८१ ॥

[द्वादशं हेमबीजम्]

ताप्येन मारयेत्ताम्रं तन्नागे वाहयेच्छनैः ।
यावच्छत(दश ?)गुणं ताप्यं चूर्णं क्षिप्त्वा धमन्धमन् ॥
तद्वाहयेद्धमेद्धेम्नि क्रमाद् द्वात्रिंशतं गुणम् ।
स्वर्णशेषं भवेद्यावत् तावत्स्याद्धेमबीजकम् ॥ २८३ ॥

[त्रयोदशं हेमबीजम्]

भागैकं खर्परीसत्वं द्विभागं चाभ्रसत्वकम् ।
त्रिभागं ताम्रचूर्णं च लिप्तमूषागतं धमेत् ॥ २८४ ॥
तत्खोटं चूर्णयेत्ताप्यं तुल्यमम्लैर्विमर्दयेत् ।
तत्क्षिपेत्संपुटे रुध्वा पुटेल्लघुपुटे पुनः ॥ २८५ ॥
एवं पञ्चपुटैः पक्वं तच्चूर्णं वाहयेद् द्रुते ।
सहस्रगुणितं हेम्नि यावत्स्वर्णावशेषितम् ॥ २८६ ॥
तावत्ताप्यं वहेद्युक्त्या स्यादिदं हेमबीजकम् ।

[चतुर्दशं हेमबीजम्]

भागैकमभ्रसत्वं च द्विभागं शुद्धताम्रकम् ॥ २८७ ॥
चूर्णयेल्लिप्तमूषायां क्षिप्त्वा रुध्वा धमेद्दृढम् ।
ततस्तं चूर्णयेत्ताप्यं तुल्यमम्लेन मर्दयेत् ॥ २८८ ॥

तद्रुध्वा संपुटे पच्यात्पुटे तच्चूर्णयेत्पुनः ।
पूर्ववन्माक्षिके क्षिप्त्वा मर्दयेत्पातयेत्प्रिये ! ॥ २८९ ॥

एवं पञ्चपुटे कार्ये तच्चूर्णं वाहयेत्प्रिये ! ।
स्वर्णे शतगुणं यावत्तावत्स्याद्धेमबीजकम् ॥ २९० ॥

[पञ्चदशं हेमबीजम्]

माक्षिकं गन्धपाषाणं हरिताळं मनश्शिलाम् ।
वैक्रान्तकं कांतमुखं सस्यकं विमलांजने ॥ २९१ ॥

रसकं चापि शतशश्चूर्णितं हेम्नि वाहयेत् ।
लोहपर्पटिकाताप्यकंकुष्ठविमलाभ्रकैः ॥ २९२ ॥

मृतशुल्बशिलासूतस्नुह्यर्कक्षीरहिंगुलैः ।
नागो निर्जीवतां याति पुटयोगैः पुनः पुनः ॥ २९३ ॥

रसतालकशुद्धाभ्रचिंचाक्षारैस्तथा त्रपु ।
मृतं नागं मृतं वङ्गं शुल्वं तीक्ष्णं च वा मृतम् ॥

एकैकमुत्तमे हेम्नि वाहयेत्सुरवन्दिते ! ।
निरुद्धे पन्नगे हेम्नि निर्व्यूढे शतसंगुणैः ॥ २९५ ॥

हेम्नि नागादिनिर्वहणेन वर्णव्यत्यासः ॥

नागजीर्णं रोचनाभं हारीतं ताम्रवाहितम् ।
तीक्ष्णजीर्णं रविसमं वङ्गजीर्णं जपानिभम् ॥ २९६ ॥

[प्रथमं तारबीजम्]

श्वेताभ्रसत्वं तीक्ष्णं च ताप्यं च विमलां तथा ।
खर्परं च समं सर्वं कुटिलं च चतुर्गुणम् ॥ २९७ ॥

धमेत्सर्वं चूर्णयेच्च भस्मयेत्पुटपञ्चकैः ।
तारे द्रुते शतगुणं वाहयेच्च शनैश्शनैः ॥ २९८ ॥

तारबीजमिदं ख्यातं जारणे परमं हितम् ।

[द्वितीयं तारबीजम्]

यथा ताप्येन कुटिलं तथा ताप्येन मारयेत् ॥ २९९ ॥

तद्भागं च समं तालं तत्समं रजते द्रुते ।
त्रिंशद्गुणं भवेद्यावत् तावद्वाहयं क्रमेण च ॥

तारबीजमिदं ख्यातं पारदे तच्च जारयेत् ।

[तृतीयं तारबीजम्]

तीक्ष्णं वङ्गं च विमलां समांशं चूर्णयेत्प्रिये ! ॥

द्वन्द्वमेलोपलिप्तायां धमेत्तत्खोटकं भवेत् ।
तत्खोटं चूर्णयेदम्लैर्मर्दयेत्पुटयेदिति ॥ ३०२ ॥

पञ्चवारं प्रकुर्वीत भस्म तज्जायते प्रिये ! ।
तद्भस्म विद्रुते तारे वाहयेच्च समं समम् ॥ ३०३ ॥

धमन्धमन्दशगुणं यावद्भवति भैरवि ! ।
तारबीजमिदं श्रेष्ठं रसराजस्य जारणे ॥ ३०४ ॥

[चतुर्थं तारबीजम्]

श्वेताभ्रसत्वं कुटिलं तारमाक्षीकसत्वकम् ।
त्रयं समांशं संचूर्ण्य लिप्तमूषागतं धमेत् ॥ ३०५ ॥

तच्चूर्णं वाहयेत्तारे तारतुल्यं विनि(ष ?)क्षिपेत् ।
यावद्दशगुणं तावत्तारमाक्षीकवापतः ॥ ३०६ ॥

तारबीजमिदं प्रोक्तं जारणे परमं हितम् ।

[पञ्चमं तारबीजम्]

त्रिद्व्येकभागान्देवेशि तीक्ष्णतालामलान्क्रमात् ॥ ३०७ ॥

चूर्णितान् लिप्तमूषायां क्षिप्त्वा तीव्राग्निना धमेत् ।
तत्खोटं चूर्णयेदम्लैर्मर्दयेत्पुटयेदिति ॥ ३०८ ॥

सप्तधा तद्द्रुते तारे वाह्यं दशगुणं ततः ।
क्षिप्त्वा क्षिप्त्वा ताळचूर्णं तारशेषं यथा धमेत् ॥

तारबीजमिदं श्रेष्ठं जारणे परमं हितम् ।

[षष्ठं तारबीजम्]

खर्परी ताळशुभ्राभ्रसत्वकं तारमाक्षिकम् ॥ ३१० ॥

तुल्यं सर्वसमं वङ्गं सर्वं मूषागतं धमेत् ।
चूर्णयेन्मर्दयेदम्लैः पुटेदेवं तु सप्तधा ॥ ३११ ॥

तच्चूर्णं वाहयेत्तारे द्रुते दशगुणं धमन् ।
तारशेषं भवेद्यावत्तावत्स्यात्तारबीजकम् ॥ ३१२ ॥

[सप्तमं तारबीजम्]

श्वेताभ्रसत्वं वङ्गं च द्वन्द्वं कुर्याच्च पूर्ववत् ।
तच्चूर्णे ताळकं दत्वा पादमम्लैर्विमर्दयेत् ॥ ३१३ ॥

पुटेत्तस्मिन्क्षिपेत्ताळं पूर्ववन्मर्दनं पुटम् ।
एवं पञ्चपुटं कुर्यात्तच्चूर्णं वाहयेद्द्रुते ॥ ३१४ ॥

रजते द्वादशगुणं तद्भवेत्तारबीजकम् ।

[अष्टमं तारबीजम्]

श्वेताभ्रसत्वं वङ्गञ्च वङ्गार्धं तीक्ष्णचूर्णकम् ॥ ३१५ ॥

तीक्ष्णांशा तारविमला सर्वं मूषागतं धमेत् ।
ततस्तच्चूर्णयेदम्लैः पिष्ट्वा रुध्वा पुटेत्पचेत् ॥ ३१६ ॥

पञ्चवारं पुनस्तच्च वाहयेद्रजते द्रुते ।
यावच्छतगुणं तावत्तालकं च क्षिपन् धमेत् ॥ ३१७ ॥

तारबीजमिदं ख्यातं जारणे परमं हितम् ।

[द्वितीयं तारबीजम्]

यथा ताप्येन कुटिलं तथा ताप्येन मारयेत् ॥ २९९ ॥

तद्भागं च समं तालं तत्समं रजते द्रुते ।
त्रिंशद्गुणं भवेद्यावत् तावद्वाह्यं क्रमेण च ॥

तारबीजमिदं ख्यातं पारदे तच्च जारयेत् ।

[तृतीयं तारबीजम्]

तीक्ष्णं वङ्गं च विमलां समांशं चूर्णयेत्प्रिये ! ॥

द्वन्द्वमेलोपलिप्तायां धमेत्तत्खोटकं भवेत् ।
तत्खोटं चूर्णयेदम्लैर्मर्दयेत्पुटयेदिति ॥ ३०२ ॥

पञ्चवारं प्रकुर्वीत भस्म तज्जायते प्रिये ! ।
तद्भस्म विद्रुते तारे वाहयेच्च समं समम् ॥ ३०३ ॥

धमन्धमन्दशगुणं यावद्भवति भैरवि ! ।
तारबीजमिदं श्रेष्ठं रसराजस्य जारणे ॥ ३०४ ॥

[चतुर्थं तारबीजम्]

श्वेताभ्रसत्वं कुटिलं तारमाक्षीकसत्वकम् ।
त्रयं समांशं संचूर्ण्य लिप्तमूषागतं धमेत् ॥ ३०५ ॥

तच्चूर्णं वाहयेत्तारे तारतुल्यं विनि(षे ?)क्षिपेत् ।
यावद्दशगुणं तावत्तारमाक्षीकवापतः ॥ ३०६ ॥

तारबीजमिदं प्रोक्तं जारणे परमं हितम् ॥

[पञ्चमं तारबीजम्]

त्रिद्व्येकभागान्देवेशि तीक्ष्णतालामलान्क्रमात् ॥ ३०७ ॥

चूर्णितान् लिप्तमूषायां क्षिप्त्वा तीव्राग्निना धमेत् ।
तत्खोटं चूर्णयेदम्लैर्मर्दयेत्पुटयेदिति ॥ ३०८ ॥
सप्तधा तद्द्रुते तारे वाह्यं दशगुणं ततः ।
क्षिप्त्वा क्षिप्त्वा ताळचूर्णं तारशेषं यथा धमेत् ॥
तारबीजमिदं श्रेष्ठं जारणे परमं हितम् ।

[षष्ठं तारबीजम्]

खर्परी ताळशुभ्राभ्रसत्वकं तारमाक्षिकम् ॥ ३१० ॥
तुल्यं सर्वसमं वङ्गं सर्वं मूषागतं धमेत् ।
चूर्णयेन्मर्दयेदम्लैः पुटेदेवं तु सप्तधा ॥ ३११ ॥
तच्चूर्णं वाहयेत्तारे द्रुते दशगुणं धमन् ।
तारशेषं भवेद्यावत्तावत्स्यात्तारबीजकम् ॥ ३१२ ॥

[सप्तमं तारबीजम्]

श्वेताभ्रसत्वं वङ्गं च द्वन्द्वं कुर्याच्च पूर्ववत् ।
तच्चूर्णे ताळकं दत्वा पादमम्लैर्विमर्दयेत् ॥ ३१३ ॥
पुटेत्तस्मिन्क्षिपेत्ताळं पूर्ववन्मर्दनं पुटम् ।
एवं पञ्चपुटं कुर्यात्तच्चूर्णं वाहयेद्द्रुते ॥ ३१४ ॥
रजते द्वादशगुणं तद्भवेत्तारबीजकम् ।

[अष्टमं तारबीजम्]

श्वेताभ्रसत्वं वङ्गञ्च वङ्गार्धं तीक्ष्णचूर्णकम् ॥ ३१५ ॥
तीक्ष्णांशा तारविमला सर्वं मूषागतं धमेत् ।
ततस्तच्चूर्णयेदम्लैः पिष्ट्वा रुध्वा पुटेत्पचेत् ॥ ३१६ ॥
पञ्चवारं पुनस्तच्च वाहयेद्रजते द्रुते ।
यावच्छतगुणं तावत्तालकं च क्षिपन् धमेत् ॥ ३१७ ॥

तारशेषं भवेद्यावत् तावत्स्यात्तारबीजकम् ।

ताम्रबीजम् ॥

ताम्रबीजं प्रवक्ष्यामि जारणार्थं रसस्य तु ॥ ३१८ ॥

स्वर्णं ताम्रं समं देवि तयोस्तुल्यं च माक्षिकम् ।
ऊर्ध्वाधो निक्षिपेल्लिप्तमूषायां तद्धमेद्दृढम् ॥

धमेदेवं च दश(शत ?)धा दत्वा दत्वाऽथ माक्षिकम् ।
ताम्रबीजमिदं ख्यातं भास्वरिकिरणसंनिभम् ॥ ३२० ॥

चतुष्षष्टितमे भागे शुल्बवेधं तु दापयेत् ।
तदंशं(तारं) जायते श्रेष्ठं धर्मकामार्थमोक्षदम् ॥ २५३ ॥

निशाचरस्य पुष्पाणि सूक्ष्मचूर्णानि कारयेत् ।
पलानि दशचूर्णस्य रसैर्धात्र्यास्तु भावयेत् ॥ २५४ ॥

घृतेन मधुनाऽऽलोड्य नवभाण्डे विनिक्षिपेत् ।
धान्यराशौ निधातव्यं त्रिस्सप्ताहं सुरेश्वरि ! ॥ २५५ ॥

तेन भक्षितमात्रेण वलीपलितवर्जितः ।
वल्कलं सूक्ष्मचूर्ण तु मधुना सहितं लिहेत् ॥ २५६ ॥

अर्धमासप्रयोगेण प्रत्ययोगं(क्षोऽयं) भवेत्प्रिये ! ।
तस्य मूत्रपुरीषेण शुल्बं भवति काञ्चनम् ॥ २५७ ॥

मासमात्रप्रयोगेण पन्नगः काञ्चनं भवेत् ।
ग्राह्यं तत्फलतैलं तु यन्त्रे पातालसंज्ञके ॥ २५८ ॥

तेन तैलेन देवेशि ! रसं संकोचयेद्बुधः ।
तत्क्षणाज्जायते देवि ! पाटबन्धो महारसः ॥ २५९ ॥

कटकं कङ्कणं कार्यं रसलिङ्गं वरानने ! ।
संकोचमरणं तेन कर्तव्यं परमाद्भुतम्[1] ॥ २६० ॥

[अङ्गनायिकाकल्पः ।]

पुनरन्यं प्रवक्ष्यामि रसबन्धं सुदुर्लभम् ।

---

1. निशाचररसे क्षिप्तं सप्तवारं तु भास्करम् ।
काळिकारहितं तेन जायते कनकप्रभम् ॥

तत्तारेण समं वाह्यं तेन सिक्त तु वापितम् ।
दशांशं वेधयेत्सूतं दश पीतं शतेन च ॥

शतं वेधयते लक्षं सहस्रं कोटिवेधकम् ॥
दशांशं कोटिवेधि स्यात्कोटिवेधि समेन च ।

त्रैलोक्यजननी या सा ओषधी अङ्गनायिका ॥२६१॥

तया संपर्कमात्रेण बद्धस्तिष्ठति पारदः ।
सप्ताहं मर्दितस्यास्य महौषध्या रसै रसः ॥ २६२ ॥

शतांशेनैव वेधेन कुरुते दिव्यकाञ्चनम् ।
त्रिस्सप्ताहं रसे तस्या मर्दनाद्वरवर्णिनि ! ॥ २६३ ॥

लक्षवेधी रसस्साक्षादष्टौ लोहानि विध्यति ।
त्रिसप्ताहेन देवेशि ! दशलक्षाणि विध्यति ॥ २६४ ॥

चतुर्थे चैव सप्ताहे कोटिवेधी भवेद्रसः ।
स्वेदतापनिघर्षेण महौषध्या रसेन तु ॥ २६५ ॥

ददाति खेचरीं सिद्धिमनिवारितगोचरः ।
कामयेत्कामिनीनां तु सहस्रं दिवसान्तरे ॥ २६६ ॥

नष्टच्छायो ह्यदृश्यश्च त्रैलोक्यं च भ्रमेदसौ ।
महौषध्या रसेनैव मृतसंजीवनं भवेत् ॥ २६७ ॥

अनेन घातयेत्सूतं पञ्चावस्थं कुरु प्रिये ! ।
मृतस्य दापयेन्नस्यं हस्तौ पादौ तु मर्दयेत् ॥ २६८ ॥

तस्य तु प्रविशेज्जीवो मृतस्यापि वरानने ! ।

[नरसारकल्पः ।]

पुनरन्यं प्रवक्ष्यामि रसबन्धं सुदुर्लभम् ॥ २६९ ॥

नर(क)सारस्पर्शनेन क्षणाद्बध्येत सूतकः ।
नर(क)साररसं दत्वा द्विपदीरजसा रसे ॥ २७० ॥

दिनान्ते बन्धमायाति सर्वलोहानि रञ्जति ।
नर(क)साररसेनैव भावयेत्तु मनश्शिलाम् ॥ २७१ ॥

निर्गन्धा जायते सा तु घातयेत्तेन पन्नगम् ।
द्विपदीरजसा सार्धं निरुद्धः पन्नगो भवेत् ॥ २७२ ॥

नर(क)साररसेनैव जीर्णे षड्गुणपन्नगे ।
तारे ताम्रेऽपि वा देवि ! कोटिवेधी भवेद्रसः ॥२७३॥

नरसाररसे स्तन्ये भावितं सप्तधा पृथक् ।
रसस्य दापयेद्ग्रासं यन्त्रे विद्याधराह्वये ॥ २७४ ॥

जीर्यते गगनं देवि ! निर्मुखे च वरानने ! ।
नर(क)साररसेनेशि ! कीटमारीरसेन च ॥ २७५ ॥

द्रावयेद्गगनं देवि ! तीक्ष्णलोहं च पन्नगम् ।
नर(क)साररसेनेशि ! हनुमत्या रसेन च ॥ २७६ ॥

जायते काञ्चनं दिव्यं निषेकाद्भास्करः प्रिये ! ।
नर(क)साररसे दत्वा मञ्जिष्ठां रक्तचन्दनम् ॥ २७७ ॥

स्वरसैर्मर्दयन्त्याश्च पन्नगं देवि ! सेचयेत् ।
तत्क्षणात्काञ्चनं दिव्यं सप्तवारा निषेचितम्[1] ॥२७८॥

अष्टमांशयुतं हेम हेमकर्मणि चौषधम् ।
नर(क)साररसे भाव्यं सप्तवारं तु हिङ्गुलम् ॥२७९॥

तेनैव घातयेत्तीक्ष्णं भस्मीभूतत्वमाप्नुयात् ।
तद्भस्म ताम्रपिष्टे तु त्रिगुणं तेन निर्वहेत् ॥ २८० ॥

तच्छुल्बं हेमसङ्काशं तारे वाऽष्टांशयोजितम् ।
तारं हेमसमांशं तु द्विवर्णं पतितं भवेत् ॥ २८१ ॥

नर(क)साररसे भाव्यं रसकं सप्तवारतः ।
नर(क)साररसेनैव रसेन्द्रं सप्तवारतः ॥ २८२ ॥

तं रसं रसकं चैव तीक्ष्णलोहं च पन्नगम् ।
नर(क)साररसेनैव तेनैकत्र विमर्दयेत् ॥ २८३ ॥

---

1. रविघृष्टं तु तं देवि ! पन्नगं त्रिगुणं प्रिये ! ।
तच्छुल्बं तारसङ्काशं तारपञ्चांशयोजितम् ॥

तत्क्षणाज्जायते बद्धो रसस्य रसकस्य च ।
तीक्ष्णनागं तथा शुल्बं रसकेन तु रञ्जयेत् ॥ २८५ ॥
हठात्तज्जायते हेम कूश्माण्डकुसुमप्रभम् ।

[कङ्कालखेचरीकल्पः ।]

पुनरन्यं प्रवक्ष्यामि रसबन्धं सुदुर्लभम् ॥ २८६ ॥
कङ्कालखेचरी नाम्ना ओषधी परमेश्वरि ! ।
तस्य तैलं तु संग्राह्यमाद्य(माघ)खेचरिसंयुतम् ॥२८७॥
स्थापयेद्दिनमेकं तु पात्रे भास्करनिर्मिते ।
द्वितीये वासरे प्राप्ते वज्ररत्नं तु घातयेत् ॥ २८८ ॥
अनले धामयेत्तं तु सुतप्तं प्रज्वलत्प्रभम्[1] ।

[मन्त्रसिद्धासनीकल्पः ।]

सबीजा चौषधी ग्राह्या काचिद्गुल्मलता प्रिये ! ॥
मन्त्रसिद्धासनी नाम तृतीया देवि ! खेचरी ।
पातालयन्त्रे तत्तैलं गृह्णीयात्ताम्रभाजने ॥ २९० ॥
तस्य तैलस्य मध्ये तु प्रक्षिपेत्खेचरीरसम् ।
मेदिनीयन्त्रमध्ये तु स्थापयेच्च वरानने ! ॥ २९१ ॥

---

1. कङ्कालखेचरीतैले वज्ररत्नं निषेचयेत् ।
दशवारं निषिक्तं तु भस्माकारं हि जायते ॥
तद्धेमपक्वबीजं तु तेन भस्मसमं कुरु ।
त्रिभागं टङ्कणं दत्वा अन्धमूषागतं धमेत् ॥
तत्क्षणान्मिलति द्वन्द्वं वज्ररत्नं च काञ्चनम् ।
चन्द्रहेम वरारोहे समं जारयते यदि ॥
कोटिवेधी रसो देवि ! लोहान्यष्टौ च विध्यति ।
पुनरन्यं प्रवक्ष्यामि रसबन्धं सुदुर्लभम् ॥

पूर्वौषध्यां तु तद्देवि ! गगनं मेदिनीजले ।
रसे मा(श्रा)सं ततो दत्वा मर्दनाद्गोलकं कुरु ॥२९२॥
बध्वा पोट्टलिकां तेन गगनं जारयेत्प्रिये ! ।
समे तु गगने जीर्णे बद्धस्तिष्ठति पारदः ॥ २९३ ॥
भस्त्राफूत्कारयुक्तेन धाम्यमानो न नश्यति ।
काकविष्ठासमं रूपं समजीर्णस्य जायते ॥ २९४ ॥
द्विगुणे गगने जीर्णे ह्यष्टलोहानि संहरेत् ।

[इरिन्दिरीकल्पः ।]

पुनरन्यं प्रवक्ष्यामि रसबन्धं सुदुर्लभम् ॥ २९५ ॥
शिवदेहात्समुत्पन्ना ओषधी तु इरिन्दिरी ।
जारयेद्गन्धकं सा तु जारयेत्साऽपि तालकम् ॥२९६॥
काञ्चनं जारयेत्सा तु रसेन्द्रं सा च बन्धयेत् ।
प्रवालं द्रावयेत्सा तु द्रावयेद्गगनं तथा ॥ २९७ ॥
वज्रं च घातयेत्सा तु सर्वसत्वं च घातयेत् ।
जारयेत्सर्वलोहानि सत्वान्यपि च जारयेत् ॥ २९८ ॥
इरिन्दिरीरसे न्यस्य गोशृङ्गे तु वरानने ! ।
धान्यराशौ निधातव्यं द्रुतस्तिष्ठति पारदः ॥ २९९ ॥
दिव्यौषध्या रसेनैव रसेन्द्रस्सुरवन्दिते ! ।
समे तु कनके जीर्णे दशकोटिं तु वेधयेत् ॥ ३०० ॥
पञ्चमे लक्षकोटिं तु षड्गुणे स्पर्शवेधकः ।
सप्तमे धूम्रवेधी स्यादष्टमे त्ववलोकतः ॥ ३०१ ॥
नवमे शब्दवेधी स्यादत ऊर्ध्वं न विद्यते ।
भ्रमन्ति पशवो मूढाः कुलौषधिविवर्जिताः ॥ ३०२ ॥

तृणौषधिरसानां च नैव सिद्धिः प्रजायते ।
तस्मात्सर्वप्रयत्नेन ज्ञातव्या तु कुलौषधिः ॥ ३०३ ॥

दिव्यौषध्यश्चतुष्षष्टिः कुलमध्ये व्यवस्थिताः ।
नैव जानाति मूढास्ताश्शिवमोहेन मोहिताः ॥ ३०४ ॥

अदिव्यास्तु तृणौषध्यो जायन्ते गिरिगह्वरे ।
तृणौषध्या रसे सूतो नैव बद्धः कदाचन ॥ ३०५ ॥

अक्षयो नैव तिष्ठेत कुलौषधिविवर्जितः ।
कुलौषध्या विहीनास्तु गगनं चारयन्ति ये ॥ ३०६ ॥

स रसस्तु वरारोहे ! वह्निमध्ये न तिष्ठति ।
न खोटं न च वा भस्म नैव द्रव्यं करोति सः ॥

किंचिद्द्रव्यं प्रकुर्वन्ति धाम्यमानं न तिष्ठति ।
पत्रे पाके कषे च्छेदे नैव तिष्ठति काञ्चनम् ॥३०८॥

न वेधं च शतादूर्ध्वं करोति स रसः प्रिये ! ।
यावन्न चाब्द(बद्ध)मेकं तु विक्रान्तं(क्रीतं)त्रपु (तत्तु) काञ्चनम् ॥

धर्मार्थकाममोक्षेषु नैव दद्यात्ततः प्रिये ! ।

श्रीभैरवी—

निर्जीवत्वं गतस्सूतः कथं जीवं ददाति सः ॥ ३१० ॥

निर्जीवेन तु निर्जीवं कथं जीवति शंकरः ।

श्रीभैरवः—

दिव्यौषध्या यदा देवि ! रसेन्द्रो मर्दितो भवेत् ॥

कालिकारहितस्सूतस्तदा भवति पार्वति ! ।

परस्य हरते कालं कालिकारहितो रसः ॥ ३१२ ॥

अष्टानां चैव लोहानां मलं शमयति क्षणात् ।
महामूर्च्छागतं सूतं को वा विकथयेन्मृतम् ॥ ३१३ ॥

दिव्यौषध्या रसेनैव जायते नष्टचेतनः ।
पञ्चभूतात्मकस्सूतस्तिष्ठत्येव सदाशिवः ॥ ३१४ ॥

[क्ष्मापालकल्पः ।]

पुनरन्यं प्रवक्ष्यामि रसबन्धनमीश्वरि! ।
क्ष्मापालेन हरेद्वज्रं अनेनैव तु काञ्चनम् ॥ ३१५ ॥
वज्रभस्म हेमभस्म तद्वा एकत्र बन्धयेत् ।

[अन्ये कुलमूलिकाकल्पाः ।]

निशाचररसे जार्यं नरजीवेन जारयेत् ॥ ३१६ ॥
तं सूतं मारयेद्भद्रे! जागरिर्दिव्य ओषधिः ।
भक्षितस्स रसो येन सोऽपि साक्षात्सदाशिवः ॥३१७॥
भक्षिते तोलकैकेन स्पर्शवेधी भवेन्नरः ।
प्रस्वेदात्तस्य गात्रस्य अष्टौ लोहानि काञ्चनम् ॥३१८॥
लक्षवर्षसहस्राणि स जीवेत्साधकोत्तमः ।
प्रस्वेदात्तस्य गात्रस्य रसराजश्च बध्यते ॥ ३१९ ॥
अजापतिः कृष्णतेजाः क्षणाद्बध्नाति सूतकम् ।
जागरीस्पर्शनाद्देवि! क्ष्मापालेन च बध्यते ॥ ३२० ॥
तुरु(वज्र)वल्ल्या रसेनैव भावितं गगनं प्रिये! ।
जारयेद्वालुकायन्त्रे खोटो भवति तत्क्षणात् ॥ ३२१ ॥
द्रु(मृ)तगोलकमाषैकं माषैकं हेमगोलकम् ।
एकीकृत्य तु सम्मर्द्य लुङ्गाम्लेन दिनत्रयम् ॥ ३२२ ॥
कर्षैकं नागपत्राणि रसकल्केन लेपयेत् ।
वेष्टयेद्वृश्चिकालीं च तत्पिण्डं लेपयेत्ततः ॥ ३२३ ॥

मारयेत्पन्नगं देवि! शक्रगोपनिभं भवेत्।
कर्षैकं तारपर्णानि मृतनागेन लेपयेत् ॥ ३२४ ॥

लेपयेद्वृश्चिकालीं च तत्पत्रं लेपयेत्ततः।
तत्तारं म्रियते देवि! सिन्दूरारुणसन्निभम् ॥ ३२५ ॥

सहस्रांशेन तेनैव शुल्ववेधं प्रदापयेत्।
जायते कनकं दिव्यं देवाभरभूषणम् ॥ ३२६ ॥

क्षीरयुक्ता बहुफला ग्रन्थियुक्ता च पार्वति!।
नाम्ना वर्तुलपत्राणि शस्यते रसबन्धने ॥ ३२७ ॥

एकवारं कन्दकल्के मूकमूषागतं रसम्।
धमेन्मुखानिलैर्बद्धो भक्षणाय प्रशस्यते ॥ ३२८ ॥

रक्तकञ्चुकिकन्दं तु स्त्रीस्तन्येन तु पेषितम्।
मूषायां पूर्वयोगेन कुरुते सूतबन्धनम् ॥ ३२९ ॥

वृश्चिकापत्रिकाबीजं नारीक्षीरसमन्वितम्।
धमयेत्पूर्ववत्सूतं भक्षणार्थाय वार्तिकः ॥ ३३० ॥

वज्रकन्दं समादाय रसं मध्ये विनिक्षिपेत्।
गजेन्द्राख्यं पुटं दद्यात्सप्तधा बन्धतां नयेत् ॥ ३३१ ॥

भक्षयेत्तं रसं प्राज्ञष्षण्मासादमरो भवेत्।
लाङ्गलीकन्दमादाय कर्कोटीकन्दमेव च ॥ ३३२ ॥

रसं तन्मध्यगं कृत्वा स्वेदयेन्मर्दयेत्पुनः।
म्रियते नात्र सन्देहो ध्मातस्तीव्रानलेन तु ॥ ३३३ ॥

शुकचञ्चुगतं सूतं पुटयेद्धामयेत्ततः।
शतांशवेधकर्ताऽयं देहसिद्धिकरो भवेत् ॥ ३३४ ॥

हंसपादीरसं सूतं शुष्ककन्दोदरे क्षिपेत्।
गजेन्द्रपुटनं दद्यान्म्रियते नात्र संशयः ॥ ३३५ ॥

सहस्रवेधकर्त्ता च जायते नात्र संशयः ।
हंसांघ्रि शुकचञ्चुं च गृहीत्वा मर्दयेद्रसम् ॥ ३३६ ॥
क्रौञ्चपादोदरे क्षिप्त्वा ततो दद्यात्पुटत्रयम् ।
म्रियते नात्र सन्देहो लक्षवेधी महारसः ॥ ३३७ ॥

[तृणज्योतिःकल्पः ।]

तृणज्योतिरिति ख्यातां शृणु दिव्यौषधिं प्रिये ! ।
निशा तु प्रज्वलेन्नित्यं नाह्ना ज्वलति पार्वति ! ॥
तस्य मूले तु संक्षिप्ते क्षीरं रक्तं भवेत्क्षणात् ।
तन्मूलरसगन्धाभ्रैर्मातुलुङ्गाम्लपेषितैः ॥ ३३९ ॥
शुल्बपत्रं विलिप्तं तु भवेद्धेम पुटत्रयात् ।
तन्मूलचूर्णसंयुक्तो रसराजस्सुरेश्वरि ! ॥ ३४० ॥
मातुलुङ्गरसे घृष्टमभ्रकं चरति क्षणात् ।

[उच्चाटाकल्पः ।]

अथोच्चाटां प्रवक्ष्यामि रसबन्धकरीं प्रिये ! ॥ ३४१ ॥
एकमेव भवेन्नालं तस्या रोमप्रवेष्टनम् ।
तस्याग्रे च भवेत्पुष्पं शुकतुण्डस्य सन्निभम् ॥ ३४२ ॥
तत्पत्राणि च देवेशि ! शुकपिञ्छनिभानि च ।
तत्कन्दं कूर्मसंस्थानं क्षीरं सिन्दूरसन्निभम् ॥ ३४३ ॥
जलं स्रवेन्मधूच्छिष्टे तत्समादाय पार्वति ! ।
वेधयेत्सर्वलोहानि काञ्चनानि भवन्ति च ॥ ३४४ ॥
रसतालकतुल्यानि मर्दयेदुच्चटारसैः ।
आतपे म्रियते तप्तो रसो दिव्यौषधीबलात् ॥ ३४५ ॥
वेधयेत्सर्वलोहानि लक्षांशेन वरानने ! ।

आवर्तितं भवेद्यावज्जायतेऽर्कसमप्रभम्[1] ॥ ३४६ ॥

[रक्तस्नुहीकल्पः।]

रसं रक्तस्नुहीक्षीरं कुनटीं गन्धकाभ्रकम्।
दरदं चैव लोहानि सहस्रांशेन वेधयेत् ॥ ३४७ ॥

स्नुहीक्षीरं समादाय निशाचूर्णेन वेष्टयेत्[2]।
घुटिकीकृत्य तेनैव नागं विध्यति तत्क्षणात् ॥ ३४८ ॥

[स्थलपद्मिनीकल्पः।]

अथातस्स्थलपद्मिन्या दिव्यौषध्या विधिं शृणु।
पद्मिनीसदृशा पत्रैः पुष्पैरपि च तादृशी ॥ ३४९ ॥

भङ्गे चैव स्रवेत्क्षीरं रक्तवर्णा सुशोभना।
आक्रम्य वामपादेन पश्येद्गगनमण्डलम् ॥ ३५० ॥

पश्येच्च तारकायुक्तं ग्रहनक्षत्रमण्डलम्।
लक्षयोजनतो देवि! सा ज्ञेया स्थलपद्मिनी ॥३५१॥

तस्याः पञ्चाङ्गमादाय हरगौरीसमन्वितम्।
मनश्शिलातालयुक्तं माक्षिकेण समन्वितम् ॥ ३५२ ॥

मर्दयेत्सप्तरात्रं तु तेन शुल्बञ्च वेधयेत्।
सहस्रांशेन देवेशि! विद्धं भवति काञ्चनम् ॥३५३॥

तस्याः पञ्चाङ्गमादाय पूर्वोक्तविधिना प्रिये!।
चारयेत्सूतराजं तु मूकमूषागतं धमेत् ॥ ३५४ ॥

---

1. अथातस्तिलतैलेन पाचयेच्च दिनत्रयम्।
   तथा शुल्बस्य पत्राणि वेध्यं जांबूनदं भवेत् ॥

2. स्नुहीक्षीरं समादाय निशार्धं हेम चोभयम्।
   कुनटीं गन्धचूर्णं च सर्वमेकत्र मर्दयेत् ॥
   अनेनैव प्रकारेण निशार्धं हेम शोधयेत्।

म्रियते मूषिकामध्ये संकोचेन न संशयः ।
तेनैव सर्वलोहानि सहस्रांशेन वेधयेत्[1] ॥ ३५५ ॥

[चित्रककल्पः ।]

चित्रकस्य यथा गुह्यं कथयामि समासतः ।
त्रिविधश्चित्रको ज्ञेयः कृष्णो रक्तो रसायनम् ॥३५६॥

शुक्लो व्याधिप्रशमनश्श्रेष्ठमध्यकनीयसाः ।
कृष्णं रक्तं सितं वाऽपि हेमन्ते नोद्धरेद्बुधः ॥३५७॥

कृष्णचित्रकमुत्पाट्य गोभिर्नाघ्रातमीश्वरि ! ।
क्षीरमध्ये क्षिपेत्क्षीरं कृष्णवर्णं भवेत्क्षणात् ॥ ३५८ ॥

तस्य पञ्चाङ्गचूर्णेन पारदं सह मर्दयेत् ।
धमेच्च मूकमूषायां खोटो भवति तत्क्षणात् ॥ ३५९ ॥

रक्तांबरधरो भूत्वा रक्तमाल्यानुलेपनः ।
कृष्णपक्षे तु पञ्चम्यां रक्तमाल्यौदनेन तु ॥ ३६० ॥

बलिं दत्वा महादेवि ! रक्तचित्रकमुद्धरेत् ।
रक्तचित्रकचूर्णेन वङ्गं पायै(स्तापै)स्त्रिभिस्त्रिभिः ॥

सर्वदोषविनिर्मुक्तस्स्तम्भमायाति तत्क्षणात् ।
तन्मूलं सूतकं ताम्रं कुंकुणीतैलसेचनात् ॥ ३६२ ॥

---

1. [कुमुदिनीकल्पः ।]

अथातस्संप्रवक्ष्यामि कुमुदिन्या निधिं प्रिये ! ।
भित्वा काश्मीरिपाषाणे पूर्णिमायां तु कारयेत् ॥
तस्याः पञ्चाङ्गमादाय भावयेत्तु मनश्शिलाम् ।
खर्परे धारयित्वा तु भावयेत्तु पुनः पुनः ॥
खर्परे द्रावितं नागं तत्कल्केन युतं कुरु ।
काश्मीरद्रवतुल्यं हि जायते कनकं ध्रुवम् ॥

एकविंशतिवारेण शुद्धं शुल्वं भविष्यति।
रक्तचित्रकभल्लाततैललिप्तं पुटेन तु ॥ ३६३ ॥

चन्द्रार्कपत्रं देवेशि! जायते दिव्यकाञ्चनम्।
नागिनीकन्दसूतेन्द्ररक्तचित्रकसंयुतम् ॥ ३६४ ॥

पत्रलेपप्रतीवापैश्चन्द्रार्कं काञ्चनं भवेत्[1]।

[ज्योतिष्मतीतैलकल्पः।]

ज्योतिष्मतीतैलविधिं वक्ष्यामि शृणु पार्वति! ॥३६५॥

ज्योतिष्मती नाम लता या च काञ्चनसन्निभा।
वल्लीवितानबहुला हेमवर्णफला शुभा ॥ ३६६ ॥

आषाढपूर्वपक्षेऽस्या गृहीत्वा बीजमुत्तमम्।
तिलवत्क्वाथयित्वा वा हस्तपादैरथापि वा ॥ ३६७ ॥

तस्यास्तैलं समादाय कुम्भे ताम्रमये क्षिपेत्।
स्थापयेद्भूगतं कुम्भं क्रमादूर्ध्वतुषाग्निना ॥ ३६८ ॥

षण्मासे तु व्यतिक्रान्ते स घटः काञ्चनं भवेत्।
ताम्रं हेमसमं कृत्वा तैलमाक्षीकमिश्रितम् ॥ ३६९ ॥

प्रतिवापेन सि(निषि)ञ्चेत्तद्धेम ताम्रसमं भवेत्।
तथा च शतवेधी स्याद्विद्यारत्नमनुत्तमम् ॥ ३७० ॥

[दग्धरुहाकल्पः।]

दग्धरुहां प्रवक्ष्यामि रसबन्धकरीं प्रिये!।
स्पर्शौषधीति सा ज्ञेया सर्वकामार्थसाधनी ॥ ३७१ ॥

शश्वच्छिन्ना महादेवि! दग्धा सा पावकेन तु।
प्ररोहति क्षणाद्दिव्या दग्धा सा तु महौषधी ॥३७२॥

---

1. रक्तचित्रकसंयुक्तो रसोऽपि सर्वदो भवेत्।

रक्तं पीतं सितं कृष्णं तस्याः पुष्पं प्रजायते ।
चणकस्येव पत्राणि सुप्रसूतानि लक्षयेत् ॥ ३७३ ॥

सा स्थिता गोमतीतीरे गङ्गायामर्बुदे गिरौ ।
उज्जयिन्या दक्षिणतो वनान्तेषु च दृश्यते ॥ ३७४ ॥

तस्याः कन्दरसं दिव्यं कृष्णराजीसमन्वितम् ।
ताम्बूलेन समं कृत्वा घुटिकां कारयेद्बुधः ॥ ३७५ ॥

सर्वेषामेव लोहानां द्रुतानां वह्निमध्यतः ।
सहस्रं वेधयित्वा तु काञ्चनं कुरुते क्षणात् ॥ ३७६ ॥

तथैव म्रियते सूतः कान्तहेमाभ्रसंयुतः ।

[कटुतुम्बीकल्पः ।]

कटुतुंबी तु विख्याता देवि! दिव्यौषधिं शृणु ॥

तस्या बीजानि सङ्गृह्य सूक्ष्मचूर्णं तु कारयेत् ।
एकविंशतिवाराणि भाव्यं धात्रीरसेन च ॥ ३७८ ॥

पयसा सह तेनैव विश्वभेषजसंयुतम् ।
बीजं यन्त्रे विनिक्षिप्य तैलं संगृह्य पिण्डितः ॥३७९॥

रसं मूर्च्छापयेत्तेन चक्रमर्देन मर्दयेत् ।

[लोहदण्डकल्पः ।]

गोपित्तं शिखिपित्तं च कांक्षीकासीससंयुतम् ॥३८०॥

तारतुल्यानि चैतानि सर्वेषां सूतकं समम् ।
मेषशृङ्गे निधातव्यं मासमेकं निरन्तरम् ॥ ३८१ ॥

लोहदण्डेन संसिक्तं सर्वलोहानि वेधयेत् ।
गन्धकं लोहदण्डेन एकविंशतिभावितम् ॥ ३८२ ॥

युक्तं लोहकुले(मने)नैव जम्बीररससंयुतम् ।
सबीजं सूतकोपेतमन्धमूषानिवेशितम् ॥ ३८३ ॥

भूगतं मासमेकं तु तारं काञ्चनतां नयेत् ।
दलस्य भागमेकं तु तारपञ्चांशमेव च ॥ ३८४ ॥

शुल्बं च पञ्चभागं च बीजस्यैकं च योजयेत् ।
एते द्वादशभागास्स्युस्सर्वं तद्धारयेत्क्षितौ ॥ ३८५ ॥

स्थानस्यास्य निषेकं तु सुदण्डेन तु कारयेत् ।
पञ्चविंशद्दिनान्ते तु जायते कनकोत्तमम् ॥ ३८६ ॥

[क्षीरकन्दकल्पः ।]

क्षीरकन्दविधिं वक्ष्ये सर्वसिद्धिकरं तथा ।
चतुर्वर्णं विषं तत्र रक्तकन्दं प्रशस्यते ॥ ३८७ ॥

भग्नमेतत्स्रवेत्क्षीरं रक्तवर्णं सुशोभनम् ।
मेघानां तु निनादेन सञ्जातैरुपशोभितम् ॥ ३८८ ॥

पत्रैस्स्नुहीसमैस्स्निग्धैस्सप्तभिर्हेमसत्प्रभैः ।
बन्धनं रसराजस्य सर्वसत्ववशंकरम् ॥ ३८९ ॥

तस्य क्षीरं तु सङ्गृह्य तारं निर्वाहयेद्बुधः ।
धमेद्धठाग्निना चैव जायते हेम शोभनम् ॥ ३९० ॥

तिन्त्रिणीपत्रनिर्यासमीषत्ताम्ररजोयुतम् ।
मर्दयेत्पारदं प्राज्ञो रसबन्धो भविष्यति ॥ ३९१ ॥

तोयमध्ये विनिक्षिप्य गुलिका वज्रवद्भवेत् ।

[शाकवृक्षकल्पः ।]

शाकवृक्षस्य देवेशि ! निष्पीड्य रसमुत्तमम् ॥३९२॥

रक्तचन्दनसंयुक्तं सर्वलोहानि जारयेत् ।
[1]मिलन्ति सर्वलोहानि द्रवन्ति सलिलं यथा ॥३९३॥

गन्धकं रसकं तार्क्ष्यं पारदं रक्तचन्दनम् ।
रुदन्त्या रससंयुक्तं तारमायाति काञ्चनम् ॥ ३९४ ॥

शाकवृक्षस्य निर्यासं यत्नतः परिगालयेत् ।
शिग्रुमूलस्य चूर्णं तु तद्रसेन तु मर्दयेत् ॥ ३९५ ॥

प्रलिप्तशुल्बपत्राणि पुटेत्क्षिप्त्वा विपाचयेत् ।
तद्द्रुतं काञ्चनं दिव्यं भवेल्लक्षणसंयुतम् ॥ ३९६ ॥

फलानि शाकवृक्षस्य परिपक्वानि संगृहेत् ।
तद्रसेन तु संप्राज्ञः सप्तरात्रं तु भावयेत् ॥ ३९७ ॥

तद्रसेन समायुक्तं मञ्जिष्ठामिश्रितं तथा ।
लेपयेत्तारपत्राणि ध्मातं भवति काञ्चनम् ॥ ३९८ ॥

[देवदालीकल्पः ।]

देवदाल्या महौषध्या विधिं वक्ष्याम्यतः परम् ।
सा श्वेता व्याधिशमने कृष्णा पीता रसायने ॥३९९॥

पौर्णमास्यां त्रयोदश्यां राहुग्रस्ते दिवाकरे ।
अथवा कृष्णपञ्चम्यामिमां विधिवदुद्धरेत् ॥ ४०० ॥

देवदालीफलं देवि ! विष्णुकान्तां च सूतकम् ।
मूर्च्छयेद्बन्धयेत्क्षिप्रं शुल्बं हेम करोति च ॥ ४०१ ॥

देवदालीफलं मूलमीश्वरीरसमेव च ।
तोयेन मर्दितं कृत्वा वङ्गं स्तम्भयति क्षणात् ॥४०२॥

---

1. गन्धपाषाणगन्धेन आयसे विनियोजयेत् ।

[श्वेतगुञ्जाकल्पः।]

अथातस्संप्रवक्ष्यामि श्वेतगुञ्जाविधिं प्रिये!।
कृष्णपक्षे चतुर्दश्यामष्टम्यां च सुरार्चिते!॥ ४०३॥

कपाले मृत्तिकां न्यस्य सेचयेत्सलिलेन तु।
बीजानि सितगुञ्जायाः पुष्ययोगे तु वापयेत्॥ ४०४॥

वक्ष्यमाणेन योगेन कुर्यात्सङ्ग्रहणं तथा।
ओं नमो भगवति श्वेतवल्लि श्वेतपर्वतवासिनि!॥
सर्वकार्याणि कुरु कुरु अप्रतिहतं नमो नमस्स्वाहा[1]।

शुद्धशुल्वं तु सङ्गृह्य मूषामध्ये तु संस्थितम्॥४०६॥

त्रिपञ्चपलसंख्या तु कर्षार्धसितगुञ्जया।
सहैकत्र भवं तारं तस्य गन्धविवर्जितम्॥ ४०७॥

ब्रह्मरीतिसमायुक्तं गुञ्जाचूर्णं सहैकतः।
देवीनां भूषणं देवि! जायते हेम शोभनम्॥ ४०८॥

[कर्तरीरसबन्धः।]

अथातस्संप्रवक्ष्यामि कर्तरीरसबन्धनम्।
असुराणां समायोगे क्रोधाविष्टेन चेतसा॥ ४०९॥

सुदर्शनं महाचक्रं प्रेषितं सुरवैरिणा।
भालपट्टात्ततस्तस्य निपेतुस्स्वेदबिन्दवः॥ ४१०॥

ते भूमौ पतिता दिव्यास्सञ्जाताः कर्तरीरसः।
रक्षार्थं स्थापितं तत्र विष्णुना च सुदर्शनम्॥ ४११॥

चक्रतुल्यं भ्रमत्येतदायुधानि निकृन्तति।
कुरुते गर्जनं नादं धूमज्वालां विमुञ्चति॥ ४१२॥

---

1. अनेन मनुना प्रोक्ता सिद्धिर्भवति नान्यथा।
षण्मासेन तथा वल्लीं मन्त्रपूतेन रक्षयेत्॥

कर्तरीदृष्टिमात्रेण तथाऽन्या शब्दकर्तरी[1] ।
लोकानां तु हितार्थाय घोरशक्तिर्व्यवस्थिता ॥ ४२३ ॥

रसरूपा महाघोरा सा सिद्धानां तु वेदिनी
तस्य क्षेत्रं यदा गच्छेदघोरास्त्रं जपेत्तदा ॥ ४१४ ॥

पुनर्घोरं न्यसेत्तत्र अथान्यं(स्त्रं) विन्यसेद्बुधः ।
अनुलोमविलोमेन देहेऽधिष्ठाप्य कर्तरीम् ॥ ४१५ ॥

मुद्रया मुद्रयेत्तां तु अघोरास्त्रेण योजिताम् ।
दीप्ते(पे)न रोधयेत्तां तु स्तम्भयेद्दी(धू)पनेन तु ॥

निष्ठया मुद्रया तां तु स्थानयोगेन योजयेत् ।

उदकबन्धाः ॥

[चन्द्रोदकबन्धः ।]

अथ चन्द्रोदकेनेशि ! वक्ष्यामि रसबन्धनम्[2] ॥४१७॥

दृष्ट्वा चन्द्रोदकं मन्त्री पौर्णमास्यां विशेषतः ।
ग्रहणं तत्र कर्तव्यं पौर्णमास्यां प्रयत्नतः ॥ ४१८ ॥

निर्गच्छति महीं भित्वा चन्द्रवृद्ध्या तु वर्धते ।
क्षेत्रबन्धं पुरा कृत्वा देवमभ्यर्च्य शङ्करम् ॥ ४१९ ॥

चतुर्दश्यां तु तत्क्षेत्रं पूजयित्वा विचक्षणः ।

---

1. सा स्पर्शकर्तरी छायाकर्तरी धूमकर्तरी ।
सा ज्वालाकर्तरी चैव शक्तिर्घोरस्य कर्तरी ॥

2. शुक्लपक्षे पौर्णमास्यां दृष्ट्वा पूर्णेन्दुमण्डलम् ।
निर्गच्छन्ति महीं भित्वा चन्द्रतोयान्यनेकधा ॥
कानिचिन्मृत्तिवर्णानि रसेन लवणानि तु ।
कानिचिच्चन्द्रतुल्यानि व्योमाभासानि कानिचित् ।
चन्द्रवृद्ध्याऽभिवर्धेरन् क्षीयेरंस्तत्क्षयेण तु ॥

अहोरात्रोषितो भूत्वा बलिं तत्र निवेदयेत् ॥ ४२० ॥

पौर्णमास्यां च रात्रौ च गत्वा तस्य समीपतः ।
चन्द्रोदकं तु सङ्गृह्य मन्त्रयुक्तस्सुमन्त्रितम् ॥ ४२१ ॥

आलोड्य मधुसर्पिर्भ्यां पिबेत्तत्तु समाहितः ।
पीतमात्रेण तेनैव मूर्च्छितो भवति क्षणात् ॥ ४२२ ॥

चन्द्रोदये तथोत्तिष्ठेत्क्षीरं तस्य तु दापयेत् ।
सप्तरात्रप्रयोगेण चन्द्रवन्निर्मलो भवेत् ॥ ४२३ ॥

एकविंशतिरात्रेण जीवेद्ब्रह्मदिनत्रयम् ।
एकमासप्रयोगेण ब्रह्मायुस्स भवेन्नरः ॥ ४२४ ॥

चन्द्रोदकेन गगनं रसं हेम च मर्दयेत् ।
मूषामध्यगतं ध्मातं तत्क्षणाद्गुटिका भवेत् ॥ ४२५ ॥

अयं तु स्पर्शमात्रेण लोहान्यष्टौ च वेधयेत् ।
तद्रसं तु रसं चान्यं वज्रेण समजारितम् ॥ ४२६ ॥

चतुष्षष्ट्यंशतो विध्येद्द्विगुणेन सहस्रकम् ।
दशसङ्कलिकाबद्धं गुञ्जामात्रं रसं ततः ॥ ४२७ ॥

त्रिलोहवेष्टितं वक्त्रे धृत्वा चादृश्यतां व्रजेत् ।

"ओं नमो रुद्राय दंष्ट्रोत्कटाय विघ्नं नाशय नाशय दिशो रक्ष रक्ष रुद्रो ज्ञापयति हुं फट् स्वाहा"

इति दिग्बन्धमन्त्रः ।

"ओं नमो भगवते रुद्राय त्रिशूलहस्ताय अमृतोद्भव रक्ष रक्ष हुं फट् स्वाहा ।"

इति पान मन्त्रः ॥

[विषोदकबन्धः।]

अथातस्संप्रवक्ष्यामि विषोदरसबन्धनम् ॥ ४२८ ॥
सितपीतादिवर्णाढ्यं तत्र देवि ! रसोत्तमम् ।
तत्र गत्वाऽचलोद्देशे स्मरेद्घोरं सहस्रकम् ॥४२९॥
केशाः क्षिप्तास्स्फुटन्त्यस्मिन्नात्मच्छायां न दृश्यते ।
तैलं च गोलकाकारं घृतं तेन विसर्पति ॥ ४३० ॥
गन्धकस्य हरेद्गन्धं पललं लवणायते ।
ज्ञात्वा पलाशपत्रेण कटुकालाबुके क्षिपेत् ॥ ४३१ ॥
विषोदकं गन्धकं च हरबीजं च तत्समम् ।
अजाक्षीरेण पिष्ट्वा तु शुल्बपात्रे तु लेपयेत् ॥ ४३२॥
तत्पुटेन भवेद्देवि ! सिन्दूरारुणसन्निभम् ।
शतांशेनैव तद्देवि ! सर्वलोहानि वेधयेत् ॥ ४३३ ॥
अनेन विधिना देवि ! नागस्सिन्दूरतां व्रजेत् ।
सहस्रांशेन तस्यैव तारं भवति काञ्चनम् ॥ ४३४ ॥
रक्तं पीतं तथा कृष्णमुत्तरोत्तरकार्यकृत् ।
त्रिफलाकान्तपात्रे वा पात्रेऽलाबुमयेऽपि वा ॥ ४३५ ॥
गृहीत्वा पूर्ववत्पत्रैः पालाशैर्वेष्टयेद्बहिः ।
स्थापयेद्धान्यमध्ये तु दिवसानेकविंशतिम् ॥ ४३६ ॥
महिषीक्षीरमध्ये तु बिन्दुमेकं तु साधयेत् ।
पायसं भक्षयेद्यस्तु पयोमध्वाज्यसंयुतम् ॥ ४३७ ॥
यावत्पूर्णं बलं देवि ! जीवेत्तद्बिन्दुसंख्यया ।
लाङ्गली गृहधूमश्च सिन्दूरं रजनीद्वयम् ॥ ४३८ ॥
मेषस्य शृङ्गं शृङ्गीं च कृष्णोन्मत्ताश्वमारकम् ।
सबीजसूतकं चैव विषतोयेन मर्दयेत् ॥ ४३९ ॥

विषतोयेन मेधावी सप्तवाराणि भावयेत् ।
अथवा भावयेत्तं तु यावच्चूर्णं तु मर्दयेत् (तद्भवेत्) ॥
तेन नागं प्रतीवाप्य षोडशांशेन खं(सं)भवेत् ।
मूषास्थं वेणुयन्त्रे च त्रीणि वाराणि भावयेत् ॥४४१॥
धूमं परिहरेत्तस्य अङ्गव्याधिकरं परम् ।
स्थापयेन्नागसिन्दूरं पात्रेऽलाबुमये च तत् ॥ ४४२ ॥
तच्चूर्णं तु शतांशेन तारताम्रादि वेधयेत् ।
विषपानीयमादाय वङ्गमावर्तितं शुभम् ॥ ४४३ ॥
निषिक्तं चैव तत्तोयैस्तारं भवति काञ्चनम् ।
विषपानीयमादाय प्रक्षिपेच्च रसोत्तमे ॥ ४४४ ॥
कुनटीगन्धपाषाणविषटङ्कणलाङ्गली: ।
नष्टपिष्टं कृतं खल्वे तारपत्राणि लेपयेत् ॥ ४४५ ॥
अन्धमूषागतं ध्मातं निर्बीजं कनकं भवेत् ।

ओं ह्रीं नीलकण्ठाय ठः ठः। अस्य अयुतं जपेत्।
इति विषोदकग्रहणपानमन्त्रः ॥

[सञ्जीवनीजलकल्पः।]

सञ्जीवनीजलस्याथ विधिं वक्ष्यामि पार्वति ! ॥ ४४६ ॥
शुक्रेणाराधितो देवि ! प्रागहं सुरवन्दिते ! ।
दानवानां हितार्थाय मृतानां देवसङ्गरे ॥ ४४७ ॥
मया सञ्जीवनी विद्या दत्ता चोदकरूपिणी ।
तया सञ्जीविता दैत्या ये मृता देवसङ्गरे ॥ ४४८ ॥
निक्षिप्ता मर्त्यलोके सा सम्यक् ते कथयाम्यहम् ।
अस्ति मर्त्या महापुण्या पवित्रा दक्षिणापथे[1] ॥४४९॥

1. नदी गोदावरी नाम प्रसिद्धा जाह्नवी यथा ।

दक्षिणे तु तटे तस्या उत्पली(कदली)नगरं परम् ।
तस्य दक्षिणतश्शैलस्सर्वलोकेषु विश्रुतः ॥ ४५० ॥

नाम्ना कृष्णगिरिश्चेति दृश्यते सर्वमङ्गले ! ।
सुप्रसिद्धाम्बिका नाम ग्रामस्तस्यास्ति सन्निधौ ॥

तत्राप्युदकमालोक्य परीक्षेत सुरार्चिते ! ।
गृहीत्वा शुष्कवंशं तु क्षिपेत्तोयस्य मध्यतः ॥ ४५२ ॥

जायते हरितं स्निग्धमहोरात्रेण निश्चितम् ।
मुञ्चत्यङ्कुरपत्राणि दृश्यतेऽतिमनोहरम् ॥ ४५३ ॥

बलिपुष्पोपहारेण ततो देवि ! समर्चयेत् ।
क्षेत्राधिपं गणेशं च चन्द्रं योगिगणं तथा ॥ ४५४ ॥

ओं चन्द्राय पिनाकिने शूलपाणये ओं दिशो बन्ध बन्धय दिशो बन्ध बन्धय ठः ठः ।

तिलांश्च सर्षपांश्चैव मन्त्रेणानेन सर्षपान् ।
सप्ताभिमन्त्रितान्कृत्वा साधको दिक्षु निक्षिपेत् ॥४५५॥

कटुकालाबुके तोयं कृतरक्षस्समाहितः ।
गृहीत्वा तत्प्रयत्नेन निजं स्थानं समाश्रयेत् ॥ ४५६ ॥

ओं नमो अमृते अमृतरूपिणि अमृतं कुरु कुरु एवं रुद्र आज्ञापयति स्वाहा ।

सप्ताभिमन्त्रितं कृत्वा मन्त्रेणानेन तज्जलम् ।
दिनमेकं तथा सूतं स्वर्णमाषद्वयान्वितम् ॥ ४५७ ॥

मर्दयेत्तेन तोयेन पिबेत्तत्तु विचक्षणः ।
एकविंशतिरात्रं तु क्षीराहारोऽथ यत्नतः ॥ ४५८ ॥

जीवेत्कल्पायुतं साग्रं कामरूपो महाबलः ।
योजनानां शतं गत्वा पुनरेव निवर्तते ॥ ४५९ ॥

अवध्यस्सर्वभूतानां स्वेच्छाहारस्स खेचरः ।
कनकं पारदं व्योम सममेकत्र योजयेत् ॥ ४६० ॥

मर्दयेत्तेन तोयेन सप्ताहं स्वेदयेत्ततः ।
स रसस्सर्वलोहानि षष्ट्यंशेन तु वेधयेत् ॥ ४६१ ॥

अथ वा तं रसं दिव्यं मधुना सह भक्षयेत् ।
मासमात्रप्रयोगेण जीवेद्ब्रह्मदिनायुतम् ॥ ४६२ ॥

तस्य मूत्रमलस्वेदैश्शुल्बं भवति काञ्चनम् ।
[1]निर्वाते तोयमादाय पारदं च मनश्शिलाम् ॥४६३ ॥

मर्दयेत्खल्वपाषाणे नष्टपिष्टं भवेत्ततः ।
स्वेदयेत्सप्तरात्रं तु त्रिलोहेन च वेष्टयेत् ॥ ४६४ ॥

अन्तर्धानं क्षणाद्गच्छेद्विद्याधरपतिर्भवेत् ।
सिद्धकन्याशतवृतो यावत्कल्पांश्चतुर्दश ॥ ४६५ ॥

दिनेषु तेषु सर्वेषु दद्याच्छाल्योदनं घृतम् ।
पयसा च समायुक्तं नित्यमेवं च कारयेत् ॥ ४६६ ॥

[उष्णोदककल्पः ।]

उष्णोदकविधिं वक्ष्ये समाहितमनाश्शृणु ।

---

1. निर्वाते तोयमादाय अञ्जलित्रितयं पिबेत् ।
   पीतमात्रे भवेन्मूर्च्छा स्वास्थ्यं स्यात्प्रहरत्रयात् ॥

   एकविंशद्दिनान्येवं क्षीराहारो भवेत्ततः ।
   अष्टवर्षाकृतिः प्राज्ञः कामरूपो महाबलः ॥

   पश्येच्छिद्रां महीं सर्वां सप्तपातालसंयुताम् ।
   अवध्यो देवदैत्यानां कल्पायुश्च प्रजायते ॥
   अथवोदकमादाय पारदं च मनश्शिलाम् ।

पश्यत्युष्णोदकं यत्र वासं तत्रैव कारयेत्[1] ॥ ४६७ ॥

शर्वरीमुषितां तत्र चणकास्तु दिने दिने ।
भक्षयेन्मासमात्रं तु जीवेद्वर्षशताष्टकम् ॥ ४६८ ॥

[2]तस्य मूत्रपुरीषेण शुल्बं भवति काञ्चनम् ।
उष्णोदकं च कासीसं गन्धपाषाणसंयुतम् ॥ ४६९ ॥

चतुर्थांशेन रसकं दशभागं विनिक्षिपेत् ।
शुल्बं च मर्दयेत्सर्वं नष्टपिष्टं क्षणेन तु ॥ ४७० ॥

तेन लेपितमात्रेण शुल्बं भवति काञ्चनम् ।
निषिक्तं तेन तोयेन प्रतिवापं ददेद्बुधः ॥ ४७१ ॥

शुल्बं च जायते हेम तरुणादित्यवर्चसम् ।
तारं च तेन मार्गेण निषिक्तं हेमतां व्रजेत् ॥ ४७२ ॥

उष्णोदकेन भल्लातं तिलमुष्टिं च भक्षयेत् ।
मासद्वयप्रयोगेण जीवेद्वर्षशतत्रयम् ॥ ४७३ ॥

रसगन्धाश्मरसकतुत्थं दरदमाक्षिकम् ।
याममुष्णाम्बुना घृष्ट्वा तारपत्राणि लेपयेत् ॥ ४७४ ॥

---

1. अस्ति गोदावरी नाम महाराष्ट्रेऽतिविश्रुता ।
तस्या उत्तरभागे तु सह्याद्रिः पुण्यपर्वतः ॥
तत्र मातापुरं नाम प्रसिद्धं देवतागृहम् ।
तस्मादुत्तरतो देवि ! कम्पाख्यं नगरं परम् ।
तत्र कम्पेश्वरो देवस्तत्रास्त्युष्णोदकं ध्रुवम् ॥
प्रणीताख्या नदी तत्र स्नात्वा वै साधकोत्तमः ।
पश्चादुष्णोदके कुण्डे विधिं कुर्याद्यथोदितः ॥

2. वर्षमेकं प्रयुञ्जीत जीवेद्वर्षायुतं सुखी ।
वलीपलितनिर्मुक्तो भोगी चैव पुरन्दरः ॥
वर्षमेकं पिबेत्तोयं जीवेच्चन्द्रार्कतारकम् ।

विश्राम्य तु धमेद्देवि ! स्याच्चतुर्दशवर्णकम् ।
क्रमेणानेन देवेशि ! शुल्वं षोडशवर्णकम् ॥४७५॥

एकैकं हेमतारांशं द्वयं कांताभ्रयोः पृथक् ।
उष्णोदकेन सम्मर्द्य धमनात्खोटतां नयेत् ॥ ४७६ ॥

तं मुखे धारयेन्मासं वज्रकायो भवेत्ततः ।
तच्चूर्णं यवमात्रं तु भक्षयेन्मधुसर्पिषा ॥ ४७७ ॥

यावत्पलं तस्य मलैश्शुल्वं भवति काञ्चनम् ।
उष्णोदपाचितान्खादेत्कुलुत्थान्क्षीरपो भवेत् ॥ ४७८ ॥

स्नानमुष्णांभसा कुर्याद्वर्षाद्वर्षाच्छतायुषः ।
क्षीरमुष्णोदकं क्वाथं त्रिफलायाश्च पाचयेत् ॥ ४७९ ॥

पाचयेत्पायसं कान्तपात्रे भुक्त्वा महायुषः ।

[शैलोदककल्पः ।]

अतः परं प्रवक्ष्यामि शैलोदकविधिं प्रिये ! ॥ ४८० ॥

कर्दमापो महीशैलशिला चेति चतुर्विधम् ।
कानिचित्क्षणवेधीनि दिनवेधीनि कानि च ॥ ४८१ ॥

पक्षमासादिषण्मासवेधनानि महीतले ।
क्षिप्तं जले यदा काष्ठं शैलीभूतं च दृश्यते ॥४८२॥

बहिरन्तश्च देवेशि ! वेधकं तत्प्रकीर्तितम् ।
हिङ्गुलं हरितालं च गन्धकं च मनश्शिलाम् ॥४८३॥

एषां गन्धापहारं तु कुरुते तच्च वेधकम्[1] ।
अन्यथा चे(वे)ष्टकं देवि तदग्राह्यं निरर्थकम् ॥

---

1. गन्धकं तालकञ्चैव तोयपूर्णे घटे क्षिपेत् ।
यदा तद्बुद्बुदाकारं तदा शैलोदकं भवेत् ॥

श्रीशैले श्रीवनप्रान्ते पर्यङ्काख्ये शिलातले ।
तत्रस्थं क्षणवेधि स्यान्नद्यां भगवतीतटे ॥ ४८५ ॥

एकाहे वेधकं तत्र गोकर्णे तु दिनत्रयम् ।
भद्रांगे दिनवेधि स्यात्त्रिस्थलान्ते त्रिवत्सरम् ॥४८६॥

धारेश्वरे पाक्षिकं स्यात्कर्षापुर्यां दिनैकतः ।
ब्रह्मेश्वरे मासिकं स्याद्व्याघ्रपुर्यां तु वासरम् ॥ ४८७ ॥

अघोरेशे मासिकं स्यात्सिद्धद्वीपे तथा पुनः ।
दिनमेकं ब्रह्मगिरौ विन्ध्ये तु क्षणवेधकम् ॥ ४८८ ॥

वासरं माल्यवन्ते तु क्षणवेधी तु तत्र च ।
किष्किन्धे पर्वते रम्ये पंपातीरे क्षणोदकम् ॥ ४८९ ॥

तस्य पश्चिमतो देवि! योजनद्वितये पुनः ।
भूशैलमस्ति तत्रैव त्रिदिनं वेदपर्वते ॥ ४९० ॥

[1]अन्यत्र यत्र यत्रापि ब्रह्मविष्णुशिवोद्भवम् ।
अमृतं तत्र तत्रापि वज्रीकरणमुत्तमम् ॥ ४९१ ॥

तस्योत्पत्तिं प्रवक्ष्यामि यथा जानाति साधकः ।
महीं समुद्धृतवतो वराहस्य कलेबरात् ॥ ४९२ ॥

यत्स्वेदः पतितस्तस्माज्जातं शैलोदकं परम् ।
तं मुखे क्षणिकं जातं कर्णदेशे तु वासरम् ॥४९३॥

बाहुभ्यां त्र्यहवेधी स्यान्मासवेधी तु पार्श्वयोः ।
षण्मासमपराङ्गे च सर्वं समफलं च तत् ॥ ४९४ ॥

अघोरास्त्रेण तत्क्षेत्रे रक्षां कृत्वा दिशां बलिम् ।

---

1. सह्याचले पुरे देव्याः क्षीरक्षेत्रस्य सन्निधौ ।
शैलोदकं कोटिवेधि दुर्जदेशेऽपि वासरम् ॥
लक्षवेधि नृसिंहस्य नगरे गोकुलाभिधे ।

दत्वा लक्षं जपित्वा तु गृह्णीयादमृतं परम् ॥ ४९५ ॥

शरद्ग्रीष्मवसन्तेषु हेमन्ते वा सुरार्चिते ।
आयसे ताम्रपात्रे वा कान्तलोहमयेऽथवा ॥ ४९६ ॥

शिलाम्बुपलमष्टौ तु पलं क्षीरस्य निक्षिपेत् ।
क्षीरावशेषं संक्वाथ्यं त्रिसप्ताहं पिबेन्नरः ॥ ४९७ ॥

जीवेद्वर्षसहस्रं तु वलीपलितवर्जितः ।
अथवाऽष्टपलं क्षीरं पलैकेनाम्बुमिश्रितम् ॥ ४९८ ॥

क्षीरावशेषं सेवेत पूर्वोक्तं लभते फलम् ।
कुलुत्थाष्टगुणं वारि पचेदष्टावशेषितम् ॥ ४९९ ॥

चतुर्गुणेन तेनाऽऽज्यं पाचयेद्घृतशेषितम् ।
लिह्यान्मधुसितोपेतं त्रिसप्ताहाद्बृहस्पतिः ॥ ५०० ॥

द्विरष्टवार्षिकाकारस्सहस्रायुर्नसंशयः ।
अवशिष्टकुलुत्थं तु पादांशमधुसर्पिषा ॥ ५०१ ॥

भक्षयेत्कर्षमेकं तु मासेनायुतजीवितः ।
तत्सिद्धतैलेनाभ्यङ्गं म्रक्षणं चैव कारयेत् ॥ ५०२ ॥

पामाविचर्चिकादद्रुकुष्ठानि सहसा जयेत् ।
वलीपलितनिर्मुक्तस्सहस्रायुश्च जायते ॥ ५०३ ॥

यः पिबेत्प्रातरुत्थाय शैलाम्बु चुलुकं पयः ।
षण्मासात्स्यात्सहस्रायुर्निर्वलीपलितश्च सः ॥ ५०४ ॥

अथवा सूतकं देवि ! वारिणा सह मर्दयेत् ।
मासेनैकेन देवेशि ! नष्टपिष्टिर्भविष्यति ॥ ५०५ ॥

मासमात्रं समश्नीयात्स भवेदजरामरः ।
अथवा तं रसं हेम्ना धामयेत्खदिराग्निना ॥ ५०६ ॥

गुलिका सुन्दरी नाम सर्वायुधनिवारिणी ।
कर्ता हर्ता स्वयं सिद्धो जीवेच्चन्द्रार्कतारकम् ॥५०७॥

अथ तेनोदकेनैव क्षीरार्धं पायसं पचेत् ।
मासमात्रप्रयोगेण वलीपलितवर्जितः ॥ ५०८ ॥

पक्त्वा तेनाम्भसा पथ्याष्षष्टिस्त्रीणि शतानि च ।
मधु संयोज्य भाण्डस्थं भूमौ सर्वं निधापयेत् ॥५०९॥

दिने दिने तदेकैकं भक्षयेत्प्रातरुत्थितः ।
वलीपलितनिर्मुक्तो जीवेद्वर्षसहस्रकम् ॥ ५१० ॥

शैलीभूतं कुलुत्थं वा भक्षयेन्मधुसर्पिषा ।
षण्मासात्तु प्रयोगेण जीवेद्वर्षसहस्रकम् ॥ ५११ ॥

कूश्माण्डमादितः कृत्वा यानि कानि फलानि च ।
जले क्षिप्तानि लोहानि शैलभूतानि भक्षयेत् ॥ ५१२ ॥

क्षीराहारश्च जीर्णान्ते वज्रकायो भवेन्नरः ।
तेनोदकेन सम्मर्द्यमभ्रकं क्राथयेत्प्रिये ! ॥ ५१३ ॥

कटुत्रययुतं खादेज्जीवेद्वर्षसहस्रकम् ।
अथवा रसकर्षैकं तज्जलेन तु मर्दितम् ॥ ५१४ ॥

इङ्गुदीफलमध्यस्थं तच्छैलोदकमध्यगः ।
कालेन त्रिगुणेनैव काठिन्यं तस्य जायते ॥ ५१५ ॥

षण्मासं तन्मुखे धार्यं वज्रकायं करोति तत् ।
दशनागसमप्राणो देवैस्सह स मोदते ॥ ५१६ ॥

गृहीत्वा त्रिफलां तत्र शैलवारिणि निक्षिपेत् ।
यदा भवति तच्छैलं गृहीत्वा चूर्णयेत्ततः ॥ ५१७ ॥

कान्तजीर्णरसं तेन सार्धं घृतमधुप्लुतम् ।
भक्षयेद्वर्षमेकं तु ततः क्षीराशनो भवेत् ॥ ५१८ ॥

उदयादित्यसङ्काशो मेधावी प्रियदर्शनः।
नीलकुञ्चितकेशश्च जीवेच्चन्द्रार्कतारकम् ॥ ५१९ ॥

पारदं हरितालं च शिलां माक्षिकमेव च।
दरदं च विषं चैव सर्वमेकत्र कारयेत् ॥ ५२० ॥

मर्दयेत्खल्वपाषाणे मातुलुङ्गरसेन तु।
गोलकं कारयित्वा तु वारिमध्ये विनिक्षिपेत् ॥५२१॥

तेन तारं च शुल्बं च कांचनं भवति ध्रुवम्।
उपयुञ्जीत मासैकं वलीपलितवर्जितः ॥ ५२२ ॥

सहस्रं जीवितं तस्य महाबलपराक्रमः।
शैलीभूतहरिद्रां तु तच्चूर्णावापमात्रतः ॥ ५२३ ॥

हेमत्वं लभते नागो बालार्कसदृशप्रभः।
शैलोदके विनिक्षिप्य भूशैले कर्दमेऽपि वा ॥५२४॥

ज्ञात्वा कालप्रमाणेन बन्धयेत्पारदं ततः।
रक्तक्षारयुतं ध्मातं सुवर्णसमसारितम् ॥ ५२५ ॥

शतांशेन तु लोहानां सर्वेषां हेमकारकम्[1]।
द्वितीयसारणां प्राप्य सहस्रांशेन विध्यति ॥ ५२६ ॥

तं खोटं धारयेद्वक्त्रे दिव्यत्वं लभते ध्रुवम्।

[केचन घुटिकायोगाः।]

निचुले ककुभे चैव किंशुके मधुकेऽपि वा ॥५२७॥

इङ्गुदीफलमध्ये वा रजनीद्वयमार्द्रके।
अमृते कन्दके वाऽथ उक्तकन्दौषधीषु च ॥ ५२८ ॥

1. द्वितीयसारणां प्राप्य भक्षयेन्मधुसर्पिषा।
तत्कालं चित्तजातानां ऊर्ध्वं भवति चानिलः॥
कालज्ञानं भवेत्तस्य जीवेदयुतपञ्चकम्।

विधाय कोटरं तत्र क्षिप्त्वा तेनैव डोलयेत् ।
त्रिफलाव्योषकल्केन वेष्टयित्वा प्रयत्नतः ॥ ५२९ ॥
पादेन कनकं दत्वा पारदं तत्र योजयेत् ।
शैलोदके क्षिपेत्तत्र गुलिका वज्रवद्भवेत् ॥ ५३० ॥
पूर्ववत्सारणा कार्या पूर्ववत्सिद्धिदा भवेत् ।
धार्यमाणा मुखे सा तु सहस्रायुष्करी भवेत् ॥५३१॥
द्वितीयसारणायोगादयुतं वेधयेत्तु सा ।
धार्यमाणा मुखे सैवमयुतायुष्यदा भवेत् ॥ ५३२ ॥
तृतीयसारणायोगाज्जायते लक्षवेधिनी ।
तं खोटं धारयेद्वक्त्रे लक्षायुर्जायते नरः ॥ ५३३ ॥
चतुर्थी सारणा देवि ! कोटिवेधी न संशयः ।
कोट्यायुर्जीवितं तस्य खेचरत्वं च लभ्यते ॥ ५३४ ॥
पञ्चभिर्दशकोटिस्स्यात्षड्भिः कोटिशतं भवेत् ।
यावच्चन्द्रार्कजीवित्वमनन्तबलवीर्यवान् ॥ ५३५ ॥
ददाति सप्तमी चापि सारणा गुलिका परा ।
खेचरी नाम विख्याता भैरवेण प्रचोदिता ॥ ५३६ ॥
यस्तु तद्राजिकामात्रं मासमेकं तु भक्षयेत् ।
वज्रदेहस्स सिद्धस्स्याद्दिव्यस्त्रीजनवल्लभः ॥ ५३७ ॥
क्रीडते खेचरैर्भोगैस्स्वेच्छया शिवतां व्रजेत् ।
नानाविधफलाश्चास्या घुटिकां शृणु सुन्दरि ! ॥५३८॥
शुद्धबद्धं रसेन्द्रं तु गन्धकं तत्र जारयेत् ।
त्रिगुणे गन्धके जीर्णे तेन हेम तु कारयेत् ॥ ५३९ ॥
कारयेद्द्रुतसूतं तु काञ्चनं तेन सूतकम् ।
तद्द्रुतसूतके जार्यं रसेन्द्रस्य समे समम् ॥ ५४० ॥

तेन सूतकजीर्णेन वज्ररत्नं तु घातयेत् ।
तद्वज्रं जायते भस्म सिन्दूरारुणसन्निभम् ॥ ५४१ ॥

तद्भस्म जारयेत्सूते त्रिगुणे तु सुरार्चिते ! ।
हाटकं सारयेत्तं तु घुटिकां तेन कारयेत् ॥ ५४२ ॥

त्रिलोहावेष्टितं तं तु मुखे प्रक्षिप्य साधकः ।
नष्टच्छायो भवेत्सोऽयमदृश्यो देवदानवैः[1] ॥ ५४३ ॥

लक्षवर्षसहस्राणि निर्वलीपलितो भवेत् ।
शूलिनं शक्तिसंयुक्तं रत्नादिगुणभूषितम् ॥ ५४४ ॥

वक्त्रे करे च बिभृयात्सर्वायुधनिवारणम् ।
व्योम माक्षिकसत्वं च तारं ताम्रं सुरायुधम् ॥ ५४५॥

सारलोहं सूतकं च रत्नादिगुणभूषितम् ।
घुटिका सा वरारोहे ! मधुरत्रयसंयुता ॥ ५४६ ॥

वक्त्रस्था नाशयेत्साक्षात्पलितं नात्र संशयः ।
शिवश्शक्तिश्च देवेशि ! रत्नानि सितगोनसा ॥५४७॥

हेम तारं तथा भानुस्समभागानि कारयेत् ।
स्त्रीरजो व्याघ्रमध्यस्थं पद्मसूत्रेण वेष्टयेत् ॥ ५४८ ॥

सि(त्रि)तयेन तथा वेष्ट्यं गुह्यस्थाने निवेशयेत् ।
रणे राजकुले द्यूते दिव्ये कामे जयो भवेत् ॥५४९॥

वैक्रान्ताभ्रककान्तं तु सस्यकं तु सुरायुधम् ।
विभीतकादिसंभूतकांजिकस्य समं भवेत् ॥ ५५० ॥

समावर्त्य ततस्सूते योजयेत्पादयोगतः ।
कुमारीरसङ्घृष्टा कृतैषा घुटिका शुभा ॥ ५५१ ॥

---

1. तत्क्षणाद्वेधयेद्देवि ! सर्वलोहानि काञ्चनम् ।

रोगमृत्युजरा हन्ति वक्त्रस्था नात्र संशयः ।
पञ्च तारं वरारोहे! सूतकद्वयमेव च ॥ ५५२ ॥

त्रयो गगनभागास्स्युरेकैकं हेमकान्तयोः ।
अर्धं शुल्बं विभागेन गुलिकाऽमरसुन्दरी ॥ ५५३ ॥

अक्षयो ह्यजरश्चैव भवेत्तेन महाबलः[1] ।
भस्म सूतपलैकं च मृतकान्तपलं तथा ॥ ५५४ ॥

माक्षिकस्य पलं चैव शिलाजतु पलं तथा ।
पलमेकं विडङ्गस्य पथ्याचूर्णपलं तथा ॥ ५५५ ॥

एकीकृत्य तु तत्सर्वं मध्वाज्येन तु पेषयेत् ।
गुलिकाः कारयेत्तेन षष्ट्याऽधिकशतत्रयम् ॥ ५५६ ॥

एकैकां भक्षयेन्नित्यं वर्षमेकं निरन्तरम् ।
जीवेद्वर्षशतायुस्स यथा रुद्रो महाबलः ॥ ५५७ ॥

[केचन रसायनकल्पाः ।]

अतः परं प्रवक्ष्यामि रसभस्मरसायनम् ।
विज्ञेयं निष्परिहारं साक्षाद्दिव्यौषधं परम् ॥ ५५८ ॥

आमलक्यादि कान्तं च पारदं च मनश्शिलाम् ।
बाकुचीसमभागानि क्षीरिणीरसपेषितम् ॥ ५५९ ॥

मेघनादरसोपेतं मूकमूषागतं पचेत् ।
माषं द्विमाषं त्रिगुणं भक्षयेत्तत्क्रमेण तु ॥ ५६० ॥

वर्षत्रयं परं देवि! पादनिष्कार्धकं क्रमात् ।
षट् सप्ताष्टौ च वर्षाणि क्रमान्निष्कप्रमाणतः ॥५६१॥

---

1. सर्वरोगविनिर्मुक्तो जीवेद्ब्रह्मदिने विधारणात् ।

भुञ्जीत स च दिव्यान्नं जरावैरूप्यवर्जितः।
किञ्चित्काञ्चनसंयुक्तं निष्कं निष्कार्धमेव वा ॥५६२॥

यो भक्षयेत्त्रिभिर्वर्षैस्सर्वव्याधीञ्जयत्ययम्।
अष्टवर्षसहस्रायुर्द्वादशे लक्षवेधकः॥ ५६३॥

षोडशे वत्सरे देवि! दिव्यरूपस्स जायते।
उत्तमो मूलबन्धस्तु मध्यमं सारबन्धनम्॥ ५६४॥

अधमः पाकबन्धस्तु एवं त्रिविधबन्धनम्।

शतपलमभयानामक्षधात्र्योस्तथैव
कथितजलसमाष्टौ भागमष्टावशिष्टम्।
घृतमधुसितयाढ्यं व्योषचित्रं दशैव
रसपलदशसिद्धं लोहजीर्णं मृतं च॥ ५६५॥

गिरियुत(जतु)सममभ्रं कान्तभृङ्गं विडङ्गं
रससहितविभाव्यं तण्डुलैर्बिल्वमज्जैः।
हिमकरकृतकल्कं लोहपात्रस्थमासं
त्रिदिनतनुविशुद्धं कल्कमेनं वरिष्ठम्॥ ५६६॥

लिहति शयनकाले चामनेत्रार्धसेवी
घननिबिडसमाधिर्मत्तमातङ्गदर्पः।
विगतसकलदोषस्सर्वदृक् दिव्यचक्षुः
मदन इव सुकान्तिः कामिनीनां प्रवीरः॥ ५६७॥

जलद इव वपुष्मान्कुञ्चिताग्राग्रकेशः
तुरग इव विशुद्धस्सत्कविश्चित्रकारी।
वृषभगतिविचेष्टो मन्दगम्भीरघोषः
सुरगज इव लोके चन्द्रतारार्कजीवी॥ ५६८॥

कान्तहेमरविचन्द्रमभ्रकै-
गोलकं निहितमिङ्गुदीफले ।
शैलवारिविरिसिद्धगोलकं
सुन्दरी ह्यमरसंज्ञिका शुभा ॥ ५६९ ॥

कान्तहेमरविचन्द्रमभ्रकं
वज्ररत्नरस(महि)राजगोलकम् ।
क्षिप्तमामलककाष्ठकोदरे
भूमिशैलनिहितं समुद्धृतम् ॥ ५७० ॥

शैलतां गतमथाहितं मुखे
वज्रकायकरक(म)ल्पवासरैः ।
तारहेमवरशुल्बसूतकै-
र्गोलकं वरणकाष्ठयन्त्रितम् ॥ ५७१ ॥

शैलवारिकृतसुन्दरीरसैः
खेचरीति गुलिका निगद्यते ॥ ५७२ ॥

शैलाम्बुनिक्षिप्तपलाशबीजं
शैलीकृतं क्षौद्रघृतेन खादेत् ।
त्रिसप्तरात्रं दिनमेकमेकं
सहस्रजीवी विदितो नरस्स्यात् ॥ ५७३ ॥

सूतकं चाभ्रकं चैव वज्रतीक्ष्णसमन्वितम् ।
हाटकेन समायुक्तं गुलिका खेचरी भवेत् ॥ ५७४ ॥

करञ्जफलमध्यस्थं सूतं तत्रैव निक्षिपेत् ।
धृतश्शैलाम्बुमध्यस्थस्सहस्रायुः प्रयच्छति ॥ ५७५ ॥

तिन्दुके द्विसहस्रायुर्जम्बीरे त्रिसहस्रकम् ।
मातुलुंगे च नारङ्गे चतुःपञ्चसहस्रकम् ॥ ५७६ ॥
रम्भाफले षट्सहस्रं पनसे सप्तसंख्यकम् ।
विभीतकफले चैव दशसाहस्रसंख्यकम् ॥ ५७७ ॥
नारिकेरे महाभागे ! सहस्राणि चतुर्दश ।
त्रिंशत्सहस्रं पथ्यायां लक्षमामलके पुनः ॥ ५७८ ॥
अभ्रपत्रभवात्क्वाथादहोरात्रं शिलोदके ।
बध्नाति चोद्धृतं सूतं मृत्युदारिद्र्यनाशनम् ॥ ५७९ ॥
सारणाक्रमयोगेन वज्रवज्जायते वपुः ।
रसे रसायने चैव लक्षवेधी न संशयः ॥ ५८० ॥
कर्दमं तु कुमार्याश्च रसेन कृतपिण्डिकम् ।
धमनात्पतते सत्वं मुखस्थं धारयेन्नरः ॥ ५८१ ॥
षण्मासोपप्रयोगेण ह्यजरामरतां व्रजेत् ।
स्रोतोऽञ्जनयुतं ध्मातं सत्वं पारदमिश्रितम् ॥ ५८२ ॥
तत्खोटं धारयेद्वक्त्रे ह्यदृश्यो भवति ध्रुवम् ।
यस्य यो विधिराम्नात उदकस्य शिवागमे ॥ ५८३ ॥
शतेन बत कालेन कुर्याद्देहे रसायनम् ।

बद्धजारणविधिः ॥

या पूर्वा निर्मिता सेयमधमा बालजारणा ॥ ५८४ ॥
उत्तमा दुर्लभा चैव श्रूयतां बद्धजारणा ।
अबद्धं जारयेद्यस्तु क्षीय(जीर्य)माणः क्षयं व्रजेत् ॥
बद्धस्य जीर्यते ग्रासो जीर्णस्य च मुखं भवेत् ।
समुखो दुर्मुखं दत्ते सामान्योत्तमलक्षणम् ॥ ५८६ ॥

[बन्धप्रकाराः ।]

सामान्योऽग्निसहत्वेन महारत्नादिजारकः ।
सामान्यः प्रथमः कार्यस्सग्रासस्तु समन्ततः ॥ ५८७ ॥

वसुदेहकरो देवि ! सामान्यो हि भवेदयम् ।
ग्रासहीनस्तु यो बद्धो दिव्यसिद्धिकरो भवेत् ॥५८८॥

उत्तमो मूलबन्धस्तु मध्यमं सारबन्धनम् ।
अधमः पाकबन्धस्तु एवं त्रिविधबन्धनम् ॥ ५८९ ॥

मूलबन्धस्तु यो बन्धो मूलसंकुचितं महत् ।
सारबन्धस्तु यो बन्धो वासनाबन्ध उच्यते ॥ ५९० ॥

स्याच्चतुष्षष्टिमूलेभ्यः किंचिन्मूलेन बन्धनम् ।
प्राण्यङ्गं दैत्यादीनां मूलाङ्गं देवतामयम् ॥ ५९१ ॥

पाषाणं चैव सिद्धानां मानुषाणां च पूजितम् ।
पीठि(पिण्डि)काद्रुतिसकोचैस्त्रिविधं बन्धनं भवेत् ॥

दिव्याभिरौषधीभिः प्रागुक्तं संकोचबन्धनम् ।

[द्रुतिबन्धः ।]

द्रुतिभिर्बध्यते सूतः क्षणबन्ध उदाहृतः ॥ ५९३ ॥

अभ्रकं हरबीजं च षोडशांशेन काञ्चनम् ।
ध्मातं प्रकाशमूषायां शोधयेत्काचटङ्कणैः ॥ ५९४ ॥

दक्षिणावर्तितं ध्मातं हरबीजेन मेलकम् ।
मूषां त्यक्त्वा वरारोहे ! तिष्ठते खग(बद्ध)वद्रसः ॥

रक्तिकार्धार्धमात्रेण पर्वतानपि वेधयेत् ।
भक्षणात्तस्य देवेशि ! रुद्रतुल्यो भवेन्नरः ॥ ५९६ ॥

क्रीडते सप्तलोकेषु शिवतुल्यपराक्रमः[1] ।

द्रुतिमेलनविधिः ॥

वज्रकन्दं गुडूची च उच्चटादिसमन्वितम् ॥ ५९७ ॥

अभ्रकं क्रमते शीघ्रमन्यथा नास्ति सङ्क्रमः ।
कृष्णागरुनाभिसितैः (शङ्खनाभि)रसोनपितरामठैः ॥

नारीकुसमपालाशबीजतैलसमन्वितैः ।
सोष्णैर्मिलन्ति मृदिता द्रुतयस्सकला रसे ॥ ५९९ ॥

वज्रबन्धः ॥

[दशसङ्कलिकाविधिसिद्धः ।]

पुनरन्यं प्रवक्ष्यामि वज्रबन्धं सुरार्चिते ! ।
गन्धकं भक्षयेन्नारी दिनानामेकविंशतिम् ॥ ६०० ॥

तद्रजो रसराजस्य बन्धने जारणे हितम् ।
वज्रभस्म तु भागैकं भागाश्शुद्धरसास्त्रयः ॥ ६०१ ॥

द्विपदीरजसा मर्द्यं यावत्तत्कल्कतां गतम् ।
पादांशेन सुवर्णेन(र्णस्य) पत्रलेपं तु कारयेत् ॥६०२॥

सो(व्यो)मवल्लीरसं कान्तं टङ्कणालं सुचूर्णितम् ।
दद्यात्तमष्टमांशेन मर्दयेच्च प्रयत्नतः ॥ ६०३ ॥

नष्टपिष्टं च शुष्कं तदन्धयित्वा पुटे ततः ।
अन्धमूषागतं ध्मातं क्रामणेन समन्वितम् ॥ ६०४ ॥

खोटस्तु जायते देवि ! शतवेधी महारसः ।
सौवीरं टङ्कणं काचं दत्वा दत्वा विशोधयेत् ॥६०५॥

---

1. द्रुतीनां मेलनं देवि ! दिव्यौषधिपरं शृणु ।

[बन्धप्रकाराः ।]

सामान्योऽग्निसहत्वेन महारत्नादिजारकः ।
सामान्यः प्रथमः कार्यस्सग्रासस्तु समन्ततः ॥ ५८७ ॥

वसुदेहकरो देवि ! सामान्यो हि भवेदयम् ।
ग्रासहीनस्तु यो बद्धो दिव्यसिद्धिकरो भवेत् ॥५८८॥

उत्तमो मूलबन्धस्तु मध्यमं सारबन्धनम् ।
अधमः पाकबन्धस्तु एवं त्रिविधबन्धनम् ॥ ५८९ ॥

मूलबन्धस्तु यो बन्धो मूलसंकुचितं महत् ।
सारबन्धस्तु यो बन्धो वासनाबन्ध उच्यते ॥ ५९० ॥

स्याच्चतुष्षष्टिमूलेभ्यः किंचिन्मूलेन बन्धनम् ।
प्राण्यङ्गं दैत्यादीनां मूलाङ्गं देवतामयम् ॥ ५९१ ॥

पाषाणं चैव सिद्धानां मानुषाणां च पूजितम् ।
पीठि(पिण्डि)काद्रुतिसकोचैस्त्रिविधं बन्धनं भवेत् ॥

दिव्याभिरौषधीभिः प्रागुक्तं संकोचबन्धनम् ।

[द्रुतिबन्धः ।]

द्रुतिभिर्बध्यते सूतः क्षणबन्ध उदाहृतः ॥ ५९३ ॥

अभ्रकं हरबीजं च षोडशांशेन काञ्चनम् ।
ध्मातं प्रकाशमूषायां शोधयेत्काचटङ्कणैः ॥ ५९४ ॥

दक्षिणावर्तिनं ध्मातं हरबीजेन मेलकम् ।
मूषां त्यक्त्वा वरारोहे ! तिष्ठते खग(बद्ध)वद्रसः ॥

रक्तिकार्धार्धमात्रेण पर्वतानपि वेधयेत् ।
भक्षणात्तस्य देवेशि ! रुद्रतुल्यो भवेन्नरः ॥ ५९६ ॥

क्रीडते सप्तलोकेषु शिवतुल्यपराक्रमः[1] ।

द्रुतिमेलनविधिः ॥

वज्रकन्दं गुडूची च उच्चटादिसमन्वितम् ॥ ५९७ ॥
अभ्रकं क्रमते शीघ्रमन्यथा नास्ति सङ्गमः ।
कृष्णागरुनाभिसितैः (शङ्खनाभि)रसोनपितरामठैः ॥
नारीकुसमपालाशबीजतैलसमन्वितैः ।
सोष्णैर्मिलन्ति मृदिता द्रुतयस्सकला रसे ॥ ५९९ ॥

वज्रबन्धः ॥

[दशसङ्कलिकाविधिसिद्धः ।]

पुनरन्यं प्रवक्ष्यामि वज्रबन्धं सुरार्चिते ! ।
गन्धकं भक्षयेन्नारी दिनानामेकविंशतिम् ॥ ६०० ॥
तद्रजो रसराजस्य बन्धने जारणे हितम् ।
वज्रभस्म तु भागैकं भागाश्शुद्धरसात्त्रयः ॥ ६०१ ॥
द्विपदीरजसा मर्द्यं यावत्तत्कल्कतां गतम् ।
पादांशेन सुवर्णेन(र्णस्य) पत्रलेपं तु कारयेत् ॥६०२॥
सो(व्यो)मवल्लीरसं कान्तं टङ्कणालं सुचूर्णितम् ।
दद्यात्तमष्टमांशेन मर्दयेच्च प्रयत्नतः ॥ ६०३ ॥
नष्टपिष्टं च शुष्कं तदन्धयित्वा पुटे ततः ।
अन्धमूषागतं ध्मातं क्रामणेन समन्वितम् ॥ ६०४ ॥
खोटस्तु जायते देवि ! शतवेधी महारसः ।
सौवीरं टङ्कणं काचं दत्वा दत्वा विशोधयेत् ॥६०५॥

---

1. द्रुतीनां मेलनं देवि ! दिव्यौषधिपरं शृणु ।

अक्षीणो मिलते हेम्ना समावर्तश्च जायते ।
एकोत्तरक्रमे वृद्ध्या सङ्कलैः क्रामयेत्ततः ॥ ६०६ ॥

एकगुणेन सूतेन एका सङ्कलिकोच्यते ।
त्रिगुणेन तु सूतेन द्वितीया सङ्कलोच्यते ॥ ६०७ ॥

षड्गुणेन तु सूतेन तृतीया सङ्कली भवेत् ।
दशगुणेन सूतेन चतुर्थी सङ्कली भवेत् ॥ ६०८ ॥

पञ्चादशगुणेनेशि ! पञ्चमी सङ्कली भवेत् ।
एकविंशद्गुणेनेशि ! षष्ठी सङ्कलिका भवेत् ॥ ६०९॥

अष्टाविंशद्गुणेनेशि ! सप्तमी सङ्कली स्मृता ।
षट्त्रिंशद्गुणिते बद्धा भवेत्सङ्कलिकाऽष्टमी ॥ ६१० ॥

पञ्चचत्वारिंशगुणे सङ्कली नवमी मता ।
पञ्चाध्यधिकपञ्चाशद्दशसङ्कलिका स्मृता ॥ ६११ ॥

एवं च क्रमवृद्ध्या तु सङ्कली दशबन्धिता ।
प्रथमे दशवेधी च शतवेधी द्वितीयके ॥ ६१२ ॥

तृतीये सहस्रवेधी स्याच्चतुर्थेऽयुतवेधिकः ।
पञ्चमे लक्षवेधी स्याद्दशलक्षन्तु षष्ठके ॥ ६१३ ॥

सप्तमे कोटिवेधी स्याद्दशकोटिं तथाऽष्टमे ।
धूमवेधी तु नवमे दशमे शब्दवेधकः ॥ ६१४ ॥

सङ्कलैस्सकलैर्बद्धे वेधो दशगुणो भवेत् ।
दशसंकलिकाबद्धश्शब्दवेधी महारसः ॥ ६१५ ॥

यथा लोहे तथा देहे क्रामते नात्र संशयः ।
वेधयेत्तत्प्रमाणेन धातूंश्चैव शरीरकम् ॥ ६१६ ॥

कारयेद्गुटिकां दिव्यां बदरास्थिप्रमाणतः ।
महाकालीं पूजयित्वा धारयेत्सततं बुधः ॥ ६१७ ॥

"ओं ऐं ह्रीं श्रीं
कालि कालि महाकालि मांसशोणितभोजनि !।
ह्रां ह्रीं ह्रूं
रक्ष कृष्णमुखि! देवि! रससिद्धिं ददस्व मे ॥
श्रीं ह्रीं ऐं ॥"

पूजयित्वा ततो देवीं सिद्धचक्रं विशेषतः।
तां क्षिपेच्चक्रमध्ये तु घुटिकां दिव्यरूपिणीम् ॥६१९॥

शतवेधेन या बद्धा रसेन घुटिका प्रिये!।
मासमेकं तु वक्त्रस्था जीवेच्चैव यथा विधिः ॥६२०॥

तथा सहस्रवेधेन बद्धा या घुटिका शुभा।
मासद्वयं तु वक्त्रस्था जीवेच्चन्द्रार्कतारकम् ॥ ६२१ ॥

दशसहस्रवेधेन बद्धा या घुटिका यदि।
शक्रतुल्यं तदायुष्यं त्रिभिर्मासैस्तु जायते ॥ ६२२ ॥

लक्षवेधेन या बद्धा घुटिका दिव्यरूपिणी।
चतुर्मासं तु वक्त्रस्था ब्रह्मायुष्यं प्रयच्छति ॥ ६२३ ॥

दशलक्षेण या बद्धा घुटिका दिव्यरूपिणी।
सप्तमासं तु वक्त्रस्था वैष्णवं लभते फलम् ॥ ६२४ ॥

कोटिवेधेन या बद्धा घुटिका दिव्यरूपिणी।
षण्माससंस्थिता वक्त्रे साक्षाद्वै रुद्रतां नयेत् ॥ ६२५ ॥

दशकोटिप्रभेदेन घुटिका दिव्यरूपिणी।
सप्तमासं तु वक्त्रस्था स भवेद्व्यापको नरः ॥ ६२६ ॥

कर्ता हर्ता स्वयं भोक्ता शापानुग्रहकारकः।
सर्वज्ञस्सर्वकर्ता च सूक्ष्मरूपो निरञ्जनः ॥ ६२७ ॥

इच्छया कुरुते सृष्टिमिच्छया संहरेज्जगत्।

स्वच्छन्दगमनो भूत्वा शिवरूपो भवेन्नरः ॥ ६२८ ॥
पूज्यते सर्वदेवैश्च ब्रह्मविष्णुमहेश्वरैः ।

[अन्यो वज्रबन्धः ।]

पुनरन्यं प्रवक्ष्यामि वज्रबन्धं सुदुर्लभम् ॥ ६२९ ॥
समांशभक्षणं हेम शुद्धसूतेन कारयेत् ।
मृतवज्रं कलांशेन मर्दयेद्द्विपदीरसैः ॥ ६३० ॥
प्राग्वच्छेषं क्रियाजातं पूर्ववच्च फलं भवेत् ।
वज्रबन्धो भवेत्सिद्धो देवदानवदुर्जयः ॥ ६३१ ॥
चतुर्विंशतिसिद्धानां नायकस्सर्वसिद्धिमान् ।

[अन्यो वज्रबन्धः ।]

वज्रचूर्णसमं सूतं हंसपाद्या विमर्दितम् ॥ ६३२ ॥
पुटित्वा मारयेत्तत्र पुनस्तुल्यं रसं क्षिपेत् ।
ध्मातः खोटो भवत्याशु शोधितः काचटङ्कणैः ॥६३३॥
यावच्छुक्रोदयप्रख्यो जायते च रसः प्रिये ! ।

[अन्यो वज्रबन्धः ।]

वज्रसत्वं च गगनं रसं हेम च मेलयेत् ॥ ६३४ ॥
अमरत्वमवाप्नोति वक्त्रस्थेन सुराधिपे ! ।
जारयित्वा रसं तद्धि पुनस्तेनैव जारयेत् ॥ ६३५ ॥
कोटिवेधी न सन्देहो वक्त्रस्थं खेचरं परम ।
वेधयेत्तत्प्रमाणेन धातूंश्चैव शरीरकम ॥ ६३६ ॥
कारयेद्घुटिकां दिव्यां वज्रसिद्धेन काञ्चने ।
अनेन क्रमयोगेन यावच्छक्यं तु मारयेत् ॥ ६३७ ॥

तद्भस्म सूतकं देवि ! सर्वरोगनिवर्हणम् ।
हेम्ना च सारयित्वा तु चन्द्रार्कं लेपयेत्ततः ॥ ६३८ ॥

द्वात्रिंशांशेन हेमार्धं मातृकार्य(भ्य)धिकं भवेत् ।
बदरास्थिप्रमाणेन कारयेद्गुलिकां बुधः ॥ ६३९ ॥

यथा लोहे तथा देहे क्रमते नान्यथा क्वचित् ।

[अन्यो वज्रबन्धः ।]

वज्रेण द्वन्द्वितं हेम कान्तशुल्बकपालिना(योजितम्) ॥

रञ्जयेत्सप्तवाराणि तं खोटं सूक्ष्मचूर्णितम् ।
भावितं स्त्रीरजेनैव भूर्जपत्रे निवेशितम् ॥ ६४१ ॥

द्रुतसूतेन संयुक्तं बध्वा वस्त्रेण पोट्टलीम् ।
स्वेदयेद्देवदेवेशि ! यावद्द्रवति गोलकः ॥ ६४२ ॥

लाङ्गली जीवनी चैव गन्धार्युत्तरवारुणी ।
एतेषां निक्षिपेत्पिण्डे वज्रगोलं तु वेष्टयेत् ॥ ६४३ ॥

मूषामध्ये विनिक्षिप्य सन्धयित्वा प्रयत्नतः ।
भूमौ मूषां विनिक्षिप्य पुटं मूर्ध्नि प्रदापयेत् ॥६४४॥

अनेनैव प्रतापेन बन्धमेति महारसः ।
गोलकं धारयेद्वक्त्रे वर्षमेकं यदा प्रिये ! ॥ ६४५ ॥

जीवेत्कल्पसहस्राणि यथा नागो महाबलः ।
वर्षैर्द्वादशभिस्साक्षाज्जायते रसपूरुषः ॥ ६४६ ॥

गात्रस्य तस्य प्रस्वेदादष्टौ लोहास्तु काञ्चनम् ।
वज्रभस्म तथा सूतं काञ्चनेन समन्वितम् ॥ ६४७ ॥

वक्त्रस्थं कुरुते यस्तु अब्दात्पलितवर्जितः ।

अन्ये वेधोपयोगिनो बन्धाः ॥

कृष्णाभ्रकस्य सत्वं च तारं ताम्रं च हाटकम् ॥६४८॥
माक्षिकं कान्ततीक्ष्णं च समभागानि कारयेत् ।
अन्धमूषागतं ध्मातं खोटं भवति तत्क्षणात् ॥ ६४९ ॥
तं खोटं सूक्ष्मचूर्णं तु द्रुतसूतेन गोलयेत् ।
मृतसत्व(वज्र)स्य भागैकं भागाश्चत्वारि गोलकम् ॥
मर्दयेत्तप्तखल्वेन भस्मीभवति सूतकः ।
मारयेद्भूधरे यन्त्रे सप्तसङ्कलिकाक्रमात् ॥ ६५१ ॥
गुञ्जामात्रं तु तद्भस्म मध्वाज्येन तु लेहयेत् ।
संवत्सरप्रयोगेण ह्ययुतायुर्भवेन्नरः ॥ ६५२ ॥
वलीपलितनिर्मुक्तो महाबलपराक्रमः ।
तद्भस्म पलमेकं तु पलैकं गन्धकस्य च ॥ ६५३ ॥
अन्धमूषागतं ध्मातं खोटं भवति तत्क्षणात् ।
जीवेत्कल्पसहस्राणि यथा नागो महाबलः ॥ ६५४ ॥
तस्य मूत्रपुरीषेण लोहान्यष्टौ च काञ्चनम् ।
तत्खोटं रञ्जयेत्पश्चाद्वङ्गाभ्रककपालिना ॥ ६५५ ॥
रञ्जयेत्सप्तवाराणि भवेत्कुङ्कुमसन्निभः ।
हेम्ना सह समावर्त्य सारणात्रयसारितम्[1] ॥ ६५६ ॥
शतांशेन तु तेनैव शुल्बमध्ये(वेधं) प्रदापयेत् ।

सहस्रांशेन तेनैव सर्वलोहानि वेधयेत् ।
कृष्णाभ्रकस्य सत्वं च तारं ताम्रं च हाटकम् ॥
तीक्ष्णं च बद्धसूतं च माक्षिकं च समन्वितम् ।
अन्धमूषागतं ध्मातं खोटो भवति तत्क्षणात् ॥
हेम्ना सह समावर्त्य सारणात्रयसारितम् ।

जायते कनकं दिव्यं देवाभरणभूषणम्[1] ॥ ६५७ ॥

वद्धसूतस्य भागैकं भागैकं कुटिलस्य च[2] ।
अन्धमूषागतं ध्मातं यावद्भस्मावशेषितम् ॥ ६५८ ॥

अनेन क्रमयोगेन वङ्गं निर्वाह्य षड्गुणम् ।
अनेन क्रमयोगेन वह्नागं च षड्गुणम् ॥ ३५९ ॥

ततस्तं रञ्जयेत्पश्चात्तीक्ष्णशुल्वकपालिना[3] ।
पक्वसूत(वीज)स्य भागेकं भागैकं द्रुतसूतकम् ॥६६०॥

मर्दयेन्मध्यमाम्लेन गोलकं भवति क्षणात् ।
मृतवज्रस्य भागैक भागाश्चत्वारि गोलकम् ॥ ६६१ ॥

मर्दयेत्तप्तखल्वेन भस्मीभवति सूतकः ।
मारयेद्भूधरे यन्त्रे सप्तसंकलिकाक्रमात् ॥ ६६२ ॥

तद्भस्म तु पुनः पश्चान्मध्यमाम्लेन मर्दयेत् ।
पुटं दद्यात्प्रयत्नेन षष्ठ्याऽधिकशतत्रयम् ॥ ६६३ ॥

---

1. वद्धसूतस्य भागैकं भागैकं पन्नगस्य च ।
   हाटकस्य तु भागैकं भागैकं चाभ्रकान्तयोः ॥
   एकीकृत्य च तद्भाम्यं रसे जीर्णे तु जारयेत् ।
   शतांशेनैव तेनैव शुल्ववेधं प्रदापयेत् ॥

2. अन्धमूषागतं ध्मातं खोटं भवति तत्क्षणात् ।
   तत्खोटं भागमेकं च भागैकं गन्धकस्य च ॥

3. रञ्जयेत्तत्प्रयत्नेन यावत्कुङ्कुमसन्निभम् ।
   हेम्ना सह समावर्त्य सारणात्रयसारितम् ॥
   शतांशे वेधयेच्छुल्वं दिव्यं हेम प्रजायते ।
   पुनरन्यं प्रवक्ष्यामि द्रवसंस्कारमुत्तमम् ॥
   रञ्जयेच्छुद्धकनकं तीक्ष्णशुल्वकपालिना ।

तद्भस्म जायते दिव्यं सिन्दूरारुणसन्निभम् ।
तेनैव वेधयेत्तारं सहस्रांशेन काञ्चनम् ॥ ६६४ ॥

मृतवज्रस्य भागैकं भागाष्षोडश सूतकम् ।
देवदालीशङ्खपुष्पीरसेन मृदितं क्रमात् ॥ ६६५ ॥

मारयेद्भूधरे यन्त्रे भस्मीभवति तत्क्षणात् ।
फूत्काराणां सहस्रेण धाम्यमानं न गच्छति ॥ ६६६ ॥

ईदृशं भस्म सूतं च देहे लोहे च योजयेत् ।
तद्भस्म पलमेकं तु पलमेकं च गन्धकम् ॥ ६६७ ॥

अन्धमूषागतं ध्मातं खोटं भवति तत्क्षणात् ।
तं खोटं रञ्जयेत्पश्चात्कपालिक्रमयोगतः ॥ ६६८ ॥

सारणात्रययोगेन शुल्बवेधं प्रदापयेत् ।
भस्मसूतपलैकं च पलैकं पन्नगस्य च ॥ ६६९ ॥

कान्तपात्रेण तं कृत्वा मर्दयेल्लोहमुष्टिना ।
मृद्वग्निना ततः पाच्यं यावन्नागेन मेलकम् ॥ ६७० ॥

पुटेन जायते भस्म सिन्दूरारुणसप्रभम् ।
तद्भस्म तु पुनः पश्चाद्गोपित्तेन तु मर्दयेत् ॥ ६७१ ॥

तच्चतुर्दशवारांस्तु पुटयेद्भस्मयेत्ततः ।
तद्भस्म भागमेकं तु भागैकं हेमगोलकम् ॥ ६७२ ॥

एकीकृत्याऽथ सम्मर्द्य क्रामणेन सहैकतः ।
तारवि(रि)द्धं तु तेनैव सहस्रांशेन काञ्चनम् ॥६७३॥

अनेन क्रमयोगेन वज्रभस्म प्रजायते ।
सहस्रांशेन तेनैव शुल्बवेधं प्रदापयेत् ॥ ६७४ ॥

तच्छुल्बं जायते तारं शङ्खकुन्देन्दुसन्निभम् ।
श्वेताभ्रकं च सत्वं च कांक्षी कान्तं तथाऽऽयसम् ॥

वङ्गं कान्तं (तारं) तथा श्वेतं वैक्रान्तं च कर्दवकम् ।
अन्धमूषागतं ध्मातं खोटं कुन्देन्दुसन्निभम् ॥६७६॥

तं खोटं सूक्ष्मचूर्णं तु द्रुतसूतेन गोलकम् ।
मृतवज्रस्य भागैकं भागाश्चत्वारि गोलकः ॥ ६७७ ॥

मर्दयेत्तप्तखल्वेन भस्मीभवति सूतकः ।
मारयेद्भूधरे यन्त्रे सप्तसङ्कलिकाक्रमात् ॥ ६७८ ॥

ततश्च जायते भस्म शङ्खकुन्देन्दुसन्निभम् ।
तद्भस्म पलमेकं तु पलमेकं तु गन्धकम् ॥ ६७९ ॥

अन्धमूषागतं ध्मातं खोटं भवति तद्रसः ।
तारेण च समावर्त्य सारणात्रयसारितम् ॥ ६८० ॥

सहस्रांशेन तेनैव शुल्ववेधं प्रदापयेत् ।
तीक्ष्णचूर्णपलान्यष्टौ पलाष्टौ द्रुतसूतकम् ॥ ६८१ ॥

मर्दयेत्तप्तखल्वेन टेटंचिल्वी(कुष्ठच्छल्ली)रसेन च ।
तत्क्षणाज्जायते पिण्डं तीक्ष्णेन सह गोलकम् ॥६८२॥

मृतवज्रस्य भागैकं भागाश्चत्वारि गोलकम् ।
मर्दयेत्तप्तखल्वेन भस्मीभवति तत्क्षणात् ॥ ६८३ ॥

मारयेद्भूधरे यन्त्रे सप्तसङ्कलिकाक्रमात् ।
षोडशांशेन तेनैव वङ्गवेधं प्रदापयेत् ॥ ६८४ ॥

तद्भस्म पलमेकं तु पलैकं गन्धकस्य च ।
अन्धमूषागतं ध्मातं खोटं भवति तत्क्षणात् ॥ ६८५ ॥

तस्य खोटस्य भागं च तीक्ष्णचूर्णं च तत्समम् ।
द्वौ भागौ द्रुतसूतस्य सर्वमेकत्र मर्दयेत् ॥ ६८६ ॥

तप्तखल्वे तु सम्मर्द्य गोलकं भवति क्षणात् ।
मारयेद्भूधरे यन्त्रे सप्तसङ्कलिकाक्रमात् ॥ ६८७ ॥

तत्सर्वं जारयेद्भस्म शङ्खकुन्देन्दुसन्निभम् ।
तद्भस्म कारयेत्खोटं तीक्ष्णेन द्वन्द्वितं सह ॥ ६८८ ॥

अनेन क्रमयोगेन सप्तसङ्कलिकाक्रमात् ।
तं खोटं जारयेत्पश्चात्सारणात्रयसारितम् ॥ ६८९ ॥

लक्षांशेन तु तेनैव वङ्गवेधं प्रदापयेत् ।
भस्मसूतपलैकं तु शुद्धवङ्गं प्रदापयेत् ॥ ६९० ॥

मर्दयेदायसे पात्रे वङ्गं तु म्रियते क्षणात् ।
द्विपलं मृतवङ्गस्य तारचूर्णपलद्वयम् ॥ ६९१ ॥

द्विपलं गन्धकं दद्यात्पलैकं टङ्कणस्य च ।
अन्धमूषागतं ध्मातं खोटं भवति तत्क्षणात् ॥ ६९२ ॥

पलैकं खोटचूर्णस्य पलैकं द्रु(मृ)तसूतकम् ।
मर्दयेन्मातुलुङ्गाम्लैर्गोलको भवति क्षणात्[1] ॥ ६९३ ॥

षोडशांशेन तेनैव तारारिष्टं तु वेधयेत् ।
मृतवङ्गपलैकं तु पलैकं सूतकस्य च ॥ ६९४ ॥

सर्व(त्व)चूर्णं पलैकं तु त्रयमेकत्र कारयेत् ।
मर्दयेन्मातुलुङ्गाम्लैर्गोलको भवति क्षणात् ॥ ६९५ ॥

मृतवज्रस्य भागैकं भागश्चत्वारि गोलकम् ।
एकत्र मर्दयेद्भद्रे ! ओषधीद्रवसंयुतम् ॥ ६९६ ॥

मारयेद्भूधरे यन्त्रे पुटानां सप्तकेन तु ।
तत्सर्वं जायते भस्म वज्रस्यैव प्रभावतः ॥ ६९७ ॥

---

1. षोडशांशेन तेनैव शुल्बवेधं प्रदापयेत् ।
   वङ्गस्थाने ददेन्नागं तारस्थाने च काञ्चनम् ॥
   पूर्ववत्क्रमयोगेन रसं खोटं तु कारयेत् ।
   तं खोटं सूक्ष्मचूर्णं तु द्रुतसूतेन गोलकम् ॥

सामुद्रं त्रिपलं देवि ! भस्ममध्ये प्रदापयेत् ।
एकीकृत्याऽथ सम्मर्द्य वज्रीक्षीरे दिनत्रयम् ॥ ६९८ ॥

विश्वामित्रकपालस्थं पुटं दद्यात्तु भूधरे ।
तत्सर्वं जायते भस्म शङ्खकुन्देन्दुसन्निभम् ॥ ६९९ ॥

तेनैव यवमात्रेण वङ्गं स्तम्भयति क्षणात् ।
वङ्गं तारं तथा सत्वं समसूतेन गोलकम् ॥ ७०० ॥

अनेन क्रमयोगेन मारयेच्च पृथक् पृथक् ।
तत्सर्वं जायते भस्म वज्रस्यैव प्रभावतः ॥ ७०१ ॥

भस्मसूतपलैकं च वङ्गभस्म पलद्वयम् ।
द्वे पले मृततारस्य सत्वभस्म पलद्वयम् ॥ ७०२ ॥

शङ्खचूर्णं पलं पञ्च सामुद्रस्य पलाष्टकम् ।
टङ्कणस्य पलान्यष्टौ सर्वमेकत्र जारयेत् ॥ ७०३ ॥

वज्रीक्षीरेण संवेष्ट्य पुटं दद्याच्चतुर्दश ।
एष सिद्धरसस्साक्षाद्दुर्लभस्त्रिदशैरपि ॥ ७०४ ॥

वङ्गं तु दाप(द्राव)येत्पश्चाद्भाण्डे चैव तु मृण्मये ।
सिद्धं भस्म भवेल्लोहशलाकेन च चालयेत् ॥७०५॥

वापयेच्च प्रयत्नेन यावत्कठिनतां व्रजेत् ।
अन्धमूषागतं ध्मातं तारं भवति शोभनम् ॥ ७०६ ॥

कदाचित्स्फा(पु)टिते तारे पुनर्वङ्गं प्रदापयेत् ।
पत्रे दाहे कषे छेदे तत्तारं शाश्वतं भवेत् ॥ ७०७ ॥

सन्ति(स्तंभि)तं दनु(तत्तु)गोलं च षोडशांशसमन्वितम् ।
मृतवज्रस्य भागैकमेकत्रैव तु कारयेत् ॥ ७०८ ॥

देवदाली शङ्खपुष्पं तद्रसेन तु मर्दयेत् ।
मारयेद्भूधरे यन्त्रे पुटानां सप्तकेन तु ॥ ७०९ ॥

तद्भस्म तु पुनः पश्चाद्दीपयन्त्रेण पाचयेत् ।
भस्मसूतपलैकं च श्वेताभ्रकद(प)लद्वयम् ॥ ७१० ॥
शङ्खचूर्णपलैकं तु पलैकं टङ्कणस्य तु ।
एकीकृत्याथ तत्सर्वं वज्रीक्षीरेण पेषयेत् ॥ ७११ ॥
अरण्योत्पलकैः पश्चात्पुटं दद्याच्चतुर्दश ।
रसोऽयं यवमात्रेण वङ्गं स्तम्भयति क्षणात् ॥ ७१२ ॥
कृष्णाभ्रकपलैकं तु द्विपलेनैव सूतकम् ।
गन्धकस्य पलैकं च एकीकृत्याथ मर्दयेत् ॥ ७१३ ॥
मर्द्यमानं प्रयत्नेन गोलकं भवति क्षणात् ।
मृतवज्रस्य भागैकं भागाश्चत्वारि गोलकम् ॥ ७१४ ॥
मर्दयेत्प्रहरैकं तु भस्मीभवति सूतकः ।
आरण्यगोमयेनैव पुटं दद्यात्तु भूधरे ॥ ७१५ ॥
अनेन क्रमयोगेन सप्तसङ्कलिकां कुरु ।
शतांशेन तु तेनैव नागवेधं प्रदापयेत् ॥ ७१६ ॥
तं खोटं रञ्जयेत्पश्चाच्छुल्बाभ्रककपालिना ।
पुनस्तं रञ्जयेत्पश्चात्तीक्ष्णशुल्बकपालिना ॥ ७१७ ॥
पुनस्तं रञ्जयेत्पश्चान्नागाभ्रककपालिना ।
हेम्ना सह समावर्त्य सारणात्रयसारितम् ॥ ७१८ ॥
सहस्रांशेन तेनैव शुल्बवेधं प्रदापयेत् ।
जायते कनकं दिव्यं देवाभरणभूषणम् ॥ ७१९ ॥
वज्रवल्ली(भस्म)स्नुहीक्षीरे पुटितं दशभिः पुटैः ।
तत्तुल्यं मर्दयेत्सूतं देवदाल्या रसैः पुटेत् ॥ ७२० ॥
तत्तुल्यं पुटयेत्तीक्ष्णं त्रिफलाया रसेन तु ।
तत्तुल्यं पुटयेन्नागमहिमाराटरूषकैः ॥ ७२१ ॥

हेमवर्णप्रदं तद्धि विंशत्यंशेन योजितम् ।
चतुष्षष्ट्यंशकेनेदं शुद्धतारं च रञ्जयेत् ॥ ७२२ ॥

अष्टमांशेन तेनैव नागपत्राणि लेपयेत् ।
पुटयेन्मारयेन्नागं सिन्दूरारुणसन्निभम् ॥ ७२३ ॥

तत्तुल्यं मारयेद्धेम काञ्चनाररसे पुटेत् ।
तत्तुल्यं मारयेच्छुल्वं गृहकन्यारसेन च ॥ ७२४ ॥

पश्चादम्लेन पुटयेद्यावत्सिन्दूरसन्निभम् ।
चन्द्रार्कौ रञ्जयेत्तेन शतांशेन तु पाचितम् ॥ ७२५ ॥

सबीजं बीजवर्ज्यं वा वज्रेण सह सूतकः ।
तद्रस मर्दयेत्पश्चात्स्वर्णपत्ररसेन च ॥ ७२६ ॥

तेनैव वेधयेच्छुल्वं शुल्वं तारेण योजयेत् ।

वज्रहेमद्वन्द्वमेलापनम् ॥

वज्रेण द्वन्द्वयेद्धेम हेम्ना च द्वन्द्वयेद्रसम् ॥ ७२७ ॥

रसेन द्वन्द्वयेद्देहं स देहो ह्यजरामरः ।
कदलीटङ्कसौवीरं कण्टकारीरसप्लुतम् ॥ ७२८ ॥

क्रामणं सर्वधातूनां सर्वद्वन्द्वेषु मेलनम् ।
तिमिरस्य तु पञ्चाङ्गं पेटा(मार्जा)रीबीजसंयुतम् ॥७२९॥

एकीकृत्याऽथ सम्मर्द्य वज्रं तेनैव वेष्टयेत् ।
वज्रमूषागतं ध्मातं हेमद्वन्द्वं तु कारयेत् ॥ ७३० ॥

कान्तपाषाणचूर्णं तु भूलता रामठं मधु ।
गुञ्जाटङ्कणकाचं च कर्कटास्थि स्नुहीपयः ॥ ७३१ ॥

तत्सर्वं तु समं योज्यं स्त्रीस्तन्येन तु मर्दयेत् ।
मूषालेपः कृतः प्राज्ञो वज्रमेलापकस्सुखम् ॥ ७३२ ॥

हठाग्नौ वज्रमूषाभिर्दृढं वज्रा मिलन्ति च ।
सुसूक्ष्मा रवका भूत्वा ह्येकीभावं व्रजन्ति च ॥७३३॥
काचटङ्कणयोगेन ध्मातश्शुद्धिमवाप्नुयात् ।
बहुभिश्चैव मूषाभिस्तेजःपुञ्जोऽपि जायते ॥ ७३४ ॥
मृतवज्रस्य भागैकं भागाष्षोडश हाटकम् ।
श्वेतकाचस्य सूतं तु भागं षोडश दापयेत् ॥ ७३५ ॥
अन्धमूषागतं ध्मातं वज्रद्वन्द्वन्तु कारयेत् ।
अनेन क्रमयोगेन सप्तवारांश्च दापयेत् ॥ ७३६ ॥
मिलने तत्क्षणाद्वज्रं हेम्ना तु सलिलं यथा ।
चूर्णं नरकपालस्य मृतवज्रं च दापयेत् ॥ ७३७ ॥
अन्धमूषागतं ध्मातं हेम्ना मिलति तत्क्षणात् ।
भृङ्गपत्रं नृकेशं च मुखं कान्तस्य टङ्कणम् ॥ ७३८ ॥
बालवत्सपुरीषं च स्त्रीस्तन्येन तु पेषयेत् ।
अन्धमूषागतं ध्मातं वज्रं मिलति तत्क्षणात् ॥ ७३९ ॥
क्षीरेणोत्पलसारिण्या मृतवज्रं तु भावयेत् ।
हेमपिष्टिकया मध्ये वज्रं तत्रैव निक्षिपेत् ॥ ७४० ॥
वेष्टयेद्भूर्जपत्रेण बाह्ये वस्त्रेण वेष्टयेत् ।
धान्यमध्ये तु संस्थाप्य पक्षमेकं निरन्तरम् ॥ ७४१ ॥
उद्धरेत्तत्प्रयत्नेन वज्रबन्धं तु कारयेत् ।

रत्नद्रुतिबन्धः ॥

द्रुता वज्रास्तु सूतेन मेलनीयास्तु पार्वति ! ॥ ७४२ ॥
द्रुतिबन्धस्स विज्ञेयश्शतसाहस्रवेधकः ।
रत्नानां द्रुतयस्सर्वा मेलयित्वा यथाविधि ॥ ७४३ ॥

शतसहस्रवेधी च देहसिद्धिप्रदायकः।
मुसली चित्रकं वन्ध्या कुक्कुटीकन्दपद्मिनी ॥७४४॥

कञ्चुकी नीलिसिन्दूरी पाठा नागबला यथा।
कंसपात्रे रसश्चैव रत्नानां द्रुतयस्तथा ॥ ७४५ ॥

आतपे धारयित्वा वै अधः कर्षानलं यथा।
ओषधीनां रसं दत्वा स्वच्छं कृत्वा पुनः पुनः ॥७४६॥

याममात्रं तु घर्मे च द्रुतिर्मिलति वै रसम्।
न तेषां क्रामणे शक्तिर्वक्तुं वक्त्रशतैरपि ॥ ७४७ ॥

सैन्धवं निंबपत्राणि बाकुची द्वेषिणीजके।
द्रुताभ्रस्य रसेनैव मेलनं परमं मतम् ॥ ७४८ ॥

वज्रद्वन्द्वानमीशानि! वज्रेण रसमारणम्।
सबीजं सारणं प्रोक्तं खोटबन्धनमेव च ॥ ७४९ ॥

तन्ममाचक्ष्व देवेशि! किमन्यच्छ्रोतुमर्हसि ॥

॥ इति श्रीभैरवोक्ते आनन्दकन्दे अमृतीकरणविश्रान्तौ त्रयोविंशोल्लासः ॥

॥ चतुर्विंश उल्लासः ॥

महारसैरुपरसैर्लोहैश्च रसस्य वेधोपयोगिनो बन्धाः ॥

श्री भैरवः—

महारसैरुपरसैर्लोहैश्च परमेश्वरि!।
आज्ञापय समस्तं तं रसराजस्य बन्धनम् ॥ १ ॥

ातां यातं देहलोहकरं भवेत् ।

ाः प्रकारः– श्वेतवैक्रान्तसिद्धः ।]

र्णं तु हयमूत्रेण मर्दयेत् ॥ ११ ॥

मादाय पले पलशतं क्षिपेत् ।

भस्म विशुद्धस्फटिकाकृति ॥ १२ ॥

सूते समभागं विचक्षणः ।

ते हयमूत्रेण मर्दयेत् ॥ १३ ॥

गां क्रमेण मृदुवह्निना[1] ।

त्रं वा भवेदग्निसहो रसः ॥ १४ ॥

ूनि रजतं च करिष्यति ।

ाः प्रकारः– रक्तवैक्रान्तसिद्धः ।]

कर्म जरादारिद्र्यनाशनम् ॥ १५ ॥

ास्य व्याघ्रीकन्दांभसा रजः ।

हेम्नः पलं शुद्धरसस्य च ॥ १६ ॥

त्सर्वं पुनर्हेम्नश्शतं क्षिपेत् ।

सर्वं शुद्धहेमसमप्रभम् ॥ १७ ॥

ो तु पुनर्हेम्ना तु मेलयेत् ।

देवि ! ततो रसवरो भवेत् ॥ १८ ॥

ूतः कोटिवेधी महारसः ।

[षष्ठः प्रकारः ।]

ा तु हेम्ना तु सह मेलयेत् ॥ १९ ॥

सूते सारयित्वा समेन तु ।

समायुक्तं मूषामध्ये विचक्षणः ।

सहस्रांशेन लोहानि वेधयेन्नात्र संशयः ॥ २० ॥

[सप्तमः प्रकारः– कृष्णवैक्रान्तसिद्धः ।]

कृष्णवैक्रान्तभागैकं शुद्धसूतं शतांशकम् ।
एकत्र मर्दयेत्खल्वे चूर्णं भवति तद्द्वयम् ॥ २१ ॥

अस्य चूर्णस्य भागैकं हेमभागसहस्रकम् ।
एकत्र मर्दयेत्तावद्यावद्भस्म तु जायते ॥ २२ ॥

धमेत्तदन्धमूषायां यावत्खोटो भविष्यति[1] ।
समांशभक्षणं तस्य पीठि(पिष्टि)कां तस्य कारयेत् ॥

वेधयेत्सर्वलोहानि स्पर्शमात्रेण हेमताम् ।
तच्चूर्णमभ्रकं चैव रसेन सह मर्दयेत् ॥ २४ ॥

स्वेदयेज्जारयेच्चैव ततो वह्निसहो भवेत् ।
स रसश्चा(स्सा)रितश्चैव सर्वलोहानि विध्यति ॥२५॥

[अष्टमः प्रकारः– पीतवर्णवैक्रान्तसिद्धः ।]

पीतवर्णेऽपि वैक्रान्ते रक्तकृष्णविधिस्स्मृतः ।
पीतवैक्रान्तचूर्णं तु हेमचूर्णसमन्वितम् ॥ २६ ॥

पीताभ्रकस्य चूर्णं तु मेलयित्वा महारसः ।
स्वेदितो मर्दितश्चैव मासादग्निसहो भवेत् ॥ २७ ॥

[नीलवैक्रान्तभस्मरसायनम् ।]

नीलवर्णं तु वैक्रान्तं म्रियते रससंयुतम् ।

---

1. समांशभक्षणं तस्य शुद्धसूतं तु कारयेत् ।
वेधयेत्सर्वलोहानि स्पर्शमात्रेण पार्वति ! ॥

तच्चूर्णमभ्रकं चैव रसेन सह मर्दयेत् ।
एकत्र मर्दयेत्तावद्यावद्भस्म प्रजायते ।
धमेत्तदन्धमूषायां यावत्खोटो भविष्यति ॥

कृष्णाभ्रकेण सहितं मधुसर्पिर्युतं च तत् ॥ २८ ॥
भक्षयेन्मण्डलं देवि ! जीवेच्चन्द्रार्कतारकम् ।
यस्य यस्य हि यो योगस्तस्य तस्य प्रयोगतः ॥ २९ ॥
मेलयित्वा रसं गुञ्जामानं त्रिमधुसंयुतम् ।
खादेत्क्षीराज्यशाल्यन्नं भोज्यमन्यच्च वर्जयेत् ॥ ३० ॥

[नवमः प्रकारः ।]

वैक्रान्तसत्वसंयुक्तं लुङ्गाम्ले मर्दयेद्रसम् ।
तापयेदुष्णतोयेन जलेन परिपूरयेत् ॥ ३१ ॥
सत्वं सूतं च संमिश्रं धमेत्स्याद्रसबन्धनम् ।
बद्धं रसं मुखे क्षिप्त्वा भूमिच्छिद्राणि पश्यति ॥३२॥

[दशमः प्रकारः ।]

निष्कमेकं रसं कान्तमश्वमूत्रेण मर्दयेत् ।
दिनमेकमिदं देवि ! मर्दयित्वा मृतो भवेत् ॥ ३३ ॥
चतुर्दिनमिदं कृत्वा समसूतं समं नयेत् ।
मर्दनं स्वेदनं चैव पूर्ववच्छुद्धमानसः ॥ ३४ ॥
सप्तद्वन्द्वजमेकैकं सप्तमेऽष्टपलं भवेत्[1] ।
शल्याविशल्यामूलस्य वारिणा मर्दयेद्दिनम् ॥ ३५ ॥

---

1. मर्दयेन्मातुलुङ्गाम्लैश्चतुष्षष्टिपुटं ददेत् ।
उदयारुणसङ्काशस्सर्वलोहानि वेधयेत् ॥
कृष्णाभ्रकस्य सत्वं च रसं हेमसमं भवेत् ।
निक्षिप्य वज्रमूषायां धमित्वा खोटतां नयेत् ॥
बद्धं रसं मुखे क्षिप्त्वा ह्यजरामरतां व्रजेत् ।
तेनैव भस्म संमिश्रं कृष्णाभ्रकसमं भवेत् ॥

मूषरीयन्त्रमध्यस्थं पुटं सप्तदिनं ददेत् ।
तद्भस्म शुद्धं सेव्यं स्याद्गुञ्जामात्रं तु मण्डलम् ॥३६॥
षट्कार्यं पञ्चमं मध्यं पुनरेकं प्रशस्यते ।
पूर्ववद्बन्धनं देवि ! कोटिवेधी भवेद्रसः ॥ ३७ ॥

कान्तबन्धः ॥

रक्तवर्णमयस्कान्तं लाक्षारससमप्रभम ।
भिन्नस्त्रीरक्तसंकाशं तच्चूर्णं सूतसंयुतम् ॥ ३८ ॥
मर्दयेच्छागरक्तेन ध्मातं खोटो भवेत्प्रिये ! ।
स सूतश्शतवेधी तु स तु व्याधिहरो भवेत् ॥ ३९ ॥
गुलिकां धारयेद्वक्त्रे जीवेद्वर्षसहस्रकम् ।
पीतवर्णमयस्कान्तं भिन्नहेमसमप्रभम् ॥ ४० ॥
वेधयेत्स्पर्शमात्रेण स तु लोहानि सुन्दरि ! ।

चपलबन्धः ॥

[प्रथमः प्रकारः ।]

लाङ्गलीं करवीरं च चित्रकं गिरिकर्णिकाम् ॥ ४१ ॥
स्त्रीस्तन्यटङ्कसौवीरं मूषालेपं तु कारयेत् ।
चपलाद्द्विगुणं सूतं सूताद्द्विगुणकाञ्चनम् ॥ ४२ ॥
नष्टपिष्टं च तत्कुर्यादन्धमूषागतं धमेत् ।
तत्र स्थितो रसेन्द्रोऽयं खोटो भवति शोभनः ॥ ४३ ॥
शतांशं वेधयेन्नागं गुञ्जावर्णस्तु जायते ।
तेन नागशतांशेन शुल्बं रक्तनिभं भवेत् ॥ ४४ ॥
तेन शुल्वशतांशेन तारं विध्यति काञ्चनम् ।

[द्वितीयः प्रकारः ।]

चपलस्य तु षड्भागास्तारभागास्तु सप्त च ॥ ४५ ॥

अष्टौ कनकभागास्तु नव भागा रसस्य च ।
त्रिंशद्भागा मिलित्वा तु भवन्ति सुरवन्दिते ! ॥ ४६ ॥

चित्रकं कण(र)वीरं च लाङ्गली गृध्रविट् तथा ।
मर्दितं मातुलुङ्गाम्लैर्मूषालेपं तु कारयेत् ॥ ४७ ॥

अन्धयित्वा धमेद्देवि ! खोटो भवति शोभनः ।
तेन खोटदशांशेन विद्धो नागोऽरुणो भवेत् ॥ ४८ ॥

तेन नागेन विद्धं तु शुल्वं गुञ्जारुणं भवेत् ।
तेन शुल्वेन तारं तु विद्धं भवति काञ्चनम् ॥ ४९ ॥

[तृतीयः प्रकारः ।]

हेमाभ्रं(भं) चपलं देवि ! पारदार्धेन संयुतम् ।
पारदे(देन)कनकं दत्वा कुनट्या मर्दयेत्क्षणम् ॥५०॥

लाङ्गली चित्रकं चैव स्त्रीस्तन्यं कण(र)वीरकम् ।
गृध्रविष्ठा तथा सर्वं मूषालेपं तु कारयेत् ॥ ५१ ॥

तन्मध्ये तु स्थितं ध्मातं खोटो भवति शोभनः ।
पूर्वोक्तं वेधयेदेतन्निर्बीजं कनकं भवेत् ॥ ५२ ॥

सुतप्तलोहपात्रे च क्षिपेच्चपलचूर्णकम् ।
सबीजं पारदं कृत्वा चपलस्य तु वापयेत् ॥ ५३ ॥

लाक्षाभो बध्यते सूतोऽङ्कुशेनेव महागजः ।

गन्धकबन्धः ॥

[प्रथमः प्रकारः ।]

शुद्धसूतपलैकं च पलैकं गन्धकस्य च ॥ ५४ ॥

एकीकृत्याऽथ संमर्द्य धुत्तूरकरसेन च ।
मारयेच्चक्रयोगेन भस्मीभवति सूतकः ॥ ५५ ॥

अन्धमूषागतो ध्मातः खोटो भवति शोभनः ।
सितं हेम च नागं च चन्द्रार्कं चापि वेधयेत् ॥५६॥

[द्वितीयः प्रकारः ।]

पलैकं शुद्धसूतस्य कर्षैकं गन्धकस्य च ।
मर्दयेत्स्निग्धखल्वेन देवदालीरसप्लुतम् ॥ ५७ ॥

मर्दयेत्तु कराङ्गुल्या गन्धपिष्टिस्तु जायते ।
जम्बीरस्य रसेनैव दिनमेकं तु मर्दयेत् ॥ ५८ ॥

पञ्चद्रावकसंयुक्तां वटिकां कारयेच्छुभाम् ।
पलाशमूलकल्केन वटिकां तां प्रलेपयेत् ॥ ५९ ॥

धमेत्खोटो भवेच्छ्वेतकाचटङ्कणयोगतः ।
शोधयेत्तं प्रयत्नेन यावन्निर्मलतां व्रजेत् ॥ ६० ॥

स खोटो जायते देवि ! त्रिगुणं पन्नगं ततः ।
शतशो रञ्जयेत्पश्चाच्छुल्बाभ्रककपालिना ॥ ६१ ॥

शुल्बे तारे च खोटोऽयं सहस्रांशेन वेधकः ।

[तृतीयः प्रकारः ।]

गन्धकेन हते सूते मृतलोहानि वाहयेत् ॥ ६२ ॥

पुनर्हेम समावर्त्य समांशं भक्षणं कुरु ।
सारितश्शुल्बतारारैर्घोषं विध्यति सूतकः ॥ ६३ ॥

[चतुर्थः प्रकारः ।]

रसं हेमसमं कृत्वा पिष्टिकार्धेन गन्धकम् ।
द्विपदीरजसा युक्तं मर्दयेट्टङ्कणान्वितम् ॥ ६४ ॥

नष्टपिष्टं च शुष्कं च ध्मातः खोटो भवेत्ततः[1] ।
चन्द्रार्कषोडशांशेन विद्धं भवति काञ्चनम् ॥ ६५ ॥

हेमार्धमिलितं तं तु मातृकासमतां व्रजेत् ।
कुर्यात्सङ्कलिकायोगाद्वेधो दशगुणोत्तरः ॥ ६६ ॥

यथा हेम्नि तथा तारे व्याटि(पि)बीजेन योजितम् ।
तृतीयसङ्कलाबद्धं षट्शते नागवेधकम् ॥ ६७ ॥

चतुर्गुणेन तेनैव सहस्रांशेन काञ्चनम् ।
अनेन क्रमयोगेन सप्त सङ्कलिका यदि ॥ ६८ ॥

कुरुते काञ्चनं दिव्यमष्टलोहानि पार्वति ! ।
तं पुनश्चूर्णयित्वा तु पुटयेद्भस्म जायते ॥ ६९ ॥

सर्वव्याधिजयो देवि ! पलैकेन सुभक्षिते ।
द्विपले ब्राह्ममायुष्यं त्रिपले वैष्णवं भवेत् ॥ ७० ॥

चतुष्पले च पञ्चत्वमीशः पञ्चपले भवेत् ।
षट्पले भक्षिते देवि ! सदाशिवतनुर्भवेत् ॥ ७१ ॥

[पञ्चमः प्रकारः ।]

सूतकं गन्धकं तारं मेषवल्लीवसा समा ।
त्रिदिनं मर्दयेल्लक्षं(त्तीक्ष्णं) वङ्गं पादेन लेपयेत् ॥७२॥

अन्धमूषागतं ध्मातं वङ्गं स्तम्भयति क्षणात् ।

---

1. सौवीरं टङ्कणं काचं दत्वा दत्वा च शोधयेत् ।
अक्षीणो मिलते हेम्नि समावर्तस्तु जायते ॥
समांशं भक्षणं हेम्नि शुद्धसूतेन कारयेत् ।
नष्टपिष्टं च तच्छुल्वं ध्मातं खोटो भवेत्ततः ॥
द्विपदीरजसा युक्तं मर्दयेट्टङ्कणान्वितम् ।

[षष्ठः प्रकारः ।]

[गन्धपिष्टिविधिः ।]

चूर्णितं गन्धकं देवि ! मर्कटीरसभावितम् ॥ ७३ ॥
भावयेच्छतवाराणि जीवभस्म तु गच्छति ।
दापयेन्मृण्मये पात्रे रसेन सह संयुतम् ॥ ७४ ॥
तापयेद्रवितापेन मर्कटीरससंयुतम् ।
गन्धकं ग्रसते सूतः पिष्टिका भवति क्षणात् ॥ ७५ ॥
तिलपर्णीरसेनैव गन्धकं भावयेत्ततः ।
सप्तवारांस्तु देवेशि ! छायाशुष्कं पुनःपुनः ॥ ७६ ॥
शोधितं पातितं सूतं पलैकप्रमितं प्रिये ! ।
मूषामध्ये विनिक्षिप्य नरेन्द्रीरससंयुतम् ॥ ७७ ॥
जारयेद्वालुकायन्त्रे भावितं गन्धकं तुनः ।
त्रुटि त्रुटि प्रदातव्यं गन्धकं च पुनः पुनः ॥ ७८ ॥
अनेन क्रमयोगेन जायते गन्धपिष्टिका ।
गन्धपाषाणचूर्णं तु कनकस्य रसेन तु ॥ ७९ ॥
भावयेत्सप्तवारांस्तु स्त्रीरजेन(पुष्पेण) तु सप्तधा ।
शुद्धसूतपलैकं च खर्परे दापयेत्ततः ॥ ८० ॥
भावितं गन्धकं दद्यान्नरपित्तेन संयुतम् ।
डोलयेद्रवितापेन पिष्टिका भवति क्षणात् ॥ ८१ ॥
गन्धकं सूक्ष्मचूर्णं तु चणकाम्लेन पार्वति ! ।
भावयेत्सप्तवाराणि स्त्रीपुष्पेण च सप्तधा ॥ ८२ ॥
द्रुतसूतकमध्ये तु कर्पूरं गन्धकं समम् ।
दापयेन्निक्षिपेद्गोष्ठे सप्ताहाद्गन्धपिष्टिका ॥ ८३ ॥

[गन्धकपिष्टीस्तंभनं वेधश्च]

कटुकोशातकीबीजं चाण्डालीकन्दमेव च ।
स्तन्यक्षीरेण संपेष्य पिष्टिकां तेन लेपयेत् ॥ ८४ ॥

पुटयेद्भूधरे यन्त्रे स्तम्भते नात्र संशयः ।
हेमसम्पुटमध्ये तु समावर्तं तु कारयेत् ॥ ८५ ॥

अष्टमांशेन तेनैव नागवेधं प्रदापयेत् ।
षोडशांशेन तेनैव तारवेधं प्रदापयेत् ॥ ८६ ॥

[सप्तमः प्रकारः ।]

गन्धपिष्टिपलैकं तु नागपिष्टिपलाष्टकम् ।
लेपयेन्नागपत्राणि छायायां शोषयेत्ततः ॥ ८७ ॥

आटरूषकपिण्डेन नागपत्राणि लेपयेत् ।
आरण्योत्पलकैर्देवि ! दापयेच्च पुटत्रयम् ॥ ८८ ॥

तन्नागं म्रियते दिव्यं सिन्दूरारुणसप्रभम् ।
तन्नागं पलमेकं तु शुल्वचूर्णपलाष्टकम् ॥ ८९ ॥

वासकस्य रसेनैव प्रहरैकं तु मर्दयेत् ।
मारयेत्पातनायन्त्रे शुल्बं तन्म्रियते क्षणात् ॥ ९० ॥

षोडशांशेन तेनैव तारवेधं प्रदापयेत् ।
जायते कनकं दिव्यं देवाभरणभूषणम् ॥ ९१ ॥

या काचिद्गन्धपिष्टी तु आदौ नागं तु मारयेत् ।
नागेन वेधयेच्छुल्वं शुल्वे तारं तु वेधयेत् ॥ ९२ ॥

कनकं जायते दिव्यं सिद्धयोग उदाहृतः ।

[अष्टमः प्रकारः ।]

गन्धकं मधुसंयुक्तं हरबीजेन मर्दितम् ॥ ९३ ॥

भूमिस्थं मासमेकं तु तारमायाति काञ्चनम् ।
उद्वर्तनेन तेनैव सर्वकुष्ठविनाशनम् ॥ ९४ ॥

घनेन सह संयुक्तं व्रणरोगविनाशनम् ।
संवत्सरप्रयोगेण सहस्रायुर्भवेन्नरः ॥ ९५ ॥

तालकबन्धः ॥

शुद्धसूतपलैकं तु पलैकं तालकस्य च ।
एकीकृत्याऽथ संमर्द्य उन्मत्तकरसेन च ॥ ९६ ॥

मारयेच्चक्रयन्त्रेण भस्मीभवति सूतकः ।
अन्धमूषागतं ध्मातं खोटो भवति शोभनः ॥ ९७ ॥

वङ्गं तारं च शुल्वं च क्रमशो वेधयेद्रसः ।
शुद्धवङ्गपलैकं च पलैकं सूतकस्य च ॥ ९८ ॥

द्वे पले तालकं चैतदुन्मत्तरसमर्दितम् ।
मारयेत्पातनायन्त्रे धमनात्खोटतां नयेत् ॥ ९९ ॥

श्वेताभ्रकस्य सत्वं च तारं तीक्ष्णं च माक्षिकम् ।
अन्धमूषागतं ध्मातं खोटो भवति तत्क्षणात् ॥ १०० ॥

तत्खोटपलमेकं च पलैकं सूतकस्य च ।
तालकस्य पलं सर्वमेकीकृत्याऽथ मर्दयेत् ॥ १०१ ॥

मारयेत्पातनायन्त्रे धमनात्खोटतां नयेत् ।

अन्ये लघुबन्धाः ॥

शुद्धसूतपलैकं च पलैकं पन्नगस्य च ॥ १०२ ॥

पलद्वयं कुनट्याश्च सर्वमेकत्र मर्दयेत् ।
मारयेत्पातनायन्त्रे धमनात्खोटतां नयेत् ॥ १०३ ॥

हेमपिष्टिपलैकं च पलैकं गन्धकस्य तु ।
एकीकृत्याऽथ समर्द्य धुत्तूरकरसेन च ॥ १०४ ॥

मारयेत्पातनायन्त्रे धमनात्खोटतां नयेत् ।
कृष्णाभ्रकस्य सत्वं च कान्तं तीक्ष्णं च हाटकम् ॥

शुद्धं तारं च माक्षीकं समभागानि कारयेत् ।
अन्धमूषागतं ध्मातं खोटो भवति तत्क्षणात् ॥१०६॥

तत्खोटपलमेकं तु पलैकं सूतकस्य च ।
पलद्वयं कुनट्याश्च सर्वमेकत्र मर्दयेत् ॥ १०७ ॥

मारयेत्पातनायन्त्रे धमनात्खोटतां नयेत् ।
कृष्णाभ्रकपलैकं तु रसकस्य पलं तथा ॥ १०८ ॥

सूतकस्य पलैकं तु सर्वमेकीकृतं प्रिये ! ।
उन्मत्तकरसेनैव मर्दयेत्प्रहरद्वयम् ॥ १०९ ॥

मर्दयेद्दिनमेकं वा टङ्कणेन समन्वितम् ।
घुटिकां कारयेत्पश्चाच्छायाशुष्कं तु कारयेत् ॥११०॥

महावर्ति(ह्नि)गतं ध्मातं खोटं भवति सूतकः ।
तं खोटं शोधयेत्काचटङ्कणद्रवयोगतः ॥ १११ ॥

हेम्ना सह समावर्त्य सारणात्रयसारितम् ।
सहस्रांशेन तेनैव शुल्बवेधं प्रदापयेत् ॥ ११२ ॥

अनेन क्रमयोगेन कोटिवेधी भवेद्रसः ।
बीजद्वयं पलाशस्य पलमेकं तु सूतकम् ॥ ११३ ॥

जम्बीराम्लेन संमर्द्य छायाशुष्कं तु कारयेत् ।
तुं(बिं)बीका मेघनादी च काकजङ्घा च भू(चू)लिका ॥

स्तन्यं च तैः प्रलिप्तायां मूषायां चैव निक्षिपेत् ।
धमयेत्खदिराङ्गारैः खोटो भवति चाक्षयः ॥ ११५ ॥

पलाशतैले संमर्द्य यावत्स्याद्द्रव(द्रस)पिष्टिका ।
अन्धमूषागतं ध्मातं खोटो भवति तत्क्षणात् ॥११६॥

पूर्वशुद्धेन सूतेन समहेम्ना च पार्वति ! ।
गोलकं कारयेत्तेन मर्दयित्वा दृढं कृतम् ॥ ११७ ॥

ब्रह्मवृक्षस्य बीजानि कार्पासास्थि विभीतकम् ।
यवचिञ्चा च वन्ध्या च राजिका च समन्वितम् ॥

सूक्ष्मपिण्डीकृतं सर्वं तेन लिप्त्वा तु गोलकम् ।
पुटनैस्सप्तभिर्देवि ! पिष्टिकास्तम्भनं भवेत् ॥ ११९ ॥

बृहत्पुटं ततो दत्वा मूषायां तु धमेत्ततः ।
समावर्त्य तु तं सूतं समहेम्ना नियोजितम् ॥१२०॥

शतांशेन तु चन्द्रार्कं वेधयेत्सुरवन्दिते ! ।
पुनस्तेनैव योगेन पिष्टीस्तंभं तु कारयेत् ॥ १२१ ॥

सारयित्वा ततो हेम्ना वेधश्चैव सहस्रकः ।
एवं लक्षाणि कोटिं च वेधयेत्क्रमयोगतः ॥ १२२ ॥

सप्तसंकलिकादूर्ध्वं कृत्वा वक्त्रं तु गोलकम् ।
वर्षेणैकेन स भवेद्वलीपलितवर्जितः[1] ॥ १२३ ॥

चाण्डालीराक्षसीपुष्पैरथ मध्वाज्यटङ्कणैः ।
महारसाष्टमध्ये तमभ्रकं वाऽपि योजयेत् ॥ १२४ ॥

नागवङ्गसमं सूतं हेमतारमथाऽपि वा ।
अभ्रकं द्रुतिसत्वं वा मर्दयेत्प्रहरद्वयम् ॥ १२५ ॥

1. चाण्डाली राक्षसी चाथ गुण्डगोलो भवेद्रसः ।
बीजं सूतं च वैक्रान्तं मर्दयेत्प्रहरद्वयम् ॥
विशुष्कगोलकं कृत्वा मूकमूषागतं पुटेत् ।
खोटस्तु जायते देवि ! सुध्मातः खदिराग्निना ॥

छायाशुष्कं ततो गोलं मृकमूषागतं क्षिपे!।
दत्वा लघुपुटं ध्मातः खोटो भवति शोभनः ॥ १२६ ॥

रंभा वीरा स्नुहीक्षीरं कञ्चुकी वदचिञ्चिका ।
दीनारी चैव गोरम्भा मीनाक्षी काकमाचिका ॥१२७॥

एभिर्मर्दितसूतस्य पुनर्जन्म न विद्यते ।
पूर्ववत्क्रमयोगेन खोटो भवति शोभनः ॥ १२८ ॥

विष्णुकान्ता च व(च)कांका(गी)वला च तुलसी तथा ।
महासोमाऽहिवल्ली च सूर्यावर्तं च सुन्दरि! ॥१२९॥

एभिस्तु मर्दितस्सूतः पूर्ववत्खोटतां नयेत्[1] ।
स्नुहीक्षीरं च काञ्जीरं(कं) बीजानि कनकस्य च ॥

कञ्चुकी लाङ्गली चेन्द्रवारुणी विषमुष्टिका ।
पालाशमूलतोयञ्च मर्दयेत्तेन सूतकम् ॥ १३१ ॥

समहेम्नि समं सूतं पिष्टिकां कारयेद्बुधः ।
महारसान्पिष्टिकार्धं मर्दयेद्दोषधीरसैः ॥ १३२ ॥

यामत्रयं मर्दयित्वा गोलकं कारयेद्बुधः ।
पिष्टिकां बन्धयित्वा तु गन्धतैले विपाचयेत् ॥१३३॥

अन्धमूषागतं गोलं छायाशुष्कं तु कारयेत् ।
ततो लघुपुटं दत्वा खदिराग्नौ तु धामयेत् ॥ १३४ ॥

---

1. मुखेन ग्रसते ग्रासं जारणा तेन सुन्दरि!।
रसोनराजिकामूलैर्मर्दितं वरवर्णिनि!॥

दिव्यौषधिपुटं पाच्यं रसखोटस्य लक्षणम्।
एतत्ते कथितं गुह्यं विज्ञेयं रसवादिभिः॥
मत्प्रसादेन देवेशि! तस्य सिद्धिर्न संशयः।

खोटवज्जायते देवि ! सह हेम्ना तु धामयेत् ।
अक्षीणो मिलते हेम्नि समावर्तश्च जायते ॥ १३५ ॥

तत्क्षणादेव सूतस्य दिव्यदेहो भवेन्नरः ।
वेधयेत्सर्वलोहानि रञ्जितः क्रामितो रसः ॥ १३६ ॥

समांशभक्षणे सूते मर्दयेदोषधीरसैः ।
नष्टपिष्टं तु तं कृत्वा पूर्वयोगेन धामयेत् ॥ १३७ ॥

खोटस्तु जायते दिव्यष्षोडशांशेन वेधकः ।
बद्धस्सङ्कलिकायोगाद्विध्येद्दशगुणोत्तरम् ॥ १३८ ॥

अथवा चूर्णबद्धस्तु विध्येद्दशगुणोत्तरम् ।
मृगदूर्वा चन्द्रवल्ली पक्वबिंया तथैव च ॥ १३९ ॥

कांक्षीला करवीरं च बीजं चोन्मत्तकस्य च ।
काकाण्डीपलसंयुक्तं मर्दयेत्सुरसुन्दरि ! ॥ १४० ॥

समहेम्नि समं सूतं पिष्टिकां कारयेद्बुधः ।
अथवा सारयित्वा तु समेन समसूतकम् ॥ १४१ ॥

महारसं पिष्टिकां च मर्दयेदोषधीरसैः ।
यामत्रयं मर्दयित्वा गोलकं कारयेद्बुधः ॥ १४२ ॥

अन्धमूषागतं गोलं छायाशुष्कं तु कारयेत् ।
ततो लघुपुटं दत्वा ध्मातः खोटो भवेत्प्रिये ! ॥१४३॥

मृगदूर्वोत्तमासोमारसैस्सूतकसारणम् ।
मूलैस्त्रयाणां लाङ्गल्या रामठेन च हन्यते ॥ १४४ ॥

समेन हेम्ना संयुक्तं पिष्टिकां कारयेद्बुधः ।
अथवा तारपिष्टिं च समसूतेन कारयेत् ॥ १४५ ॥

पूर्ववत्क्रमयोगेन खोटो भवति शोभनः ।
अन्धमूषागतं भूमौ स्वेदयेत्कर्षकाग्निना ॥ १४६ ॥

अहोरात्रं त्रिरात्रं वा चूर्णबन्धं भवेत्ततः।
तच्चूर्णबन्धं कुरुते वेधं दशगुणोत्तरम् ॥ १४७ ॥

शूलिनीरससूतं च स्रोतोऽञ्जनसमन्वितम्।
पूर्ववत्पिष्टिकायोगात्खोटो भवति शोभनः ॥ १४८ ॥

स्रोतोऽञ्जनं सतगरं सृष्टित्रययुतं रसम्।
भवेद्वह्निसहः क्षिप्रं सूतकस्सर्वकर्मकृत् ॥ १४९ ॥

हेमाभ्रं चैव ताराभ्रं शुल्वाभ्रं चाभ्रतीक्ष्णकम्।
वङ्गाभ्रं चैव नागाभ्रं सह सूतेन बन्धयेत् ॥ १५० ॥

यथालाभौषधीघृष्टं महारससमन्वितम्।
हेम्ना तारेण शुल्वेन तीक्ष्णवङ्गोरगैस्तथा ॥ १५१ ॥

एभिर्व्यस्तैस्समस्तैर्वा पिष्टिं कृत्वा समे समाम्।
मारयेत्पूर्वविधिना गर्भयन्त्रे तुषाग्निना ॥ १५२ ॥

समांशं सूतकं दत्वा वारं वारं पुनः पुनः।
जायते विविधः खोटः कान्तबद्धो महारसः ॥१५३॥

भवेत्सङ्कलिकायोगाद्वेधो दशगुणोत्तरः।

निगलबन्धः॥

खोटः पोटस्तथा भस्म धूलीकल्पश्च पञ्चमः ॥ १५४ ॥

एते निगलयोगाभ्यां सर्वबन्धफलोदयः।
स्नुह्यर्कसंभवं क्षीरं बन्ध(ब्रह्म)बीजानि गुग्गुलुः ॥१५५॥

सैन्धवं द्विगुणं दत्वा मर्दयेत विचक्षणः।
पिष्टिकाबन्धनं कृत्वा कल्केनानेन सुन्दरि! ॥१५६॥

बिल्वप्रमाणं कृत्वा तु मूषामतिदृढां शुभाम्।
ऊर्ध्वाधो लवणं दत्वा मूषामध्ये रसं क्षिपेत् ॥१५७॥

मूषामध्ये प्रदातव्यं दग्धशङ्खादिचूर्णकम् ।
मुखं तस्य दृढं बध्वा लोणमृत्तिकया बुधः ॥ १५८ ॥

कारयेत्सन्धिलोणं च छायाशुष्कं तु कारयेत् ।
उक्तो निगलबन्धोऽयं पुत्रस्याऽपि न कथ्यते ॥१५९॥

तुषकर्षाग्निना भूमौ मृदुस्वेदं तु कारयेत् ।
अहोरात्रं त्रिरात्रं वा पुटं दत्वा प्रयत्नतः ॥ १६० ॥

सुध्मातं खदिराङ्गारै रसेन्द्रं खोटतां नयेत् ।
सौवीरं टङ्कणं काचं दत्वा दत्वा तु शोधयेत् ॥१६१॥

अक्षीणो मिलते हेम्नि समावर्तश्च जायते ।
समांशभक्षणं तत्तु शुद्धसूतेन कारयेत् ॥ १६२ ॥

धमयेत्पूर्वयोगेन रसेन्द्रं खोटतां नयेत् ।
भवेत्सङ्कलिकायोगाद्वेधो दशगुणोत्तरः ॥ १६३ ॥

पलाशबीजनिर्यासं कोकिलोन्मत्तवारुणी ।
शूलिनीरससंयुक्तं पेषयेत्सैन्धवान्वितम् ॥ १६४ ॥

पिष्टिकावेष्टनं कृत्वा निगलेन तु बन्धयेत्[1] ।
अभ्रकस्य तु पत्रेण वज्रार्कक्षीरसिन्धुना ॥ १६५ ॥

ताप्येन लोहकिट्टेन सिकतामृण्मयेन च ।
एभिस्तु निगले बद्धः पारदीयो महारसः ॥ १६६ ॥

नातिक्रामति मर्यादा वेलामिव महोदधिः ।
तैलार्कक्षीरकतकलाङ्गल्या निगलोत्तमः ॥ १६७ ॥

काकविट् ब्रह्मबीजानि लाङ्गली निगलोऽपरः ।
वाकुची ब्रह्मबीजानि कर्कटास्थीनि सुन्दरि ! ॥१६८॥

---

1. मूषायां निगलो देवि ! लेपितश्शिवशासनात् ।
रसस्य परिणामाय महदग्निस्थितो भवेत् ॥

सामुद्रं शाम्बरं चैव लवणं निगमोत्तमः ।
स्नुह्यर्कसम्भवं क्षीरं ब्रह्मबीजानि कारयेत् ॥ १६९ ॥

कन(त)कस्य च बीजानि लोणाष्टेन च मर्दयेत् ।
निगलोऽन्यस्तु गोजिह्वामूलानि स्त्रीरजोऽपरः ॥१७०॥

बाकुची ब्रह्मबीजानि स्नुह्यर्कक्षीरसैन्धवम् ।
ज्वालिनी काकविष्ठा च प्रशस्तो निगलोत्तमः ॥१७१॥

लवणं टङ्कणं क्षारं शिलातालकगन्धकम् ।
तथाऽम्लवेतसं ताप्यं हिङ्गुलं समभागिकम् ॥ १७२ ॥

स्नुह्यर्कपयसा युक्तं पेषयेन्निगलोत्तमम् ।
पिष्टिकां वेष्टयेदेषामेकेन निगलेन तु ॥ १७३ ॥

लोणमूषागतं प्राग्वत्खोटं कृत्वा तु वेधयेत् ।
द्वितीयं गोरुकं वक्ष्ये पिष्टिकास्तम्भमुत्तमम् ॥ १७४ ॥

द्विपदीरजमूत्रेण सैन्धवाभ्रं सगुग्गुलम् ।
पिष्टीं संवेष्ट्य कल्केन मृदा तु पुनरष्टधा ॥ १७५ ॥

तुषकर्षाग्निना भूमौ मृदुस्वेदं तु कारयेत् ।
अहोरात्रं त्रिरात्रं वा पूर्ववत्खोटतां नयेत्[1] ॥ १७६ ॥

बाकुची ब्रह्मबीजानि गगनं विमलं मणिम् ।
सौवर्चलं सैन्धवं च टङ्कणं गुग्गुलुं तथा ॥ १७७ ॥

द्विपदीरजसा मूत्रं सुश्लक्ष्णं तं च मर्दयेत् ।
पिष्टीमावेष्ट्य कल्केन पूर्ववत्खोटतां नयेत् ॥ १७८ ॥

---

1. त्रयोविंशोल्लासगतमूलिकाबन्धात् (पृ. ४०८) एत त्पर्यन्तं पाठो रसार्णवेऽमुनैव सन्दर्भेणोपलभ्यते ।

रसमूर्च्छाविधिः ॥

[प्रथमः प्रकारः ।]

अथ मूर्च्छां प्रवक्ष्यामि रसस्य परमेश्वरि ! ।
बाह्लीकं सैन्धवं कन्या धूशरो लशुनं वचा ॥ १७९ ॥
मेघनादा काकमाची सर्वांशं मर्दयेद्रसम् ।
श्लक्ष्णं तं गोलकं कृत्वा हिंगुना वेष्टयेद्बहिः ॥१८०॥
समेन लोणयन्त्रस्थं कृत्वा तद्विपचेद्दिनम् ।
चण्डाग्निना स्वाङ्गशीतमधःपात्रे स्थितं रसम् ॥ १८१ ॥
चूर्णीभूतं समादाय सान्द्रद्विगुणवाससा ।
बध्वा सोमानले यन्त्रे ह्यधोर्ध्वं गन्धकं समम् ॥१८२॥
दत्वा पचेत्पुनर्गन्धमेवं गन्धं तु षड्गुणम् ।
जारयेत्स रसो देवि ! मूर्च्छितस्सर्वरोगहा ॥ १८३ ॥

[द्वितीयः प्रकारः ।]

गन्धकं नवसारं च शुद्धसूतसमं समम् ।
यामं सम्मर्दयेच्छ्लक्ष्णं काचकूप्यां विनिक्षिपेत् ॥१८४॥
सप्तमृत्कर्पटैर्लिप्त्वा कूपीं घर्मे विशोषयेत् ।
कूपिकां वालुकायन्त्रे द्वादशप्रहरं पचेत् ॥ १८५ ॥
स रसो जायते देवि ! मूर्च्छितो रञ्जितो भवेत् ।

[तृतीयः प्रकारः ।]

रसार्धं गन्धकं मर्द्यं यामयुग्मं खरातपे ॥ १८६ ॥
ततस्सितजयन्त्याश्च रसैस्संमर्दयेत्त्र्यहम् ।
ततस्तु गोलकं कृत्वा मूषायां सन्निरोधयेत् ॥१८७॥

शोषयित्वा धमेत्किञ्चित्सन्तप्तां तां जले क्षिपेत् ।
तं रसेन्द्रं समादाय भावयेद्गोक्षुरद्रवैः ॥ १८८ ॥
मूर्च्छितो जायते सूतस्सर्वरोगहरश्शुभः ।

बद्धरसलक्षणम् ॥

अक्षयश्च लघुद्रावी तेजस्वी निर्मलो गुरुः ॥ १८९ ॥
स्फुटनः पुनरावर्तो बद्धस्सूतस्स उच्यते ।

जलूकाबन्धाः ॥

[मर्दनजलूका ।]

रसस्याष्टमभागं तु स्वर्णं वा नागमेव वा ॥ १९० ॥
श्लेष्मातकफलं पक्वं कोकिलाक्षकबीजकम् ।
तिलपिण्याकचूर्णं च तप्तखल्वे विमर्दयेत् ॥ १९१ ॥
शाल्मल्याश्चैव पञ्चाङ्गं रसं तत्र विनिक्षिपेत् ।
जलूका जायते यावत्तावन्मर्द्यात्ततः क्षिपेत् ॥ १९२ ॥
कर्पूरं बाकुचीतैलं सैन्धवं टङ्कणं कणाम् ।
कपिकच्छुकरोमाणि तत्सर्वं पेषयेज्जलैः ॥ १९३ ॥
एतत्पूर्वजलूकां त्रिसप्ताहं तप्तखल्वके ।
जलूका जायते दिव्या मर्दनाख्या सुरार्चिते ! ॥१९४॥
नारीणामृतुकाले तु सा योज्या योनिगह्वरे ।
मददर्पहरा तासां मदविह्वलकारका ॥ १९५ ॥
बाल्ये चाष्टाङ्गुला योज्या यौवने सा दशाङ्गुला ।
द्वादशाङ्गुलिका योज्या प्रगल्भानां जलूकका ॥ १९६ ॥
यस्तु तां धारयेन्मूर्ध्नि वीर्यं तस्य स्थिरं भवेत् ।

[मन्मथजलूका ।]

रसेन्द्रस्याष्टमं भागं स्वर्णं वा नागमेव वा ॥ १९७ ॥

॥ पञ्चविंश उल्लासः ॥

परिभाषा ॥

परिभाषां प्रवक्ष्यामि शृणु त्वं सावधानतः ।

वैद्यभागः ॥

अर्धं सिद्धरसं देवि ! त्रिप्वेकं हेमभस्म च ॥ १ ॥

पादांशकं रूप्यभस्म षष्ठांशं ताम्रभस्म च ।
अष्टमांशं हि कान्ताभ्रं कलांशं नवरत्नकम् ॥ २ ॥

रसेश्वरं समुद्दिश्य रसवैद्याय धीमते ।
रसाचार्याय सिद्धाय दद्यादिष्टार्थसिद्धये ॥ ३ ॥

कज्जली पङ्करसश्च ॥

धातुभिर्गन्धकाद्यैश्च निर्द्रवैर्मर्दितो रसः ।
सुश्लक्ष्णः कज्जलाभोऽसौ कज्जली साऽभिधीयते ॥ ४ ॥

सद्रवे मर्दितस्सोऽपि इति पा(पं)करसस्स्मृतः ।

पिष्टी ॥

अर्कांशतुल्याद्रसतोऽथ गन्धा-
न्निष्कार्धतुल्यात्त्रुटिशोऽपि खल्वे ।
अर्कातपे तीव्रतरे विमर्द्या-
त्पिष्टिर्भवेत्सा नवनीतरूपा ॥ ५ ॥

खल्वे विमर्द्य गन्धेन दुग्धेन सह पारदम् ॥ ६ ॥

पेषणात्पिष्टितां याति सा पिष्टीति मता परैः ।

पातनपिष्टी ॥

चतुर्थांशसुवर्णेन रसेन कृतपिष्टिका ॥ ७ ॥
भवेत्पातनपिष्टी सा तथा रूप्यादिभिः कृता ।

हेमपिष्टी तारपिष्टी च ॥

रूप्यं वा जातरूपं वा रसगन्धादिभिर्हतम् ॥ ८ ॥
समुत्थितं च बहुशस्सा कृष्टी हेमतारयोः ।
कृष्टीं क्षिप्त्वा सुवर्णान्ते न वर्णो हीयते तया ॥ ९ ॥
स्वर्णकृष्ट्या कृतं बीजं रसस्य परिरञ्जनम् ।

वरलोहकम् ॥

ताम्रं तीक्ष्णसमायुक्तं द्रुतं निक्षिप्य भूरिशः ॥ १० ॥
सगन्धे लिकुचद्रावे निर्गतं वरलोहकम् ।

हेमरक्तीताररक्ती च ॥

तेन रक्तीकृतं स्वर्णं हेमरक्तीत्युदाहृता ॥ ११ ॥
निक्षिप्ता सा द्रुते स्वर्णे वर्णोत्कर्षविधायिनी ।
तारस्य रञ्जनी चापि बीजरागविधायिनी ॥ १२ ॥
एवमेव प्रकर्तव्या ताररक्ती मनोहरा ।
रञ्जनी खलु रूप्यस्य बीजानामपि रञ्जनी ॥ १३ ॥

चन्द्रानलदलम् ॥

मृतेन वा बद्धरसेन वान्य-
    लोहेन वा साधितमन्यलोहम् ।
सितं हि पीतत्वमुपागतं त-
    द्दलं हि चन्द्रानलयोः प्रसिद्धम् ॥ १४ ॥

आभास(ा)मृतबन्धेन रसेन सह योजितम् ।
साधितं वाऽन्यलोहेन सितं पीतं हि तद्दलम् ॥ १५ ॥

अयोनागम् ॥

ताप्येन निहतं कान्तं सप्तवारं समुत्थितम् ।
तद्द्वयं द्विपलं वाऽथ ताम्रभस्म पलद्वयम् ॥ १६ ॥

सर्वं निक्षिप्य मूषायां सप्तवारं धमेद्दृढम् ।
तदयोनागमित्युक्तं साधकं देहलोहयोः ॥ १७ ॥

रसेन सारणायन्त्रे तदीया गुलिका कृता ।
सा धृता वदने हन्ति मेहरोगानशेषतः ॥ १८ ॥

कुरुते दन्तदार्ढ्यं च दृशौ गृध्रदृशाविव ।
तथाऽन्यान्क्षेत्रजान्रोगान्रोगाञ्जत्रूर्ध्वसंभवान् ॥ १९ ॥

शुल्बनागम् ॥

माक्षिकेण हतं ताम्रं दशवारं समुत्थितम् ।
तद्वद्विशुद्धनागं हि द्वितयं तच्चतुष्पलम् ॥ २० ॥

नीलाञ्जनहतं भूयस्सप्तवारं समुत्थितम् ।
इति संसिद्धमेतद्धि शुल्बनागं प्रकीर्तितम् ॥ २१ ॥

साधितस्तेन सूतेन्द्रो वदने विधृतो नृणाम् ।
निहन्ति मासमात्रेण मेहव्यूहमशेषतः ॥ २२ ॥

पथ्याशनस्य वर्षेण पलितं वलिभिस्सह ।
गृध्रदृष्टिर्लसद्दृष्टिस्सर्वारोग्यसमन्वितः ॥ २३ ॥

पिञ्जरी ॥

लोहं लोहान्तरे क्षिप्तं ध्मातं निर्वापितं द्रवे ।
पाण्डुपीतप्रभं जातं पिञ्जरीत्यभिधीयते ॥ २४ ॥

चन्द्रार्कम् ॥

भागाष्षोडश तारस्य तथा द्वादश भास्वतः ।
एकत्वावर्तितास्ते तु चन्द्रार्कमिति कथ्यते ॥ २५ ॥

निर्वाप(ह)णम् ॥

धार्य(म्य)(साध्य)लोहेऽन्यलोहश्चेत्प्रक्षिप्तो वङ्कनालतः ।
निर्वापणं तु तत्प्रोक्तं वैद्यैर्निर्वाहणं खलु ॥ २६ ॥
क्षिपेन्निर्वाहणं द्रव्ये निर्वाह्ये समभागिकम् ।
आवाप्यं वापनीयञ्च भागे दृष्टे च दृष्टवत् ॥ २७ ॥

लोहभस्मसिद्धिलक्षणम् ॥

मृतं तरति यत्तोये लोहं वारितरं हि तत् ।
अङ्गुष्ठतर्जनीघृष्टं यत्तद्रेखान्तरे विशेत् ॥ २८ ॥
मृतं लोहं तदुद्दिष्टं रेखापूर्णाभिधानतः ।

निरुत्थभस्मलक्षणम् ॥

गुडगुञ्जासुखस्पर्शमध्वाज्यैस्सह योजितम् ॥ २९ ॥
न याति प्रकृतिं ध्मानादपुनर्भवमुच्यते ।
लोहेन सह संयुक्तं ध्मातं रूप्येण चेल्लिहे(ल्लगे)त् ॥
तदा निरुत्थमित्युक्तं लोहं तदपुनर्भवम् ।
एवं रूप्यं सताम्रं चेद्ध्मातं ताम्रे लगेन्न हि ॥ ३१ ॥
तदानिरुत्थं मन्तव्यं रजतं च भिषग्वरैः ।

बीजम् ॥

निर्वाहणविशेषेण तद्वद्वर्णं भवेद्यदा ॥ ३२ ॥
मृदुलं चित्रसङ्काशं तद्बीजमिति कथ्यते ।

उत्तारणम् ॥

इदमेव हि निर्दिष्टं वैद्यैरुत्तारणं खलु ॥ ३३ ॥

संसृष्टलोहयोरेकलोहस्य परिनाशनम् ।

ताडनम् ॥

प्रध्मातं वङ्कनालेन तत्ताडनमुदाहृतम् ॥ ३४ ॥

धान्याभ्रम् ॥

चूर्णाभ्रं शालिसंयुक्तं वस्त्रबद्धं हि काञ्जिके ।
निर्यातं मर्दनाद्वस्त्राद्धान्याभ्रमिति कथ्यते ॥ ३५ ॥

सत्वम् ॥

क्षाराम्लद्रावकैर्युक्तं ध्मातमाकरकोष्ठके ।
यस्ततो निर्गतस्सारस्सत्वमित्यभिधीयते ॥ ३६ ॥

एककोलीसकः ॥

कोष्ठिकाशिखरापूर्णैः कोकिलाध्मानयोगतः ।
मूषाकर्ण(ण्ठ)मनुप्राप्तैरेककोलीशको मतः ॥ ३७ ॥

स्वेदनाद्यर्हाः कोकिलाः ॥

शिखित्राः पावकोच्छिष्टा मृताङ्गाराश्च कोकिलाः ।
कृष्णाङ्गाः कोकिलाश्चेति पर्यायास्ते परस्परम् ॥३८॥

द्रावणे सत्वपाते च माधूकाः खादिराश्शुभाः ।
दुर्द्रावे वंशजापे(ता)स्तु स्वेदने बादराश्शुभाः ॥३९॥

हिङ्गुलाकृष्टरसः ॥

विद्याधराख्ययन्त्रस्थादार्द्रकद्रवमर्दितात् ।
समाकृष्टो रसो योऽसौ हिंगुलाकृष्ट उच्यते ॥ ४० ॥

घोषाकृष्टं वङ्गम् ॥

स्वल्पतालयुतं कांस्यं वङ्कनालेन ताडितम् ।
मुक्तवङ्गं हि तत्ताम्रं घोषाकृष्टमुदाहृतम् ॥ ४१ ॥

गुह्यनागम् ॥

पलविंशति नागस्य शुद्धस्य कृतचक्रिकम् ।
रूषिकादुग्धसंपिष्टशिलायां(लया) परिलेपितम् ॥४२॥
शरावसंपुटे रुध्वा पचेत्क्रोडपुटेन ताम् ।
तावद्वारं पचेद्यत्नाद्यावद्भस्म प्रजायते ॥ ४३ ॥
गुडगुग्गुलुगुञ्जाऽऽज्यटङ्कणैः परिमर्द्य तम् ।
मूषामध्ये निरुध्याऽथ ध्मानादुत्थापितं पुनः ॥ ४४ ॥
चक्रीं तेन पुनः कृत्वा पलप्रमितपारदैः ।
लिप्त्वा लिम्पेत्सितार्कस्य पयसा शिलयाऽपि च ॥४५॥
पचेद्गजपुटैरेवं वाराणां खलु विंशतिः ।
पुटे पुटे च नागस्य कुर्यादुत्थापनं खलु ॥ ४६ ॥
नीलज्योतिर्द्रवैस्सम्यग्दशवाराणि ढालयेत् ।
इति सिद्धं हि तत्सीसं कर्षमात्रावशेषितम् ॥ ४७ ॥
गुह्यनागाख्यया प्रोक्तं श्रेष्ठं रसरसायने ।
निष्कमात्रं तु नागेऽस्मिन् लोहाख्ये या द्रुते सति ॥
स्वतो लक्षगुणां हैमीं शलाकां ग्रसते ध्रुवम् ।
लगेत्तैलप्रतप्तं तत्स्वर्णमुद्गिरति ध्रुवम् ॥ ४९ ॥
गुह्यनागोऽयमुद्दिष्टश्शक्तिस्वच्छन्दभैरवः ।

वरनागम् ॥

तीक्ष्णं नीलाञ्जनोपेतं ध्मातं हि बहुशो दृढम् ॥ ५० ॥

मृदु कृष्णं द्रुतद्रावं वरनागं तदुच्यते ।

उत्थापनम् ॥

मृतस्य पुनरुद्भूतिस्सा प्रोक्तोत्थापनाख्यया ॥ ५१ ॥

ढालनम् ॥

द्रुतद्रव्यस्य विक्षेपो द्रवे तत् ढालनं मतम् ।

चपलः ॥

त्रिंशत्पलमितं नागं भानुदुग्धेन मर्दितम् ॥ ५२ ॥

विमृद्य पुटयेत्तावद्यावत्कर्षावशेषकम् ।
न तत्पुटसहस्रेण क्षयमायाति सर्वदा ॥ ५३ ॥

चपलोऽयं समादिष्टो वार्तिकैर्नागसम्भवः ।
इत्थं हि चपलः कार्यो वङ्गस्यापि न संशयः ॥ ५४ ॥

तत्स्पृष्टहस्तसंस्पृष्टः केवलो बध्यते रसः ।
स रसो धातुवादेषु शस्यते न रसायने ॥ ५५ ॥

अयं हि कर्पणाख्येन लोकनाथेन कीर्तितः ।
आमकाश्मरजस्सूक्ष्मं पञ्चमांशसमन्वितम् ॥ ५६ ॥

कुमारीमूलतोयेन मर्दयेदेकवासरम् ।
शार्ङ्गेरीस्वरसे वाऽपि दिनमेकमनारतम् ॥ ५७ ॥

एवं भूनागधौतं च मर्दयेद्दिवसद्वयम् ।
अथैकपलनागेन तावता त्रपुणाऽपि च ॥ ५८ ॥

दशनिष्करसेन्द्रेण श्लक्ष्णपिष्टिं समाचरेत् ।
योजयित्वाऽऽद्यकल्केन यथापूर्वं विमर्दयेत् ॥ ५९ ॥

ततश्शाणरसेन्द्रेण सत्वेन रसकस्य च ।
पिष्टीं कृत्वा तु पूर्वेण पूर्वकल्कैश्च योजयेत् ॥ ६० ॥

अथ प्रक्षाल्य सोष्णेन काञ्जिकेन प्रशोषयेत् ।
पलार्धं शुद्धसस्येन अष्टगुञ्जारसेन च ॥ ६१ ॥
विमर्द्य काञ्जिकैः कुर्यान्मरिचप्रमिता वटीः ।
निरुध्य वज्रमूषायां सन्धिबन्धं विधाय च ॥ ६२ ॥
शिखित्रैर्नवभिस्सम्यग्भस्त्राभ्यां प्रधमेत्खलु ।
ततो मूषागतं सत्वं समादाय समन्ततः ॥ ६३ ॥
धमेत्प्रकटमूषायां वङ्कनालेन शोधयेत् ।
दशशाणं हि तत्सत्वं भस्मना लवणेन च ॥ ६४ ॥
सकाञ्जिकेन संपेष्य पुटयोगेन शोधयेत् ।
त्रिनिष्कप्रमिते तस्मिन्पूर्वप्रोक्तेन भस्मना ॥ ६५ ॥
अशीतिगुणितं नागं ध्मात्वा निर्वाहयेत्खलु ।
इयता पूर्वसूतोऽसौ क्षीयते न कथञ्चन ॥ ६६ ॥
चपलोऽयं समुद्दिष्टो लोकनाथेन शम्भुना ।
अनेनापि रसश्शीघ्रं पूर्ववद्बध्यते सुखम् ॥ ६७ ॥
कारवल्लीजटाचूर्णैर्दशधा पुटितो हि सः ।
भवेन्नागविनिर्मुक्तो ग्रासं गृह्णात्यशेषतः ॥ ६८ ॥
सुखं प्रकटमूषायां भवेच्चातिगुणोत्तरः ।
जीर्णग्रासो रसो ह्येषां देहलोहकरो भवेत् ॥ ६९ ॥

भूनागधौतम् ॥

भूभुजङ्गशकृत्तोयैः प्रक्षाल्यापहृतं मलम् ।
कृष्णवर्णं हि तत्प्रोक्तं धौताख्यं रसवादिभिः ॥ ७० ॥

द्वन्द्वानम् ॥

द्रव्ययोर्मेलनं ध्मानाद्द्वन्द्वानं परिकीर्तितम् ।

भञ्जनी ॥

भागाद्रूप्याधिके क्षेपमनुवर्णसवर्णकम् ॥ ७१ ॥
दलैर्वा वर्णिकाग्रासो भञ्जनी वादिनिर्मिता ।

फुल्लिका ॥

पतङ्गीकल्कतो जाता लोहे तारत्वहेमता ॥ ७२ ॥
दिनानि कतिचित्स्थित्वा यात्यसौ फुल्लिका मता ।

पतङ्गीरागः ॥

रञ्जितार्धरसाल्लोहादन्यद्वा चिरकालतः ॥ ७३ ॥
विनिर्याति स निर्दिष्टः पतङ्गीरागसंज्ञकः ।

आवापः ॥

द्रुते द्रव्यान्तरक्षेपाल्लोहाद्यैः क्रियते हि यः ॥ ७४ ॥
स आवापः प्रतीवापस्तदेवाच्छादनं मतम् ।

अभिषेकः ॥

द्रुते वह्निस्थिते लोहे विरम्याऽष्टनिमेषकम् ॥ ७५ ॥
सलिलस्य परिक्षेपस्सोऽभिषेक इति स्मृतः ।
नागं वा वङ्गं वा प्रद्राव्य निषेचयेच्छतं वारान् ॥७६॥
उक्तद्रव्ये तद्द्रवताडनमेतद्धि सोऽभिषेकस्तु ।

निर्वापः ॥

तप्तस्याप्सु परिक्षेपो निर्वापस्तपनं च तत् ॥ ७७ ॥
प्रतिवाप्यादिकं कार्यं द्रुतलोहे सुनिर्मले ।

शुद्धावर्तः ॥

यदा हुताशो दीप्तार्चिश्शुक्लोत्थानसमन्वितः ॥ ७८ ॥

शुद्धावर्तस्तदा ज्ञेयस्स कालस्सत्वनिर्गमे ।

रेखावर्तः ॥

द्राव्यद्रव्यनिभा ज्वाला दृश्यते धमने यदा ॥ ७९ ॥

द्रवस्योन्मुखता सेयं रेखावर्तस्स कथ्यते ।

स्वाङ्गशीतं वह्नि(बहिश्)शीतञ्च ॥

वह्निस्थमेव शीतं यत्तदुक्तं स्वाङ्गशीतलम् ॥ ८० ॥

अग्नेराकृष्टशीतं यद्वह्नि(बहिश्)शीतं तदीरितम् ।

स्वेदनम् ॥

क्षाराम्लैरौषधैर्वाऽपि डोलायन्त्रे स्थितस्य हि ॥ ८१ ॥

पचनं स्वेदनाख्यं स्यान्मलशैथिल्यकारकम् ।

मर्दनम् ॥

उद्दिष्टैरौषधैस्सार्धं सर्वाम्लैः काञ्जिकैरपि ॥ ८२ ॥

पेषणं मर्दनाख्यं स्याद्बहिर्मलविनाशनम् ।

मूर्च्छनम् ॥

मर्दनादिष्टभैषज्यैर्नष्टपिष्टित्वकारकम् ॥ ८३ ॥

तन्मूर्च्छनं हि वार्यद्रिभूजकञ्चुकनाशनम् ।

नष्टपिष्टिः ॥

स्वरूपस्य विनाशेन पिष्टित्वापादनं हि यत् ॥ ८४ ॥

विवृद्धि(द्धि)र्जितसूतेन(सूतोऽसौ) नष्टपिष्टिस्स उच्यते ।

उत्थापनम् ॥

स्वेदतापादियोगेन स्वरूपापादनं पुनः ॥ ८५ ॥

तदुत्थापनमित्युक्तं मूर्च्छाव्यापत्तिनाशनम् ।

पातनम् ॥

उक्तौषधैर्मर्दितपारदस्य
    यन्त्रस्थितस्योर्ध्वमधश्च तिर्यक् ।
निर्यापनं पातनसंज्ञयोक्तं
    वङ्गाहिसंपर्कजकञ्चुकघ्नम् ॥ ८६ ॥

रोधनम् ॥

जलसैन्धवयुक्तस्य रसस्य दिवसत्रयम् ॥ ८७ ॥
स्थितिराप्यायिनी कुम्भे योऽसौ रोधनमुच्यते ।

नियमनम् ॥

रोधनाल्लब्धवीर्यस्य चपलत्वनिवृत्तये ॥ ८८ ॥
क्रियते यो घटे स्वेदः प्रोक्तं नियमनं हि तत् ।

दीपनम् ॥

धातुपाषाणमूलाद्यैस्संयुक्तो घटमध्यतः ॥ ८९ ॥
ग्रासार्थं त्रिदिनं स्वेदो दीपनं तन्मतं बुधैः ।

ग्रासमानम् ॥

इयन्मानस्य सूतस्य भोज्यद्रव्यात्मिका मितिः ॥ ९० ॥
इयतीत्युच्यते योऽसौ ग्रासमानमितीरितम् ।

जारणा ॥

ग्रासस्य चारणं गर्भद्रावणं जारणं तथा ॥ ९१ ॥
इति त्रिरूपा निर्दिष्टा जारणा वरवार्तिकैः ।
ग्रासः पिण्डः परीणामस्तिस्रश्चाख्याः पराः पुनः ॥९२॥
समुखा निर्मुखा चेति जारणा द्विविधा मता ।
निर्मुखा जारणा प्रोक्ता बीजादानेन भागतः ॥ ९३ ॥

समुखजारणा ॥

शुद्धं स्वर्णं च रूप्यं च बीजमित्यभिधीयते ।
चतुष्षष्ट्यंशतो बीजप्रक्षेपो मुखमुच्यते ॥ ९४ ॥

एवं कृते रसो ग्रासलोलुपो मुखवान् भवेत् ।
कठिनान्यपि लोहानि क्षमो भवति भक्षितुम् ॥ ९५ ॥

इयं हि समुखी प्रोक्ता जारणाऽमृतजार(चारि)णा ।

निर्मुखचारणा ॥

दिव्यौषधिसमायोगात्स्थितः प्रकटकोष्ठिषु ॥ ९६ ॥

भुंक्ते निखिललोहाद्यान्योऽसौ राक्षसवक्त्रवान् ।

चारणा ॥

रसस्य जठरे ग्रासक्षेपणं चारणा मता ॥ ९७ ॥

गर्भद्रुतिः ॥

ग्रस्तस्य द्रावणं गर्भे गर्भद्रुतिरुदाहृता ।

बाह्यद्रुतिः ॥

बहिरेव द्रुतीकृत्य घनसत्वादिकं खलु ॥ ९८ ॥

जारणाय रसेन्द्रस्य सा बाह्यद्रुतिरुच्यते ।

द्रुतिलक्षणम् ॥

निर्लेपित्वं द्रवत्वं च तेजस्त्वं लघुता तथा ॥ ९९ ॥

असंयोगश्च सूतेन पञ्चधा द्रुतिलक्षणम् ।
औषधाज्यादियोगेन लोहधात्वादिकं सदा ॥ १०० ॥

उत्तिष्ठते द्रवाकारा सा द्रुतिः परिकीर्तिता ।

जारणा ॥

द्रुतग्रासपरीणामो बिडयन्त्रादियोगतः ॥ १०१ ॥

जारणेत्युच्यते तस्याः प्रकारास्सन्ति कोटिशः ।

बिडम् ॥

क्षारैरम्लैश्च गन्धाद्यैर्मूत्रैस्सपटुभिस्तथा ॥ १०२ ॥

रसग्रासस्य जीर्णार्थं तद्बिडं परिकीर्तितम् ।

रञ्जनम् ॥

संसिद्धबीजसत्वादिजारणेन रसस्य हि ॥ १०३ ॥

पीतादिरागजननं रञ्जनं समुदीरितम् ।

सारणा ॥

सूते सतैलयन्त्रस्थे स्वर्णादिक्षेपणं हि यत् ॥ १०४ ॥

वेधाधिक्यकरं लोहे सारणा सा प्रकीर्तिता ।

वेधः ॥

व्यवायिभेषजोपेतो द्रव्ये क्षिप्तो रसः खलु ॥ १०५ ॥

वेध इत्युच्यते तज्ज्ञैः स चानेकविधस्स्मृतः ।
लेपः क्षेपश्च कुन्तश्च शब्दाख्यो धूमसंज्ञकः ॥१०६॥

लेपवेधः ॥

लेपेन कुरुते लोहं स्वर्णं वा रजतं तथा ।
लेपवेधस्स विज्ञेयः पुटमत्र च सौकरम् ॥ १०७ ॥

क्षेपवेधः ॥

प्रक्षेपणं द्रुते लोहे वेधस्स्यात्क्षेपसंज्ञकः ।

कुन्तवेधः ॥

सन्दंशधृतसूतेन द्रुतद्रव्याहतिश्च यः ॥ १०८ ॥

सुवर्णत्वादिकरणः कुन्तवेधस्स उच्यते ।

धूमवेधः ॥

वह्नौ धूमायमानेऽन्तःप्रक्षिप्तरसधूमतः ॥ १०९ ॥
स्वर्णाद्यापादनं लोहे धूमवेधस्स ईरितः ।

शब्दवेधः ॥

मुखस्थिते रसे नाल्या लोहस्य धमनात्खलु ॥ ११० ॥
स्वर्णरूप्यत्वजननं शब्दवेधस्स कीर्तितः ।

उत्पाटनम् ॥

पिण्डद्रव्यस्य सूतेन कालुष्यादिनिवारणम् ॥ १११ ॥
प्रकाशनं च वर्णस्य तदुत्पाटनमीरितम् ।

स्वेदनम् ॥

क्षाराम्लैरौषधैस्सार्धं भाण्डे रुध्वाऽतियत्नतः ॥ ११२ ॥
भूमौ निखन्यते यत्तत्स्वेदनं समुदीरितम् ।

सन्यासः ॥

रसस्यौषधयुक्तस्य भाण्डे रुद्धस्य यत्नतः ॥ ११३ ॥
सदाऽग्नियुतचुल्यन्तःक्षेपस्सन्यास उच्यते ।
द्वावेतौ स्वेदसन्यासौ रसराजस्य निश्चितम् ॥ ११४ ॥
गुणप्रभावजननौ शीघ्रव्याप्तिकरौ तथा ।

॥ इति श्रीभैरवोक्ते आनन्दकन्दे अमृतीकरणविश्रान्तौ पञ्चविंशोल्लासः ॥

॥ षड्विंश उल्लासः ॥

यन्त्राणि ॥

रसो नियन्त्र्यते येन यन्त्रं तदिति कथ्यते ।

१. खल्वयन्त्रम् ॥

खल्वयन्त्रं द्विधा प्रोक्तं मर्दनादिककर्मणि ॥ १ ॥

खल्वं लोहमयं देवि! पाषाणोत्थमथाऽपि वा ।
खल्वयोग्या शिला नीला श्यामा स्निग्धा दृढा गुरुः ॥

खल्वयन्त्रं द्विधा प्रोक्तं रसादिसुखमर्दने ।
षोडशाङ्गुलिकोत्सेधा नवाङ्गुलिसुविस्तरा ॥ ३ ॥

चतुर्विंशाङ्गुलीदीर्घघर्षणी द्वादशाङ्गुला ।
विंशत्यङ्गुलदीर्घा वा स्यादुत्सेधे दशाङ्गुला ॥ ४ ॥

खल्वप्रमाणं तज्ज्ञेयं श्रेष्ठं स्याद्रसमर्दने ।
षोडशाङ्गुलविस्तारः खल्वो भवति वर्तुलः ॥ ५ ॥

चतुरङ्गुलनिम्नं च मध्येऽतिमसृणीकृतम् ।
मर्दनी चिपिटाऽधस्तात्सुग्रहा च शिखोपरि ॥ ६ ॥

अयं हि वर्तुलः खल्वो मर्दनेऽतिसुखप्रदः ।
अयसा कान्तलोहेन लोहखल्वमपीदृशम् ॥ ७ ॥

अधस्ताद्द्रोणिका कार्या वह्निप्रज्वालनोचिता ।

पातनात्रितयस्योक्तं यन्त्राणां त्रितयं खलु ।
पातनैश्च विना सूतो नितरां दोषमृच्छति ॥ २७ ॥
त्रिभिरेवोर्ध्वपातैस्स कस्माद्दोषैर्न मुच्यते ।
द्वि(वि)भागेन विपाकेन द्रव्यान(न्येणा)न्योन्ययोगतः ॥
पात्रान्तरपरिक्षेपाद्गुणास्स्युर्विविधाःखलु ।
खण्डान्युलूखलांभोभिस्तण्डुलास्युर्ज(र्म)लोज्झिताः ॥
पातनैव महाशुद्धिस्तण्डुली परिकीर्तिता ।

६. कच्छपयन्त्रम् ॥

विशालवदने भाण्डे तोयपूर्णे निवेशयेत् ॥ ३० ॥
अपरं पृथुलं सम्यक् प्रत(स्त)रस्तस्य मध्यमे ।
आलवालं बिडैः कृत्वा तन्मध्ये पारदं क्षिपेत् ॥ ३१ ॥
ऊर्ध्वाधश्च बिडं दत्वा मल्लेनारुध्य यत्नतः ।
पुटमौचित्ययोगेन दीयते तन्निगद्यते ॥ ३२ ॥
यन्त्रं कच्छपसंज्ञं हि तदुक्तं रसजारणे ।

७. आन्तरालिकयन्त्रम् ॥

कृत्वा लोहमयीं मूषां वर्तुलाधारका(धा)रिणीम् ॥३३॥
वितस्त्या संमितां कान्तलोहेन परिनिर्मिताम् ।
मुण्डलोहोद्भवां वाऽपि कण्ठाधो त्र्यङ्गुलादधः ॥ ३४ ॥
त्र्यङ्गुलं वलयं दद्यान्मध्यदेशे च कण्ठतः ।
पिधानधारकं चिञ्चापत्रविस्तीर्णकङ्कणम् ॥ ३५ ॥
पिधानमन्तराविष्टं सशिखं श्लिष्टसन्धिकम् ।
तले प्रविहतच्छिद्रं भाण्डं कृत्वा ह्यधोमुखम् ॥ ३६ ॥

यन्त्रेणालम्बयेन्मूर्ध्नि निरुध्य च विशोष्य च ।
स्थालीकण्ठं ततो दद्यात्पुटानलविधारणन् ॥ ३७ ॥

एवंरूपं भवेद्यन्त्रमान्तरालिकसंज्ञकम् ।
अनेन जारयेद्गन्धं द्रुतं गर्भद्रु(घृ)तामपि ॥ ३८ ॥

८. तापिकायन्त्रम् ॥

तापीमूषां मृदा कृत्वा दृढां चारत्निमात्रिकाम् ।
सुदृढां मध्यदेशे च द्व्यङ्गुलच्छिद्रसंयुताम् ॥ ३९ ॥

कान्तलोहमयीं खारीं दद्याद्द्रव्यस्य चोपरि ।
तापिकां पूरयेच्छुद्धसिकताभिस्समन्ततः ॥ ४० ॥

तां च चुल्यां समारोप्य क्षेपं क्षेपं बिडद्रवम् ।
पादाङ्गुष्ठमितां ज्वालां ज्वालयेदनलं ततः ॥ ४१ ॥

लोहाभ्रकादिकं सर्वं रसस्योपरि जारयेत् ।
तापिकायन्त्रमित्युक्तं सुकरं रसजारणे ॥ ४२ ॥

९. गर्भयन्त्रम् ॥

स्थाल्यां विनिक्षिप्य रसादिवस्तु
स्वर्णादि खोर्यां प्रविधाय भूयः ।
अम्लेन चोर्ध्वं लवणानि दत्वा
चुल्यां पचेत्तत्प्रतिगर्भयन्त्रम् ॥ ४३ ॥

खोरीमल्लं ततस्स्थालीं निरुध्यादतियत्नतः ।
स्थाल्यां मल्लेन वा खोर्यां क्षिप्त्वा वस्तु निरुध्य च ॥

क्षिप्त्वा पट्टादिकं रुध्वा पाकस्स्याद्गर्भयन्त्रकम् ।

१०. पालिकायन्त्रम् ॥

चषकं वर्तुलं लोहं विनताग्रोर्ध्वदण्डकम् ॥ ४५ ॥

एतद्धि पालिकायन्त्रं बलिजारणहेतवे ।

११. घटीयन्त्रम् ॥

चतुःप्रस्थजलाधारं चतुरङ्गुलकाननम् ॥ ४६ ॥

घटीयन्त्रमिदं प्रोक्तं तदाप्यायनके स्मृतम् ।

१२. इष्टिकायन्त्रम् ॥

विधाय वर्तुलं गर्तं मल्लमत्र निधाय च ॥ ४७ ॥

विनिधायेष्टकां तत्र मध्यगर्तवतीं शुभाम् ।
गर्तस्य परितः कुर्यात्पालिकामङ्गुलोच्छ्रयाम् ॥ ४८ ॥

तत्र सूतं विनिक्षिप्य गर्तास्ये वसनं क्षिपेत् ।
निक्षिपेद्गन्धकं तत्र मल्लेनास्यं निरुध्य च ॥ ४९ ॥

मल्लपालिकयोर्मध्ये मृदा सम्यङ्निरुध्य च ।
वनोत्पलैः पुटं देयं कपोताख्यं न चाऽधिकम् ॥ ५० ॥

इष्टिकायन्त्रमेतत्स्याद्गन्धकं तेन जारयेत् ।

१३. विद्याधरयन्त्रम् ॥

स्थालिकोपरि विन्यस्य स्थालीं सम्यङ्निरुध्य च ॥५१॥

ऊर्ध्वस्थाल्यां जलं क्षिप्त्वा वह्निं प्रज्वालयेदधः ।
एतद्विद्याधरं यन्त्रं हिङ्गुलाकृष्टिहेतवे ॥ ५२ ॥

१४. डमरुकयन्त्रम् ॥

यन्त्रं स्थाल्युपरि स्थालीं न्युब्जां दत्वा निरुध्यते ।
यन्त्रं डमरुकाख्यं तद्रसबन्धकृते हितम् ॥ ५३ ॥

१५. नाभियन्त्रम् ॥

मल्लमध्ये चरेद्गर्तं तत्र सूतं सगन्धकम् ।

गर्तस्य परितः कुड्यं प्रकुर्यात्त्र्यङ्गुलोच्छ्रितम् ॥ ५४ ॥
ततश्चाच्छादयेत्सम्यग्गोस्तनाकारमूषया ।
सम्यक्तोयमृदा रुध्वा सम्यगत्रोच्यमानया ॥ ५५ ॥

[जलमृत्स्ना ।]

लेहवत्कृतबर्बूरक्वाथेन परिमिश्रितम् ।
जीर्णकिट्टरजस्सूक्ष्मं गुडचूर्णैस्समन्वितम् ॥ ५६ ॥
इयं हि जलमृत्प्रोक्ता दुर्भेद्या सलिलैः खलु ।

[वह्निमृत्स्ना ।]

स्फटिकापटुकिट्टैश्च महिषीदुग्धमर्दितैः ॥ ५७ ॥
वह्निमृत्स्ना भवेद्घोरवह्नितापसहा खलु ।
एतयोर्मृत्स्नयो रुद्धो न गन्तुं क्षमते रसः ॥ ५८ ॥
ततो जलं विनिक्षिप्य वह्निं प्रज्वालयेदधः ।
नाभियन्त्रमिदं प्रोक्तं नन्दिना तत्त्ववेदिना ॥ ५९ ॥
अनेन जीर्यते सूते निर्धूमश्शुद्धगन्धकः ।

१६. ग्रस्तयन्त्रम् ॥

मूषा मूषोदराविष्टा आद्यन्तसमवर्तुला ॥ ६० ॥
चिपिटा च तले प्रोक्तं ग्रस्तयन्त्रं मनीषिभिः ।
सूतेन्द्रबन्धनार्थं हि रसविद्भिरुदीरितम् ॥ ६१ ॥

१७. तुलायन्त्रम् ॥

वृन्ताकाकारमूषे द्वे तयोः कण्ठादधः खलु ।
प्रादेशमात्रां नलिकामृज्वीं लग्नां सगन्धकाम् ॥ ६२ ॥

एतद्धि पालिकायन्त्रं बलिजारणहेतवे ।

११. घटीयन्त्रम् ॥

चतुःप्रस्थजलाधारं चतुरङ्गुलकाननम् ॥ ४६ ॥

घटीयन्त्रमिदं प्रोक्तं तदाप्यायनके स्मृतम् ।

१२. इष्टिकायन्त्रम् ॥

विधाय वर्तुलं गर्तं मल्लमत्र निधाय च ॥ ४७ ॥

विनिधायेष्टकां तत्र मध्यगर्तवर्तीं शुभाम् ।
गर्तस्य परितः कुर्यात्पालिकामङ्गुलोच्छ्रयाम ॥ ४८ ॥

तत्र सूतं विनिक्षिप्य गर्तास्ये वसनं क्षिपेत् ।
निक्षिपेद्गन्धकं तत्र मल्लेनास्यं निरुध्य च ॥ ४९ ॥

मल्लपालिकयोर्मध्ये मृदा सम्यङ्निरुध्य च ।
वनोत्पलैः पुटं देयं कपोताख्यं न चाऽधिकम् ॥ ५० ॥

इष्टिकायन्त्रमेतत्स्याद्गन्धकं तेन जारयेत् ।

१३. विद्याधरयन्त्रम् ॥

स्थालिकोपरि विन्यस्य स्थालीं सम्यङ्निरुध्य च ॥५१॥

ऊर्ध्वस्थाल्यां जलं क्षिप्त्वा वह्निं प्रज्वालयेदधः ।
एतद्विद्याधरं यन्त्रं हिङ्गुलाकृष्टिहेतवे ॥ ५२ ॥

१४. डमरुकयन्त्रम् ॥

यन्त्रं स्थाल्युपरि स्थालीं न्युब्जां दत्वा निरुध्यते ।
यन्त्रं डमरुकाख्यं तद्रसबन्धकृते हितम् ॥ ५३ ॥

१५. नाभियन्त्रम् ॥

मल्लमध्ये चरेद्गर्तं तत्र सूतं सगन्धकम् ।

गर्तस्य परितः कुड्यं प्रकुर्यात्त्यङ्गुलोच्छ्रितम् ॥ ५४ ॥
ततश्चाच्छादयेत्सम्यग्गोस्तनाकारमूषया ।
सम्यक्तोयमृदा रुध्वा सम्यगत्रोच्यमानया ॥ ५५ ॥

[जलमृत्स्ना ।]

लेहवत्कृतबर्बूरक्वाथेन परिमिश्रितम् ।
जीर्णकिट्टरजस्सूक्ष्मं गुडचूर्णैस्समन्वितम् ॥ ५६ ॥
इयं हि जलमृत्प्रोक्ता दुर्भेद्या सलिलैः खलु ।

[वह्निमृत्स्ना ।]

स्फटिकापटुकिट्टैश्च महिषीदुग्धमर्दितैः ॥ ५७ ॥
वह्निमृत्स्ना भवेद्घोरवह्नितापसहा खलु ।
एतयोर्मृत्स्नयो रुद्धो न गन्तुं क्षमते रसः ॥ ५८ ॥
ततो जलं विनिक्षिप्य वह्निं प्रज्वालयेदधः ।
नाभियन्त्रमिदं प्रोक्तं नन्दिना तत्त्ववेदिना ॥ ५९ ॥
अनेन जीर्यते सूते निर्धूमश्शुद्धगन्धकः ।

१६. ग्रस्तयन्त्रम् ॥

मूषा मूषोदराविष्टा आद्यन्तसमवर्तुला ॥ ६० ॥
चिपिटा च तले प्रोक्तं ग्रस्तयन्त्रं मनीषिभिः ।
सूतेन्द्रबन्धनार्थं हि रसविद्भिरुदीरितम् ॥ ६१ ॥

१७. तुलायन्त्रम् ॥

वृन्ताकाकारमूषे द्वे तयोः कण्ठादधः खलु ।
प्रादेशमात्रां नलिकामृज्वीं लग्नां सगन्धकाम् ॥ ६२ ॥

तत्रैकस्यां क्षिपेत्सूतमन्यस्यां गन्धचूर्णकम् ।
निरुध्य मूषयोर्वक्त्रं वालुकायन्त्रके क्षिपेत् ॥ ६३ ॥

अधोऽग्निं ज्वालयेदेतत्तुलायन्त्रमुदाहृतम् ।
शिलातालकगन्धाश्मजारणाय प्रकीर्तितम् ॥ ६४ ॥

१८. स्थालीयन्त्रम् ॥

स्थाल्यां ताम्रादि निक्षिप्य मल्लेनास्यं निरुध्य च ।
पच्यते स्थालिसंस्थं यत्स्थालीयन्त्रमिति स्मृतम् ॥

१९. कोष्ठिकायन्त्रम् ॥

स्थूलभाण्डोदरस्यान्तर्वालुकां निक्षिपेच्छुभाम् ।
वितस्तिप्रमितोत्सेधां ततस्तत्र निवेशयेत् ॥ ६६ ॥

सुपक्वां मृण्मयीं कोष्ठीं द्वादशाङ्गुलकोच्छ्रयाम् ।
षडङ्गुलकविस्तीर्णां मध्येऽतिमसृणीकृताम् ॥ ६७ ॥

पञ्चाङ्गुलपिधानं च तीक्ष्णाग्रं मुकुलीकृतम् ।
न न्यूनं नाधिकं कोष्ठे कण्ठतो मसृणा बहिः ॥ ६८ ॥

कोष्ठ्यां च निक्षिपेद्गन्धं षड्पलं श्लक्ष्णचूर्णितम् ।
ततस्त्रैपादिकीं लौहीं निवेश्य च स्थिरीकृताम् ॥६९॥

तस्यां च विन्यसेत्खोरीं लौहीं वा कान्तलोहजाम् ।
तस्यां सूतं क्षिपेच्छुद्धं पलविंशतिमानतः ॥ ७० ॥

टङ्कगन्धकसूतं च भावयेल्लशुनद्रवैः ।
अधश्शिखेन पूर्वोक्तपिधानेन पिधाय च ॥ ७१ ॥

संधिबन्धं प्रकुर्वीत सुधामृत्स्नागुडादिभिः ।
सन्धिबन्धे विशुष्के च क्षिपेदुपरि वालुकाम् ॥ ७२ ॥

भाण्डवक्त्रं निरुध्याऽथ ज्वालयेत्तदधोऽनलम् ।
एवं यामत्रयं यावत्ततो गन्धकसम्भवः ॥ ७३ ॥

पिधानलग्नधूमोऽसौ गलित्वा निपतेद्रसे ।
एवं च षड्गुणं गन्धं भुक्त्वा सूतोऽरुणो भवेत् ॥७४॥

करोति कल्पनिर्दिष्टान्विशिष्टानखिलान्गुणान् ।
कोष्ठिकायन्त्रमेतद्धि नन्दिना परिकीर्तितम् ॥ ७५ ॥

२०. वालुकायन्त्रम् ॥

पश्चाद्ढवालुकाचूर्णं भाण्डे निक्षिप्य यत्नतः ।
पच्यते रसगोलाद्यं वालुकायन्त्रकं हि तत् ॥ ७६ ॥

२१. लवणयन्त्रम् ॥

एवं लवणनिक्षेपात्प्रोक्तं लवणयन्त्रकम् ।

२२. धूपयन्त्रम् ॥

याष्टाङ्गुलं पात्रं लोहमष्टांगुलोच्छ्रयम् ॥ ७७ ॥
धो द्व्यङ्गुले देशे जाताधारं च तत्र च ।
लोहशलाका च तस्मिंस्तिर्यग्विनिक्षिपेत् ॥७८॥

े स्वर्णपत्राणि तस्यामुपरि विन्यसेत् ।
धो निक्षिपेद्धूपं वक्ष्यमाणमिहैव हि ॥ ७९ ॥

त्रं न्युब्जपात्रेण छादयेदपरेण हि ।
विलिप्य सन्धिं च वह्निं प्रज्वालयेदधः ॥८०॥

कृष्णानि पत्राणि हतान्युक्तविधानतः ।
ारति वेगेन द्रुतिं गर्भे द्रवन्ति च ॥ ८१ ॥

ालकशिलानां हि कज्जल्या वा मृताहिना ।
स्वर्णपत्राणां परमं परिकीर्तितम् ॥ ८२ ॥

जारार्थं तारपत्राणि मृतवङ्गेन धूपयेत् ।
धूपयेच्च यथायोगैः रसैरुपरसैरपि ॥ ८३ ॥
धूपयन्त्रमिदं प्रोक्तं जारणाद्रव्यशोधने ।

२३. कन्दुकयन्त्रम् ॥

स्थूलस्थाल्यां द्रवं क्षिप्त्वा वासो बध्वा मुखे दृढम् ॥
तत्र स्वेद्यं विनिक्षिप्य मृदाऽऽस्यं प्रपिधाय च ।
अधस्ताज्ज्वालयेदग्निं यन्त्रं तत्कन्दुकाह्वयम् ॥ ८५ ॥

२४. ढेकीयन्त्रम् ॥

भाण्डकण्ठादधश्छिद्रे वेणुनालं विनिक्षिपेत् ।
कान्त(कांस्य)पात्रद्वयं कृत्वा सम्पुटं जलगर्भितम् ॥
नालास्यं तत्र संयोज्यं दृढं तच्चापि कारयेत् ।
युक्तद्रव्यैर्विनिक्षिप्तः पूर्वं तत्र पुटे रसः ॥ ८७ ॥
अग्निना तापितो नालात्तोये तस्मिन्पतत्यधः ।
यावदुष्णं भवेत्सर्वं भाजनं तावदेव हि ॥ ८८ ॥
जायते रससन्धानं ढेकीयन्त्रमिदं भवेत् ।

२५. सोमानलयन्त्रम्॥

ऊर्ध्वं वह्निरधश्चापो मध्ये तु रससङ्ग्रहः ॥ ८९ ॥
सोमानलमिदं प्रोक्तं जारयेद्गगनादिकम् ।

२६. नालिकायन्त्रम् ॥

लोहनालगतं सूतं भाण्डे लवणपूरितम् ॥ ९० ॥
निरुद्धं विपचेदेतन्नालिकायन्त्रमीरितम् ।

२७ पातालयन्त्रम् ॥

सुसन्धि सन्धितं कृत्वा दिव्यभाण्डे तु सम्मुखम् ॥

अष्टाङ्गुलमुखं तं तु दीर्घं स्यात्षोडशाङ्गुलम् ।
सुसन्धि सन्धितं कृत्वा वस्त्रमृत्तिकलेपनम् ॥ ९२ ॥

तत्र पातालयन्त्रे तु सूतकादि निपातयेत् ।

२८. दीपिकायन्त्रम् ॥

कच्छपयन्त्रान्तर्गतमृण्मयपीठस्थदीपिकासंस्थः ॥ ९३ ॥

यस्मिन्निपतति सूतः प्रोक्तं तद्दीपिकायन्त्रम् ।

२९. गङ्गासागर(भट्टी)यन्त्रम् ॥

द्वादशाङ्गुलमुत्सेधं षोडशाङ्गुलमायतम् ॥ ९४ ॥

ताम्रीयं मृण्मयं वाऽथ सुश्लक्ष्णं चिपिटं शुभम् ।
पात्रं कर्णा(ण्ठा)दधो द्रोणीं ब्यङ्गुलोत्सेधमात्रकाम् ॥

द्रोण्यां पात्रं न्यसेदन्यत्तावन्मात्रं सुसन्धितम् ।
न्युब्जं सन्धौ तयोर्नालं कुर्याद्गोमुखसन्निभन् ॥९६॥

पाच्यद्रव्यमधः पात्रे द्रवद्रव्येण योजितम् ।
क्षिप्त्वा निधाय मृत्सन्धिं यन्त्रोर्ध्वे जलसेचनम् ॥९७॥

चुल्यामारोप्य तद्यन्त्रं चण्डाग्निं ज्वालयेदधः ।
तस्मान्नान्यद्विनिर्याति तत्तद्द्रव्याश्रितो रसः ॥ ९८ ॥

गङ्गासागरयन्त्रं हि भट्टियन्त्रमिदं स्मृतम् ।
गुडपुष्पफलादीनामाहरेद्द्रुतिमुत्तमाम् ॥ ९९ ॥

३०. डो(दो)लायन्त्रम् ॥

द्रवद्रव्येण भाण्डस्य पूरितार्धोदरस्य च ।
मुखे तिर्यक्कृते दण्डे रसं सूत्रेण लम्बितम् ॥१००॥

स्वेदयेत्तत्तलगतं डोलायन्त्रमिति स्मृतम् ।

३१. कोष्ठीयन्त्रम् ॥

चुल्लीं चतुर्मुखीं कृत्वा तत्र भाण्डं निवेशयेत् ॥१०१॥

तत्रौषधं विनिक्षिप्य रुद्ध्वा तद्भाण्डकाननम् ।
कोष्ठीयन्त्रमिदं नाम्ना तत्रत्यैः परिकीर्तितम् ॥१०२॥

३२. गर्भयन्त्रम् ॥

त्र्यङ्गुलां परिणाहेन दैर्घ्येण चतुरङ्गुलाम् ।
मृण्मयीं सुदृढां मूषां वर्तुलं कारयेन्मुखम् ॥ १०३ ॥

लोणस्य विंशतिं भागान्भागमेकं तु गुग्गुलोः ।
सुश्लक्ष्णं पेषयित्वा तु वारं वारं पुनः पुनः ॥१०४॥

मूषालेपं दृढं कृत्वा लवणार्धमृदा बुधः ।
कारीषे वा तुषाग्नौ वा भूमौ तु स्वेदयेन्मृदु ॥१०५॥

अहोरात्रं त्रिरात्रं वा रसेन्द्रो भस्मतां व्रजेत् ।
गर्भयन्त्रमिदं प्रोक्तं पिष्टिकाभस्मकारकम् ॥ १०६ ॥

३३. हंसपाकयन्त्रम् ॥

खर्परं सिकतापूर्णं कृत्वा तस्योपरि न्यसेत् ।
अपरं खर्परं तत्र शनैर्मृद्वग्निना पचेत् ॥ १०७ ॥

पञ्चक्षारैस्तथा मूत्रैर्लवणैश्च बिडं ततः ।
हंसपाकस्समाख्यातो यन्त्रं तद्वार्तिकोत्तमैः ॥ १०८ ॥

३४. मूषायन्त्रम् ॥

लोहमूषाद्वयं कृत्वा द्वादशाङ्गुलमानतः ।
मूषयोर्मुखयोर्नालं दत्वा सम्यङ्निरोधयेत् ॥ १०९ ॥

एकस्यां सूतकं शुद्धमन्यस्यां शुद्धगन्धकम् ।
देयं जलं सूतकाधो वह्निं गन्धोपरि क्षिपेत् ॥ ११० ॥

जारयेत्षड्गुणं गन्धमनेनैव क्रमेण हि ।
मूषायन्त्रमिदं ज्ञेयं सिद्धनागार्जुनेरितम् ॥ १११ ॥

३५. स्तनयन्त्रम् ॥

कान्तलोहमयं पात्रमायतं द्वादशाङ्गुलम् ।
दीर्घमष्टाङ्गुलं देवि ! पात्राधस्त्र्यङ्गुलं शुभम् ॥ ११२ ॥

निम्नं पात्रं पिधानीं च लोहोत्थां चिपिटां शुभाम् ।
स्तनयन्त्रमिदं सूतपिष्टीनां जारणे वरम् ॥ ११३ ॥

३६. नागमायूरयन्त्रम् ॥

वृन्ताकमूषायुगलं पद्म(वर्त)लोहेन कारयेत् ।
एकस्यां निक्षिपेत्सूतमन्यस्यां गरलं क्षिपेत् ॥ ११४ ॥

नागाकारं वक्त्रनालं विषमूषामुखे न्यसेत् ।
मयूराकारनालं हि रसमूषामुखे न्यसेत् ॥ ११५ ॥

मयूरवदने नागमुखं संयोजयेत्सुधीः ।
सन्धित्रयं वज्रमृदा लेपं कुर्याद्यथा दृढम् ॥ ११६ ॥

सलिलं रसमूषाधो विषाधोऽङ्गारपावकः ।
नागमायूरयन्त्रं हि विषधूपे वरं प्रिये ! ॥ ११७ ॥

३७. चक्रयन्त्रम् ॥

हस्तमात्रायतं गर्तं वितस्तिद्वयनिम्नकम् ।
कोष्ठीं गर्तस्य मध्ये तु द्वादशांगुलमायताम् ॥ ११८॥

वितस्तिद्वयमुत्सेधां कोष्ठ्यामापूरयेच्छुभाम् ।
वालुकां तद्बहिश्छाणवह्निं कोष्ठ्यां रसं प्रिये ! ॥११९॥

चक्रयन्त्रमिदं सूतभस्मकर्मणि शस्यते ।

३८. खेचरयन्त्रम् ॥

स्थाल्यां कदलीपुष्पनिभां सच्छिद्रमूषिकाम् ॥१२०॥

अधोमुखीं प्रकुर्वीत लिंपेद्वज्रमृदा दृढम् ।
उपरिष्टादधोवक्त्रां स्थालीमन्यां सुसन्धिताम् ॥ १२१ ॥

मूषायां वत्सनाभं तु निक्षिपेदूर्ध्वभाजने ।
रसं विलेपयेद्युक्त्या यन्त्रोर्ध्वे कैतवो रसः ॥ १२२ ॥

अधो मृद्वग्निना पाकस्त्वेतत्खेचरयन्त्रकम् ।
प्रायस्सिद्धरसेन्द्रस्य विषधूपे वरं प्रिये ! ॥ १२३ ॥

३९. कापालियन्त्रम् ॥

स्थाल्यां सूतादिकान्क्षिप्त्वा हेमरूप्यादि खोरिकाम् ।
न्युब्जां सन्धि मृदा लिप्त्वा वालुकां खोरिकान्तगाम् ॥

कृत्वा मृद्वग्निना पाकस्त्वेतत्कापालियन्त्रकम् ।

४०. वालुकायन्त्रम् ॥

सरसां गूढवक्त्रां च मृद्वस्त्राङ्गुलसंयुताम् ॥ १२५ ॥

शोषितां काचकलशीं पूरयेत्त्रिषु भागयोः ।
भाण्डे वितस्तिगंभीरे वालुकासु प्रतिष्ठिता ॥ १२६ ॥

भागस्य पूरयित्रीभिरन्याभिरवकुण्ठयेत् ।
भाण्डवक्त्रं मणिकया सन्धि लिम्पेन्मृदा पचेत् ॥१२७॥

चुल्ल्यां तृणस्य चादाहान्मणिकापृष्ठवर्तिनः ।
एतद्धि वालुकायन्त्रं रसगोलादिकान्पचेत् ॥ १२८ ॥

४१. लवणयन्त्रम् ॥

एवं लवणनिक्षेपात्प्रोक्तं लवणयन्त्रकम् ।
अन्तःकृतरसालेपताम्रपात्रमुखस्य च ॥ १२९ ॥
लिप्त्वा मृल्लवणेनैव सन्धिं भाण्डतलस्य च ।
तद्भाण्डं पटुनाऽऽपूर्य क्षारैर्वा पूर्ववत्पचेत् ॥ १३० ॥

४२. भूधरयन्त्रम् ॥

वालुकागूढसर्वाङ्गां यन्त्रे मूषां रसान्विताम् ।
दीप्तोत्पलैस्संवृणुयाद्यन्त्रं तद्भूधराह्वयम् ॥ १३१ ॥

४३. नालिकायन्त्रम् ॥

कुम्भस्य पार्श्वे सुषिरं कुर्यादङ्गुष्ठमात्रकम् ।
तावत्स्थूलमयोनालं वेणुनालमथापि वा ॥ १३२ ॥
छिद्रे संयोजयेन्नालं नालाग्रे घटिकां न्यसेत् ।
कुम्भे सर्जादिनिर्यासं क्षिप्त्वा वक्त्रं निरोधयेत् ॥१३३॥
अधोऽग्निं ज्वालयेदेतन्नालिकायन्त्रमुच्यते ।

४४. पुटयन्त्रम् ॥

शरावसम्पुटान्तस्थं करीषेष्वग्निमानवित् ॥ १३४ ॥
पचेत चुल्यां यामं वा रसं तत्पुटयन्त्रकम् ।

४५. पातालयन्त्रम् ॥

विशालवदनां स्थालीं गर्ते सजलगोमये ॥ १३५ ॥
विन्यस्य वदनान्तश्च पूरयेदपरं घटम ।
पञ्चसच्छिद्रसहितां स्थालीं वक्त्रे निवेशयेत् ॥ १३६ ॥
तद्घटं पूरयेत्तैलपात्यंद्रव्यैर्निरोधयेत् ।
भाण्डवक्त्रं शरावेण पुटं दद्यात्समन्ततः ॥ १३७ ॥

छिद्रेभ्यः पतितं तैलं तत्तद्योगेषु योजयेत् ।
इदं पातालयन्त्रं हि सर्वतैलं निपातयेत् ॥ १३८ ॥
काष्ठत्वग्बीजमांसास्थिवंशतैलं समाहरेत् ।

४६. धूपयन्त्रम् ॥

स्थाल्यां लद्दिं खरादीनां क्षिप्त्वाऽऽस्ये कांस्यपात्रकम् ॥
सजलं विन्यसेद्देवि ! वह्निं प्रज्वालयेदधः ।
कान्तपात्रस्थितं तैलं सर्वव्रणविरोपणम् ॥ १४० ॥
धूपयन्त्रमिदं देवि ! नन्दिना परिकीर्तितम् ।

४७. अधःपातनयन्त्रम् ॥

वृत्तालाबुसमस्थूलं दीर्घनालं सरन्ध्रकम् ॥ १४१ ॥
तस्मिन्क्षिपेत्तैलपात्यद्रव्यं बीजादिकं प्रिये ! ।
तन्मुखे निक्षिपेत्केशान्विन्यसेत्तदधोमुखम् ॥ १४२ ॥
सच्छिद्रे च घटे नालं भाण्डच्छिद्रे निवेशयेत् ।
घटमध्ये पुटं दद्यान्नालाधो घटिकां न्यसेत् ॥ १४३ ॥
अधःपातनयन्त्रं हि श्रेष्ठं स्यात्तैलपातने ।

४८. अन्यत्- अधःपातनयन्त्रम् ॥

विशालकांस्यपात्रान्तर्न्यसेदुत्तम्भनं समम् ॥ १४४ ॥
तदूर्ध्वे मृण्मयं पात्रं सुदृढं चतुरङ्गुलम् ।
विन्यसेदपरं पात्रं सन्तप्तं पूर्वपात्रके ॥ १४५ ॥
विन्यस्य तस्मिन्श्रीखण्डकृष्णागरुमधुप्लुतम् ।
एवं द्वितीयं पात्रं तु तृतीयमपि तद्विधम् ॥ १४६ ॥

उपर्युपरि विन्यस्य तदूर्ध्वं मृत्कटाहकम्।
न्युब्जं न्यसेत्कांस्यपात्रे कटाहं मार्जयेज्जलैः ॥ १४७ ॥
अधःपातनयन्त्रं हि गन्धतैलं निपातयेत्।

मूषा ॥

मूषा हि क्रौञ्चिका प्रोक्ता कुमुदी करहाटिका ॥
पाचनी वह्निमित्रा च रसवादिभिरिष्यते।
मुष्णाति दोषान्मूषेयं सा मूषेति निगद्यते ॥ १४९ ॥
उपादानं भवेत्तस्या मृत्तिका लोहमेव च।
मूषामुखविनिष्क्रान्ता वरमेकाऽपि काकिनी ॥ १५० ॥
दुर्जनप्रणिपातेन धिग्लक्षमपि मानिनाम्।
मूषापिधानयोर्बन्धे रन्ध्राणं सुविलेपयेत् ॥ १५१ ॥
अन्ध्रणं रन्धनं चैव संश्लिष्टं सन्धिबन्धनम्।

[मूषार्थे श्रेष्ठा मृत्।]

मृत्तिका पाण्डुरस्थूलशोणपाण्डुरमूषरा ॥ १५२ ॥
चिराध्मानसहा सा हि मूषार्थमतिशस्यते।
तदभावे च वाल्मीकी कौलाली वा समीर्यते ॥१५३॥
या मृत्तिका दग्धतुषैश्शणेन
　　शिखित्रकैर्वा हयलद्दिना च।
लोहेन दण्डेन च कुट्टिता सा-
　　साधारणा स्यात्खलु मूषिकार्थम् ॥ १५४ ॥
श्वेताश्मानस्तुषा दग्धाश्शिखित्राश्शणकर्पटम्।
लद्दिकिट्टं यथायोग्यं संयोज्या मूषिकामृदि ॥

छिद्रेभ्यः पतितं तैलं तत्तद्योगेषु योजयेत् ।
इदं पातालयन्त्रं हि सर्वतैलं निपातयेत् ॥ १३८ ॥
काष्ठत्वग्बीजमांसास्थिवंशतैलं समाहरेत् ।

४६. धूपयन्त्रम् ॥

स्थाल्यां लद्दिं खरादीनां क्षिप्त्वाऽऽस्ये कांस्यपात्रकम् ॥
सजलं विन्यसेद्देवि ! वह्निं प्रज्वालयेदधः ।
कान्तपालस्थितं तैलं सर्वव्रणविरोपणम् ॥ १४० ॥
धूपयन्त्रमिदं देवि ! नन्दिना परिकीर्तितम् ।

४७. अधःपातनयन्त्रम् ॥

वृत्तालाबुसमस्थूलं दीर्घनालं सरन्ध्रकम् ॥ १४१ ॥
तस्मिन्क्षिपेत्तैलपात्यद्रव्यं बीजादिकं प्रिये ! ।
तन्मुखे निक्षिपेत्केशान्विन्यसेत्तदधोमुखम् ॥ १४२ ॥
सच्छिद्रे च घटे नालं भाण्डच्छिद्रे निवेशयेत् ।
घटमध्ये पुटं दद्यान्नालाधो घटिकां न्यसेत् ॥ १४३ ॥
अधःपातनयन्त्रं हि श्रेष्ठं स्यात्तैलपातने ।

४८. अन्यत्– अधःपातनयन्त्रम् ॥

विशालकांस्यपात्रान्तर्न्यसेदुत्तम्भनं समम् ॥ १४४ ॥
तदूर्ध्वे मृण्मयं पात्रं सुदृढं चतुरङ्गुलम् ।
विन्यसेदपरं पात्रं सन्तप्तं पूर्वपात्रके ॥ १४५ ॥
विन्यस्य तस्मिन्श्रीखण्डकृष्णागरुमधुप्लुतम् ।
एवं द्वितीयं पात्रं तु तृतीयमपि तद्विधम् ॥ १४६ ॥

उपर्युपरि विन्यस्य तदूर्ध्वं मृत्कटाहकम् ।
न्युब्जं न्यसेत्कांस्यपात्रे कटाहं मार्जयेज्जलैः ॥ १४७ ॥
अधःपातनयन्त्रं हि गन्धतैलं निपातयेत् ।

मूषा ॥

मूषा हि क्रौञ्चिका प्रोक्ता कुमुदी करहाटिका ॥
पाचनी वह्निमित्रा च रसवादिभिरिष्यते ।
मुष्णाति दोषान्मूषेयं सा मूषेति निगद्यते ॥ १४९ ॥
उपादानं भवेत्तस्या मृत्तिका लोहमेव च ।
मूषामुखविनिष्क्रान्ता वरमेकाऽपि काकिनी ॥ १५० ॥
दुर्जनप्रणिपातेन धिग्लक्षमपि मानिनाम् ।
मूषापिधानयोर्बन्धे रन्ध्राणं सुविलेपयेत् ॥ १५१ ॥
अन्ध्रणं रन्धनं चैव संश्लिष्टं सन्धिबन्धनम् ।

[मूषार्थे श्रेष्ठा मृत् ।]

मृत्तिका पाण्डुरस्थूलशोणपाण्डुरमूषरा ॥ १५२ ॥
चिराध्मानसहा सा हि मूषार्थमतिशस्यते ।
तदभावे च वाल्मीकी कौलाली वा समीर्यते ॥ १५३ ॥

या मृत्तिका दग्धतुषैश्शणेन
शिखित्रकैर्वा हयलद्दिना च ।
लोहेन दण्डेन च कुट्टिता सा-
साधारणा स्यात्खलु मूषिकार्थम् ॥ १५४ ॥

श्वेताश्मानस्तुषा दग्धाश्शिखित्राश्शणकर्पटम् ।
लद्दिकिट्टं यथायोग्यं संयोज्या मूषिकामृदि ॥

वज्रमूषा ॥

मृदस्त्रिभागं शणलद्द्विभागौ
ना(भा)गश्च निर्दग्धतुषोपलादेः ।
किट्टार्धभागं परिखण्ड्य वज्र-
मूषां विदध्यात्खलु सत्वपाते ॥ १५६ ॥

योगमूषा ॥

दग्धाङ्गारतुषोपेतमृत्स्ना वल्मीकसम्भवा ।
तत्तद्बिडसमायुक्ता तत्तद्बिडविलेपिता ॥ १५७ ॥
तया या विहिता मूषा योगमूषेति कथ्यते ।
अनया साधितस्सूतो जायते गुणवत्तरः ॥ १५८ ॥

वज्रद्रावणमूषा ॥

गारभूनागधौताभ्यां शणैर्दग्धतुषैरपि ।
समैस्समा च मूषामृन्महिषीदुग्धसंयुता ॥ १५९ ॥
क्रौञ्चिका वक्ष्यमाणा हि बहुधा परिकीर्तिता ।
तया विरचिता मूषा वज्रद्रावणके हिता ॥ १६० ॥
यामयुग्मपरिध्मानान्नासौ द्रवति वह्निना ।

गारमूषा ॥

दग्धषड्गुणगाराढ्या किट्टाङ्गारशणान्विता ॥ १६१ ॥
कृष्णमृद्भिः कृता मूषा गारमूषेत्युदाहृता ।

वज्रमूषा ॥

वल्माङ्गारतुषास्तुल्यास्तच्चतुर्गुणमृत्तिका ॥ १६२ ॥
गाराश्च मृत्तिका तुल्या सर्वैरेतैर्विनिर्मिता ।
वज्रमूषेति निर्दिष्टा याममग्निं सहेत सा ॥ १६३ ॥

स्वर्ण(वर)मूषा ॥

रक्तवर्गरजोयुक्ता रक्तवर्गाम्बुसाधिता ।
वरमूषेति निर्दिष्टा स्वर्णमूषेत्युदाहृता ॥ १६४ ॥

मृण्मया साधिता मूषा क्षितिखेचरलेपिता ।
वर्णमूषेति सा प्रोक्ता वर्णोत्कर्षे नियुज्यते ॥ १६५ ॥

रूप्यमूषा ॥

एवं हि श्वेतवर्गेण रूप्यमूषा समीरिता ।

बिडमूषा ॥

तत्तद्बिडमृदोद्भूता तत्तद्बिडविलेपिता ॥

देहलोहार्थयोगार्थं बिडमूषेत्युदाहृता ।
सहतेऽग्निं चतुर्यामं द्रवेण व्यथिता सती ॥ १६७ ॥

मूषाऽऽप्यायनम् ॥

द्रवीभावमुपेयोश्च मूषायां ध्मानयोगतः ।
क्षणमुद्धरणं यत्तन्मूषाऽऽप्यायनमुच्यते ॥ १६८ ॥

वृन्ताकमूषा ॥

वृन्ताकाकारमूषायां नालं द्वादशकाङ्गुलम् ।
धुत्तूरपुष्पवच्चोर्ध्वं सुदृढं श्लिष्टसन्धिकम् ॥ १६९ ॥

अष्टाङ्गुलं च सच्छिद्रं सा स्याद्वृन्ताकमूषिका ।
अनया खर्परादीनां मृदूनां सत्वमाहरेत् ॥ १७० ॥

गोस्तनी मूषा ॥

मूषा या गोस्तनाकारा शिखायुक्तपिधानका ।
सत्वानां द्रावणे शुद्धौ मूषा सा गोस्तनी भवेत् ॥

मल्लमूषा ॥

निर्दिष्टा मल्लमूषा या मल्लद्वितयसम्पुटात् ।
पर्पट्यादिरसादीनां स्वेदनाय प्रकीर्तिता ॥ १७२ ॥

पक्वमूषा ॥

कुलालभाण्डरूपा या दृढा च परिपाचिता ।
पक्वमूषेति सा प्रोक्ता पोट्टल्यादिविपाचने ॥ १७३ ॥

गोलमूषा ॥

निर्वक्त्रा गोलकाकारा पुटनद्रव्यगर्भिणी ।
गोलमूषेति सा प्रोक्ता गत्वरद्रव्यरोधिनी ॥ १७४ ॥

मञ्जुमूषा ॥

तले या कूर्पराकारा क्रमादुपरि विस्तृता ।
स्थूलवृन्ताकवत्स्थूला मञ्जुमूषेति संस्मृता ॥ १७५ ॥
सा चायोऽभ्रकसत्वादेः पुटाय द्रावणाय च ।

मञ्जूषामूषा ॥

मञ्जूषाकारमूषा या निम्नतायामविस्तरा ॥ १७६ ॥
षडङ्गुलप्रमाणेन मूषा मञ्जूषासंज्ञका ।
भूमौ निखन्य तां मूषां दद्यात्पुटमथोपरि ॥ १७७ ॥

मुसलमूषा ॥

मूषा या चिपिटा मूले वर्तुलाऽष्टाङ्गुलोच्छ्रया ।
मूषा सा मुसलाख्या च चक्रिबद्धरसे तथा ॥ १७८ ॥

अन्या वज्रमूषा ॥

दग्धाङ्गारस्य षड्भागा गैरिकं कृष्णमृत्तिका ।
गारमङ्गारकिट्टं च वज्रमूषा प्रकीर्तिता ॥ १७९ ॥

गारा दग्धास्तुषा दग्धा वल्मीकमृत्तिका ।
शणत्वक् च समायुक्ता मूषा वज्रोपमा मता ॥ १८० ॥

अन्धमूषा प्रकाशमूषा च ॥

प्रकाशा चान्धमषा च मूषा च द्विविधा स्मृता ।
प्रकाशमूषा विज्ञेया शरावाकारसंयुता ॥ १८१ ॥
द्रव्यनिर्वहणे सा च वार्तिकैस्तु प्रशस्यते ।
अन्धमूषा च कर्तव्या गोस्तनाकारसन्निभा ॥ १८२ ॥
पिधानेन समायुक्ता किञ्चिदुन्नतमस्तका ।
पत्रलेपे तथा रङ्गे द्वन्द्वमेलापके हितम् ॥ १८३ ॥
सैव छिद्रान्विता नन्दगम्भीरा सारणोचिता ।

भस्ममूषा ॥

तिलभस्म द्विरंशं तु इष्टकांशसमन्वितम् ॥ १८४ ॥
भस्ममूषेति विज्ञेया तारसशोधने हिता ।

अन्या वज्रमूषा ॥

तुषं वस्त्रं समं दग्धं मृत्तिका चतुरंशिका ॥ १८५ ॥
कूपीपाषाणसंयुक्ता वज्रमूषा प्रकीर्तिता ।

मूषावङ्कनालकोष्ठिकोपयुक्तमृल्लक्षणम् ॥

कृष्णा रक्ता च पीता च शुक्लवर्णा च मृत्तिका ॥
आद्या श्रेष्ठा कनिष्ठाऽन्त्या मध्यमे मध्यमे मते ।
गजाश्वानां मलं दग्ध्वा यावत्कृष्णत्वतां गतम् ॥१८७॥
वाशा वज्रलता पत्रं वल्मीकस्य मृदा सह ।
पेषयेद्वज्रतोयेन यावच्छुक्लत्वतां गतम् ॥ १८८ ॥

मर्दयेत्तेन बध्नीयाद्वङ्कनालं च कोष्ठिकाम् ।
वल्मीकमृत्तिकालोहकिट्टश्वेताश्मनां पृथक् ॥ १८९ ॥

एकांशौ द्वौ तु दग्धस्य तुषस्य स्त्रीशिरोरुहाम् ।
समांशस्तत्समस्तं तु छागीदुग्धेन मर्दयेत् ॥ १९० ॥

यामद्वयं दृढं तेन कुर्यान्मूषां च सम्पुटम् ।
शोषयित्वा रसं क्षिप्त्वा तत्र कंसं निरोधयेत् ॥१९१॥

वज्रमूषादिकं प्रोक्तं सम्यक्सूतस्य मारणे ।
मोक्षक्षारस्य भागौ द्वाविष्टिकैकांशसंयुतौ ॥ १९२ ॥

यत्कृतौ सा तु मूषा स्यादुत्तमा तारशोधने ।
रक्तवर्गेण संमिश्रा रक्तवर्गपरिप्लुता ॥ १९३ ॥

रक्तवर्गकृतालेपा समुक्ता स्वर्णकर्मसु ।
शुक्लवर्गेण संमिश्रा शुक्लवर्गपरिप्लुता ॥ १९४ ॥

शुक्लवर्गकृतालेपा शुक्लशुद्धिषु शस्यते ।
विड्वर्गेण तु संमिश्रा विड्वर्गेण परिप्लुता ॥ १९५॥

विड्वर्गेण कृतालेपा मूषा स्याद्द्रुतिजारणे ।
क्षारवर्गेण संमिश्रा क्षारवर्गपरिप्लुता ॥ १९६ ॥

क्षारवर्गकृतालेपा मूषा निर्वहणे हिता ।

मूषायामावर्तनविधिः ॥

विषटङ्कणगुञ्जाभिर्मूषालेपं तु कारयेत् ॥ १९७ ॥

प्रकाशायां प्रकुर्वीत यदि वाऽङ्गारलेपनम् ।
तस्यां विन्यस्य मूषायां द्रव्यमावर्तयेद्बुधः ॥ १९८ ॥

लेपवर्णे पुटे योज्या रक्तमृत्पट्टभूखगाः ।

आवर्तितद्रव्यस्वरूपम् ॥

आवर्तमाने कनके पीता तारे सितप्रभा ॥ १९९ ॥
शुल्वे ज(नी)लनिभा तीक्ष्णे शुक्लवर्णा प्रशस्यते ।
यन्त्रमेवौषधीभ्यस्स्याच्छ्रेष्ठं सूतस्य यन्त्रणे ॥ २०० ॥
ओषधीसहितेऽप्येषां रसो यन्त्रेण बध्यते ।

कोष्ठी ॥

सत्वानां पातनार्थाय पतितानां विशुद्धये ॥ २०१ ॥
कोष्ठिका विविधाकारास्तासां लक्षणमुच्यते ।

आकरकोष्ठी अङ्गारकोष्ठी वा ॥

राजहस्तसमुत्सेधा तदर्धायामविस्तरा ॥ २०२ ॥
चतुरश्रा च कुड्येन वेष्टिता मृण्मयेन सा ।
एकभित्तौ चरेद्द्वारं वितस्त्याभोगसंयुतम् ॥ २०३ ॥
द्वारं सार्धवितस्त्या च सम्मितं सुदृढं शुभम् ।
दोहल्यधो विधातव्यं धमनाय यथोचितम् ॥ २०४ ॥
प्रादेशप्रमिता भित्तिरुत्तराङ्गस्य चोर्ध्वतः ।
द्वारं चोपरि कर्तव्यं प्रादेशप्रमितं खलु ॥ २०५ ॥
ततश्चेष्टिकया रुध्वा द्वारसन्धिं विलिप्य च ।
शिखित्रैस्तां समापूर्य धमेद्भस्त्राद्वयेन च ॥ २०६ ॥
शिखित्राधमनद्रव्यमूर्ध्वद्वारेण निक्षिपेत् ।
सत्वपातनगोलांश्च पञ्च पञ्च पुनः पुनः ॥ २०७ ॥
भवेदाकर(दङ्गार)कोष्ठीयं खराणां सत्वपातने ।

पातालकोष्ठी ॥

दृढभूमौ चरेद्वृत्तं वितस्त्या सम्मितं शुभम् ॥ २०८ ॥
वर्तुलं चाऽथ तन्मध्ये गर्तमन्यं प्रकल्पयेत् ।
चतुरङ्गुलविस्तारनिम्नत्वेन समन्वितम् ॥ २०९ ॥
गर्ताद्धरणिपर्यन्तं तिर्यग्दल(द्वार)समन्वितम् ।
किञ्चित्समुन्नतं बाह्यगर्ताभिमुखनिम्नकम् ॥ २१० ॥
मृच्चक्रीं पञ्चरन्ध्राढ्यां गर्भगर्तोपरि क्षिपेत् ।
आपूर्य कोकिलैः कोष्ठीं प्रधमेदेकभस्त्रया ॥ २११ ॥
पातालकोष्ठिका ह्येषा मृदूनां सत्त्वपातने ।
ध्मानसाध्यपदार्थानां नन्दिना परिकीर्तिता ॥ २१२ ॥

गारकोष्ठी ॥

द्वादशाङ्गुलनिम्ना या प्रादेशप्रमिता तथा ।
चतुरङ्गुलतश्चोर्ध्वं वलयेन समन्विता ॥ २१३ ॥
भूरिच्छिद्रवतीं चक्रीं वलयोपरि निक्षिपेत् ।
शिखित्रांस्तत्र निक्षिप्य प्रधमेद्वङ्कनालतः ॥ २१४ ॥

[वङ्कनालम् ।]

मूषामृद्भिः प्रकर्तव्यमरत्निप्रमितं दृढम् ।
अधोमुखं च तद्वक्त्रे नालं पञ्चाङ्गुलं खलु ॥ २१५ ॥
वङ्कनालमिति प्रोक्तं दृढाध्मानाय कीर्तितम् ।
गारगोष्ठीयमादिष्टा सृष्टलोहविनाशिनी ॥ २१६ ॥
कोष्ठी बन्धरसादीनां विधानाय विधीयते ।
द्वादशाङ्गुलकोत्सेधा सा बुघ्ना(ध्ने) चतुरङ्गुला ॥ २१७ ॥
तिर्यक्प्रधमना या सा मृदुद्रव्यविशोधनी ।

पुटम् ॥

रसादिद्रव्यपाकानां प्रमाणज्ञापनं पुटम् ॥ २१८ ॥

नेष्टो न्यूनाधिकः पाकस्सुपाकं हितमौषधम् ।
लोहादेरपुनर्भावो गुणाधिक्यं तथोग्रता ॥ २१९ ॥

अनप्सु मज्जनं रेखापूर्णता पुटतो भवेत् ।
पुटाद्रागो लघुत्वं च शीघ्रं व्याप्तिश्च दीपनम् ॥२२०॥

जारितादपि सूतेन्द्राल्लोहानामधिको गुणः ।
यथाऽश्मनि विशेद्वह्निर्बहिस्स्थः पुटयोगतः ॥ २२१ ॥

चूर्णत्वाद्धि गुणावाप्तिस्तथा लोहेषु निश्चितम् ।
पाच्यमानौषधं क्षिप्त्वा शरावद्वयसम्पुटे ॥ २२२ ॥

रुध्वा गरुण्डपचनं पुटं तदिति कथ्यते ।

महापुटम् ॥

निम्नविस्तरतः कुण्डे द्विहस्ते चतुरश्रके ॥ २२३ ॥

वनोत्पलसहस्रेण पूरिते पुटनौषधम् ।
कोष्ठ्यां रुद्धं प्रयत्नेन पिष्टिकोपरि निक्षिपेत् ॥२२४॥

वनोत्पलसहस्रार्धं कोविकोपरि निक्षिपेत् ।
वह्निं प्रज्वालयेत्तत्र महापुटमिदं स्मृतम् ॥ २२५ ॥

गजपुटम् ॥

राजहस्तप्रमाणेन चतुरश्रं च निम्नकम् ।
पूर्णं चोपलशाठीभिः कण्ठावध्यथ विन्यसेत् ॥२२६॥

विन्यसेत्कुमुदीं तत्र पुटनद्रव्यपूरिताम् ।
पूर्वच्छगणतोऽर्द्धानि गरुण्डानि विनिक्षिपेत् ॥ २२७ ॥

एतद्गजपुटं प्रोक्तं महागुणविधायकम् ।

वाराहपुटम्

इत्थं चारत्निके कुण्डे पुटं वाराहमुच्यते ॥ २२८ ॥

कुक्कुटपुटम् ॥

पुटं भूमितले यत्तद्वितस्तिद्वितयोच्छ्रयम् ।
तावच्च तलविस्तीर्णं तत्स्यात्कुक्कुटकं पुटम् ॥ २२९ ॥

कपोतपुटम् ॥

यत्पुटं दीयते भूमावष्टसंख्यैर्वनोत्पलैः ।
तद्बालसूतभस्मार्थं कपोतपुटमुच्यते ॥ २३० ॥

गोर्वरपुटम् ॥

गोष्ठान्तर्गोखुरक्षुण्णं शुष्कं चूर्णितगोमयम् ।
गोर्वरं तत्समादिष्टं वरिष्ठं रससाधने ॥ २३१ ॥
गोर्वरैर्वा तुषैर्वाऽपि पुटं यत्र प्रदीयते ।
तद्गोर्वरपुटं प्रोक्तं रसभस्मप्रसिद्धये ॥ २३२ ॥

भाण्डपुटम् ॥

स्थूलभाण्डे तुषापूर्णे मध्ये मूषासमन्विते ।
वह्निना विहिते पाके तद्भाण्डपुटमुच्यते ॥ २३३ ॥

वालुकापुटम् ॥

अधस्तादुपरिष्टाच्च कोविका छाद्यते खलु ।
वालुकाभिः प्रतप्ताभिर्यन्त्रं तद्वालुकापुटम् ॥ २३४ ॥

भूधरपुटम् ॥

वह्निमत्यां क्षितौ सम्यङ्निखन्याद्द्व्यङ्गुलादधः ।
उपरिष्टात्पुटं यन्त्रं पुटं तद्भूधराह्वयम् ॥ २३५ ॥

लावकपुटम् ॥

ऊर्ध्वं षोडशिकामात्रैस्तुषैर्वा गोर्वरैः पुटम् ।
यन्त्रं तल्लावकाख्यं स्यान्मृदुद्रव्यसुसाधने ॥ २३६ ॥

अनुक्तपुटमाने तु साध्यद्रव्यबलाबलात् ।
पुटं विज्ञाय दातव्यमूहापोहविचक्षणैः ॥ २३७ ॥

कूपिकादिस्वरूपम् ॥

काचायोमृद्घटीनां च कूपिका चषकाणि च ।
रूपिका कूपिका सिद्धा गोलं चैव करण्डकम् ॥२३८॥

चषकं च कठोरी च वाटिका खोरिका तथा ।
कञ्चोली ग्राहिका चेति नामान्येकार्थकानि हि ॥२३९॥

रसोपरसलोहानां त्रिधा संस्कारवह्नयः ।
गरुण्डकाष्ठकोलीशसाधनास्ते पृथक्त्रिधा ॥ २४० ॥

गरुण्डसाधनास्तेषु पुटं कुक्कुटसंज्ञकम् ।
वराहपुटसंज्ञं हि गजसंज्ञं पुटे भवेत् ॥ २४१ ॥

श्रेष्ठा वनोद्भवच्छाणा मध्यमा गोष्ठसम्भवाः ।
अधमाः कृत्रिमं काष्ठं खदिरासनसम्भवम् ॥ २४२ ॥

अथवा सारवृक्षोत्थं वितस्तिद्वयदीर्घकम् ।
स्थूलप्रकोष्ठमात्रं तु श्रेष्ठं सूतेन्द्रपाचने ॥ २४३ ॥

मृदुमध्यमचण्डाग्निसंज्ञं स्याद्दारुसाधनम् ।
अङ्गाराः खदिरोद्भूतास्त्रिफला वृक्षसम्भवाः ॥ २४४ ॥

कर्षास्सारतरूद्भूताश्श्रेष्ठा धमनकर्मणि ।

॥ इति श्रीभैरवोक्ते आनन्दकन्दे अमृतीकरणविश्रान्तौ षड्विंशोल्लासः ॥

॥ इति अमृतीकरणविश्रान्तिः समाप्ता ॥

॥ क्रियाकरणं नाम द्वितीया विश्रान्तिः ।

॥ प्रथम उल्लासः ॥

उपरसशोधनमारणविधिः ॥

श्रीभैरवी—

देवदेव चिदानन्द सच्चिदानन्ददायक ! ।
त्वयैव प्रतिबुद्धाऽस्मि पूर्वं रसविज्ञानकम् ॥ १ ॥

इदानीं त्वत्प्रसादेन श्रोतुमिच्छाम्यहं प्रभो ! ।
गन्धाद्युपरसानां च लोहानां हेमपूर्विणाम् ॥ २ ॥

पद्मरागादिरत्नानां लक्षणं जातिमाह्वयम् ।
संस्कारं च गुणान्ब्रूहि यथा जानाम्यहं प्रभो ! ॥ ३ ॥

उपरसाः ॥

श्रीभैरवः—

गन्धतालशिलाताप्यघनहिङ्गुलगैरिकाः ।
चपलाश्मजभूनागहरिद्राश्माग्निजारकाः ॥ ४ ॥

खर्परीतुत्थकङ्कुष्ठगिरिसिन्दूरटङ्कणाः ।
कम्पिल्लविषकासीसगौरीपाषाणभूखगाः ॥ ५ ॥

पोद्दारश्रृङ्गी सिन्दूरस्तुवरिश्च रसाञ्जनम् ।
नीलाञ्जनं च सौवीरं स्रोतोञ्जनमफेनकम् ॥ ६ ॥

पुष्पाञ्जनं शङ्खशुक्तिशम्बूकाश्च वराटकाः ।
साबुणी च नवक्षारचीनक्षाराखुमारकाः ॥ ७ ॥

सर्जगुग्गुलुलाक्षाश्च क्षाराश्च लवणानि च ।
गोरोचनोऽम्लवेतश्च काचच्छगणवालुकाः ॥ ८ ॥

एते उपरसाः ख्याता रसराजस्य कर्मणि ।

द्वादश लोहाः ॥

स्वर्णरूप्यार्ककान्ताभ्रसत्वं तीक्ष्णं च मुण्डकम् ॥ ९ ॥
भुजङ्गं त्रपुसं चैव रीतिः कांस्यं च वर्तकम् ।
द्वादशैतानि लोहानि मण्डूरो लोहकिट्टकम् ॥ १० ॥

नवरत्नानि ॥

माणिक्यमुक्ताफलविद्रुमाणि
    तार्क्ष्यं च पुष्यं भिदुरं च नीलम् ।
गोमेधकं चाऽथ विडूरकं च
    क्रमेण रत्नानि नवग्रहाणाम् ॥ ११ ॥

नव उपरत्नानि ॥

सूर्यकान्तश्चन्द्रकान्तस्तारकान्तस्तु कान्तकः ।
वैक्रान्तश्च नृपावर्तस्सस्यको विमला तथा ॥ १२ ॥
पेरोजश्च नवैतानि ह्युपरत्नानि निर्दिशेत् ।

गन्धकः— गन्धकशुद्धिः ॥

[प्रथमः प्रकारः ।]

उत्पत्तिलक्षणं जातिं गन्धकं शोधयेदतः ॥ १३ ॥
साज्यं भाण्डे पयः क्षिप्त्वा मुखं वस्त्रेण बन्धयेत् ।
तत्पृष्ठे चूर्णितं गन्धं क्षिप्त्वा श्रावेण रोधयेत् ॥ १४ ॥
भाण्डं निक्षिप्य भूम्यन्तरूर्ध्वं देयं पुटं लघु ।
ततः क्षीरे द्रुतं गन्धं शुद्धं योगेषु योजयेत् ॥ १५ ॥

[द्वितीयः प्रकारः ।]

कङ्गुणीसर्षपैरण्डतैलं वाऽथ कुसुम्भजम् ।
मेषीक्षीरं घृतं वाऽथ गोक्षीरं चारनालकम् ॥ १६ ॥

एतेष्वेकं तु भाण्डान्तः किञ्चिदूनं प्रपूरयेत् ।
रुध्वा वस्त्रेण तद्वक्त्रं गन्धचूर्णं ततोपरि ॥ १७ ॥

लोहपात्रेण रुध्वाऽथ पृष्ठे स्थाप्य च खर्परम् ।
साग्निमुत्पलकैः पूर्णमेवं द्राव्य समुद्धरेत् ॥ १८ ॥

तद्धुत्तूरद्रवैः पिष्ट्वा शुष्कं द्राव्यं च पूर्ववत् ।
पुनरेवं प्रकर्तव्यं सुशुद्धो गन्धको भवेत् ॥ १९ ॥

[तृतीयः प्रकारः]

यामैकं गन्धकं मर्द्यं बृहत्या चाज(श्व)गन्धया ।
भृङ्गीधुत्तूरयोर्वाऽथ तिलपर्ण्याश्च तद्द्रवैः ॥ २० ॥

तमादाय घृतैस्तुल्यैर्लोहपात्रे क्षणं पचेत् ।
बध्वाऽग्निना द्रुतं तं वै ह्यजाक्षीरे विनिक्षिपेत् ॥ २१ ॥

इत्येवं सप्तधा कुर्याच्छुद्धिमायाति गन्धकः ।

[चतुर्थः प्रकारः ।]

करञ्जैरण्डतैलं च छागींदुग्धं च भाण्डके ॥ २२ ॥

क्षिप्त्वा तस्य मुखं बध्वा स्वच्छवस्त्रेण बुद्धिमान् ।
गन्धकं धूर्तजैर्द्रावैर्दिनं भाव्यं विशोषयेत् ॥ २३ ॥

तच्चूर्णं पूर्वभाण्डस्य वस्त्रोपरि निधापयेत् ।
आच्छाद्य श्रावकेनैव पृष्ठे देयं पुटं लघु ॥ २४ ॥

द्रुतं गन्धं समादाय भाव्यं धुत्तूरजैर्द्रवैः ।
तद्वद्द्राव्यं पुनर्भाव्यं द्रावयेच्च पुनस्ततः ॥ २५ ॥

आदाय मत्स्यपित्तेन सप्तधा भाव्यमातपे ।
ततः कोशातकीबीजचूर्णेन सह पेषयेत् ॥ २६ ॥

भावयेद्भृङ्गजैर्द्रावैस्सप्ताहमातपे खरे ।
तोयेन क्षालितं शोष्यं ततो मृद्वग्निना क्षणम् ॥ २७ ॥

घृताक्ते लोहपात्रे तु द्रावितं ढालयेत्ततः ।
भृङ्गराजद्रवान्तस्थस्सम्यक् शुद्धस्स जायते ॥ २८ ॥

[पञ्चमः प्रकारः ।]

गन्धकं याममात्रं वा मर्द्यं ब्राह्म्यजगन्धयोः ।
भृङ्गधुत्तूरयोर्वाऽपि तिलपर्णीरसेन वा ॥ २९ ॥

तदादाय घृतोपेतं लोहपात्रे क्षणं पचेत् ।
लघ्वग्निना द्रुतं तच्च मेषीक्षीरे विनिक्षिपेत् ॥ ३० ॥

एवं कृतं सप्तवारं शुद्धं भवति गन्धकम् ।

गन्धकतैलम् ॥

[प्रथमः प्रकारः ।]

देवदाल्यम्लपर्णी वा नारङ्गं वाऽथ दाडिमम् ॥ ३१ ॥

मातुलुङ्गं यथालाभं द्रवमेकस्य चाऽऽहरेत् ।
गन्धकस्य तु पादांशं टङ्कणं द्रवसंयुतम् ॥ ३२ ॥

आतपे त्रिदिनं शुष्कं द्रवं देयं पुनः पुनः ।
धुत्तूरतुलसीकृष्णलशुनं देवदालिका ॥ ३३ ॥

शिग्रुमूलं काकमाची कर्पूरं शंखिनीद्वयम् ।
कृष्णागरु च कस्तूरी वन्ध्या कर्कोटकी समम् ॥३४॥

मातुलुङ्गरसैः पिष्ट्वा क्षिपेदेरण्डतैलके ।
अनेन लोहपात्रस्थं भावयेत्पूर्वगन्धकम् ॥ ३५ ॥

त्रिवारं क्षौद्रतुल्यं तज्जायते गन्धवर्जितम् ।
इदं गन्धकतैलं स्यात्सर्वयोगेषु योजयेत् ॥ ३६ ॥

[द्वितीयः प्रकारः ।]

अथवाऽर्कस्नुहीक्षीरैर्वस्त्रं लेप्यं तु सप्तधा ।
गन्धकं नवनीतेन पिष्ट्वा वस्त्रं लिपेत्तु ताम् ॥ ३७ ॥
तद्वर्तिं ज्वलितां दंशे धृतां कुर्यादधोमुखीम् ।
तैलं पतेदधो भाण्डे ग्राह्यं योगेषु योजयेत् ॥ ३८ ॥

गन्धकसत्वपातनम् ॥

[प्रथमः प्रकारः ।]

गन्धकस्तु कुबेराक्षीतैलेन चिरमर्दितः ।
दृढं प्रकटमूषायां ध्मातस्सत्वं विमुञ्चति ॥ ३९ ॥

[द्वितीयः प्रकारः]

यद्वा भाण्डोदरे क्षिप्त्वा गन्धकं पूर्वशोधितम् ।
पिधाय ताम्रपात्रेण तस्मिन्शीतोदकं क्षिपेत् ॥ ४० ॥
मन्दं प्रज्वाल्य तदधो वह्निमुष्णं जलं हरेत् ।
एवं पुनः पुनश्शीतजलमूर्ध्वं विनिक्षिपेत् ॥ ४१ ॥
गन्धकस्याग्नितस्सत्वं स्वर्णाभं सर्वकार्यकृत् ।
न चास्य सत्वमादद्यात्सत्वरूपो हि गन्धकः ॥ ४२ ॥
इति गन्धकतत्वज्ञाः केचिदन्ये प्रचक्षते ।

गन्धकद्रुतिः ॥

यद्वा सञ्चूर्णितं गन्धं कटुतैलसमन्वितम् ॥ ४३ ॥
वस्त्रे निक्षिप्य तद्वस्त्रं कारयेद्वर्तिकां दृढाम् ।
ततस्सूत्रेण संवेष्ट्य गोघृतेन परिप्लुताम् ॥ ४४ ॥

सन्दंशेनोद्धतं कृत्वा वर्ति चाऽधः प्रदीपयेत् ।
पक्वाम्रफलसम्भूतरसवर्णा भवेद्द्रुतिः ॥ ४५ ॥

गन्धकस्य गुणाः ॥

गन्धकः कटुकः पाके वीर्योष्णो विमलस्सरः ।
विसर्पकुष्ठकण्डूतिक्रिमिगुल्मक्षयापहः ॥ ४६ ॥
अक्षिरोगप्रशमनो वृष्यो विषगदार्तिजित् ।
सर्वसिद्धिप्रदो बल्यस्त्रिदोषघ्नो रसायनः ॥ ४७ ॥

हरितालम् ॥

हरिताऌञ्च गोदन्ती तालकं नटमण्डनम् ।
गिरिजाललितं पीतमतिगन्धं बिडालकम् ॥ ४८ ॥

[हरितालभेदाः ।]

हरितालं द्विधा प्रोक्तं पत्राख्यं पिण्डसंज्ञकम् ।
स्वर्णवर्णं गुरु स्निग्धं तनुपत्रं च भासुरम् ॥ ४९ ॥
तत्पत्रतालकं प्रोक्तं बहुपत्रं रसायनम् ।
निष्पत्रं पिण्डसदृशं स्वल्पसत्वं तथा गुरु ॥ ५० ॥
स्त्रीपुष्पहरणं तत्तु गुणाल्पं पिण्डतालकम् ।

[अशुद्धहरितालसेवने दोषाः ।]

वातश्लेष्मप्रमेहादिकरमायुर्निबर्हणम् ॥ ५१ ॥
तापस्फोटाङ्गसङ्कोचं हरितालमशोधितम् ।

हरितालशुद्धिः ॥
[प्रथमः प्रकारः ।]

तालकं कणशः कृत्वा दशांशेन तु टङ्कणम् ॥ ५२ ॥
जम्बीरोत्थद्रवैः क्षाल्यं काञ्जिकैः क्षालयेत्पुनः ।

वस्त्रे चतुर्गुणे बध्वा डोलायन्त्रे दिनं पचेत् ॥ ५३ ॥
सचूर्णेनारनालेन दिनं कूश्माण्डजै रसैः ।
स्वेद्यं वा शाल्मलीतोयैस्तालकं शुद्धिमाप्नुयात् ॥५४॥

[द्वितीयः प्रकारः ।]

मधुतुल्ये घनीभूते कषाये ब्रह्ममूलजे ।
त्रिवारं तालकं भाव्यं पिष्ट्वा मूत्रेऽथ माहिषे ॥ ५५ ॥
उत्पलैर्दशभिर्देयं पुटं कुर्यात्पुनः पुनः ।
एवं द्वादशधा पाच्यं शुद्धं योगेषु योजयेत् ॥ ५६ ॥

[तृतीयः प्रकारः ।]

तालकं पोट्टलं बध्वा सचूर्णे काञ्जिके पचेत् ।
दोलायन्त्रेण यामैकं ततः कूश्माण्डजे रसे ॥ ५७ ॥
तिलतैले पचेद्यामं यामं च त्रिफलाजले ।
एवं यन्त्रे चतुर्यामं पाच्यं शुध्यति तालकम् ॥ ५८ ॥

तालकसत्वपातनम् ॥

[प्रथमः प्रकारः ।]

लाक्षा राजी तिलाश्शिग्रु टङ्कणं लवणं गुडम् ।
तालकार्द्धेण(?) सम्मर्द्य छिद्रमूषां निरोधयेत् ॥५९॥
पुटेत्पातालयन्त्रेण सत्वं पतति निश्चयम् ।

[द्वितीयः प्रकारः ।]

तालकं मर्दयेद्दुग्धैस्सर्पाक्ष्या वा कषायकैः ॥ ६० ॥
पूर्ववज्जनयेत्सत्वं छिद्रमूषानिरोधितम् ।

[तृतीयः प्रकारः ।]

लाक्षा राजी गुडं शिग्रु टङ्कणं लवणं तिलाः ॥ ६१ ॥

एभिस्तुल्यं सत्वतालं मर्दयेद्रविदुग्धकैः।
दिनं वा वज्रिणीदुग्धैः कूश्माण्डस्य द्रवैश्च वा ॥ ६२ ॥
तेन कल्केन लिप्त्वान्तश्छिद्रमूषां निरोधयेत।
पुटाद्वा धमनात्सत्वं ग्राह्यं पातालयन्त्रके ॥ ६३ ॥

[चतुर्थः प्रकारः।]

तालकादष्टमांशेन देयं सूतं च टङ्कणम्।
कूश्माण्डस्य रसैस्स्नुह्याः क्षीरैर्मर्द्याद्दिनत्रयम् ॥ ६४ ॥
तद्गोलं छिद्रमूषायां ग्राह्यं सत्वं च पूर्ववत्।

[पञ्चमः प्रकारः।]

भागाष्षोडश तालस्य विषपारदटङ्कणाः ॥ ६५ ॥
श्वेताभ्रवङ्ग्योश्चूर्णं प्रतिभागं विमिश्रयेत्।
समं स्नुह्यर्कपयसा मर्दयेद्दिवसद्वयम् ॥ ६६ ॥
तद्गोलं काचकुप्यन्तः क्षिप्त्वा तां काचकूपिकाम्।
सर्वतोऽङ्गुलमानेन लिम्पेद्वस्त्रे मृदा दृढम् ॥ ६७ ॥
शुष्कां तां वालुकायन्त्रे शनैर्मन्दाग्निना पचेत्।
शुष्के द्रवे निरुध्याऽथ सम्यङ्मृल्लवणैर्मुखम् ॥ ६८ ॥
चण्डाग्निना पचेद्यावत्तावद्द्वादशयामकम्।
स्वाङ्गशीतं समुद्धृत्य भित्वा कूपीं समाहरेत् ॥ ६९ ॥
ऊर्ध्वलग्नं तालसत्वं स्फटिकोपलसन्निभम्।

[षष्ठः प्रकारः।]

भावितं स्नुक्पयस्सिक्तं स्नुहीद्रावैर्द्विसप्तधा ॥ ७० ॥
तिलसर्षपशिग्रूणि लवणं मित्रपञ्चकम्।
एभिस्तुल्यं शुद्धतालं दिनमेकं विमर्दयेत् ॥ ७१ ॥

भूधरे च्छिद्रमूषान्तर्ध्मातं सत्वं विमुञ्चति ।

तालकस्य गुणाः ॥

तालकं शोधितं श्रेष्ठं कुष्ठमृत्युजरापहम् ॥ ७२ ॥
सौभाग्यसौगन्ध्यकरं परमायुर्विवर्धनम् ।

मनःशिला ॥

मनःशिला स्यात्कुनटी नागास्या रक्तगन्धकः ॥ ७३ ॥
नेपालिका नागजिह्वा कल्याणी सप्तनामका ।

[मनःशिलाभेदाः ।]

मनःशिला त्रिधा प्रोक्ता श्यामाङ्गी कणवीरका ॥ ७४ ॥
खण्डाख्या चैव तद्रूपं विविच्य परिकल्प्यते ।
श्यामा रक्ता खराङ्गा च भाराढ्या श्यामिका मता ॥
तेजस्विनी च निर्भारा ताम्राभा कणवीरका ।
चूर्णीभूताऽतिरक्ताङ्गी सभारा खण्डपूर्विका ॥ ७६ ॥
उत्तरोक्ता गुणैश्श्रेष्ठा भूरिसत्वा प्रकीर्तिता ।

[अशुद्धमनःशिलासेवायां दोषाः ।]

अश्मरीं मूत्रकृच्छ्रं च मन्दाग्निं मलबद्धताम् ॥ ७७ ॥
करोति कुष्ठं तापं च शुद्धिहीना मनःशिला ।

मनःशिलाशुद्धिः ॥

अजामूत्रैस्त्र्यहं पच्याद्दोलायन्त्रे मनःशिलाम् ॥ ७८ ॥
सप्तधा दध्यजापित्तैर्घर्मे ताप्यं विशुद्धये ।
जीवन्तीभृङ्गराड्भक्तागस्त्यद्रावैर्मनःशिलाम् ॥ ७९ ॥

दोलायन्त्रे पचेद्यामं यामं छागोत्थमूत्रकैः।
क्षालयेदारनालेन सर्वयोगेषु योजयेत्॥ ८०॥

अगस्त्यस्य रसे भाव्या सप्ताहाच्छोधिता शिला।

मनःशिलासत्वपातनम्॥

[प्रथमः प्रकारः।]

तालवच्च शिलासत्वं पातनं शोधनं तथा॥ ८१॥

गोमांसैर्मातुलुङ्गाम्लैर्दिनं भाव्या मनःशिला।
तां रक्तपीतपुष्पाणां रसैः पीतैश्च भावयेत्॥ ८२॥

दिनान्ते मर्दयेद्यामं मित्रपञ्चकसंयुतम्।
गुलिकां काचकूप्यन्तः क्षिप्त्वा तां काचकूपिकाम्॥

सर्वतोऽङ्गुलमानेन लिम्पेद्वस्त्रमृदा दृढम्।
शुष्कां तां वालुकायन्त्रे शनैर्मन्दाग्निना पचेत्॥८४॥

शुष्के द्रवे निरुध्याऽथ सम्यङ्मृल्लवणैर्मुखम्।
चण्डाग्निना पचेद्यावत्तावद्द्वादशयामकम्॥ ८५॥

स्वाङ्गशीतं समुद्धृत्य भित्वा कूपीं समाहरेत्।
ऊर्ध्वलग्नं शिलासत्वं बालार्कसदृशोपमम्॥ ८६॥

[द्वितीयः प्रकारः।]

अगस्त्यशिग्रुजैस्तोयैस्त्र्यहं भाव्या मनःशिला।
तालकौषधयोगेन सत्वं हेमनिभं भवेत्॥ ८७॥

मनःशिलाया गुणाः॥

मनश्शिला कटूष्णा च सतिक्ता कफवातजित्।
कण्डूतिक्षयकासघ्नी विषभूताग्निमान्द्यहृत्॥ ८८॥

माक्षिकम् ॥

माक्षिकं मधुधातु स्यान्माक्षीकं हेममाक्षिकम् ।
ताप्यञ्च तापिजं तार्क्ष्यं तापीदेशसमुद्भवम् ॥ ८९ ॥

[माक्षिकभेदाः ।]

माक्षीकं द्विविधं हेममाक्षिकं तारमाक्षिकम ।
तत्राऽऽद्यं माक्षिकं कान्यकुब्जोत्थं स्वर्णसन्निभम् ॥

तपतीतीरसंभूतं पञ्चवर्णं सुवर्णवत् ।
पाषाणबहलः प्रोक्तस्ताप्याख्योऽसौ गुणात्मकः ॥ ९१ ॥

सुवर्णाकारभेदाच्च प्रत्येकं तत्पुनस्त्रिधा ।
कादम्बं कारवेल्लाख्यं तण्डुलीयकसंज्ञकम् ॥ ९२ ॥

[अशुद्धमाक्षिकसेवने दोषाः ।]

प्राणविष्टंभदौर्बल्यवह्निसादाक्षिरोगकृत् ।
माक्षिकं मारयत्येव शुद्धिहीनं सुरार्चिते ! ॥ ९३ ॥

माक्षिकशुद्धिः ॥

[प्रथमः प्रकारः ।]

माक्षिकं नरमूत्रेण क्वाथैः कौलुत्थकोद्भवैः ।
वेतसेनाम्लवर्गेण टङ्कणेन कटुत्रिकैः ॥ ९४ ॥

डोलायन्त्रे दिनं पाच्यं सूरणस्यैव मध्यगम् ।
दिनं रम्भाद्रवैः पच्यादुद्धृतं पेषयेद्धृतैः ॥ ९५ ॥

एरण्डतैलसंयुक्तैः पुटे पच्यन्विशोधयेत् ।

[द्वितीयः प्रकारः]

माक्षिकस्य त्रयो भागा भागैकं टङ्कणस्य च ॥ ९६ ॥

मातुलुङ्गद्रवैर्वाऽथ जम्बीरोत्थद्रवैः पचेत् ।

लोहपात्रे पचेत्तावद्यावत्पात्रं सुलोहितम् ॥ ९७ ॥
ताम्रवर्णमयो वाऽपि तावच्छुध्यति माक्षिकम्।

[तृतीयः प्रकारः।]

अगस्त्रिपुष्पनिर्यासैश्शिग्रुमूलं निघर्षयेत् ॥ ९८ ॥
द्रवैः पाषाणभेद्याश्च पेष्यमेभिश्च माक्षिकम्।
तद्वटीं चाऽथ मूषायां दशभिरुत्पलैः पुटेत् ॥ ९९ ॥
पुनः पुनश्च पिष्ट्वाऽथ पुटैष्षड्भिर्विशुध्यति।

[चतुर्थः प्रकारः।]

क्षौद्रक्षीरारनालाश्च अष्टभागाः पृथक् पृथक् ॥ १०० ॥
गव्यं तक्रं चतुर्भागं भागः कौलुत्थजो रसः।
सर्वं संपूरयेद्भाण्डे भागैकं माक्षिकं पचेत् ॥ १०१ ॥
डोलायन्त्रेण मृद्वग्नौ याममात्रं पुनः पचेत्।
उद्धृत्य मातुलुङ्गाम्लैः पिष्ट्वा दशभिरुत्पलैः ॥ १०२ ॥
पुटे पुनः पुनः कुर्यादेवं द्वादशवासरम्।
शुद्धं भवति माक्षीकं सर्वयोगेषु योजयेत् ॥ १०३ ॥

[पञ्चमः प्रकारः।]

माक्षिकं कणशः कृत्वा जालिनीमेघनादयोः।
पिण्डे निक्षिप्य विपचेद्दोलायन्त्रे कुलुत्थजे ॥ १०४ ॥
क्वाथे तच्छुद्धतां याति प्रशस्तं लोहमारणे।

[षष्ठः प्रकारः।]

तैले तक्रे गवां मूत्रे कौलुत्थे वाऽम्लकाञ्जिके ॥१०५॥
माक्षिकं शोधयेत्प्राज्ञो गिरिदोषनिवृत्तये।

[सप्तमः प्रकारः ।]

कुलुत्थकोद्रवक्काथनरमूत्राम्लवेतसैः ॥ १०६ ॥

टङ्कणेनाम्लवर्गेण कटुकत्रितयेन वा ।
दोलायन्त्रे दिनं पाच्यं सूरणकन्दमध्यगम् ॥ १०७ ॥

दिनं रम्भाद्रवैः पाच्यं ध्मातमुद्धृत्य पेषितम् ।
एरण्डतैलसर्पिभ्यां पुटैश्शुध्यति माक्षिकम् ॥ १०८ ॥

[अष्टमः प्रकारः ।]

सुवर्णवर्णविमलं ताप्यं वा कणशः कृतम् ।
पुनर्नवायाः कल्कस्थं कौलुत्थे स्वेदयेद्रसे ॥ १०९ ॥

सैन्धवैर्बीजपूराक्तैर्युक्तं वा पोट्टलीकृतम् ।
दोलायन्त्रे दिनं स्वेद्यं शुद्धिमायाति निश्चितम् ॥

माक्षिकसत्वपातनविधिः ॥

[प्रथमः प्रकारः ।]

गोदुग्धैश्च स्नुहीक्षीरैर्भाव्यमेरण्डतैलकैः ।
माक्षिकं दिनमेकं तु मर्दितं वटकीकृतम् ॥ ११ ॥

अभ्रवद्धमने सत्वं सस्यकस्याऽप्ययं विधिः ।

[द्वितीयः प्रकारः ।]

दोलायन्त्रे सारनाले माक्षिकं स्वेदयेद्दिनम् ॥ ११२ ॥

चूर्णितं मधुसर्पिभ्यां लोहपात्रे पचेद्दिनम् ।
आदाय भावयेद्धर्मे वज्रीक्षीरैर्दिनावधि ॥ ११३ ॥

गृहधूमैर्घृतैः क्षौद्रैस्सयुक्तैर्मर्दयेद्दिनम् ।
अन्धमूषागतं ध्मातं सत्वं गुञ्जानिभं भवेत् ॥ ११४ ॥

[तृतीयः प्रकारः ।]

कदलीकन्दतोयेन माक्षिकं शतधाऽऽतपे ।
भावितं पाचयेद्यामं साज्यैर्वातारितैलकैः ॥ ११५ ॥
पूर्ववद्धमनात्सत्वमिन्द्रगोपसमं भवेत् ।

[चतुर्थः प्रकारः ।]

स्नुह्यर्कपयसा स्तन्यैर्माक्षिकं मर्दयेद्दिनम् ॥ ११६ ॥
कङ्कुष्ठं टङ्कणं चैव प्रतिपादांशमिश्रितम् ।
मूकमूषागतं ध्मातं सत्वं मणिनिभं भवेत् ॥ ११७ ॥

[पञ्चमः प्रकारः ।]

कदलीकन्दतुलसीजंबीराणां द्रवैः क्रमात् ।
भावयेन्माक्षिकं श्लक्ष्णं प्रतिद्रावेण सप्तधा ॥ ११८ ॥
रुध्वा ध्माते पतेत्सत्वं शुकतुण्डनिभं शुभम् ।

[षष्ठः प्रकारः ।]

मूलवर्गाम्लवर्गाभ्यां द्विसमाहं विभावयेत् ॥ ११९ ॥
माक्षीकं तीव्रघर्मेण दिनमम्लैश्च मर्दयेत् ।
मित्रपञ्चकसंयुक्तं वटीकृत्य धमेद्दृढम् ॥ १२० ॥
व्योमवद्वङ्कनालेन सत्वं शुल्वनिभं भवेत् ।

[सप्तमः प्रकारः ।]

स्नुहीक्षीरैर्गवां क्षीरैर्भाव्यमेरण्डतैलकैः ॥ १२१ ॥
माक्षिकं पञ्चमित्राक्तं सप्ताहान्ते वटीकृतम् ।
पूर्ववद्विधमेच्चेन सत्वं लाक्षानिभं भवेत् ॥ १२२ ॥

[अष्टमः प्रकारः ।]

स्तन्यैः कङ्कुष्ठकैश्चैव कदलीतोयसंयुतैः ।
मित्रपञ्चकसंयुक्तैर्माक्षिकं दिनसप्तकम् ॥ १२३ ॥

भावितं मर्दयेद्यामं दिनं वातारितैलकैः ।
मृद्वग्निना पचेत्तावद्यावद्द्रवति गोलकम् ॥ १२४ ॥

सत्वं किंशुकपुष्पाभं व्योमवद्धमनाद्भवेत् ।
विमलानां च सर्वेषां सस्यकस्याऽप्ययं विधिः ॥१२५॥

[नवमः प्रकारः]

संचूर्ण्य माक्षिकं शुद्धं मर्द्यमम्लेन केनचित् ।
क्षालयेदारनालेन ह्यधस्स्थं स्वर्णचूर्णवत् ॥ १२६ ॥

जारयेत्तत्समाहृत्य धमेत्सत्वं विमुञ्चति ।
योजयेद्द्रापने चेदं बीजानां यत्र यत्र वै ॥ १२७ ॥

[दशमः प्रकारः ।]

कदलीपत्रजैर्नीरैर्माक्षिकं भावयेद्द्रुतम् ।
गन्धर्वतैलमध्वाज्यैः पक्वमेकदिनं ततः ॥ १२८ ॥

तत्ताप्यं वज्रमूषायां पक्वायां निक्षिपेत्ततः ।
लोहसन्धानकरणं तत्समं तत्र निक्षिपेत् ॥ १२९ ॥

दृढं प्रमूकमूषायां कोष्ठिकायां निवेशयेत् ।
अङ्गारैः खदिरोद्भूतैर्धमेद्भस्त्राद्वयेन वै ॥ १३० ॥

वङ्कनालयुजा सत्वं ताप्यस्य पतति ध्रुवम् ।

[एकादशः प्रकारः ।]

माणिबन्ध्यं(मन्थं) वैष्णवं च गृह्णीयात्समभागतः ॥
फलपूररसैः पिष्ट्वा सम्पुटे सुदृढं क्षिपेत् ।

सम्यग्लिप्त्वा वनोद्भूतैश्छागणकैः पुटयेत्ततः ॥ १३२ ॥

कुकुप्तोत्थं(?) तदाकृष्यं स्वांगशीतं प्रमर्दयेत् ।
फलपूररसैः पक्वैर्मर्दयित्वाऽथ पूर्ववत् ॥ १३३ ॥

पुटनं छगणेनैव तावत्कुर्याद्विचक्षणः ।
यावत्तत्पुटितं कल्कं फलपूराम्लमर्दितम् ॥ १३४ ॥

शाणोत्तेजितनिस्त्रिंशलिप्तं तत्ताम्रतामियात् ।
इत्थं शुद्धं च गरुडं टङ्कणं नीरजं रसम् ॥ १३५ ॥

घृतेन मधुना युक्तं सगुडं गुञ्जया समम् ।
प्राग्वन्मूषागतं कृत्वा धमेत्तत्खदिराग्निना ॥ १३६ ॥

मृदुसत्वं नागसममिन्द्रगोपकसन्निभम् ।
पतत्येव न सन्देहस्सर्वज्ञवचनं तथा ॥ १३७ ॥

शुक्लदीप्तिरशब्दश्च यदा वैश्वानरो भवेत् ।
तदा तु सत्वं पतितं जानीयान्नान्यथा क्वचित् ॥१३८॥

माक्षिकस्य गुणाः ॥

कषायतिक्तमधुरं कटुकं माक्षिकद्वयम् ।
उष्णं रसायनं कुष्ठशोषहिध्मावमिप्रणुत् ॥ १३९ ॥

माक्षीकधातुस्सकलामयघ्नः
प्राणो रसेन्द्रस्य परं हि वृष्यः ।
दुर्मेललोहद्वयमेलकश्च
गुणोत्तरः पूर्वरसायनाग्र्यः ॥ १४० ॥

अभ्रकम् ॥

उत्पत्त्यादि घनस्याऽऽदौ कथितं तद्रसायने ।
अधुना सम्प्रवक्ष्यामि तत्क्रियास्तद्गुणानपि ॥ १४१ ॥

अभ्रकभस्मविधिः ॥

[प्रथमः प्रकारः ।]

धान्याभ्रकं मेघनादद्रवैस्सम्मर्दयेद्दिनम् ।
शतांशं टङ्कणं दत्वा ततो गजपुटे पचेत् ॥ १४२ ॥

मुस्तासूरणवर्षाभूरसैर्व्यस्तैः पुटं त्रिधा ।
कासमर्दरसैः पञ्च वरागोमूत्रकैरपि ॥ १४३ ॥

न्यग्रोधस्य जटाक्वाथैर्मर्द्य दशपुटं पुनः ।
षट् च जम्बीरनीरेण गोक्षीरेण पुटत्रयम् ॥ १४४ ॥

पेषणं घर्मपाकं च स्थालीपाकं पुटं क्रमात् ।
कुर्याच्चत्वारि कर्माणि टङ्कणं च पुटे पुटे ॥ १४५ ॥

निश्चन्द्रं जायते ह्यभ्रं सर्वयोगेषु योजयेत् ।
अयं सामान्यसंस्कारो विशेषस्तु निगद्यते ॥ १४६ ॥

[भस्मीकरणे विशिष्टसंस्काराः ।]

निश्चन्द्रकं मृतव्योम सामान्यक्रमसंस्कृतम् ।
तत्तद्रोगहरद्रव्यक्वाथैः पिष्ट्वा पुटे पचेत् ॥ १४७ ॥

यन्त्रैस्त्रिस्सप्तधा कुर्यात्तत्तद्रोगहरं भवेत् ।
अयं विशेषसंस्कारस्तत्तद्रोगहरो भवेत् ॥ १४८ ॥

पूर्वाह्णे पेषणं कार्यं मध्याह्ने घर्मपाचनम् ।
सायाह्ने स्थालिकापाकं कुर्याद्रात्रौ पुटं क्रमात् ॥१४९॥

संस्कारः पञ्चधा प्रोक्तो घनस्य परमेश्वरि ! ।
धान्याभ्रकरणं सत्वपातनं निर्मलक्रिया ॥ १५० ॥

सुमृतीकरणं चैव त्वमृतीकरणं तथा ।
मारणे घनसत्वस्य घनपत्रस्य मारणे ॥ १५१ ॥

क्रमाच्छ्रेष्ठतमौ प्रोक्तौ शस्तौ दरदटङ्कणौ।

[द्वितीयः प्रकारः]

मुस्ताक्वाथेन धान्याभ्रं पञ्चविंशत्पुटे पचेत् ॥१५२॥
गोमूत्रैश्च तथा क्वाथैस्त्रिफलाया सुरेश्वरि!।
कासमर्दद्रवैरेकं गोक्षीरेण पुटं त्रिधा ॥ १५३ ॥
निश्चन्द्रं जायते ह्यभ्रं सर्वयोगेषु योजयेत्।
विशेषसंस्कारयुतं तत्तद्रोगहरं भवेत् ॥ १५४ ॥

[तृतीयः प्रकारः।]

धान्याभ्रकस्य भागैकं भागौ द्वौ टङ्कणस्य च।
पिष्ट्वा तदन्धमूषायां रुध्वा तीव्राग्निना धमेत् ॥१५५॥
स्वभावशीतलं चूर्णं सर्वयोगेषु योजयेत्।
विशेषसंस्कारयुतं तत्तद्रोगहरं भवेत् ॥ १५६ ॥

[चतुर्थः प्रकारः।]

धान्याभ्रं मर्दयेदम्लैर्घर्मे संस्थापयेत्ततः।
पुटं कुर्यात्ततोऽम्लेन सेचनं मर्दनं पुनः ॥ १५७ ॥
विंशद्वारं ततो दुग्धे पुटनिस्तब्धमभ्रकम्।
क्षिपेत्तं मर्दयेद्दुग्धैर्दुग्धे क्षिप्त्वाऽऽतपे न्यसेत् ॥१५८॥
पुटं त्रिस्सप्तवाराणि कुर्यादेवं पुनः पुनः।
तण्डुलं वज्रवल्ली च तालमूली पुनर्नवा ॥ १५९ ॥
शार्ङ्गेरी मरिचं चैव बला च पयसा सह।
पूर्वाभ्रं पेषयेदेतैः प्रत्येकैश्च त्र्यहं त्र्यहम् ॥ १६० ॥
क्षिप्त्वाऽऽतपे पुटे पच्यात्प्रत्येकेन पुनः पुनः।
एवं निश्चन्द्रकं व्योम कज्जलाभं मृतं भवेत् ॥ १६१ ॥

[पञ्चमः प्रकारः।]

धान्याभ्रकस्य शुष्क(द्ध)स्य दशांशं मरिचं क्षिपेत्।
पेषयेदम्लवर्गेण अम्लैर्भाव्यं दिनत्रयम् ॥ १६२ ॥

तच्छुष्कं सम्पुटे धाम्यं खदिराङ्गारकैर्दृढम्।
ऊर्ध्वपात्रे निवार्याऽथ सिञ्चेदम्लेन केन तम्॥१६३॥

धान्यं तत्रैव षड्वारमम्लैस्सिञ्च्यात्पुनः पुनः।
अगस्त्यशिग्रुवर्षाभूमूलपत्रभवै रसैः ॥ १६४ ॥

पिष्ट्वाऽभ्रं सेचयेत्तेन षड्धा धाम्यं च सेचयेत्।
सितामध्वाज्यगोक्षीरैस्तद्धौतं पेष्यमभ्रकम् ॥ १६५ ॥

रुध्वा षड्भिः पुटैः पाच्यं पिष्ट्वा चैव पुनः पुनः।
मत्स्याक्ष्याश्चैकवीराया द्रवैः पिष्ट्वा त्रिधा पचेत् ॥

एवं गजपुटैः पाच्यं निश्चन्द्रमयतेऽभ्रकम्।
पत्राभ्रकस्य सिन्दूरं सर्वयोगेषु योजयेत् ॥ १६७ ॥

[षष्ठः प्रकारः।]

धान्याभ्रं मर्दयेद्यामं मत्स्याक्षीस्वरसैस्ततः।
पचेद्गजपुटैरेवं सप्तधा तुलसीरसैः ॥ १६८ ॥

कोकिलाक्षरसैस्सप्त कुमारीस्वरसैस्तथा।
श्वेतदूर्वारसैस्तद्वद्व्याघ्रीकन्दरसैस्तथा ॥ १६९ ॥

पुनर्नवारसैस्सप्त तद्वत्पञ्चामृतैस्ततः।
निश्चन्द्रं जायते ह्यभ्रं सर्वयोगेषु योजयेत् ॥ १७० ॥

[सप्तमः प्रकारः।]

धान्याभ्रं टङ्कणं तुल्यं गोमूत्रैस्तुलसीद्रवैः।
वाकुच्या सूरणैर्नाल्या दिनं पिष्ट्वा पुटे पचेत् ॥१७१॥

द्रवैः पुनः पुनः पिष्ट्वा दिनान्तेषु पुटे पचेत् ॥१७०॥
रुध्वा रुध्वा पुटैस्त्वेवं निश्चन्द्रं चाभ्रकं भवेत्।

[अष्टमः प्रकारः।]

पिष्ट्वा साम्लारनालेन पेटाली(री)मूलजत्वचम् ॥१७१॥
तद्द्रवैर्मर्दयेदभ्रं दिनं गजपुटे पचेत्।
एवं सप्तपुटं कार्यं दध्ना च पुटसप्तकम् ॥ १७२ ॥
यवचिञ्चाद्रवैस्तद्वन्निश्चन्द्रं जायतेऽभ्रकम्।

[नवमः प्रकारः]

धान्याभ्रकं रविक्षीरै रविमूलद्रवैश्च वा ॥ १७३ ॥
मर्द्यं मर्द्यं पुटे पच्यात्सप्तधा म्रियते ध्रुवम्।

[दशमः प्रकारः।]

धान्याभ्रकं तुषाम्लान्तरातपे स्थापयेद्दिनम् ॥ १७४ ॥
यामं मर्द्यं तु तद्गोलं रुध्वा गजपुटे पचेत्।
एवं कार्पासतोयान्तस्स्थाप्यं पाच्यं पुटे पचेत् ॥१७५॥
एवं गोक्षीरमध्यस्थं स्थाप्यं पेष्यं पुटे पचेत।
पश्चादम्लैश्च गोक्षीरैः कार्पासैश्च पुनः पुनः ॥१७६॥
घर्मपाकं मर्दनं च स्थालीपाकं पुटं क्रमात्।
एकविंशत्पुटे प्राप्ते निश्चन्द्रं जायतेऽभ्रकम् ॥ १७७ ॥
सर्वेषां घातिताभ्राणाममृतीकरणे विधिः।

अभ्रकस्य गुणाः ॥

अभ्रकं गगनं भृङ्गं बहुपुत्रमुमाभवम् ॥ १७८ ॥
पत्राभ्रकस्य सिन्दूरममृतं परमं हितम्।

त्रिदोषघ्नं बलकरं वृष्यमारोग्यदं शुचि ॥ १७९ ॥
सर्वरोगहरं सौम्यं विषघ्नं च रसायनम् ।

हिङ्गुलः ॥

हिङ्गुलो दरदं चूर्णपारदश्च रसोद्भवः ॥ १८० ॥
रसगर्भस्सुरङ्गश्च लोहघ्नस्सिद्धिपारदः ।
हिङ्गुलस्त्रिविधो ज्ञेयश्चर्मारश्शुकतुण्डकः ॥ १८१ ॥
हंसपादश्च तत्राऽऽद्यं तारकर्मणि योजयेत् ।
अधमं तं विजानीयाच्छुकतुण्डं च मध्यमम् ॥ १८२ ॥
हेमतारक्रियामार्गे योजयेत्परमेश्वरि ! ।
हंसपादो महाश्रेष्ठः सर्वकर्मकरो हि सः ॥ १८३ ॥
तस्य सत्वं सूत एव दरदस्य त्रिभेदतः ।
हेमकिट्टस्य सदृशस्तद्रूपस्तीक्ष्णमारकः ॥ १८४ ॥
चर्मारस्तीक्ष्णरूपस्स्यात्सुप्रीतश्शुकतुण्डकः ।
जपाकुसुमसङ्काशो हंसपादो महोत्तमः ॥ १८५ ॥
रसायने सर्वसूतहरणे सर्वरञ्जने ।
लोहानां मारणे श्रेष्ठो वर्णोत्कर्षणकर्मणि ॥ १८६ ॥
रसकस्य तथा रागबन्धे धौरेयकस्स्मृतः ।
मलदोषादिकं नाऽस्ति सर्वकार्येषु पूज्यते ॥ १८७ ॥

हिङ्गुलशुद्धिः ॥

मेषीक्षीरेण दरदमम्लवर्गैश्च भावितम् ।
सप्तवारं प्रयत्नेन शुद्धिमायाति निश्चितम् ॥ १८८ ॥

हिङ्गुलसत्वपातनम् ॥

दरदं पातनायन्त्रे पातितं च जलाशये ।

सत्वं सूतकसङ्काशं विमुञ्चति न संशयः ॥ १८९ ॥

हिङ्गुलस्य गुणाः ॥

ये गुणाः पारदे प्रोक्तास्ते गुणास्सन्ति हिङ्गुले ।
नवज्वरहरः प्रोक्तः सम्पातज्वरनाशनः ॥ १९० ॥

गैरिकम् ॥

गैरिकं गिरिधातुस्स्याद्रक्तधातुर्गवेधुकम् ।
गैरिकं द्विविधं प्रोक्तं तत्राऽऽद्यं स्वर्णगैरिकम् ॥१९१॥
पाषाणगैरिकं चान्यत्पूर्वं श्रेष्ठतमं गुणैः ।

गैरिकस्य गुणाः ॥

शोणितं मसृणं स्निग्धं स्वादु वृष्यं हिमं लघु ॥१९२॥
चक्षुष्यं रक्तपित्तघ्नं विषहिध्मावमिप्रणुत् ।
तापज्वरहरं श्रेष्ठं हेमघ्नं रक्तगैरिकम् ॥ १९३ ॥
पाषाणगैरिकं प्रोक्तं कठिनं ताम्रवर्णकम् ।

चपलः ॥

देहवेधी लोहवेधी चपला रसबन्धिनी ॥ १९४ ॥
चपला बहुभेदा च सर्वलोहस्वरूपतः ।
हेमस्तारो रविमयस्सीसात्मा वङ्गरूपधृक् ॥ १९५ ॥
तीक्ष्णरूपः कांस्यरूपो रक्तो विषमयस्तथा ।

[चपलस्वरूपम् ।]

सत्वलोहस्वरूपास्ते विषो हरितलोहभाक् ॥ १९६ ॥
विषाख्यं चपलं प्राप्य निर्जीवे तस्य दापयेत् ।
पुटेनारण्यजैश्छाणैस्सधूमं सर्वथा त्यजेत् ॥ १९७ ॥

नश्येत तस्य धूमं वै स्पर्शनं दूरतस्त्यजेत् ।
अशनात्तस्य संस्पर्शान्म्रियते सद्य एव हि ॥ १९८ ॥

धूमावलोकनाच्छीर्षपीडा सञ्जायते ज्वरः ।
एवं दत्तपुटे शान्ते गृह्णीयाच्चपलं ततः ॥ १९९ ॥

चपलस्य गुणाः ॥

तस्य संस्पर्शमात्रेण हीरको म्रियते क्षणात् ।
सर्वेषां चपलानां वै स्वभावस्समुदाहृतः ॥ २०० ॥

वङ्गस्तम्भे नागराजे क्रमे वाऽतीव शस्यते
सर्वलोहानि कुर्वन्ति सुवर्णं तारमेव च ॥ २०१ ॥

युक्त्याऽथ शोधितस्सूते विना बीजं च वा तथा ।
शतं वाऽपि सहस्रं वा लक्षं कोटिं च वेधयेत् ॥२०२॥

वज्रेण रसराजेन बीजेन च समाश्रिता ।
धूमतो वेधयेल्लोहान् रसजीर्णस्स्वयं गलेत् ॥ २०३ ॥

निष्पत्य तेन देहस्य चपलेन महात्मना ।

शिलाजतु ॥

अश्मजं गिरिजं शैलमश्मलाक्षा शिलाजतु ॥ २०४ ॥

शिलाधातुर्द्विधा प्रोक्तो गोमूत्राऽऽद्यो रसायनम् ।
कर्पूरपूर्वकश्चान्यस्तत्राऽऽद्यो द्विविधस्स्मृतः ॥ २०५ ॥

ससत्वश्चैव निःसत्वस्तयोः पूर्वो गुणाधिकः ।
ग्रीष्मे तीव्रार्कतप्तेभ्यः पादेभ्यो हिमभूभृतः ॥२०६॥

स्वर्णरूप्याकगर्भेभ्यः शिलाधातुर्विनिस्सरेत् ।

शिलाजतोर्गुणाः ॥

स्वर्णगर्भगिरेर्जातं जपापुष्पनिभं गुरु ॥ २०७ ॥

ससत्वं स्वादु परमं परमं तद्रसायनम्।
रूप्यगर्भगिरेर्जातं मधुरं पाण्डुरं गुरु॥ २०८॥

शिलाजं पाण्डुरोगघ्नं विशेषात्पित्तरोगजित्।
ताम्रगर्भगिरेर्जातं नीलवर्णं घनं गुरु॥ २०९॥

शिलाजं कफवातघ्नं तीक्ष्णोष्णं दीपनं परम्।
वह्नौ क्षिप्तं भवेद्यत्तल्लिङ्गाकारं ह्यधूमकम्॥ २१०॥

सलिलेऽप्यवलीनञ्च तत्सिद्धं हि शिलाजतु।

गोमूत्रगन्धि कृष्णं
गुग्गुलुकाभं सशर्करं मृत्स्नम्।
स्निग्धमनम्लकषायं
मृदु गुरु च शिलाजतु श्रेष्ठम्॥ २११॥

सर्वं च तिक्तकटुकं स्वादु नात्युष्णशीतलम्॥ २१२॥

वृष्यं त्रिदोषजिद्भेदि चक्षुष्यं च रसायनम्।
क्षयशोफोदरार्शोघ्नं मेहमूत्रग्रहापहम्॥ २१३॥

नूनं सज्वरपाण्डुशोफशमनं मेहाग्निमान्द्यापहं
मेदश्छेदकरं च यक्ष्मशमनं मूलामयोन्मूलनम्।
गुल्मप्लीहविनाशनं जठरहृच्छूलघ्नमामापहं
सर्वत्वग्गदनाशनं किमपरं देहे च लोहे हितम्॥

रसोपरससूतेन्द्ररत्नलोहेषु ये गुणाः।
वसन्ति ते शिलाधातौ जरामृत्युजिगीषया॥ २१५॥

भूनागः॥

भूनागः क्षितिनागश्च भूलता रक्तजन्तुकः।
क्षितिजः क्षितिजन्तुश्च विषघ्नो रक्ततुण्डकः॥२१६॥

यासां छेदे न रक्तं प्रभवति सततं प्रायशो रक्तभूमौ ।
सञ्जाद्या भूलतास्ता विषहरधनदं पातयेत्तासु सत्वम् ।
तद्युक्त्या पारदेन्द्रश्चरति यदि समं सारणायन्त्रयोगैः
बद्धोऽयं कोटिवेधी समरविरजते(थ तं)योजयेद्भास्करे वा ॥

भूनागसत्वस्य गुणाः ॥

सत्वं भूनागजं क्ष्वेलयक्षराक्षसमृत्युजित् ।
सर्ववश्यकरं सर्वरोगघ्नं च रसायनम् ॥ २१८ ॥

रसेन्द्रे जारणाकर्मजारितं कोटिवेधकृत् ।
सुवर्णादीनि लोहानि रक्तानि ग्रसति क्षणात् ॥२१९॥

भूनागसत्वपातनम् ॥

[प्रथमः प्रकारः ।]

रक्तभूजातभूनागमृत्तिकां क्षालयेज्जलैः ।
यावत्सत्वावशेषं स्याद्धौतसत्वं तदेव हि ॥ २२० ॥

मित्रपञ्चकयुक्तं तन्मूषायां धमयेद्दृढम् ।
निर्भिद्य मूषां तत्सत्वं गृहीत्वा किट्टकं पुनः ॥२२१॥

एवं त्रिवारं धमनात्सत्वशेषं समाहरेत् ।

[द्वितीयः प्रकारः]

भूनागमृत्तिकां भाण्डे भूनागैस्सह निक्षिपेत् ॥२२२॥
षण्मासान्तं समान्तं वा जलैस्सिञ्चेन्मुहुर्मुहुः ।
अस्य सत्वं विधानेन गृह्णीयादभ्रसत्ववत् ॥ २२३ ॥

[तृतीयः प्रकारः ।]

रक्तभूमिजभूनागान्पञ्जरस्थेन बर्हिणा ।
भक्षयेत्तु शरत्काले नित्यं तन्मलमाहरेत् ॥ २२४ ॥

लाक्षासर्जरसस्सर्जी गुग्गुलुर्मितपञ्चकम् ।
ऊर्णा क्षाराश्च पटवो नीलसर्पे(र्षे)न्द्रगोपकौ ॥ २२५ ॥

मत्स्यश्च नीलसरटः कूर्मपृष्ठं शशास्थि च ।
माक्षीकं शिखि(शंख)तुत्थं च सर्वांशं बर्हिणो मलम् ॥

सर्वं निक्षिप्य मूषायां धमेत्तीव्राग्निना दृढम् ।
निर्भिद्य मूषां तत्सत्वं गृहीत्वा किट्टकं पुनः ॥

एवं त्रिवारधमनात्सत्वशेषं समाहरेत् ।

हरिद्राश्मा ॥

हरिद्राश्मा निशाग्रावः पीताङ्गः पीतक(घ)र्षणः ॥
तत्सत्वकं सितं स्वर्णं श्रेष्ठं रसरसायने ।

अग्निजारः ॥

अग्निजारोऽग्निनिर्यासोऽप्यग्निगर्भोऽग्निजस्स्मृतः ॥
बडवाग्निमलो ज्ञेयो जरायुश्चार्णवोद्भवः ।
अग्निज्वालोऽग्निजारश्च प्रोक्तस्सिन्धुप्लवो दश ॥

सामुद्रस्याग्निनक्रस्य जरायुर्बहिरुज्झितः ।
संशुष्को भानुतापेन सोऽग्निजार इति स्मृतः ॥२३१॥

जाराभं दहति स्पर्शात्पिच्छिलं सागरोत्प्लवम् ।
जरायुस्तच्चतुर्वर्णं श्रेष्ठं तेषु सलोहितम् ॥ २३२ ॥

अग्निजारस्य गुणाः ॥

स्यादग्निजारः कटुकोष्णवीर्यः
तुन्दामयघ्नः कफवातहारी ।
पित्तप्रदः शोणितसन्निपात-
शूलादिवातामयनाशकश्च ॥ २३३ ॥

अग्निजारस्त्रिदोषघ्नो धनुर्वातादिवातनुत् ।
मर्दनो रसवीर्यस्य दीपनो जारणस्तथा ॥ २३४ ॥

खर्परी (रसकम्) ॥

खर्परी रसकं तुत्थखर्पर्यमृतसम्भवा ।
रसको द्विविधः प्रोक्तो दर्दुरः कारवेल्लकः ॥ २३५ ॥

सदंशो(दलो)दर्दुरः प्रोक्तो निर्दंश:(र्दल:)कारवेल्लकः ।
सत्वपाते शुभः पूर्वो द्वितीयश्चौषधादिषु ॥ २३६ ॥

घनसत्वनिभं बाह्ये शुभं हारिद्रवत्ततः ।
अच्छं खर्परवत्तुत्थं उत्तमं(स्यासि) सतोदरम् ॥२३७॥

खर्पर्या गुणाः ॥

रसकस्सर्वदोषघ्नः कफपित्तविनाशनः ।
चक्षूरोगक्षयघ्नश्च लोहपारदरञ्जनः ॥ २३८ ॥

नागार्जुनेन निर्दिष्टौ रसस्य(श्च) रसकावुभौ ।
श्रेष्ठौ सिद्धरसौ ख्यातौ देहलोहकरौ परौ ॥ २३९ ॥

रसश्च रसकश्चोभौ येनाग्निसहनौ कृतौ ।
देहलोहमयीं सिद्धिं दास्यतस्तु न संशयः ॥ २४० ॥

खर्परीसत्वपातनम् ॥

जयन्तीत्रिफलाचूर्णं हरिद्रागुडटङ्कणम् ।
पादांशं रसकस्येदं पिष्ट्वा मूषाः प्रलेपयेत् ॥ २४१ ॥

नलिकासम्पुटं बध्वा शोषयेदातपे खरे ।
ग्राह्यं पातालयन्त्रेण सत्वं ध्माते पुटेऽथ वा ॥२४२॥

खर्परीशुद्धिः ॥

रजस्वलारजोमूत्रे रसकं भावयेद्दिनम् ।

तैरेव दिनमेकं तु मर्दयेच्छुद्धिमाप्नुयात् ॥ २४३ ॥

मयूरतुत्थम् ॥

मयूरतुत्थं तुत्थं च नीलाश्मा ताम्रभस्म च ।
मयूरग्रीवकं क्ष्वेडनाशनं सस्यकं प्रिये ! ॥ २४४ ॥
मयूरग्रीवसङ्काशं घृष्टे गोक्षीरसन्निभम् ।
अप्सु च प्लवते क्षिप्तमेतन्मायूरतुत्थकम् ॥ २४५ ॥
अथवा शुकपिञ्छाभमन्तः काञ्चनबिन्दुभिः ।
अङ्कितं घर्षयेत्तुत्थमायसे चाम्लसंयुते ॥ २४६ ॥
भवेदयस्ताम्रनिभं एतन्मायूरतुत्थकम् ।

मयूरतुत्थशुद्धिः ॥

विष्ठया मर्दयेत्तुत्थं मार्जारककपोतयोः ॥ २४७ ॥
दशांशं टङ्कणं दत्वा पाच्यं मृदुपुटे ततः ।
पुटं दध्ना पुटं क्षौद्रैर्देयं तुत्थविशुद्धये ॥ २४८ ॥

मयूरतुत्थसत्वपातनम् ॥

तुत्थं च टङ्कणं चैव तुल्यं श्लक्ष्णं विमर्दयेत् ।
मूषायां तं विनिक्षिप्य रुध्वा तीव्राग्निना धमेत् ॥
इन्द्रगोपनिभं सत्वं पतत्येव न संशयः ।

मयूरतुत्थस्य गुणाः ॥

तुत्थं कटुकषायोष्णं श्वित्रनेत्रामयापहम् ॥ २५० ॥
विषदोषेषु सर्वेषु प्रशस्तं कान्तिकारकम् ।

कङ्कुष्ठम् ॥

कङ्कुष्ठं काककुष्ठं च रेचकं रागदायकम् ॥ २५१ ॥

कङ्कुष्ठं च द्विधा प्रोक्तं हेमतारात्मकं तथा ।
व्रणजन्तुज्वरघ्नं च शूलोदावर्तगुल्महृत् ॥ २५२ ॥

गिरिसिन्दूरम् ॥

महागिरिषु चाल्लो(ल्पा)व(वी) पाषाणान्तस्थितो रसः ।
शुष्कः शोणस्स निर्दिष्टो गिरिसिन्दूरसंज्ञया ॥२५३॥

त्रिदोषशमनं भेदि रसबन्धनकारकम् ।
देहलोहकरं नेत्र्यं गिरिसिन्दूरमीरितम् ॥ २५४ ॥

टङ्कणम् ॥

टङ्कणं टङ्कणक्षारो रसक्षारो रसाधिकः ।
लोहद्रावी रसघ्नश्च सुभगो रङ्गदश्च सः ॥ २५५ ॥

मालतीतीरसम्भूतः क्षारश्रेष्ठो नवाह्वयः ।
अश्मरीमतिसारं च निहन्यात्स्थावरं विषम् ॥ २५६ ॥

रससिद्धिकरः प्रोक्तो नागार्जुनपुरस्सरैः ।

कम्पिल्लकः ॥

इष्टचूर्णस्य सङ्काशश्चन्द्रिकाढ्योऽतिरेचकः ॥ २५७ ॥

सौराष्ट्रदेशखनिजस्स हि कंपिल्लको मतः ।
पित्तव्रणाध्मानविबन्धनघ्नः
श्लेष्मोदरार्तिक्रिमिगुल्महारी ।
मूलामशूलज्वरशोफहारी
कंपिल्लको रिच्य मलापहारी ॥ २५८ ॥

वत्सनाभिः ॥

उत्पत्यादि विषस्याऽऽदौ कथितं हि रसायनम् ॥
अमृतं स्याद्वत्सनाभो विषमुग्रं महौषधम् ।

गरलं मरणं नागस्तोकक्कं प्राणहारकम् ॥ २६० ॥

सर्वकुष्ठहरं प्रोक्तं सर्वव्याधिविनाशनम् ।
सन्निपातादिरोगाणां विनिवृत्तिकरं प्रिये ! ॥ २६१ ॥

कासीसम् ॥

कासीसं धातुकासीसं केसरं हंसलोमशम् ।
शोधनं पांशुकासीसं शुभ्रं सत्वाह्वयं मतम् ॥ २६२ ॥

कासीसं त्रिविधं शुभ्रं कृष्णं पीतनिति स्मृतम् ।
कासीसं पुष्पकासीसं हीरकासीसमित्यथ ॥ २६३ ॥

पीतं कृष्णं सितं रक्तं चतुर्धेति परे जगुः ।
कासीसमुष्णं सक्षारकषायाम्लं सतिक्तकम् ॥ २६४ ॥

वातश्लेष्मप्रशमनं चक्षुष्यं रञ्जकं परम् ।
मूत्रकृच्छ्राश्मरीकुष्ठकण्डूव्रणविषापहम् ॥ २६५ ॥

गौरीपाषाणकः ॥

गौरीपाषाणकः पीतो व्यक्तदेहश्च चूर्णकः ।
रसबन्धकरस्स्निग्धो दोषघ्नो रसवीर्यकृत् ॥ २६६ ॥

तुवरी फटकी च ॥

भूमिस्तुवरिका फुल्लतुवरी रञ्जिका क्षितिः ।
चित्रभूश्चीनकारश्च मञ्जिष्ठारागदायिनी ॥ २६७ ॥

स्वगस्तु फटकी दुग्धपाषाणो नेत्ररोगहा ।
कर्पूराख्यशिलाधातुर्मञ्जिष्ठारागरञ्जकः ॥ २६८ ॥

पोदारश्रृङ्गी ॥

सदलं पीतवर्णं च भवेद्गुर्जरमण्डले ।

अर्जुनस्य गिरेः पार्श्वे जातं पोदारशृङ्गिकम् ॥ २६९ ॥
सीससत्वं मरुच्छ्लेष्मशमनं पुङ्गदापहम् ।
रसबन्धनमुत्कृष्टं केशरञ्जनमुत्तमम् ॥ २७० ॥

सिन्दूरम् ॥

सिन्दूरनागगर्भे
सैमन्तिकवीरपांसु नागभवम् ।
रक्तं च नागरेणुः
गणपतिभूषा सुरङ्ग इत्याख्या ॥ २७१ ॥

सौभाग्यं चैव शृङ्गारं मङ्गल्यमरुणं रजः ।
सिन्दूरं कटुकं तिक्तमुष्णं व्रणविरोपणम् ॥ २७२ ॥
किलासविषकण्डूतिविसर्पशमनं परम् ।
हिङ्गुले ये गुणास्सन्ति ते गुणास्तिमुरौ प्रिये ॥२७३॥

रसाञ्जनम् ॥

रसाञ्जनं रसोद्भूतं रसगर्भं रसाग्रजम् ।
रीत्यां तु धाम्यमानायां तत्किट्टं तु रसाञ्जनम् ॥२७४॥
तदभावे तु कर्तव्यं दार्वीक्वाथसमुद्भवम् ।
कृतकं बालभैषज्यं दार्वीक्वाथोद्भवं तथा ॥ २७५ ॥
दार्वीक्वाथभवं कण्ठ(ण्ठ्यं)विकासि क्षिप्तमक्षिण यत् ।
तद्रसाञ्जनमुद्दिष्टं कषायं कटु तिक्तकम् ॥ २७६ ॥
किञ्चिदुष्णं कफहरं छेदनं लेखनं लघु ।
रक्तपित्तप्रशमनं नेत्ररोगविनाशनम् ॥ २७७ ॥
रसाञ्जनं तार्क्ष्यशैलं ज्ञेयं वर्याञ्जनं तथा ।
रसनाभं चाग्निसारं द्वादशाह्वयकीर्तितम् ॥ २७८ ॥

नीलाञ्जनम् ॥

नीलं नीलाञ्जनं चैव चक्षुष्यं वारिसम्भवम् ।
कपोतकं च कापोतं सम्प्रोक्तं शक्रभूमिजम् ॥ २७९ ॥

शीतं नीलाञ्जन प्रोक्तं कटुतिक्तकषायकम् ।
चक्षुष्यं कफवातघ्नं विषघ्नं च रसायनम् ॥ २८० ॥

सौवीराञ्जनम् ॥

सौवीरमञ्जनं स्निग्धमवघृष्टं शिलातले ।
अञ्जनाभं शिलारूपमेतच्छ्रेष्ठमकृत्रिमम् ॥ २८१ ॥

सौवीरमञ्जनं चैव रक्तपित्तहरं हितम् ।
विषहिध्माक्षिरोगघ्नं व्रणशोधनरोपणम् ॥ २८२ ॥

स्रोतोऽञ्जनम् ॥

स्रोतोद्भवं स्रोतनदीभवं च
स्रोतोऽञ्जनं वारिभवं तथाऽन्यम् ।
सौवीरसारं च कपोतसारं
वल्मीकशीर्षं मुनिसम्मिताह्वम् ॥ २८३ ॥

वल्मीकशिखराकारं भङ्गे नीलोत्पलद्युतिः ।
घर्षणे गैरिकच्छायं स्रोतोऽञ्जनमिदं भवेत् ॥ २८४ ॥

स्रोतोऽञ्जनं शीतकटुकषायं क्रिमिनाशनम् ।
रसायनं रसे योज्यं स्तन्यवृद्धिकरं परम् ॥ २८५ ॥

स्रोतोऽञ्जनं हिमं स्निग्धं तृष्णाहृत्स्वादु लेखनम् ।
नेत्र्यं हिध्मावमिच्छर्दिकफपित्तास्रकोपनुत् ॥ २८६ ॥

अहिफेनम् ॥

श्रान्तस्य मथनाक्षोभाद्वासुकेर्वदनोत्थिताः ।
द्वीपान्तरे पतन्ति स्म सविषास्स्वेदबिन्दवः ॥ २८७ ॥

यत्र यत्र पतन्ति स प्ररूढा गुल्मरूपतः ।
तेषु जातं तु निर्यासमफेनं ब्रुवते जनाः ॥ २८८ ॥

चतुर्विधमफेनं स्याज्जारणं मारणं तथा ।
धारणं सारणं चैव क्रमाद्वक्ष्यामि लक्षणम् ॥ २८९ ॥

श्वेतं तु जारणं प्रोक्तं कृष्णवर्णं तु मारणम् ।
धारणं पीतवर्णं च कर्बुरं सारणं तथा ॥ २९० ॥

जारणं जरयेदन्नं मारणं मृत्युदायकम् ।
धारणं च वयःस्तम्भं सारणं मलसारकम् ॥ २९१ ॥

अफेनं सन्निपातघ्नं वृष्यं बल्यं च मोहदम् ।
ग्रहणीमतिसारं च नाशयेत्षण्डतामपि ॥ २९२ ॥

पुष्पाञ्जनम् ॥

पुष्पाञ्जनं पुष्पकेतुः कौस्तुभः कुसुमाञ्जनम् ।
रीतिकं रीतिकुसुमं रीतिपुष्पं च पुष्पकम् ॥ २९३ ॥

पुष्पाञ्जनं हितं प्रोक्तं पित्तहिक्काप्रदाहनुत् ।
नाशयेद्विषकासार्तिसर्वनेत्रामयापहम् ॥ २९४ ॥

शङ्खः क्षुद्रशङ्खश्च ॥

शङ्खोऽर्णवभवः कंबुर्जलजः पावनध्वनिः ।
कुटिलोऽन्तर्महानादः श्वेतपीतस्सुनादकः ॥ २९५ ॥

सस्वनो दीर्घनादश्च बहुनादो हरप्रियः ।
क्षुल्लकः क्षुद्रशङ्खस्स्याच्छंबूको नखशङ्खकः ॥ २९६ ॥

शङ्खः कटुरसश्शीतः पुष्टिवीर्यबलप्रदः ।
गुल्मशूलकफश्वासनाशनो विषदोषहः ॥ २९७ ॥

क्षुल्लकः कटुकः स्निग्धश्शूलहारी च दीपनः ।

शुक्तिः ॥

शुक्तिर्मुक्ताप्रसूश्चैव महाशुक्तिश्च शुक्तिका ॥ २९८ ॥
मुक्तास्फोटस्तौतिकस्तु मौक्तिकप्रसवा च सा ।
ज्ञेया मौक्तिकसूश्चैव मुक्तामाता तथा स्मृता ॥२९९॥
मुक्ताशुक्तिः कटुस्स्निग्धा श्वासहृद्रोगहारिणी ।
शूलप्रशमनी रुच्या मधुरा दीपनी परा ॥ ३०० ॥

जलशुक्तिः ॥

जलशुक्तिः क्षुद्रशुक्तिः क्रिमिसुस्फुटिका च सा ।
जलशुक्तिः कटुस्स्निग्धा दीपनी गुल्मशूलनुत् ॥३०१॥
तथा विषहरा रुच्या पाचनी बलदायिनी ।

कपर्दः ॥

कपर्दको वराटश्च कपर्दश्च वराटिका ॥ ३०२ ॥
चराचरश्चरो वर्यो बालक्रीडनकश्च सः ।
पीताभा ग्रन्थिला पृष्ठे दीर्घवृत्ता वराटिका ॥ ३०३ ॥
रसवैद्यैर्विनिर्दिष्टा सा चराचरसंज्ञका ।
सार्धनिष्कभरा श्रेष्ठा निष्कभारा च मध्यमा ॥ ३०४॥
पादोननिष्कभारा च कनिष्ठा परिकीर्तिता ।
परिणामादिशूलघ्नी ग्रहणीक्षयनाशनी ॥ ३०५ ॥
कटूष्णा दीपनी वृष्या नेत्र्या वातकफापहा ।
रसेन्द्रजारणे प्रोक्ता विडद्रव्येषु शस्यते ॥ ३०६ ॥
तदन्ये पुंवराटास्स्युर्गुरवश्श्लेष्मपित्तलाः ।
कपर्दः कटुतिक्तोष्णः कर्णशूलव्रणापहः ॥ ३०७ ॥

गुल्मशूलामयघ्नश्च नेत्रदोषनिकृन्तनः ।

साबुणिः (सर्वक्षारः) ॥

सर्वक्षारो बहुक्षारस्समूहक्षारसाबुणिः ॥ ३०८ ॥

स्तोमक्षारो महाक्षारो मलारिः क्षारमेलकः ।
सर्वक्षारमतिक्षारं चक्षुष्यं बस्तिशोधनम् ॥ ३०९ ॥

उदावर्तक्रिमिघ्नं च बिडवद्वस्त्रशोधनम् ।

नवसारः ॥

करीरपीलुकाष्ठेषु पच्यमानेष्टकोद्भवः ॥ ३१० ॥

क्षारोऽसौ नवसारस्स्याच्चूलिकालवणाभिधः ।
रसेन्द्रजारणं लोहद्रावणं जठराग्निकृत् ॥ ३११ ॥

गुल्मप्लीहास्यशोषघ्नं भुक्तमांसादिजारणम् ।

सौराष्ट्री ॥

गोपित्तेन शतं वारान्सौराष्ट्रीं भावयेत्ततः ॥ ३१२ ॥
धमित्वा पातयेत्सत्वं क्रामणं चातिगुह्यकम् ।

आखुपाषाणः ॥

मूषकस्याभिधा पूर्वं पाषाणस्याभिधा ततः ॥ ३१३ ॥
आखुपाषाणनामायं लोहसङ्करकारकः ।
आखुग्रावा सरो रूक्षो वमिशीतज्वरापहः ॥ ३१४ ॥
तारकर्मणि संपूज्यो मेदोदुर्मांसकृन्तनः ।

सर्जरसः ॥

रालस्सर्जरसश्चैव यक्षधूपोऽग्निवल्लभः ॥ ३१५ ॥

देवेष्टस्सालनिर्यासस्सुरभिर्धूपवल्लभः ।
रालस्तु पञ्चधा प्रोक्तो रक्तः पीतस्सितोऽसितः ॥
नानावर्णश्च विज्ञेयः कृष्णस्तेषु गुणोत्तरः ।
रालस्तु शिशिरस्स्निग्धः कषायस्तिक्तको रसे ॥३१७॥
वातपित्तहरस्स्फोटकण्डूतिव्रणनाशनः ।

गुग्गुलुः ॥

दानवेन्द्रविजितान्पुरा सुरान्
भ्रष्टकान्तिधृतिधैर्यतेजसः ।
वीक्ष्य विष्णुरमृतं किलासृजत्
गुग्गुलुं बलवपुर्जयप्रदम् ॥ ३१८ ॥

मरुभूमिषु जायन्ते प्रायशः पुरपादपाः ॥ ३१९ ॥
भानोर्मयूखैस्सन्तप्ता ग्रीष्मे मुञ्चन्ति गुग्गुलुम् ।
गुग्गुलुः पञ्चधा प्रोक्तो महिषाक्षश्च नीलकः ॥ ३२० ॥
पद्मस्तु कुमुदश्चैव सुवर्णः पञ्चमः प्रिये ! ।
महिषाक्षश्च नीलश्च दन्तिनां गुणदायकौ ॥ ३२१ ॥
वाजिनां कुमुदः पद्मो नराणां स्वर्णवर्णकः ।
एरण्डबीजतैले वा तिलतैलेऽथवा घृते ॥ ३२२ ॥
पञ्चतिक्तशृतैः क्वाथैः शुद्धिं कुर्यात्सुगुग्गुलुम् ।
दोलायन्त्रे पचेत्तावद्यावन्निर्मलता भवेत् ॥ ३२३ ॥
एवं विशुद्धं सङ्ग्राह्यं तत्तद्योगेषु योजयेत् ।
पिटकागण्डमालाद्या नश्यन्ति च मरुद्गदाः ॥ ३२४ ॥

यवक्षारः ॥

यवक्षारोऽमृतः पाक्यो यवजो यवशूकजः ।

यवशूको यवाह्वश्च यवपाक्यो यवारु(ग्र)जः ॥ ३२५ ॥
यवक्षारः कटूष्णश्च कफवातोदरार्तिनुत् ।
आमशूलाश्मरीकृच्छ्रविषदोषहरः परः ॥ ३२६ ॥

सर्जक्षारः ॥

सद्यःक्षारस्सर्जिकश्च क्षारस्सज्जी सुवर्जिकः ।
सर्जीकः कटुरूक्षश्च तीक्ष्णो वातकफार्तिनुत् ॥३२७॥
गुल्मानाहवमिघ्नश्च मेहजाठररोगहृत् ।

लवणक्षारः ॥

लोणारं लवणोत्थं लवणासुरं च लवणमेदश्च ॥३२८॥
जतु(ल)जं लवणक्षारं लवणं च क्षारलवणं च ।
लोणकक्षारमत्युष्णं तीक्ष्णं पित्तप्रवृद्धिदम् ॥ ३२९ ॥
क्षारं लवणमीषच्च वातगुल्मादिशूलनुत् ।

वज्रकक्षारः ॥

वज्रकं वज्रकक्षारं क्षारश्रेष्ठं विदारकम् ॥ ३३० ॥
सारं चन्दनसारं च धूमोत्थं धूमजं गजाः ।
वज्रकक्षारमत्युष्णं तीक्ष्णं क्षारं च रोधनम् ॥ ३३१ ॥
गुल्मोदरार्तिविष्टंभशूलप्रशमनं परम् ।

सामुद्रलवणम् ॥

सामुद्रकं तु सामुद्रं सामुद्रलवणं शिवम् ॥ ३३२ ॥
सामुद्रं लघु हृद्यं च वारितासृजपित्तलम् ।
विदाहि कफवातघ्नं दीपनं रुचिकृत्प्रियम् ॥ ३३३ ॥

सैन्धवम् ॥

सैन्धवं स्याच्छीतशिवं नादेयं सिन्धुजं शिवम् ।
शुद्धं शिवात्मकं पथ्यं माणिमन्थं नवाभिधम् ॥३३४॥

सैन्धवं लवणं वृष्यं चक्षुष्यं दीपनं रुचि ।
पूतं नस्यात्तिदोषघ्नं व्रणदोषविबन्धजित् ॥ ३३५ ॥

सैन्धवं द्विविधं ज्ञेयं सितं रक्तमिति क्रमात् ।
रसवीर्यविपाकेषु गुणाढ्यं पूतनं सितम् ॥ ३३६ ॥

काचलवणम् ॥

नीलकाचोद्भवं काचति(नी) लकं चैव(काच)सम्भवम् ।
काकसौवर्चलं काचलवणं पाक्यजं स्मृतम् ॥ ३३७ ॥

काचोत्थं हृद्यगन्धं च तत्काललवणं तथा ।
कुरुविन्दं काचमलं कतिमं च चतुर्दश ॥ ३३८ ॥

काचाख्यं लवणं रुच्यमीषत्क्षारं सपित्तलम् ।
दाहदं कफवातघ्नं दीपनं गुल्मशूलहृत् ॥ ३३९ ॥

विडलवणम् ॥

बिडं च विडकं खण्डं कृतक्षारं च आसुरम् ।
सुपाक्यं लवणं खण्डं धूर्तं कृत्रिमकं दश ॥ ३४० ॥

बिडमुष्णं सलवणं दीपनं वातनाशनम् ।
रुच्यं चाजीर्णशूलघ्नं गुल्ममेहविनाशनम् ॥ ३४१ ॥

सौवर्चललवणम् ॥

सौवर्चलं च रुचक तिलकं हृद्यगन्धकम् ।
अक्षं च कृष्णलवणं रुच्यं कोद्रविकं तथा ॥ ३४२ ॥

सौवर्चलं लघु क्षारं कटूष्णं गुल्मशूलनुत् ।
ऊर्ध्ववातामशूलार्तिविबन्धारोचकं जयेत् ॥ ३४३ ॥

अम्लवेतसः ॥

अम्लोऽम्लवेतसो वेधी रसाम्लो वीतवेतसः ।
वेतसारश्चाम्लसारश्शरवेधी च वेधकः ॥ ३४४ ॥
नीलश्च भेदनो भेदी राजाम्लश्चाम्लभेदनः ।
अम्लाङ्कुशो रक्तसारः फलाम्लश्चाम्लनायकः ॥
सहस्रवेधी वीराम्लो गुल्मकेतुर्धराक्षिधा ।
शङ्खमांसादिद्रावी स्याद्द्विधा चैवाम्लवेतसः ॥३४६॥
अम्लवेतसमत्यम्लं कषायोष्णामवातजित् ।
कफार्शस्समगुल्मामरोचकहरं परम् ॥ ३४७ ॥

काचः ॥

काचस्तुषारसारश्च रसखोटमलापहः ।
शृङ्गारी चाभ्रधारी च सर्वनेत्रामयापहा ॥ ३४८ ॥

छगणम् ॥

पिष्टकं छगणश्छाणमुत्पलं च वनोत्पलम् ।
करिण्डोपलशाठी च वरटी छगणाभिधा ॥ ३४९ ॥
रसलोहदोषहारि ख्यातं तद्भस्म दुरितसंहृतये ।

अङ्गाराः ॥

शिखित्राः पावकोच्छिष्टा अङ्गाराः कोलिशा मताः ॥
कोकिलाश्चेति चाङ्गारा निर्वाणाः पयसा विना ।

सिकता ॥

सिकता प्रवाहजनिता सिक्ता पानीयचूर्णका सूक्ष्मा ॥

सा वालुका श्रमघ्नी संसेकात्सन्निपातघ्नी ।

उपरसानां शोधनम्

कासीसं भावयेद्धर्मे दिनं जम्बीरजैर्द्रवैः ॥ ३५२ ॥

शुध्यते टङ्कणं गै(गौ)री कङ्कुष्ठं च वराटिका ।
शङ्खं नीलाञ्जनं चैव पृथक् शोध्यं दिने दिने ॥

गोदुग्धैस्त्रिफलाक्वाथैर्भृङ्गद्रावैश्शिलाजतु ।
मर्दयेदायसे पात्रे दिनैकं तच्च शुध्यति ॥ ३५४ ॥

मेषीक्षीरेण दरदमम्लवर्गैश्च भावितम् ।
सप्तवारं प्रयत्नेन शुद्धिमायाति निश्चयम् ॥ ३५५ ॥

सूर्यावर्तं वज्रकन्दं कदली देवदालिका ।
शिग्रुः कोशातकी वन्ध्या काकमाची च वालुका ॥

आसामेकरसेनैव त्रिक्षारैर्लवणैस्सह ।
भावयेदम्लवर्गैश्च दिनमेकं प्रयत्नतः ॥ ३५७ ॥

सौवीरं कान्तपाषाणः शुद्धा भूनागमृत्तिका ।
सर्वे उपरसाश्चाथ पृथग्भाव्यं दिनं दिनम् ॥ ३५८ ॥

ततः पाच्यं च तद्द्रावैर्दोलायन्त्रे दिनं सुधीः ।
शुध्यन्ते नात्र सन्देहस्सर्वे उपरसाः पृथक् ॥ ३५९ ॥

पुनर्नवामेघनादकपिजम्बीरतिन्दुकैः ।
अगस्तिपुष्पकुमुदयवचिञ्चाम्लवेतसैः ॥ ३६० ॥

वनसूरणभूधात्रीमण्डूकीकरवीरकैः ।
कारवल्लीक्षीरकन्दरक्तोत्पलशमीघनैः ॥ ३६१ ॥

मेषशृङ्गीशशवसाशक्रवारुणिटङ्कणैः ।
तैलमत्स्यवसाव्योषद्रवैरेतैस्सकाञ्जिकैः ॥ ३६२ ॥

एतैस्समस्तैर्व्यस्तैर्वा डोलायन्त्रे दिनत्रयम् ।
अभ्रपत्राद्युपरसान्शुद्धिहेतोः प्रपाचयेत् ॥ ३६३ ॥

॥ इति श्रीभैरवोक्ते आनन्दकन्दे क्रियाकरणविश्रान्तौ प्रथमोल्लासः

॥ द्वितीय उल्लासः ॥

सुवर्णम् ॥

श्रीभैरवः—

स्वर्णादिसर्वलोहानामुत्पत्त्यादिक्रमं ब्रुवे ।

स्वर्णं सुवर्णकनकोज्ज्वलकाञ्चनानि
कल्याणहाटकहिरण्यमनोहराणि ।
गाङ्गेयगैरिकमहारजताग्निवीर्य-
रुक्मानि हेमतपनीयकभास्वराणि ॥ १ ॥

जाम्बूनदाष्टापदजातरूप-
पिञ्जानचामीकरकर्बुराणि ।
कार्तस्वरापिञ्जरवर्णभूरि-
तेजांसि दीप्तामलदीपि(पीत)कानि ॥ २ ॥

मङ्गल्यसौमेरवशातकुम्भ-
शृङ्गारचन्द्रारजजांबवानि ।
आग्नेयनिष्काग्निशिखानि चेति
नेत्राब्धिनिर्धारितहेमनाम ॥ ३ ॥

[सुवर्णभेदाः ।]

प्राकृतं सहजं वह्निसम्भूतं खनिसम्भवम् ॥ ४ ॥

रसेन्द्रवेधसञ्जातं स्वर्णं पञ्चविधं स्मृतम्।
ब्रह्माण्डं संवृतं येन रजोगुणभुवा खलु॥ ५॥

तत्प्राकृतमिति प्रोक्तं देवानामपि दुर्लभम्।
ब्रह्मा येनाऽऽवृतो जातस्सुवर्णं सहजं हि तत्॥ ६॥

विसृष्टमग्निना शैवं तेजः पीतं सुदुःसहम्।
अभूत्स्वर्णं तदुद्दिष्टं सुवर्णं वह्निसंभवम्॥ ७॥

एतत्स्वर्णत्रयं दिव्यं वर्णैष्षोडशभिर्युतम्।
धारणादेव तत्कुर्याच्छरीरमजरामयम्॥ ८॥

गिरीणां खनिसम्भूतं तत्स्वर्णं खनिजं स्मृतम्।
तच्चतुर्दशवर्णाऽऽढ्यं भक्षितं सर्वरोगहृत्॥ ९॥

रसेन्द्रवेधसम्भूतं तद्वेधजमुदाहृतम्।
रसायनं महाश्रेष्ठं पवित्रं वेधजं हि तत्॥ १०॥

रक्ताभं पीतवर्णं च द्विविधं काञ्चनं भवेत्।

[ग्राह्याग्राह्यसुवर्णस्वरूपम्।]

दाहे रक्तं सितं छेदे निकषे कुङ्कुमप्रभम्॥ ११॥

गुरु स्निग्धं मृदु स्वच्छं निर्दलं रक्तपीतकम्।
हेम षोडशवर्णाऽऽढ्यं शस्यते देहलोहयोः॥ १२॥

श्वेताङ्गं कठिनं रूक्षं विवर्णं समलं दलम्।
दाहे श्वेतासितं श्वेतं निकषे लघु च व्रजेत्॥ १३॥

न शुद्धं न मृतं स्वर्णं रोगवर्गं करोति च।
सौख्यं वीर्यं बलं हन्ति तस्माच्छुद्धिरुदीर्यते॥ १४॥

सुवर्णशुद्धिः॥

वल्मीकमृत्तिका धूमं गैरिकं चेष्टका पटु।

इत्येते मृत्तिकाः पञ्च जम्बीरैर्वाऽऽरनालकैः ॥ १५ ॥

पिष्ट्वा लिम्पेत्स्वर्णपत्रं भस्मच्छन्नं तु कर्परे ।
यावद्द्रवं पुटं तावत्कुर्यात्तेन विशुध्यति ॥ १६ ॥

मृत्तिकां मातुलुङ्गाम्लैः पञ्चवासरभाविताम् ।
सभस्मलवणं हेम शोधयेत्पुटपाकतः ॥ १७ ॥

भावयेन्मातुलुङ्गाम्लैस्त्रिदिनं पञ्चमृत्तिकाम् ।
सैन्धवं भूमि(धूम)भस्माभिः(पि)स्वर्णं शुध्यति पूर्ववत् ॥

तैले तक्रे गवां मूत्रे ह्यारनाले कुलुत्थके ।
क्रमान्निषेचयेत्तप्तं सप्तवारं द्रवैर्द्रवैः ॥ १९ ॥

स्वर्णादिलोहपत्राणां शुद्धिरेषा प्रशस्यते ।
द्रावितौ नागवङ्गौ च तद्वत्सिञ्चेद्विशुद्धये ॥ २० ॥

सुवर्णं ढा(क्षा)लयेत्पूर्वं काञ्चनारोद्भवे रसे ।
सप्तवारं ततः कर्मयोग्यं हेम भवेद्ध्रुवम् ॥ २१ ॥

सुवर्णभस्म ॥

[प्रथमः प्रकारः ।]

नागचूर्णं शिलायुक्तं वज्रीक्षीरसमन्वितम् ।
लेपनात्पुटयोगाच्च हेमपत्राणि लेपयेत् ॥ २२ ॥

मृतं नागं स्नुहीक्षीरैरथवाऽम्लेन केनचित् ।
पिष्ट्वा लेप्यं स्वर्णपत्रं रुध्वा गजपुटे पचेत् ॥ २३ ॥

आदाय पेषयेदम्ले मृतनागं चाष्टमांशकम् ।
पचेद्गजपुटे रुध्वा पूर्ववन्नागसंयुतम् ॥ २४ ॥

एवं पुनः पुनः पाकादष्टधा म्रियते ध्रुवम् ।

[द्वितीयः प्रकारः।]

शुद्धसूतसमं गन्धं माक्षिकं च सहाम्लकैः ॥ २५ ॥
अष्टभिश्च पुटैर्हेम म्रियते पूर्ववत्क्रिया।

[तृतीयः प्रकारः।]

शुद्धसूतसमं स्वर्णं खल्वे कुर्याच्च गोलकम् ॥ २६ ॥
ऊर्ध्वाधो गन्धकं दत्वा सर्वतुल्यं निरुध्य च।
त्रिंशद्वनोत्पलैर्दद्यात्पुटानेवं चतुर्दश ॥ २७ ॥
निरुत्थं जायते भस्म गन्धं देयं पुनः पुनः।

[चतुर्थः प्रकारः।]

स्वर्णमावर्त्य तोलैकं माषैकं शुद्धनागकम् ॥ २८ ॥
क्षिप्त्वाऽऽदाय तु तच्चूर्णं तत्तुल्ये गन्धमाक्षिके।
अम्लेन मर्दयेद्यामं रुध्वा लघुपुटे पचेत् ॥ २९ ॥
गन्धं पुनः पुनर्देयं म्रियते दशभिः पुटैः।

[रसादिभिः स्वर्णमारणम्।]

हेमपत्राणि कुर्वीत विलिंपेद्रसभस्मना ॥ ३० ॥
अम्लपिष्टेन पुटयेद्धेम निर्जीवतां व्रजेत्।
अथवा ताप्यपुटितं स्वर्णं गच्छति भस्मताम् ॥ ३१ ॥
यद्वा मृतेन करिणा शिलायोगेन भस्मयेत्।
अथवा मृतवज्रेण योगिन्यंशविलेपितम् ॥ ३२ ॥
भस्मतां यात्युपरसै रसैश्चैव महारसैः।
अम्लपिष्टैर्विलिप्तं च पुटितं याति भस्मताम् ॥ ३३ ॥

[पञ्चमः प्रकारः ।]

स्वर्णस्य द्विगुणं सूतं याममम्लेन मर्दयेत् ।
आरोटं माक्षिकं क्षिप्त्वा मूषायां स्वर्णतुल्यकम् ॥३४॥
तत्पृष्ठे मर्दितं हेम तत्पृष्ठे शुद्धमाक्षिकम् ।
देयं स्वर्णसमं तच्च पृष्ठे गन्धं च तत्समम् ॥ ३५ ॥
सर्वं च चूर्णितं दद्याद्रुध्वा मूषां धमेद्दृढम् ।
स्वभावशीतलं ग्राह्यं भस्म तद्भागपञ्चकम् ॥ ३६ ॥
टङ्कणं श्वेतकाचं च भागैकैकं प्रपेषयेत् ।
त्रितयं मधुनाऽऽज्येन मेलकं गोलकीकृतम् ॥ ३७ ॥
धान्याभ्रस्य च भागैकमधश्चोर्ध्वं च दापयेत् ।
निरुध्य तद्धमेद्गाढं मूषायां घटिकाद्वयम् ॥ ३८ ॥
निरुत्थं जायते भस्म तत्तद्योगेषु योजयेत् ।

[षष्ठः प्रकारः ।]

हेम्नः पादं मृतं सूतं पिष्टमम्लेन केनचित् ॥ ३९ ॥
पत्रे लिप्त्वा पुटे पच्यादष्टभिर्म्रियते ध्रुवम् ।
शुद्धानां सर्वलोहानां मारणे रीतिरीदृशी ॥ ४० ॥

[सप्तमः प्रकारः ।]

शुद्धमाक्षीकभागैकं भागं चारोटमाक्षिकम् ।
द्विभागं सूतकं क्षिप्त्वा त्र्यमम्लेन मर्दयेत् ॥ ४१ ॥
भागैकं हेमपत्रं च लिप्त्वा चाम्लेन मर्दयेत् ।
तद्गोलं पातनायन्त्रे हठाद्यामलयं पचेत् ॥ ४२ ॥
इत्येवं म्रियते स्वर्णं निरुत्थं नात्र संशयः ।

[अष्टमः प्रकारः ।]

यवचिञ्चारजोवृक्षमल्लातैष्टङ्कणेन च ॥ ४३ ॥

लिप्त्वा स्वर्णस्य पत्राणि रुध्वा गजपुटे पचेत् ।
तैर्द्रवैः(कृतया) पिष्ट्या म्रियते सप्तधा पुटैः ॥ ४४ ॥

[नवमः प्रकारः]

पीलुकङ्कुष्ठबुक्काणसौवर्चलमपेषितम् ।
लिप्त्वा स्वर्णस्य पत्राणि म्रियते सप्तभिः पुटैः ॥ ४५॥

सुवर्णस्य गुणाः ॥

सुवर्णं बृंहणं स्निग्धं मधुरं रसपाकयोः ।
विषदोषहरं शीतं सकषायं सतिक्तकम् ॥ ४६ ॥

हृद्यं कान्तिप्रदं बल्यं स्रंसनं गुरु लेखनम् ।
बुद्धिमेधास्मृतिकरं व्रणघ्नं वाग्विशुद्धिदम् ॥ ४७ ॥

क्षयोन्मादप्रशमनं चक्षुष्यं च रसायनम् ।
त्रिदोषशमनं सौम्यमायुष्यं रुचिरं शुचि ॥ ४८ ॥

प्रज्ञावीर्यस्वरकरमैश्वर्यं धारणाद्भवेत् ।

इति श्रीभैरवोक्ते आनन्दकन्दे क्रियाकरणविश्रान्तौ द्वितीयोल्लासः ॥

॥ तृतीय उल्लासः ॥

रजतम् ॥

श्रीभैरवः—

रौप्यं शुभ्रं वसुश्रेष्ठं रुचिरं चन्द्रलोहकम् ।
रजतं तप्तरूप्यं च चन्द्रभूतिस्तु रौप्यकम् ॥ १ ॥
कलधौतं च सौधं च चन्द्रहासं च तारकम्

[रजतभेदाः ।]

सहजं खनिसञ्जातं कृत्रिमं च त्रिधा मतम् ॥ २ ॥
रजतं पूर्वपूर्वं हि स्वगुणैरुत्तरोत्तरम् ।
कैलासाद्यद्रिसम्भूतं सहजं रजतं भवेत् ॥ ३ ॥
तत्स्पृष्टं हि महाव्याधिनाशनं देहिनां भवेत् ।
हिमाचलादिकूटेषु यद्रूप्यं जायते हि तत् ॥ ४ ॥
खनिजं कथ्यते तज्ज्ञैः परमं हि रसायनम् ।
श्रीरामपादुकान्यस्तं वङ्गं यद्रूप्यतां गतम् ॥
तत्पादरूप्यमित्युक्तं कृत्रिमं सर्वरोगनुत् ।

[ग्राह्याग्राह्यरजतस्वरूपम् ।]

घनं स्निग्धं गुरु स्निग्धं दाहे छेदे सितं मृदु ॥ ६ ॥
वर्णाढ्यं चन्द्रवत्स्वच्छं दाहे छेदे समप्रभम् ।
शङ्खाभं मसृणं स्फोटरहितं रजतं शुभम् ॥ ७ ॥
दाहे रक्तं च पीतं च कृष्णं रूक्षं स्फुटं लघु ।
स्थूलाङ्गं कर्कशाङ्गं च रजतं त्याज्यमष्टधा ॥ ८ ॥

कठिनं कृत्रिमं रूक्षं विवर्णं समलं दलम् ।
दाहे छेदे घने नष्टं मध्यमं रजतं मतम् ॥ ९ ॥

करोति तापं विड्भेदं क्षयं शुक्रबलायुषाम् ।
न शुद्धं न मृतं तारं तस्माच्छुद्धं च मारयेत् ॥१०॥

रजतशुद्धिः ॥

नागेन टङ्कणेनैव द्रावितं शुद्धिमृच्छति ।
तारं त्रिवारं निक्षिप्तं तैले ज्योतिष्मतीभवे ॥ ११ ॥

तप्तं तप्तं तारपत्रं सेचयेच्छुद्धिमाप्नुयात् ।
पिशाचसंभवे यद्वा प्रक्षिप्तं शुद्धिमाप्नुयात् ॥ १२ ॥

रजतं दोषनिर्मुक्तं नागोत्तीर्णं समाहरेत् ।
श्वेतकुम्भोद्भवे नीरे ढालयेत्सप्तवारकान् ॥ १३ ॥

रजतभस्म ॥

[प्रथमः प्रकारः ।]

कुरण्डमुनिपुष्पोत्थसलिलैस्संप्रमर्दयेत् ।
तारपत्राणि लिप्तानि पुटयेच्च वनोत्पलैः ॥ १४ ॥
म्रियते नाऽत्र सन्देहः

[द्वितीयः प्रकारः ।]

लिप्तं वा रसभस्मना ।
अम्लवर्गप्रलिप्तेन पूर्ववत्पुटयोगतः ॥ १५ ॥

म्रियते

[तृतीयः प्रकारः ।]

तालकं सूतं वज्रमम्लेन पेषयेत् ।
तारपत्राणि संलिप्य पुटित्वा भस्मतां नयेत् ॥ १६ ॥

म्रियते गन्धयोगाद्यैर्वैष्णवेन विपद्यते(मर्द्य तत्) ।

[चतुर्थः प्रकारः ।]

स्नुहीक्षीरैः पचेत्ताप्यं तारपत्राणि लेपयेत् ॥ १७ ॥
रुध्वा गजपुटे पक्त्वा पूर्वोक्तैः पाचयेत्पुनः ।
चत्वारिंशत्पुटैरेवं पचेत्तारं मृतं भवेत् ॥ १८ ॥

[पञ्चमः प्रकारः ।]

भूधात्रीं माक्षिकं तुल्यं पिप्पलीं सैन्धवाम्लकैः ।
लिप्त्वा तारस्य पत्राणि रुध्वा सप्तपुटैः पचेत् ॥ १९ ॥
द्रवैः पुनः पुनः पिष्ट्वा म्रियते नाऽत्र संशयः ।

[षष्ठः प्रकारः ।]

लिकुचद्रवसूताभ्यां तारपिष्टीं प्रकल्पयेत् ॥ २० ॥
रुध्वाऽधो गन्धकं दत्वा मूषागर्भे निरुध्य च ।
स्वेदयेद्वालुकायन्त्रे दिनमेकं दृढाग्निना ॥ २१ ॥
स्वाङ्गशीतलतां पिष्टिं साम्लतालेन मर्दितम् ।
पुटेद्द्वादशवाराणि भस्मीभवति रूप्यकम् ॥ २२ ॥

[सप्तमः प्रकारः ।]

माक्षिकं चूर्णलुङ्गाम्लमर्दितं पुटितं शनैः ।
त्रिंशद्वारेण तत्तारं निरुत्थं भस्म जायते ॥ २३ ॥
रागस्स्यात्सर्वलोहानां पुटाधिक्ये न संशयः ।

[अष्टमः प्रकारः ।]

तारपत्रं चतुर्भागा भागैकं शुद्धतालकम् ॥ २४ ॥

मर्द्यं जम्बीरजैर्द्रावैस्तारपत्राणि लेपयेत्।
शोषयेदन्धयेत्तं च त्रिंशद्वनोत्पलैः पुटेत् ॥ २५ ॥
चतुर्दशपुटैरेवं निरुत्थं म्रियते ध्रुवम्।

[नवमः प्रकारः।]

रौप्यपत्रं चतुर्भागा भागैकं मृतवङ्गकम् ॥ २६ ॥
अथवा गन्धभागैकं लेप्यं जम्बीरपेषितैः।
रुध्वा त्रिभिः पुटैः पाच्यं पञ्चविंशद्वनोत्पलैः ॥ २७ ॥
म्रियते नाऽत्र सन्देहो गन्धो देयः पुनः पुनः।

[दशमः प्रकारः।]

रसगन्धौ समं कृत्वा काकतुण्डस्य मूलकम् ॥ २८ ॥
मर्दयेन्महिषीक्षीरैः पिष्टिं तां क्षालयेज्जलैः।
हरिद्रागोलके क्षिप्त्वा गोलं हयपुरीषके ॥ २९ ॥
क्षिप्त्वा दिनैकविंशच्च तद्गर्भादुद्धरेत्पुनः।
तत्पिष्ट्वा तारपत्राणि लेप्यमम्लेन केनचित् ॥ ३० ॥
पुटैर्विंशतिभिर्भस्म जायते नात्र संशयः।
भस्मना ह्यम्लपिष्टेन लिम्पेत्ताम्रमयं क्षुरम् ॥ ३१ ॥
जायते तं मृतं विद्याद्भस्म हाटकतारयोः।

[रजतस्य गुणाः।]

रौप्यं स्निग्धं कषायाम्लं विपाके मधुरं रसम् ॥ ३२ ॥
वयसस्थापनं शीतं लेखनं वातपित्तजित्।
वृष्यं रुचिकरं बल्यं जठराग्निप्रदीपनम् ॥ ३३ ॥

॥ इति श्रीभैरवोक्ते आनन्दकन्दे क्रियाकरणविश्रान्तौ तृतीयोल्लासः ॥

॥ चतुर्थ उल्लासः ॥

ताम्रम् ॥

श्रीभैरवः—

ताम्रं म्लेच्छमुखं शुल्बं तपनेष्टमुदुम्बरम् ।
त्र्यंबकं चारविन्दं च रविलोहं रविप्रियम् ॥ १ ॥

रक्तं नैपालकं चैव रक्तधातुः करेन्दुधा ।

[ताम्रभेदाः ।]

म्लेच्छं नेपालकं चेति तयोर्नेपालमुत्तमम् ॥ २ ॥

नेपालादन्यखन्युत्थं म्लेच्छमित्यभिधीयते ।

[ग्राह्याग्राह्यताम्रस्वरूपम् ।]

सुस्निग्धं मृदुलं शोणं घनघातक्षमं गुरु ॥ ३ ॥

निर्विकारं गुरुश्रेष्ठं ताम्रं नेपालमुच्यते ।
सितकृष्णारुणच्छायं वामभेदि कठोरकम् ॥ ४ ॥

क्षालितं च पुनः कृष्णमेतन्म्लेच्छकताम्रकम् ।
पाण्डुरं कृष्णशोणं च लघु स्फुटनसंयुतम् ॥ ५ ॥

रूक्षाङ्गं सदलं ताम्रं नेष्यते रसकर्मणि ।

उत्क्लेदमोहभ्रमदाहभेदाः
ताम्रस्य दोषाः खलु दुर्धरास्ते ।
विशोधनात्तद्विगतस्वदोषं
सुधासमं स्याद्रसवीर्यपाके ॥ ६ ॥

वान्तिमूर्च्छाभ्रमोन्मादनानारुक्कुष्ठशूलकृत् ॥ ७ ॥

आयुःकान्तिबलभ्रंशकरं धातुप्रदूषणम् ।
न शुद्धं न मृतं ताम्रं तेन संशोध्य मारयेत् ॥ ८ ॥

ताम्रशुद्धिः ॥

ताम्रं क्षाराम्लसंयुक्तं द्रावितं त(लि)सगैरिकम् ।
निक्षिप्तं महिषीतक्रछगणे सप्तवारकम् ॥ ९ ॥

पञ्चदोषविनिर्मुक्तं सप्तवारेण जायते ।
ताम्रनिर्द(र्म)लपत्राणि लिप्त्वा नि(नै)म्बवसिन्धुना ॥

ध्मात्वा सौवीरके क्षेपाद्विशुध्यत्यष्टवारतः ।
निंव्वंबुपट्टुलिप्तानि तापितान्यष्टवारकम् ॥ ११ ॥

विशुद्ध्यन्त्यर्कपत्राणि निर्गुण्डीरसमर्दनात् ।
कुमारीपत्रमध्ये तु शुल्बपत्रं निवेशितम् ॥ १२ ॥

पुटितं दोषनिर्मुक्तं पाण्डुरं च प्रजायते ।
इत्थं विशोधितं ताम्रं सर्वदोषविवर्जितम् ॥ १३ ॥

भवेद्रसायनकरं देहलोहकरं परम् ।
इमां शुद्धिं विजानीयाच्छिवो वा नन्दिकेश्वरः ॥ १४ ॥

बलिना निहतं ताम्रं सप्तवारं समुत्थितम् ।
सर्वदोषविनिर्मुक्तं भवेदमृतसन्निभम् ॥ १५ ॥

स्नुह्यर्कक्षीरलवणकाञ्जिकैस्ताम्रपत्रकम् ।
लिप्त्वा प्रताप्य निर्गुण्डीरसैस्सिञ्च्यात्पुनः पुनः ॥

वारान्द्वादशतश्शुद्धं लेपात्तापाच्च सेचनात् ।
खटिकां लवणं तक्रैरारनालैश्च पेषयेत् ॥ १७ ॥

तेन लिप्तं ताम्रपत्रं तप्तं तप्तं निषेचयेत् ।
षड्वारमम्लतक्रान्तर्निर्गुण्ड्याश्च विशुद्धये ॥ १८ ॥

तप्तानि ताम्रपत्राणि सेचयेत्तिक्तकारसैः ।
लिप्त्वाऽम्लतक्रलवणकाञ्जिकेन पुनः पुनः ॥ १९ ॥
तप्तं तप्तं त्रिधा सिञ्च्याच्छुद्धिमायाति निश्चयम् ।
गोमूत्रेण पचेद्यामं ताम्रपात्रं दृढाग्निना ॥ २० ॥
शुध्यते नाऽत्र सन्देहो मारणं चाप्यथोच्यते ।

ताम्रभस्म ॥

[प्रथमः प्रकारः ।]

गन्धेन ताम्रतुल्येन ह्यम्लपिष्टेन लेपयेत् ॥ २१ ॥
कण्टवेधीकृतं पत्रमन्धयित्वा पुटे पचेत् ।
उद्धृत्य चूर्णयेत्तस्मिन्पादांशं गन्धकं क्षिपेत् ॥ २२ ॥
जम्बीरैरारनालैर्वा मृगदूर्वाथवाद्रवैः ।
पिष्ट्वा पिष्ट्वा पचेद्रुद्धं सगन्धं च चतुष्पुटैः ॥ २३ ॥
मातुलुङ्गद्रवैः पिष्ट्वा पुटमेकं प्रदापयेत् ।
सितशर्करयाऽप्येकं पुटं देयं मृतं भवेत् ॥ २४ ॥

[द्वितीयः प्रकारः ।]

पाषाणभेदिमत्स्याक्षीद्रवैर्द्विगुणगन्धकम् ।
ताम्रस्य लेपयेत्पिष्टिं(त्पत्रं) रुध्वा गजपुटे पचेत् ॥
समांशेन पुनर्गन्धं दत्वा द्रावैश्च लोलयेत् ।
एवं सप्तपुटैः पक्वं ताम्रभस्म भवेद्ध्रुवम् ॥ २६ ॥

[तृतीयः प्रकारः ।]

ताम्रस्य त्रिगुणं सूतं जम्बीराम्लेन मर्दयेत् ।
आदौ मूषान्तरे क्षिप्त्वा धुत्तूरस्य तु पत्रकम् ॥ २७ ॥

तत्पृष्ठे ताम्रतुल्यं च गन्धकं चूर्णितं क्षिपेत् ।
तत्पृष्ठे मर्दितं ताम्रं पूर्वतुल्यं च गन्धकम् ॥ २८ ॥
आच्छाद्य धूर्तपत्रैस्तु रुध्वा गजपुटे पचेत् ।
स्वाङ्गशीतं ततश्चूर्णं मृतं भवति निश्चितम् ॥ २९ ॥

[चतुर्थः प्रकारः ।]

किञ्चिद्गन्धेन वाऽम्लेन क्षालयेत्ताम्रपत्रकम् ।
ताम्रपादेन सूतेन सार्द्रं(र्धं) पत्रं प्रलेपयेत् ॥ ३० ॥
ताम्रद्विगुणगन्धेन चाम्लपिष्टेन तत्पुनः ।
लिप्त्वा ह्यधोर्ध्वगं देया सुपिष्टा चाम्लपर्णिका ॥३१॥
तत्पिण्डं भाण्डगर्भे तु रुध्वा चुल्ल्यां विपाचयेत् ।
यामैकं ताम्रपाकेन भस्मीभवति निश्चितम् ॥ ३२ ॥

[पञ्चमः प्रकारः ।]

सूतमेकं द्विधा गन्धं यामं कन्याविमर्दयेत् ।
द्वयोस्तुल्ये(ल्यं) ताम्रपत्रे(त्रं) स्थाल्या गर्भे निरोधयेत् ॥
सम्यङ्मृल्लवणैस्सन्धि पार्श्वे भस्म निधापयेत् ।
चतुर्यामं पचेच्चुल्यां पात्रपृष्ठे सगोमयम् ॥ ३४ ॥
जलं पुनः पुनर्देयं स्वाङ्गशीतं विचूर्णयेत् ।
म्रियते नाऽत्र सन्देहस्सर्वयोगेषु योजयेत् ॥ ३५ ॥

[षष्ठः प्रकारः ।]

जीर्णं ताम्रं समादाय तत्र चैतान्विनिक्षिपेत् ।
वङ्गं घोषं गजं तीक्ष्णमारं कान्तं च षट् समान् ॥३६॥
प्रत्येकं ताम्रमानेन सर्वानेकत्र धामयेत् ।

वङ्कनालेन तावत्तद्यावदर्कोऽवशिष्यते ॥ ३७ ॥

तमर्कं ढालयेत्पूर्वं निर्गुण्डीसलिलान्तरे ।
सप्तवारांश्च तन्मूलचूर्णमर्के प्रवापयेत् ॥ ३८ ॥

तेन ताम्रेण कुर्वीत वटिकामव्रणां शुभाम् ।
द्विगुणं गन्धकं लिप्त्वा बलेस्त्र्यंशं च पारदम् ॥३९॥

शुद्धं हिङ्गुलजं वाऽपि मर्दयेद्बीजपूरकैः ।
जम्बीरजैर्वा लिकुचनीरैस्सम्यक्प्रमर्दयेत् ॥ ४० ॥

त्रिदिनं तद्विशोष्याऽथ भाण्डान्तस्तन्निवेशयेत् ।
उपरिष्टात्ताम्रघटीमधोवक्त्रां निधाय च ॥ ४१ ॥

दृढं विलेपयेत्पश्चात्कटोरीं मृण्मयीं क्षिपेत् ।
अतिप्रयत्नाल्लिम्पेत्तां यथा वारा न भिद्यते ॥ ४२ ॥

अधिचुल्लि ततो दत्वा पूरयित्वा जलैरधः ।
प्रज्वालयेद्वीतिहोत्रं मृदुमध्योत्तमक्रमात् ॥ ४३ ॥

दिनानि षट् समादाय स्वाङ्गशीतं तु पात्रकम् ।
निर्भिद्य शुल्बं गृह्णीत मृतं सूतेन यत्नतः ॥ ४४ ॥

ततः खल्वे विचूर्ण्यैतद्यथेष्टं विनियोजयेत् ।

[ताम्रभस्मशुद्धिः ।]

नानाविधं मृतं ताम्रं शुद्ध्यर्थं भागपञ्चकम् ॥ ४५ ॥

भागैकं श्वेतकाचं च भागं श्वेतं च टङ्कणम् ।
मूषायां मिश्रितं क्षिप्त्वा भागैकं चाभ्रपत्रकम् ॥ ४६ ॥

ऊर्ध्वं दत्वा निरुध्याऽथ ध्माते ग्राह्यं सुशीतलम् ।
निर्दोषं तु भवेत्ताम्रं सर्वरोगहरं भवेत् ॥ ४७ ॥

अथवा मारितं ताम्रमम्लेनैकेन मर्दयेत् ।

तद्गोलं सूरणस्यान्तः रुध्वा सर्वत्र लेपयेत् ॥ ४८ ॥
शुष्कं गजपुटे पच्यात्सर्वदोषहरं भवेत् ।
वान्तिं भ्रान्तिं विरेकं च न करोति कदाचन ॥४९॥

[सप्तमः प्रकारः ।]

विलिप्य लिकुचद्रावपिष्टगन्धाश्मपङ्कतः ।
ताम्रपत्राणि सञ्छाद्य स्थालीमध्ये निरुध्य च ॥ ५० ॥
याममात्रं पचेत्सम्यक् शीतान्याकृष्य चूर्णयेत् ।
तद्रस वल्लमात्रं हि ताम्बूलीदलवेष्टितम् ॥ ५१ ॥
भक्षितं वामयित्वाऽथ रेचयित्वा द्वियामतः ।
ज्वरं विनाशयेन्नृणां शूलाध्मानसमन्वितम् ॥ ५२ ॥
विषं गरं च वेगेन वामयत्येव निश्चितम् ।
पथ्यमत्र प्रदातव्यं गव्यं तक्रं च भक्तकम् ॥ ५३ ॥
अतिरेकेऽतिवान्तौ च समोहे चातिमात्रके ।
तत्तदौचित्ययोगेन कुर्याच्छीतां प्रतिक्रियाम् ॥ ५४ ॥
अतिवान्तौ भजेद्भ्र(भृ)ष्टमिक्षुदण्डं सुशीतलम् ।
यद्वा बिल्वभवं क्वाथं सितया सह पाचयेत् ॥ ५५ ॥
बर्बूरत्वग्रसः पेयो विरेके तक्रसंयुतः ।

[अष्टमः प्रकारः ।]

शुल्बतुल्येन सूतेन बलिना तत्समेन च ॥ ५६ ॥
तदर्धांशेन तालेन शिलया च तदर्धया ।
विधाय कज्जलीं श्लक्ष्णां भिन्नकज्जलसन्निभाम् ॥५७॥
यन्त्राध्यायविनिर्दिष्टगर्भयन्त्रोदरान्तरे ।
कज्जलीं ताम्रपत्राणि पर्यायेण विनिक्षिपेत् ॥ ५८ ॥

प्रपचेद्यामपर्यन्तं स्वाङ्गशीतं विचूर्णयेत् ।

[ताम्रस्य गुणाः ।]

तत्तद्रोगहरानुपानसहितं ताम्रं द्विवल्लोन्मितं
सल्लीढं परिणामशूलमुदरं शूलं च पाण्डुज्वरम् ।
गुल्मप्लीहयकृत्क्षयाग्निसदनं मेहं च मूलामयं
दुष्टां च ग्रहणीं हरेद्ध्रुवमिदं सर्वामयध्वंसनम् ॥

ताम्रं तिक्तकषायकं च मधुरं पाकेऽथ वीर्योष्णकं
कोष्णं पित्तकफापहं जठररुक्कुष्ठामजूर्त्यन्तकृत् ।
ऊर्ध्वाधःपरिशोधनं च विषहृत्स्थौल्यापहं क्षुत्करं
दुर्नामक्षयपाण्डुरोगशमनं नेत्र्यं परं लेखनम् ॥

इति श्रीभैरवोक्ते आनन्दकन्दे क्रियाकरणविश्रान्तौ चतुर्थोल्लासः ॥

॥ पञ्चम उल्लासः ॥

कान्ततीक्ष्णमुण्डलोहाः ॥

लोहोत्पत्तिः ॥

श्रीभैरवः—

कान्तायस्तीक्ष्णमुण्डाख्यलोहोत्पत्तिरथोच्यते ।
देवासुरसमूहेन मथ्यमाने महोदधौ ॥ १ ॥

समुत्पन्नं पुरा तस्मिन्नमृतं देवजीवनम् ।
पीयमानात्सुरैस्तस्मान्निपेतुः क्षुद्रबिन्दवः ॥ २ ॥

ज्ञात्वा तान्भूगतान्यन्ता गोपयामास धूर्जटिः ।
लोहपाषाणरूपेण कृत्वा तान्वसुधातले ॥ ३ ॥

ोगाभिभूता ये मानवा न भजन्त्वमून् ।
वं शिवगुप्ता ये सुधाया बिन्दवः पुरा ॥ ४ ॥

ः मया समासेन कथ्यते साधनं स्फुटम् ।
ादिरोगनाशार्थं यथाबुद्ध्यनुसारतः ॥ ५ ॥

तायस्तीक्ष्णमुण्डाख्यं लोहमेवमपि त्रिधा ।
यनेभ्यस्सर्वेभ्यो विद्याच्छतगुणाधिकम् ॥ ६ ॥

कान्तलोहः ॥

:कान्तं कान्तलोहं कान्तं स्यात्कृष्णलोहकम् ।
ायसं महालोहं काललोहं च सप्तधा ॥ ७ ॥

[अशुद्धकान्तलोहसेवनजा दोषाः ।]

ाडां वह्निदौर्बल्यं महारोगान्मृतिं तथा ।
ति सेवनाल्लोहमशोधितममारितम् ॥ ८ ॥

ात्कान्तस्य संशुद्धिर्मारणं च विधीयते ।

कान्तग्रहणविधिः ॥

न्मत्तगजस्सूतः कान्तमङ्कुशमुच्यते ॥ ९ ॥

ज्ञात्वा गृहीतव्यं तत्प्रयत्नेन भूयसा ।
ातपनिक्षिप्तं वर्जयेत्सुरसुन्दरि ! ॥ १० ॥

स्थितं च यत्कान्तं छागरक्तेन भावयेत् ।
रक्तप्रलिप्तेन चर्मणा तत्प्रवेष्टयेत् ॥ ११ ॥

चर्म परीवेष्ट्य विन्यसेत्पूर्ववत्क्षितौ ।
तं सप्तभिर्मासैस्तोयकुम्भे विनिक्षिपेत् ॥ १२ ॥

ुष्पैस्सदा पूज्यं रक्तगन्धानुलेपनैः ।
(जि)तं मद्यमांसैश्च योज्यं रसरसायने ॥ १३ ॥

संस्कृत छागरक्तेन भ्रामकं चुंबकं भवेत् ।
अनेन क्रमयोगेन द्रावकं भवति प्रिये ! ॥ १४ ॥

कान्तलोहं विना सूतो देहे न क्रामति क्वचित् ।
न कान्तेन विना सूतः कान्तस्सूतविवर्जितः ॥ १५ ॥

कान्तसूतसमायुक्तः प्रयोगो देहधारकः ।
पुरा प्रोक्तं मया सर्वं कान्तसत्वं यथाविधि ॥ १६ ॥

अधुना संप्रवक्ष्यामि कान्तसंस्कारतद्गुणान् ।

कान्तशुद्धिः ॥

शशरक्तेन संलिप्तं कान्तपत्रं सुधामितम् ॥ १७ ॥

त्रिवारं चाग्निना देवि ! दोषं नैसर्गिकं त्यजेत् ।
त्रिफलाष्टगुणे तोये त्रिफला षोडशं पलम् ॥ १८ ॥

तत्काथपादशेषं च कान्तस्य पलपञ्चकम् ।
कृत्वा पत्राणि तप्तानि सप्तवारं निषेचयेत् ॥ १९ ॥

एवं प्रलीयते दोषो गिरिजो लोहसंभवः ।
कान्तलोहमयं चूर्णं गोमूत्रेऽष्टगुणे पचेत् ॥ २० ॥

धान्याम्लैः क्षालितं भूयः शोषितं शुद्धिमाप्नुयात् ।
रक्त(नक्त)माला हंसपादी गोजिह्वा त्रिफलाऽमृता ॥

गोपाली तुंबुरुर्दन्ती गोमूत्रे पेषयेदिमाः ।
तत्कल्के कान्तपत्रं तु तप्तं तप्तं द्विसप्तधा ॥ २२ ॥

सेचयेत्कान्तलोहं तु सर्वदोषनिवृत्तये ।

[कान्तसिद्धिक्रमः ।]

क्रमः कान्तस्य सिद्ध्यर्थं कर्तव्यो मन्त्रपूर्वकम् ॥ २३ ॥

उद्भवोद्भवशब्दस्स्याच्चतुर्थ्यन्तोऽमृतात्परम् ।
स्वाहान्तः प्रणवश्चाऽऽदौ मन्त्रोऽयं मर्दने स्थितः ॥
रक्षायै लोहरसयोरयमेवैकमुद्भवम् ।
विना स्वाहेति तस्यान्ते फडन्तं योजयेत्प्रिये ! ॥ २५ ॥
प्रणवोर्ध्वं नमश्चण्डं वज्रपाषाण इत्यपि ।
ततः परं महावज्रसेनाधिपतये नमः ॥ २६ ॥
द्विरुक्तस(स्व)रुशब्दस्स्यान्महाविद्या(बाहो)बलाय च ।
ततस्स्वाहेति मन्त्रोऽयं बलिकर्मणि पूजितः ॥ २७ ॥
अनेनैव बलिं कृत्वा यथोक्तामाचरेत्क्रियाम् ।

लोहभस्मविधिः ॥

[प्रथमः प्रकारः ।]

स्तन्येन हिङ्गुलस्याथ पेषयेत्पलपञ्चकम् ॥ २८ ॥
तेनैव पत्रं कान्तस्य लिम्पेत्पञ्चपलोन्मितम् ।
रुध्वा गजपुटे पाच्यं कषायैस्त्रैफलैः पुनः ॥ २९ ॥
जम्बीरैरारनलैर्वा विंशत्यंशेन हिङ्गुलम् ।
पिष्ट्वाऽऽलिप्य पुटे रुध्वा तल्लोहे पाचयेत्पुनः ॥३०॥
रुद्धं पुटेत्पचेद्रात्रौ प्रातर्द्रावैश्च भावयेत् ।
एवमष्टदिनं कुर्यात्त्रिविधं म्रियते ह्ययः ॥ ३१ ॥

[द्वितीयः प्रकारः ।]

चिञ्चापत्रनिभं कुर्यात्कान्तं तीक्ष्णं च मुण्डकम् ।
मृत्पात्रस्थं क्षिपेद्धर्मे दन्तीद्रावैः प्रपूरयेत् ॥ ३२ ॥
पत्रं पुनः पुनस्तावद्यावत्तरति तत्स्वयम् ।
म्रियते तीव्रघर्मेण तच्चूर्णीकृत्य योजयेत् ॥ ३३ ॥

[तृतीयः प्रकारः ।]

कान्तायस्तीक्ष्णमुण्डानां चूर्णं मत्स्याक्षिजैर्द्रवैः ।
आतपे त्रिदिनं भाव्यं त्रिदिनं चित्रकद्रवैः ॥ ३४ ॥

त्र्यहं त्रिकण्टकरसैस्सहदेवीद्रवैर्दिनम् ।
गोमूत्रैस्त्रिफलाक्वाथैर्भावयेच्च त्र्यहं त्र्यहम् ॥ ३५ ॥

उक्तद्रावैस्ततो मर्द्यं क्रमाद्देयं पुटं पुटम् ।
रुध्वा गजपुटैरेवं मृतं योगेषु योजयेत् ॥ ३६ ॥

[चतुर्थः प्रकारः ।]

स्थाल्यां वा लोहपात्रे वा लोहदर्व्या विचालयन् ।
पाचयेत्त्रिफलाक्वाथैर्दिनैकं लोहचूर्णकम् ॥ ३७ ॥

तत्पिण्डं त्रिफलातोयैः पिष्ट्वा रुध्वा पुटे पचेत् ।
षोडशाङ्गुलगर्तान्तर्निर्वातेऽहर्निशं पचेत् ॥ ३८ ॥

एवं त्रिधा प्रकर्तव्यं स्थालीपाकं पुटान्तकम् ।
भृङ्गार्द्रकं तालमूलं हस्तिकर्ण्याश्च मूलकम् ॥ ३९ ॥

शतावरीविदार्योश्च मूलं तत्त्रिफलाम्भसि ।
संपेष्य पूर्ववत्स्थाल्यां पाच्यं पेष्यं त्रिधा पुटैः ॥४०॥

पाच्यं ततः पुनर्नव्याः क्वाथैश्च दशमूलतः ।
बृहत्याश्च कषायेण बीजपूरस्य च द्रवैः ॥ ४१ ॥

ब्रह्मबीजरसैश्शिग्रुक्वाथैर्गोपयसाऽपि च ।
प्रत्येकं सम्प्रपेष्याऽऽदौ पूर्वगर्ते पुटे पचेत् ॥ ४२ ॥

भावयेत्तद्द्रवेणैव पुटान्ते याममात्रकम् ।
प्रत्येकमेवं सम्पेष्य पुटयेद्भावयेत्क्रमात् ॥ ४३ ॥

म्रियते नाऽत्र सन्देहः कान्तं तीक्ष्णं च मुण्डकम् ।

[पञ्चमः प्रकारः ।]

शुद्धसूतं द्विधा गन्धं खल्वे कृत्वा तु कज्जलीम् ॥
द्वयोस्समं कान्तचूर्णं मर्दयेत्कन्यकाद्रवैः ।
यामद्वयात्समुद्धृत्य तद्गोलं ताम्रपात्रके ॥ ४५ ॥
आच्छाद्यैरण्डपत्रैश्च यामार्धेऽत्युष्णतां गतम् ।
धान्यराशौ न्यसेत्पश्चात्त्रिदिनान्ते समुद्धरेत् ॥ ४६ ॥
सम्पेष्य गालयेद्वस्त्रे सत्यं वारितरं भवेत् ।
कान्तं तीक्ष्णं च मुण्डं च निरुत्थं जायते मृतम् ॥
स्वर्णादीन्मारयेदेवं चूर्णीकुर्याच्च लोहवत् ।
सिद्धयोगमथाऽऽख्यातं सिद्धानां सम्मुखागतम् ॥४८॥
अनुभूतं मया देवि ! सर्वरोगापहारकम् ।
नायः पचेत्पञ्चपलप्रमाणा-
  दधो न चोर्ध्वं त्रिदशप्रमाणात् ॥ ४९ ॥

[षष्ठः प्रकारः ।]

अर्जुनस्य त्वचः पेष्याः काञ्जिकेनातिलोलिताः ।
तन्मध्ये कान्तचूर्णं च कांस्यपात्रे विनिक्षिपेत् ॥ ५० ॥
दिनैकं धारयेद्धर्मे द्रवैः पूर्यं पुनः पुनः ।
अर्जुनैस्सारनालैर्वा त्रिविधं मारयेदयः ॥ ५१ ॥

[सप्तमः प्रकारः ।]

द्रवैः कुक्कुटपत्रोत्थैः कान्तचूर्णं विमर्दयेत् ।
दिनं च ह्यातपे तीव्रे द्रवैर्मर्द्यं त्रिकण्टजैः ॥ ५२ ॥
वन्ध्याभृङ्गपुनर्नव्यास्सगोमूत्रैर्दिनं पुनः ।
गोमूत्रैस्त्रिफला क्वाथ्या तत्कषायेण भावयेत् ॥ ५३ ॥

त्रिसप्ताहं प्रयत्नेन दिनैकं मर्दयेत्ततः ।
रुध्वा गजपुटे पच्यादिनं क्वाथेन मर्दयेत् ॥ ५४ ॥
दिवा मर्द्य पुटेद्रात्रावेकविंशद्दिनावधि ।
एकविंशत्पुटैरेवं म्रियते त्रिविधं ह्ययः ॥ ५५ ॥

[अष्टमः प्रकारः ।]

माक्षिकं च शिला ह्यम्लैर्हरिद्रा मरिचांघ्रि च ।
पिष्ट्वा लेप्यं कान्तपत्रं तप्तं तप्तं निषेचयेत् ॥ ५६ ॥
सप्तधा त्रैफले क्वाथे जलेन क्षालयेत्पुनः ।
कुट्टयेल्लोहदण्डेन पेषयेत्त्रैफले जले ॥ ५७ ॥
षोडशांशेन लोहस्य दातव्यं माक्षिकं शिला ।
अम्लेन मर्दितं रुध्वा गजाख्यैकपुटे पचेत् ॥ ५८ ॥
निरुत्थं जायते भस्म कान्तं तीक्ष्णं च मुण्डकम् ।

[नवमः प्रकारः ।]

तिन्दूफलस्य मज्जायां खड्गं लिप्त्वाऽऽतपे खरे ॥
धारयेत्कांस्यपात्रान्तर्दिनैकेन स्फुटत्यलम् ।
लेपं पुनः पुनः कुर्याद्दिनान्ते तं प्रपेषयेत् ॥ ६० ॥
त्रिफलाक्वाथसंयुक्तं दिनैकेन मृतो भवेत् ।

[लोहभस्मनोऽमृतीकरणम् ।]

तोयाष्टभागशेषेण त्रिफला पलपञ्चकम् ॥ ६१ ॥
घृतं क्वाथस्य तुल्यं स्याद्घृततुल्यं मृताऽऽयसम् ।
पाचयेत्ताम्रपात्रे तु लोहदर्व्या विचालयन् ॥ ६२ ॥
मृद्वग्निना पचेद्यावत्तावज्जीर्यति तद्द्रवम् ।
लोहतुल्या सिता योज्या सुपक्वामवतारयेत् ॥ ६३ ॥

योगवाहमिदं ख्यातं मृतलोहं महाऽमृतम्।
इत्थं कान्तस्य तीक्ष्णस्य मुण्डस्यापि ह्ययं विधिः ॥६४॥

घृततुल्यं मृतं लोहं लोहपात्रगतं पचेत्।
जीर्णे घृते समादाय सर्वयोगेषु योजयेत् ॥ ६५ ॥

" ओं ओं अमृतेन्द्रं भक्षयामि नमः "

[कान्तलक्षणम्।]

पात्रे यस्मिन्प्रविशति जले तैलबिन्दुर्न सर्पेत्
हिङ्गुर्गन्धं विसृजति निजां तिक्ततां निम्बकल्कः।
पाके दुग्धं भवति शिखराकारतां नैव भूमौ
कान्तं लोहं तदिदमुदितं लक्षणोक्तं न चान्यत् ॥

[लोहपाकस्वरूपम्।]

लोहपाकस्त्रिधा प्रोक्तो मृदुमध्यखरात्मकः।
पङ्कोत्करसमः पूर्वः पिण्डपाकस्तु मध्यमः ॥ ६७ ॥

तृतीयः खरपाकस्स्याद्वालुकासदृशः प्रिये !।

[निरुत्थभस्मपरीक्षा।]

पाकं वर्णं तथा गन्धं ज्ञात्वा लोहस्य वह्नितः ॥ ६८ ॥

उत्तार्याऽथ ततश्शुद्धं लोहपात्रान्तरे न्यसेत्।
लोहमातङ्गपञ्चास्या गन्धमाक्षीकहिङ्गुलाः ॥ ६९ ॥

सर्वमेतन्मृतं लोहं ध्मातव्यं मित्रपञ्चकैः।
यद्येवं स्यान्निरुत्थानं सेव्यं वारितरं हितम् ॥ ७० ॥

मध्वाऽऽज्येन समायुक्तं लोहं तारेण संयुतम्।
अन्धमूषागतं ध्मातं गृह्णीयात्स्वाङ्गशीतलम् ॥ ७१ ॥

लोहमध्यगतं तारं पूर्वमानं भवेद्यदि ।
तदा लोहं निरुत्थं स्यादन्यथा साधयेत्पुनः ॥ ७२ ॥
गन्धकं चोत्थितं लोहं तुल्यं खल्वे विमर्दयेत् ।
दिनैकं कन्यकाद्रावै रुध्वा गजपुटे पचेत् ॥ ७३ ॥
इत्येवं सर्वलोहानां कर्तव्येत्थं निरुत्थितिः ।

कान्तादिभस्मनां गुणाः ॥

कान्तसिन्दूरमायुष्यमारोग्यं बलवीर्यदम् ॥ ७४ ॥
देहदार्ढ्यकरं श्रेष्ठं कुर्यादिन्द्रियपाटवम् ।
त्रिदोषशमनं राजयक्ष्मरोगविनाशनम् ॥ ७५ ॥
ज्वरासृक्पित्तपाण्ड्वादीन्हन्यादष्टमहागदान् ।
यद्यद्रोगहरैर्योगैस्तत्तद्रोगहरं भवेत् ॥ ७६ ॥
तीक्ष्णं शस्त्रायसं शस्त्रं पिण्डं पिण्डायसं शठम् ।
आयसं निशितं तीव्रं लोहखड्गं च मुण्डजम् ॥ ७७ ॥
अयश्चित्रायसं प्रोक्तं चीनजं च त्रिपञ्चधा ।
मुण्डं मुण्डायसं लोहं कृष्णलौहं शिलोद्भवम् ॥ ७८ ॥
कान्तलोहप्रकारेण मारणं तीक्ष्णमुण्डयोः ।
तीक्ष्णलोहं कषायाम्लं तिक्तकं कटुकं लघु ॥ ७९ ॥
शीतलं लेखनं रूक्षं कफपित्तास्रपाण्डुजित् ।
प्रमेहसर्वशूलघ्नं तीक्ष्णं मुण्डाधिकं गुणैः ॥ ८० ॥
चक्षुष्यं मुण्डलोहं तु कषायं स्वादु तिक्तकम् ।
लेखनं वातहृच्छीतं कृमिपित्तकफप्रणुत् ॥ ८१ ॥
श्वयथूदरशूलार्शःकुष्ठपाण्डुप्रमेहजित् ।

॥ इति श्रीभैरवोक्ते आनन्दकन्दे क्रियाकरणविश्रान्तौ पञ्चमोल्लासः

॥ षष्ठ उल्लासः ॥

वङ्गम् ॥

श्रीभैरवः—

खुरकं मिश्रकं चेति द्विविधं वङ्गमुच्यते ।
खुरं तत्र गुणैश्श्रेष्ठं गुणहीनं तु मिश्रकम् ॥ १ ॥

धवलं मृदुलं स्निग्धं द्रुतद्रावं सगौरवम् ।
निश्शब्दं खुरवङ्गं स्यान्मिश्रकं श्यामशुभ्रकम् ॥ २ ॥

लघु त्रपुसमारूपं वङ्गं च कुटिलं हिमम् ।
कुरूप्यं विच्चटं रङ्गं पूतिगन्धं रसाह्वयम् ॥ ३ ॥

स्वच्छमुष्णासहं शीतं सूक्ष्मपत्रकरं लघु ।
रुङ्नाशे रूप्यकरणे तद्वङ्गं श्रेष्ठमुच्यते ॥ ४ ॥

वङ्गशुद्धिः ॥

द्रावयित्वा निशायुक्ते क्षिप्तं निर्गुण्डिकारसैः ।
विशुध्यति त्रिवारेण खुरवङ्गं न संशयः ॥ ५ ॥

अम्लतक्रविनिष्पिष्टवर्षाभूवृ(वि)षसिन्धु(तिन्दु)भिः ।
कट्वलाबुगतं वङ्गं द्वितयं परिशुध्यति॥ ६ ॥

वङ्गभस्म ॥

[प्रथमः प्रकारः ।]

सतालेनार्कदुग्धेन लिप्त्वा वङ्गदलान्यथ ।
बोधिचिञ्चात्वचः क्षारैर्दद्याल्लघुपुटानि च ॥ ७ ॥

मर्दयित्वा चरेद्भस्म तद्रसादिषु कीर्तितम् ।

[द्वितीयः प्रकारः ।]

नागवच्छोधयेद्वङ्गं तद्वदश्वत्थचिञ्चयोः ॥ ८ ॥
तद्भस्म हरितालं च तुल्यमम्लेन मर्दयेत् ।
पलाशोत्थद्रवैर्वाऽथ लोलयित्वाऽन्धयेत्पुटे ॥ ९ ॥
उद्धृत्य दशमांशेन तालेन सह मर्दयेत् ।

[तृतीयः प्रकारः ।]

पूर्वद्रावैस्सहालोड्य रुध्वा गजपुटे पचेत् ॥ १० ॥
एकविंशत्पुटैर्वङ्गो मृतो भवति रोगहा ।
शिरीषरजनीचूर्णैः कुमार्या युतगोलकम् ॥ ११ ॥
सूतलिप्तं वङ्गपत्रं गोलकं सममर्दितम् ।
रुध्वा लघुपुटैः पक्वं मृतं स्यात्पूर्वसंख्यया ॥ १२ ॥
अक्षभल्लातकीतोयैः पिष्ट्वा पत्राणि लेपयेत् ।
ततस्तिलखरीमध्ये क्षिप्त्वा रुध्वा पुटैः पचेत् ॥ १३ ॥
चत्वारिंशद्गजपुटैर्वङ्गकं भस्म जायते ।

वङ्गस्य गुणाः ॥

वङ्गं तीक्ष्णोष्णकटुकमीषद्वातप्रकोपनम् ॥ १४ ॥
मेदश्श्लेष्मामयघ्नं च क्रिमिघ्नं मेहनाशनम ।
हिमं कषायलवणं पाण्डुदाहहरं सरम् ॥ १५ ॥
लेखनं पित्तलं किञ्चित्त्रपु सीसं च तद्गुणम् ।

सीसकम् ॥

सीसकं तु जडं शीतं यवनेष्टं भुजङ्गमम् ॥ १६ ॥
योगीष्टं नागमुरगं कुवङ्गं परिपिष्टकम् ।

मृदु कृष्णायसं पक्ष्मतारशुद्धिकरं स्मृतम् ॥ १७ ॥
शिरावृत्तं च वङ्गं स्याच्चीनपिष्टं च षोडश ।
सीसं तु वङ्गसाम्यं स्याद्रसवीर्यविपाकतः ॥ १८ ॥

[अशुद्धवङ्गनागसेवने दोषाः।]

पाकहीनौ नागवङ्गौ कुष्ठगुल्मरुजाकरौ ।
मेहपाण्डुज्वरश्लेष्मवातपित्तप्रदौ स्मृतौ ॥ १९ ॥

[ग्राह्याग्राह्यनागस्वरूपम्]

द्रुतद्रावं महाभारं छेदे कृष्णं समुज्ज्वलम् ।
पूतिगन्धं बहिः कृष्णं शुद्धं सीसमतोऽन्यथा ॥ २० ॥

नागशुद्धिः ॥

निर्गुण्डीमूलचूर्णेन सार्कदुग्धेन लेपयेत् ।
नागपत्रं ततश्शुष्कं द्रावयित्वा निषेचयेत् ॥ २१ ॥
लिप्त्वा द्राव्यं पुनस्सेच्यं सप्तवारं विशुद्धये ।
निशातुम्बुरुबीजानि कोकिलाक्षीकुबेरकम् ॥ २२ ॥
गौरीफलं मल्लिका च मोक्षो ब्रह्मा मयूरकम् ।
यथालाभं तु भस्मैषां वज्रीक्षीरेण भावयेत् ॥ २३ ॥
तन्मध्ये द्रावितं नागं शुद्धं सेच्यं तु सप्तधा ।
महिषस्यास्थिचूर्णेन सुपाकं मूत्रसेचनात् ॥ २४ ॥
वङ्गं शुद्धं भवेत्तद्वन्नागो नागास्थिमूत्रतः ।

नागभस्म ॥

[प्रथमः प्रकारः।]

अश्वत्थचिञ्चात्वग्भस्म नागस्य चतुरंशतः ॥ २५ ॥

क्षिप्त्वा चुल्ल्यां पचेदग्नौ चालयेल्लोहचट्टुना ।
यावद्भस्म समुद्धृत्य भस्मतुल्यां मनःशिलाम् ॥ २६ ॥
जम्बीरैरारनालैर्वा पिष्ट्वा रुध्वा पुटे पचेत् ।
स्वाङ्गशीतं पुनः पिष्ट्वा विंशत्यंशे शिलाम्लके ॥ २७ ॥
एवं षष्टिपुटैः पक्त्वा नागस्स्यात्तु निरुत्थितः ।

[द्वितीयः प्रकारः ।]

अथवा नागपत्राणि चूर्णलिप्तानि खर्परे ॥ २८ ॥
अल्पाग्नौ पाचयेद्यामं भस्म तच्चित्रकद्रवैः ।
भर्जयेल्लोहपात्रे तत्पार्थदण्डेन चालयन् ॥ २९ ॥
यामषोडशपर्यन्तं द्रवं देयं पुनः पुनः ।
दण्डेन मर्दयेद्गाढमुद्धृतं चित्रकद्रवैः ॥ ३० ॥
लोलयित्वा निरुद्ध्याऽथ षट्पुटैर्म्रियते लघु ।

[तृतीयः प्रकारः ।]

चिञ्चाक्षमिक्षुभल्लातवाशावज्रलताभवैः ॥ ३१ ॥
अपामार्गार्जुनाश्वत्थसमुद्भूतैश्च भस्मभिः ।
दृढं पालाशदण्डेन लोहपात्रे तु भर्जयेत् ॥ ३२ ॥
सप्तभिर्दिवसैरेवं म्रियते नात्र संशयः ।

[चतुर्थः प्रकारः ।]

पिष्ट्वाऽगस्त्यं च भूनागं लिप्त्वा भाण्डं विशोधयेत् ॥
तद्भाण्डे द्रावयेन्नागं द्रुते नागे विनिक्षिपेत् ।
वाशाचिञ्चटयोः क्षारं वाशाकाष्ठेन घट्टयेत् ॥ ३४ ॥

यामैकं पाचयेच्चुल्ल्यां समुद्धृत्य विमिश्रयेत् ।
सञ्चूर्ण्य च शिलाताप्ये वाशकक्षारसंयुतम् ॥ ३५ ॥

चतुस्तुल्यं पूर्वनागं विंशत्येकपुटैः पचेत् ।
द्विपुटं चिञ्चिकक्षारैर्देयं वाशारसान्वितैः ॥ ३६ ॥

नागस्सिन्दूरवर्णाभो म्रियते सर्वकार्यकृत् ।

[नागभस्मनो गुणाः ।]

अत्युष्णं सीसकं स्निग्धं तिक्तं वातकफापहम् ॥ ३७ ॥

प्रमेहतोयदोषघ्नं दीपनं चाऽऽमवातनुत् ।

इति श्रीभैरवोक्ते आनन्दकन्दे क्रियाकरणविश्रान्तौ षष्ठोल्लासः ॥

॥ सप्तम उल्लासः ॥

पित्तलम् ॥

भैरवः—

रीतिः क्षुद्रसुवर्णं
सितकनकं पिङ्गलं च पित्तलकम् ।
लोहितकमारकूटं
पिङ्गललोहं च पीतकं नवधा ॥ १ ॥

रीतिका काकतुण्डीति द्विविधं पित्तलं भवेत् ।
सन्तप्ता काञ्जिके क्षिप्ता ताम्राभा रीतिका मता ॥ २ ॥

एवं या जायते कृष्णा काकतुण्डीति सा मता ।

[ग्राह्यग्राह्यपित्तलस्वरूपम् ।]

गुर्वी मृद्वी च पीता(कपोता)भा साराङ्गी ताडनक्षमा ॥
सुस्निग्धा मसृणाङ्गी च रीतिरेतादृशी शुभा ।
शुद्धा स्निग्धा मृदुश्शीता सुरङ्गा सूत्रपत्रिणी ॥ ४ ॥
हेमोपमा शुभाश्वत्था जात्या रीतिः प्रकीर्तिता ।
पाण्डुः पीता खरा रूक्षा बर्बरा घट्टनाक्षमा ॥ ५ ॥
पूतिगन्धा तथा लघ्वी रीतिर्नेष्टा रसादिषु ।
रीतिस्तिक्तरसा रूक्षा जन्तुघ्नी सास्रपित्तनुत् ॥ ६ ॥
कृष्णा कुष्ठहरा योगादुष्णवीर्या च शीतला ।
काकतुण्डी कृ(ग)तस्नेहा राजरीतिगुणानुगा ॥ ७ ॥
राजरीतिस्तु निर्दिष्टा रीतिकासदृशी गुणैः ।

[पित्तलस्य गुणाः ।]

रीतिकायुगलं रूक्षं सतिक्तं लवणं सरम् ॥ ८ ॥
शोभनं पाण्डुवातघ्न बलवीर्यायुवर्धनम् ।
रीतिका कटुतिक्तोष्णा प्लीहानाहनिबर्हणी ॥ ९ ॥
रूक्षा कफास्रपित्तं च हन्यात्स्वादु प्रयोजिता ।
राजरीतिः काकतुण्डी राजपुत्री महेश्वरी ॥ १० ॥
ब्राह्मणी ब्रह्मरीतिश्च कपिला पिङ्गलाऽपि च ।

कांस्यम् ॥

कांस्यं सौराष्ट्रिकं घोषं कंसीयं वह्निलोहकम् ॥ ११ ॥
दीप्तलोहं घोषयु(घृ)ष्यं दीप्तकं च नवाह्वयम् ।
अष्टभागेन ताम्रेण द्विभागकुटिलेन च ॥ १२ ॥

विद्रुतेन भवेत्कांस्यं तत्सौराष्ट्रभवं शुभम् ।

[ग्राह्याग्राह्यकांस्यस्वरूपम्]

तीक्ष्णशब्दं मृदु स्निग्धमीषच्छ्यामलशुभ्रकम् ॥ १३ ॥
निर्मलं दाहरक्तं च षोढा कांस्यं प्रशस्यते ।
श्वेतदीप्तं मृदुज्योति शब्दाढ्यं स्निग्धनिर्मलम् ॥
घनाग्निसहसूलाङ्गं कांस्यमुत्तममीरितम् ।
तत्पीतं दहने ताम्रं घनं रूक्षं घनासहम् ॥ १५ ॥
मन्दनादं गतज्योति सप्तधा कांस्यमुत्सृजेत् ।

कांस्यस्य गुणाः ॥

घृतमेकं विना चान्यत्सर्वं कांस्यगतं नृणाम् ॥ १६ ॥
भुक्तमारोग्यसुखदं हितं सात्म्यकरं तथा ।
कांस्यं तु लघुतिक्तोष्णं लेखनं दृक्प्रसादनम् ॥ १७ ॥
कृमिकोष्ठहरं वातपित्तघ्नं भोजने हितम् ।

वर्तलोहः ॥

वर्तलोहं वर्ततीक्ष्णं वर्तकं लोहसङ्करः ॥ १८ ॥
नीलिका नीललोहं च लोहकं वट्टलोहकम् ।
कांस्यार्करीतिलोहाहिजातं तद्वर्तलोहकम् ॥ १९ ॥
तदेव पञ्चलोहाख्यं लोहविद्भिरुदाहृतम् ।
तद्भाण्डसाधितं सर्वमन्यव्यञ्जनपूर्वकम् ॥ २० ॥
अम्लेन वर्जितं चातिदीपनं पाचनं शुभम् ।

वर्तलोहशुद्धिर्मारणं च ॥

द्रुतमश्वजले क्षिप्तं वर्तलोहं विशुध्यति ॥ २१ ॥

म्रियते गन्धतालाभ्यां पुटितं वर्तलोहकम् ।
तेषु तेषु विभागेषु योजनीयं यथाविधि ॥ २२ ॥

वर्तलोहगुणाः ॥

वर्तलोहं कटूष्णं च तिक्तं च शिशिरं तथा ।
कफजित्पित्तशमनं मधुरं दाहमेहनुत् ॥ २३ ॥
रूक्षं रुच्यं कृमिघ्नं च नेत्र्यं मलविशोधनम् ।

पित्तलादीनां शोधनभस्मविधिः ॥

त्रिक्षारं पञ्चलवणं सप्तधाऽम्लेन भावयेत् ॥ २४ ॥
कांस्यारघोषपत्राणि तेन कल्केन लेपयेत् ।
रुध्वा पुटेद्गजपुटे शुद्धिमायाति नान्यथा ॥ २५ ॥
ताम्रवन्मारणं तेषां कृत्वा सर्वत्र योजयेत् ।

मृतानि लोहान्यमृतीभवन्ति
निघ्नन्ति युक्तानि महामयांश्च ।
अभ्यासयोगाद्दृढदेहसिद्धिं
कुर्वन्ति रुग्जन्मजराविनाशम् ॥ २६ ॥

नागेन स्वर्णं रजतं च ताप्यैः
गन्धेन ताम्रं शिलया च नागम् ।
तालेन वङ्गं त्रिविधं तु लोहं
नारीपयो घ्नन्ति च हिङ्गुलेन ॥ २७ ॥

तथाऽभ्रसत्वं बलिनोपलोहं
वज्रेण सूतं विनिहन्ति सद्यः ॥ २८ ॥

अभ्रकसत्वम् ॥

वज्राभ्रकस्य सत्सत्वं वक्ष्यामि शृणु भैरवि ! ।

चतुर्धाऽभ्रकसत्वं स्यात्कठिनं मृदुलं द्रुतिः ॥ २९ ॥

बीजं च गुणवज्ज्ञेयं तत्क्रमादुत्तरोत्तरम् ।

सत्वपातनायाभ्रकसिद्धिः ॥

धान्याभ्रकं रविक्षीरे घर्मे स्थाप्यं दिनावधि ॥ ३० ॥

तच्छ्लक्ष्णं पेषयेत्पट्टे शरावे तं निरोधयेत् ।
सम्यक् पचेद्गजपुटे रविक्षीरे पचेत्पुनः ॥ ३१ ॥

मर्दनं पुटपाकं च कुर्यादेवं तु सप्तधा ।
तथा जम्बीरनीरे च निचुलस्य रसे तथा ॥ ३२ ॥

एतसिद्धघनं श्रेष्ठं निश्चन्द्रं सत्वपातने ।
घनमारकसारैर्वा व्यस्तैर्वाऽथ समस्तकैः ॥ ३३ ॥

पिष्ट्वा धान्याभ्रकं श्लक्ष्णं रुध्वा गजपुटे पचेत् ।

अभ्रककठिनसत्वम् ॥

लाक्षागुग्गुलुदग्धोर्णासर्जसर्जरसं पटु ॥ ३४ ॥

शशास्थि क्षुद्रमत्स्याश्च हरिद्रा मित्रपञ्चकम् ।
पञ्चमाहिषकञ्चापि भल्लातं च समं समम् ॥ ३५ ॥

सर्वतुल्यं सिद्धघनं निश्चन्द्रं पेषयेद्दिनम् ।
तत्सर्वं तेन वटकाः कार्यास्ते कर्षमात्रकाः ॥ ३६ ॥

कोष्ठीयन्त्रे धमेद्गाढमङ्गारैः खदिरोद्भवैः ।
त्रियामधमनादेव सत्वं पतति निर्मलम् ॥ ३७ ॥

कठिनं सूक्ष्मरवकं काचटङ्कणवर्जितम् ।
त्रिवारमेवं कुर्वीत तत्किट्टैः सत्वपातने ॥ ३८ ॥

अभ्रकमृदुसत्वम् ॥

[प्रथमः प्रकारः ।]

पुनरन्यं प्रवक्ष्यामि मृदुसत्वं सुरेश्वरि ! ।
गुग्गुलुं टङ्कणं गुञ्जां सर्जसर्जरसं गुडम् ॥ ३९ ॥
क्षुद्रमीनं यवक्षारं काचपिण्याकसूरणम् ।
भूलता त्रिफला वह्निः क्षीरकन्दं पुनर्नवम् ॥ ४० ॥
धुत्तूरं लाङ्गली पारा बला गन्धक(र)सेवकम् ।
गोक्षीरं पञ्चलवणं सर्वं च द्विगुणं मधु ॥ ४१ ॥
षड्बिन्दु क्षुद्रशंबूकमस्थीनि शशकस्य च ।
पारावतमलं त्र्यूषमिन्द्रगोपं सशिग्रुकम् ॥ ४२ ॥
गोधूमसर्षपं ताप्यं छागक्षीरेण मर्दयेत् ।
एवं व्यस्तं समस्तं वा याममात्रेण मर्दितम् ॥ ४३ ॥
अस्य पिण्डस्य भागैकं द्विभागं सिद्धमभ्रकम् ।
पञ्चमाहिषभागैकं सर्वमेकत्र लोडयेत् ॥ ४४ ॥
कर्षाभा वटिकाः कार्याः किञ्चिच्छायाविशोषिताः ।
खदिराङ्गारसन्तप्ते कोष्ठीयन्त्रे क्षिपेत्क्षिपेत् ॥ ४५ ॥
घुटीपञ्चकपञ्चैव वङ्कनाले धमेद्दृढम् ।
मृदुसत्व भवेच्छुभ्रं रुग्जरामृत्युनाशनम् ॥ ४६ ॥
त्रिवारमेवं कुर्वीत तत्किट्टं सत्वपातनम् ।
अनेन क्रमयोगेन कान्तसस्यकमाक्षिकम् ॥ ४७ ॥
कठिनोपरसाश्चान्यैः शुद्धा भूनागमृत्तिका ।
मुञ्चन्ति द्रुतिसङ्घातं गृह्णन्तीमं पृथक्पृथक् ॥ ४८ ॥

[द्वितीयः प्रकारः ।]

अभ्रसत्वं समादाय समांशं काचटङ्कणम् ।

दत्वा दत्वा त्रिवारं तद्वज्रमूषागतं धमेत् ॥ ४९ ॥

अम्लवर्गं स्नुहीपत्रं बिंबीबीजं सवल्कलम् ।
कल्कयेत्तत्र सन्तप्तं सप्तवारं निषेचयेत् ॥ ५० ॥

मृदु शुभ्रं भवेत्तस्य (सत्वं) रुग्जरामृत्युनाशनम् ।

[तृतीयः प्रकारः ।]

सिद्धाभ्रं दशभागं स्याच्छुद्धभागं त्रिभागकम् ॥ ५१ ॥

टङ्कणं माक्षिकं सूतं भागैकं च सुशोधितम् ।
ऊर्णासर्जयवक्षारं भागं भागं विमिश्रयेत् ॥ ५२ ॥

मर्द्यं मूत्राम्लवर्गाभ्यां यथा प्रोक्तं दिनावधि ।
अजापञ्चाङ्गसंयुक्तं पूर्ववत्सत्वपातनम् ॥ ५३ ॥

कृत्वाऽऽदाय मृतं साक्षान्निर्मलं मृदु जायते ।

अभ्रकबीजपाकः ॥

बीजपाकं प्रवक्ष्यामि घनस्यैतत्परं हितम् ॥ ५४ ॥

सिद्धाभ्रकं शतपलं स्वर्णरूप्यार्ककान्तकम् ।
रसत्रिगन्धमाक्षीकं विमलाभूलताद्रिजम् ॥ ५५ ॥

नीलाञ्जनं च कङ्कुष्ठं कासीसं दरदं तथा ।
प्रत्येकं दशनिष्कं स्यात्ततो गैरिकटङ्कणम् ॥ ५६ ॥

इन्द्रगोपं गुडं गुञ्जा मधु सर्पिश्च गुग्गुलुः ।
सर्जक्षारो यवक्षारो मत्कुणा नवपञ्चकम् ॥ ५७ ॥

क्षुद्रमीनशशास्थीनि माहिषं शृङ्गमा(मू)लकम् ।
पृथक्पृथक्पञ्चमूलं पञ्चमाहिषमर्दयेत् ॥ ५८ ॥

तेषां च(कर्षाभा)वटिका कार्या किञ्चिच्छायाविशोषिता ।
पूर्ववत्पातयेत्सत्वं रुग्जरादैन्यमृत्युहृत् ॥ ५९ ॥

अयं सामान्यसंस्कारो विशेषस्तु निगद्यते ।
यद्यद्रोगहरैर्द्रव्यैस्तत्तद्रोगहरं भवेत् ॥ ८१ ॥

[चतुर्थः प्रकारः ।]

घनसत्त्वं सुविमलं लोहखल्वे विचूर्णयेत् ।
मुण्डीपत्ररसैर्मद्यं दिनं गजपुटे पचेत् ॥ ८२ ॥

एवं दशपुटं कार्यं निर्गुण्डीस्वरसैस्तथा ।
तथा वटजटाक्वाथैः पेटारीमूलजै रसैः ॥ ८३ ॥

ककुभस्य रसैस्तद्वज्जम्बूत्वक्स्वरसैस्तथा ।
एवं षष्टिपुटं कार्यं ततस्तस्मिन्विनिक्षिपेत् ॥ ८४ ॥

विंशत्यंशेन दरदं स्तन्यैस्सम्मर्दयेद्दिनम् ।
ततस्तत्सम्पुटे रुध्वा भूधरे तु पुटं लघु ॥ ८५ ॥

एवं विंशतिधा कुर्यात्सिन्दूराभं भवेद्ध्रुवम् ।

स्थालीपाकविधिः ॥

स्थालीपाकस्त्रिधा प्रोक्तो मृदुर्मध्यः खरात्मकः ॥८६॥

पङ्कोत्करसमः पूर्वः पिण्डपाकस्तु मध्यमः ।
तृतीयः खरपाकस्स्याद्वालुकासदृशः प्रिये ! ॥ ८७ ॥

स्थालीपाको रसे युक्तः संयुक्तो दरदेन वा ।
मृदुमध्यमपाकाभ्यां कर्तव्यो भूधरे ततः ॥ ८८ ॥

क्षिप्त्वा लघुपुटे देयं रसहिङ्गुलवर्जितः ।
खरपाकः प्रकर्तव्यो विधिर्गजपुटे पचेत् ॥ ८९ ॥

[लोहभस्मनाममृतीकरणविधिः ।]

सर्वेषां मारितानां च लोहानामभ्रकस्य च ।

सेचयेदक्षपालान्तष्षड्वारं च पुनः पुनः ॥ १०० ॥

मण्डूरोऽयं समाख्यातश्शुद्धं श्लक्ष्णं नियोजयेत् ॥
गोमूत्रे त्रिफला क्वाथ्या तत्क्वाथे सेचयेच्छनैः ॥१०१॥

मण्डूरभस्म ॥

लोहकिट्टं सुतप्तं च यावच्छी(त्ती)र्यति तत्स्वयम् ।
तच्छी(त्ती)र्णं ग्राहयेत्पेष्यं मण्डूरं यं प्रयोजयेत् ॥

ये गुणा मारिते मुण्डे ते गुणा मुण्डकिट्टके ।
तस्मात्सर्वत्र मण्डूरं रोगशान्त्यै प्रयोजयेत् ॥ १०३ ॥

किट्टाद्दशगुणं मुण्डं मुण्डात्तीक्ष्णं शतोन्मितम् ।
तीक्ष्णाल्लक्षगुणं कान्तं भक्षणात्कुरुते गुणम् ॥ १०४ ॥

मण्डूरगुणाः ॥

मण्डूरं पाण्डुशोषार्शोग्रहणीकामलापहम् ।
सर्वशूलप्रमेहघ्नं दीपनं परमं हितम् ॥ १०५ ॥

शीतं तिक्तं कषायाम्लं हृद्रोगप्लीहनाशनम् ।

रसादिमारणाय द्रव्यमानम् ॥

रसेन्द्रं शोधयेद्देवि ! पलानां द्विसहस्रकम् ॥१०६॥

सहस्रं वा शतं वाऽपि पञ्चाशद्वा तदर्धकम् ।
न कुर्याद्रसकर्माणि हीनं वै पञ्चविंशतेः ॥ १०७ ॥

लोहस्य पचनं त्रिंशत्पलादूर्ध्वं न कारयेत् ।
अर्वाक् पञ्चपलाद्देवि ! घनसत्वं तथा पचेत् ॥१०८॥

स्वर्णं पञ्चपलादूर्ध्वं पलादर्वाङ्न शोधयेत् ।

तथा रूप्यं च ताम्रं च शोधयेन्मारयेत्प्रिये ! ॥१०९॥

लोहवद्घनसत्वं च घनपत्रं तथैव च ।
हीनं पञ्चपलादूर्ध्वं न कुर्यात्पलविंशतेः ॥ ११० ॥

द्रावणं शोधनं देवि ! मारणं नागवङ्गयोः ।
वज्रं निष्कादधश्चोर्ध्वं न कुर्याच्छोधनं मृतिम् ॥१११॥

पद्मरागादिरत्नानि तथा कुर्यात्सुरेश्वरि ! ।

इति श्रीभैरवोक्ते आनन्दकन्दे क्रियाकरणविश्रान्तौ सप्तमोल्लासः ॥

॥ अष्टम उल्लासः ॥

रत्नान्युपरत्नानि च ॥

भैरवः—

महाम्बुराशौ सरिति पर्वते काननेऽपि वा ।
रत्नानामाकरं देवि ! स्थानमाधेयगौरवात् ॥ १ ॥

तेषु रक्षोविषव्यालव्याधिदोषहराणि च ।
प्रादुर्भवन्ति रत्नानि तथैव विगुणानि च ॥ २ ॥

प्रदुष्टेनोपजातानि जन्तुनोपहतानि च ।
दोषैस्तान्युपचीयन्ते हीयन्ते गुणसंपदा ॥ ३ ॥

माणिक्यम् ॥

माणिक्यं शोणरत्नं च रत्नराट् रविरत्नकम् ।
शृङ्गारि रङ्गमाणिक्यं तरलो रत्ननायकः ॥ ४ ॥

रागदृक् पद्मरागश्च रत्नं शोणोपलस्तथा ।
सौगन्धिकं लोहितकं कुरुविन्दं शरेन्दुकम् ॥ ५ ॥

माणिक्यं पद्मरागाख्यं द्वितीयं नीलगन्धि च ।
कुशेशयदलच्छायं स्वच्छं स्निग्धं गुरु स्फुटम् ॥ ६ ॥

वृत्तायतं समं गात्रं माणिक्यं श्रेष्ठमुच्यते ।
परीक्षापरिशुद्धानां रत्नानां पृथिवीभृता ॥ ७ ॥

धारणं सर्वदा कार्यं श्रेयःश्रीकीर्तिकाङ्क्षिणा ।
ततस्तु शास्त्रतस्तेषां परीक्षादिकमुच्यते ॥ ८ ॥

[माणिक्यभेदाः ।]

यतिसिंहलं कालपुरमन्ध्रं तुम्बुरुसंस्थितम् ।
क्षेत्रं चतुर्विधं तस्य माणिक्यस्य समुद्भवे ॥ ९ ॥

सिंहले तु भवेद्रक्तं पद्मरागमनुत्तमम् ।
पीतं कालपुरोद्भूतं कुरुविन्दमिति स्मृतम् ॥ १० ॥

अशोकपल्लवच्छायमन्ध्रं सौगन्धिकं प्रिये ! ।
तुम्बुरौ छायमानीलं नीलगन्धि च कीर्तितम् ॥ ११ ॥

मध्यमे मध्यमं ज्ञेयं माणिक्यं क्षेत्रभेदतः ।
माणिक्यस्य गुणाः प्रोक्ताश्चत्वारो मुनिपुङ्गवैः ॥ १२ ॥

स्निग्धच्छाया गुरुत्वं च नैर्मल्यमतिरक्तता ।

[माणिक्यस्य गुणाः ।]

माणिक्यं दीपनं वृष्यं कफवातक्षयार्तिहृत् ॥ १३ ॥

भूतवेतालपापघ्नं कर्मजव्याधिनाशनम् ।
माणिक्यं च महापुण्यं महाभाग्यकरं परम् ॥ १४ ॥

सर्वभूतग्रहोन्मादविषघ्नं दोषजित्परम् ।

मुक्ता ॥

मुक्ता सौम्या मौक्तिकं शौक्तिकेयं
तारं तारा शौक्तिकं तारका च ।
अम्भस्सारं शीतलं नीरजं च
नक्षत्रं स्यादिन्दुरत्नं वलक्षम् ॥ १५ ॥

मुक्ताफलं बिन्दुफलं च मुक्ता
शौक्तेयकं शुक्तिमणिश्शशिप्रियम् ।
स्वच्छं हिमं हैमवतं च शुभ्रं
सुधांशुरत्नं च भसंख्यकाह्वम् ॥ १६ ॥

[मुक्ताभेदाः ।]

मातङ्गोरगमीनपोत्रिशिरसस्त्वक्सारशङ्खाम्बुभृ-
च्छुक्तीनामुदराच्च मौक्तिकमणिस्स्पष्टं भवेदष्टधा ।
छायाः पाटलनीलपीतधवलास्तत्रापि सामान्यतः
सप्तानां बहुशो न लब्धिरितरच्छौक्तेयकं तूल्बणम् ॥

नक्षत्राभं शुद्धमत्यन्तमुक्तं
स्निग्धं स्थूलं निर्मलं निर्व्रणं च ।
न्यस्तं धत्ते गौरवं यत्तुलायां
तन्निर्मौल्यं मौक्तिकं सौख्यदायि ॥ १८ ॥

[मुक्तागुणाः ।]

मौक्तिकं च मधुरं सुशीतलं
दृष्टिरोगशमनं विषापहम् ।
राजयक्ष्मपरिकोपनाशनं
क्षीणवीर्यबलपुष्टिवर्धकम् ॥ १९ ॥

मौक्तिकं शिशिरं स्निग्धं विशदं कान्तिवर्धनम् ॥२०॥

दाहतृड्भ्रममूर्च्छास्रक्पित्तज्वरविषापहम् ।

चक्षुष्यं पवनास्रपित्तविषजित्सर्वेन्द्रियाह्लादनं
तृड्दाहज्वरशोकमोहशमनं शीतं श्रमघ्नं हितम् ।
धन्यं मङ्गलमायुषः स्थितिकरं सौभाग्यकान्तिप्रदं
मुक्ता हारविभूषणं तदखिलं मूलं शशी प्रीयते ॥

प्रवालः ॥

प्रवालोऽङ्गारकमणिर्विद्रुमोऽम्भोधिपल्लवः ॥ २२ ॥

भौमरत्नं च रक्ताङ्गो रक्ताङ्कुरलतामणिः ।
सेतौ सागरमध्ये या जायते वल्लरी शुभा ॥ २३ ॥

विद्रुमाख्या सुरक्ता सा दुर्लभा दीप्तरूपिणी ।
पाषाणत्वं भजत्येषा पाकतः कठिना सती ॥ २४ ॥

प्रवालनाम तद्रक्तं वर्णसौभाग्यकान्तिदम् ।
सिद्धं स्वच्छं स्निग्धरूपं वृत्तं कान्तं समं गुरु ॥२५॥

रङ्गगात्रं दृढं पिण्डं प्रवालं श्रेष्ठमुच्यते ।
पक्वबिंबफलाभासं जपाकुसुमसन्निभम् ॥ २६ ॥

शुकतुण्डसमच्छायं प्रवालमतिशोभनम् ।
शारदाभं दलं सूक्ष्मं वक्रं रूक्षं सकोटरम् ॥ २७ ॥

विद्धं कृष्णं लघुतमं प्रवालं दोषकृद्भवेत् ।
गौररङ्गं जलाक्रान्तं प्रवालमशुभं त्यजेत् ॥ २८ ॥

प्रवालं कोमलं स्निग्धं सुरागं विद्रुमं हितम् ।

[प्रवालगुणाः]

धनधान्यकरं मेध्यं विषाहिभयनाशनम् ॥ २९ ॥

प्रवालो मधुराम्लश्च कफपित्तादिदोषनुत् ।
वीर्यकान्तिकरः स्त्रीणां धृतो मङ्गलदायकः ॥ ३० ॥

मरकतम् ॥

मरकतं रौहिणेयं गारुत्मन्तं हरिन्मणिः ।
सौपर्णं गरुडोद्गीर्णं बुधरत्नाश्मगर्भजे ॥ ३१ ॥

गरलारिर्वाय(कं)वीर्यं(यं) गारुडं रुद्रसम्मितम् ।
तुरुष्कविषयांभोधौ समीरारोहणाचले ॥ ३२ ॥

तच्छायाश्यामलो देशस्सोऽभून्मरतकाकरः ।
तद्विशेषान्मरकतं जातं दोषगुणान्वितम् ॥ ३३ ॥

दोषास्सप्तविधास्तस्य गुणाः पञ्चविधास्स्मृताः ।
भवेदष्टविधा छाया मणेर्मरकतस्य च ॥ ३४ ॥

अस्निग्धं रूक्षमित्युक्तं विस्फोटं पिट(पीठ)कं तथा ।
जठरं कान्तिहीनं च विच्छायं मलिनं तथा ॥ ३५ ॥

सशर्करं सपाषाणं कर्कशं सूलसंयुतम् ।
कल्माषवर्णं शबलं समस्तभयदायकम् ॥ ३६ ॥

निर्मलं कथितं स्वच्छं गुरु स्याद्गुरुदायुत(यक)म् ।
स्निग्धं रूक्षं विनिर्मुक्तमरजस्क(मरत्व)मरेणुकम् ॥

सुरागं रागबहुलमिति पञ्च गुणाः स्मृताः ।
एतैर्युक्तं मरकतं सर्वपापहरं परम् ॥ ३८ ॥

[मरकतगुणाः ।]

मरकतं विषघ्नं च शीतलं मधुरं रसे ।
आम(अम्ल)पित्तहरं रुच्यं पुष्टिदं भूतनाशनम् ॥३९॥

स्निग्धं मरकतं स्वच्छं सर्वदोषहरं शुभम् ।

कान्तिसौभाग्यदं मेध्यं भूतग्रहविषापहम् ॥ ४० ॥

पुष्परागः ॥

पीतस्तु पुष्परागः
पीतस्फुटिकं च पीतरत्नं च ।
पीताश्मा गुरुरत्नं
पीतमणिः पुष्यरागश्च ॥ ४१ ॥

ईषत्पीतं पविच्छायं स्वच्छं कान्त्या मनोहरम् ।
पुष्यराग इति ख्यातं रत्नं रत्नपरीक्षकैः ॥ ४२ ॥

हेमच्छायं शिरोवृत्तं ज्योतिरङ्गारनिर्मलम् ।
पीतगात्रं गुरु स्निग्धं पुष्यरागं प्रशस्यते ॥ ४३ ॥

रूक्षं क्षतलघु श्वेतं कृष्णं गौरं सशर्करम् ।
मलिनं बिन्दुमद्रत्नं पुष्यरागं न शस्यते ॥ ४४ ॥

[पुष्यरागगुणाः ।]

पुष्यरागोऽम्लशीतश्च वातजिद्दीपनः परम् ।
आयुः श्रियं च प्रज्ञां च धारणात्कुरुते नृणाम् ॥४५॥

पुष्यरागं शुभं मेध्यं वस्तुसौभाग्यकीर्तिदम् ।
वाक्पटुत्वकरं हृद्यं विषघ्नं दोषजित्परम् ॥ ४६ ॥

वज्रम् ॥

वज्रमिन्द्रायुधं वीरं भिदुरं कुलिशं पविः ।
अभेद्यमसिरं रत्नं दृढं भार्गवकं स्मृतम् ॥ ४७ ॥

स्वच्छं विद्युत्प्रभं स्निग्धं सुन्दरं लघु लेखनम् ।
षडारं तीक्ष्णधारं च सुसौम्यारं श्रियं दिशेत् ॥ ४८ ॥

[वज्राकरा वज्रभेदाश्च ।]

पौण्ड्रमतङ्गहिमाचल-
सौराष्ट्रसुपारकोसलकलिङ्गाः ।
पेण्णा(पूर्णा)नदीतटश्चे-
त्यष्टौ वज्राकरा विनिर्दिष्टाः ॥ ४९ ॥

श्यामं प्रपौण्ड्रभवं
किञ्चित्पीतं मतङ्गगिरिजातम् ।
हिमवत्सुराष्ट्रसंभव-
मातामं कृष्णकान्ति सौपारम् ॥ ५० ॥

फुल्लशिरीषच्छायं
कोसलजं कनककान्ति कालिङ्गम् ।
पेण्णानदीतटोद्भव
माहुर्वज्रं सुधांशुनिभम् ॥ ५१ ॥

कलिङ्गकोसलौ देशौ मतङ्गाद्रिहिमालयौ ।
सौराष्ट्रपौण्ड्कौबेरा(पेण्णा)करसूपारकौ तथा ॥ ५२ ॥
कृतादिषु युगेष्वेतौ वज्राणामाकरौ स्मृतौ ।
आकरेष्वेव वज्राणां खनिः स्रोतः प्रकीर्णकम् ॥ ५३ ॥
समुत्पत्तिस्थलं त्रेधा निर्दिष्टं सुरनायिके ! ।

[वज्रगता गुणा दोषाश्च ।]

कोट्यः पार्श्वानि धाराश्च षडष्टौ द्वादशैव च ॥ ५४ ॥
इत्यच्छतीक्ष्णधाराग्रा वज्रस्याहुरथो गुणान् ।
मलो बिन्दुश्च रेखा च त्रासः काकपदं तथा ॥ ५५ ॥
एते दोषास्समाख्याताः पञ्च वज्रेषु संस्थिताः ।
कुर्यादशोधितं वज्रं कुष्ठदाहाङ्गगौरवम् ॥ ५६ ॥

हृत्पार्श्वपीडां पाण्डुं च ततस्तच्छुद्धिरुच्यते ।

[वज्रशुद्धिः ।]

गृहीत्वाऽथ शुभं वज्रं व्याघ्रीकन्दोदरे क्षिपेत् ॥ ५७ ॥
महिषीशकृदाऽऽलिप्य करीषाग्नौ विपाचयेत् ।
अहोरात्रात्समुद्धृत्य हयमूत्रेण सेचयेत् ॥ ५८ ॥
एवं पुनः पुनः पक्वं सप्तरात्राद्विशुध्यति ।
मेघनादाशमीश्यामाशृङ्गीमदनकोद्रवैः ॥ ५९ ॥
कुलुत्थवेतसागस्त्यसिन्दुवाराखुकर्णिकाः ।
एतेषां हयमूत्रेण कषायं साधितं पुनः ॥ ६० ॥
जम्बीरे कुलिशं क्षिप्त्वा हयमूत्रैस्त्र्यहं पचेत् ।
डोलायन्त्रविधानेन ततश्शुद्धिमवाप्नुयात् ॥ ६१ ॥
कुलुत्थकोद्रवक्वाथैर्डोलायन्त्रे विपाचयेत् ।
व्याघ्रीकन्दगतं वज्रं सप्ताहाच्छुद्धिमाप्नुयात् ॥ ६२ ॥
कुलत्थकोद्रवक्वाथं हयमूत्रं स्नुहीपयः ।
क्षिप्त्वा भाण्डे पचेत्तस्मिन्व्याघ्रीकन्दगतं पविम् ॥ ६३ ॥
डोलायन्त्रे दिवारात्रं समुद्धृत्य पुनः क्षिपेत् ।
वज्रकन्दे मृदा कन्दं लिप्त्वा गजपुटे पचेत् ॥ ६४ ॥
तत्पक्वं पाचनद्रावैस्सेचितं शुद्धिमाप्नुयात् ।
व्याघ्रीकन्दगतं वज्रं मृदा लिप्तं पुटे पचेत् ॥ ६५ ॥
अहोरात्रात्समुद्धृत्य हयमूत्रेण सेचयेत् ।
वज्रीक्षीरेण वा सिंच्यादेवं शुद्धं तु मारयेत् ॥ ६६ ॥

वज्रमारणविधिः ॥

[विप्रजातीयवज्रमारणम् ।]

वक्ष्यते विप्रजात्यादेश्शुद्धवज्रस्य मारणम् ।

क्षेकं कर्कटास्थि च ॥ ६७ ॥

ा मूषामध्ये प्रलेपयेत् ।
ैषधैस्तैस्ततः परम् ॥ ६८ ॥

ततो मूषां निरोधयेत् ।
टेन महता पुनः ॥ ६९ ॥

टेनैकेन सिध्यति ।

पजातीयवज्रमारणम् ।]

रदं(वदरं)च ह्युदुम्बरम् ॥ ७० ॥

तत्कृते गोलके क्षिपेत् ।
ूर्ववन्मारयेद्ध्रुवम् ॥ ७१ ॥

[जातीयवज्रमारणम् ।]

शिलायां(ह्व) पेषयेत्समम् ।
कच्छपास्थि च पेषयेत् ॥ ७२ ॥

कृते गोलके क्षिपेत् ।
पूर्ववत्तन्मृतं भवेत् ॥ ७३ ॥

जातीयवज्रमारणम् ।]

शिलां संपेषयेत्समम् ।
गोलके पूर्ववत्पचेत् ॥ ७४ ॥

तेन सम्यग्भवेन्मृतम् ।

नपुंसकवज्रमारणम् ।]

र्म्रियते तत्तदौषधैः ॥ ७५ ॥

ृतिर्वज्रे नपुंसके ।

सामान्येन वज्रमारणविधिः ॥

[प्रथमः प्रकारः ।]

सामान्यस्सर्ववज्राणां वक्ष्यते मारणक्रमः ॥ ७६ ॥

शुद्धं वज्रं मत्कुणानां रक्तैर्लिप्त्वा धमेत्पुनः ।
अग्निवर्णं क्षिपेन्मूत्रे गर्दभस्य पुनः पुनः ॥ ७७ ॥

लेपितं ध्मापितं तद्वदेवं कुर्यात्त्रिसप्तधा ।
तालकं मत्कुणैः पिष्ट्वा तस्मिन्गोले क्षिपेत्तु तम् ॥७८॥

रुध्वा मूषां धमेद्गाढं हयमूत्रे विनिक्षिपेत् ।
समुद्धृत्य पुनस्तद्वत्सप्तवारैर्मृतो भवेत् ॥ ७९ ॥

[द्वितीयः प्रकारः ।]

मेषशृङ्गं भुजङ्गास्थि कूर्मपृष्ठं शिलाजतु ।
गन्धकं कान्तपाषाणं मुनिपुष्पं सतालकम् ॥ ८० ॥

त्रिक्षारं पञ्चलवणं मेषशृङ्गीन्द्रवारुणी ।
वज्रवल्ली मूषकर्णी बदरी कुट्मलानि च ॥ ८१ ॥

मूषकस्य मलं स्तन्यं स्नुह्यर्कक्षीरमत्कुणम् ।
पञ्चाङ्गं शरपुंखस्य ह्यस्थिनी खरमेषयोः ॥ ८२ ॥

पेटारिबीजं स्त्रीपुष्पं पारावतमलं शिला ।
पुष्पाणि चैव बाकुच्याः पञ्चाङ्गं तिमिरस्य च ॥ ८३ ॥

धात्रीवृक्षस्य पञ्चाङ्गं गोरंभा वाजिमूत्रकम् ।
हंसपादी वज्रकन्दं बृहतीफलसूरणम् ॥ ८४ ॥

गोजिह्वा कर्कटं मांसं मूत्रवर्गं च मिश्रयेत् ।
एतत्समस्तं व्यस्तं वा यथालाभं सुपिण्डितम् ॥८५॥

तत्पिण्डे निक्षिपेद्वज्रमन्धमूषागतं पुटेत् ।

कुलुत्थकोद्रवं पिष्ट्वा हयमूत्रे विलोलयेत् ॥ ८६ ॥

तन्मध्ये सेचयेत्तप्तां मूषापुटविनिर्गताम्।
एवं पुनः पुनः कुर्यादेकविंशतिवारकम् ॥ ८७ ॥

आदाय तत्पुनर्वज्रं ताले मत्कुणपेषिते।
गोलके निक्षिपेद्रुध्वा मूषां तीव्रानले धमेत् ॥ ८८ ॥

इत्येवं सप्तधा ध्मातं हयमूत्रे निषेचयेत्।
अनेन क्रमयोगेन मृतो भवति निश्चितम् ॥ ८९ ॥

तन्मृतं चूर्णयेत्खल्वे सिद्धयोग उदाहृतः।

[तृतीयः प्रकारः।]

आमकं च मृतं ताप्यं पेटालीबीजटङ्कणम् ॥ ९० ॥

क्षीरं चोत्तरवारुण्या गन्धक तालकं शिला।
चिञ्चाबीजं मेषशृङ्गी स्त्रीपुष्पं चाम्लवेतसः ॥ ९१ ॥

पञ्चाङ्गं शरपुंखायाश्शशदन्तं शिलाजतु।
एतत्समस्तं व्यस्तं वा यथालाभं सुचूर्णयेत् ॥ ९२ ॥

स्नुह्यर्कोत्तरवारुण्याः क्षीरैस्स्तन्यैर्विमर्दयेत्।
तद्गोलके क्षिपेद्वज्रं रुध्वा चैतान्धमेद्दृढम् ॥ ९३ ॥

गुडूची सैन्धवं हिङ्गु समुस्तोत्तरवारुणी।
क्वाथैः कौलुत्थकैः पिष्ट्वा तस्मिन्क्वाथे विनिक्षिपेत् ॥

तं वज्रं पूर्ववद्गोले कृत्वा रुध्वा धमेत्तथा।
सेचनान्तं ततः कुर्यादेकविंशतिवारकम् ॥ ९५ ॥

तालकं मत्कुणायोगे सप्तवारं पुनर्धमेत्।
सेचयेदश्वमूत्रेण तद्वज्रं म्रियते ध्रुवम् ॥ ९६ ॥

[चतुर्थः प्रकारः ।]

त्रिवर्षीयोत्थकार्पासमूलमादाय पेषयेत् ।
त्रिवर्षनागवल्ल्या वा निजद्रावैः प्रपेषयेत् ॥ ९७ ॥

तद्गोलके क्षिपेद्वज्रं रुध्वा गजपुटे पचेत् ।
एवं सप्तपुटैः पक्वमेकैकेन कृतं भवेत् ॥ ९८ ॥

[पञ्चमः प्रकारः ।]

तालकासीससौराष्ट्रीमपामार्गस्य भस्म च ।
पिष्ट्वा कौलुत्थकैः क्वाथैस्तस्मिन्वज्रं सुतापितम् ॥९९ ॥

क्षिपेत्त्रिसप्तवाराणि म्रियते नाऽत्र संशयः ।

[षष्ठः प्रकारः ।]

वैक्रान्तभस्मना सार्धं पेषयेदम्लवेतसम् ॥ १०० ॥

तद्गोले निक्षिपेद्वज्रमन्धमूषागतं धमेत् ।
सेचयेदश्वमूत्रेण पूर्वगोले पुनः क्षिपेत् ॥ १०१ ॥

रुध्वा ध्मातः पुनस्सेच्यमेवंकुर्यात्त्रिसप्तधा ।
म्रियते नाऽत्र सन्देहस्सर्वयोगेषु योजयेत् ॥ १०२ ॥

[सप्तमः प्रकारः ।]

उत्तरावारुणीक्षीरैः कान्तपाषाणजं मुखम् ।
क्षणं पिष्ट्वा तु तद्गोलं क्षिप्त्वा तस्मिन्पचेद्दिनम् ॥

नृतैले गन्धतैलेन म्रियते नाऽत्र संशयः ।

[अष्टमः प्रकारः ।]

भूनागं गन्धकं चाऽथ नारीस्तन्येन पेषयेत् १०४ ॥

तद्गोलस्थं पचेद्वज्रं पूर्वतैले मृतं भवेत् ।

[नवमः प्रकारः]

स्नुहीक्षीरेण विमलां पिष्ट्वा तद्गोलके क्षिपेत् ॥१०५॥
वज्रं निरुध्य मूषां तु शुष्कां तीव्राग्निना धमेत् ।
क्षिप्तामश्वस्य मूत्रे तु क्षिप्त्वा वज्रं समाहरेत् ॥१०६॥
इत्येवं सप्तधा कुर्यात्ततस्तालकमत्कुणैः ।
पिष्ट्वा गोलं क्षिपेत्तस्मिन्वज्रमूषां निरुध्य च ॥१०७॥
ध्मापितं पूर्ववत्सेच्यं सप्तवारैर्मृतं भवेत् । ।

[दशमः प्रकारः ।]

वज्रं मत्कुणरक्तेन लिप्त्वा लिप्त्वाऽऽतपे क्षिपेत् ॥
शुष्कं लेप्यं पुनः शोष्यं यावत्सप्तदिनावधि ।
विष्णुक्रान्तापेटकार्योर्द्रवैस्सिञ्चेत्पुनः पुनः ॥ १०९ ॥
तप्तं तप्तं च तद्वज्रं शतवारैर्मृतं भवेत् ।

[एकादशः प्रकारः ।]

गन्धकं चूर्णितं भाव्यं स्त्रीपुष्पेण तु सप्तधा ॥११०॥
पुनस्स्त्रीरजसाऽऽलोड्यं तस्मिन्वज्रं सुतापितम् ।
सेचयेत्तापयेदेकविंशद्वारान्मृतं भवेत् ॥ १११ ॥

[द्वादशः प्रकारः ।]

वज्रं नदीमहाशुक्तौ क्षिप्त्वा भाव्यं मुहुर्मुहुः ।
स्नुह्यर्कोत्तमकन्यानां द्रवैणैकेन चातपे ॥ ११२ ॥
कृष्णक(म)र्कटमांसेन पेषितं वेष्टयेत्पुनः ।
भूनागस्य मृदा सम्यग्धृतं भस्मत्वमाप्नुयात् ॥ ११३ ॥

[त्रयोदशः प्रकारः।]

रक्तमूलस्य मूलैश्च मेघनादस्य कुट्मलैः ।
पेषितैर्वेष्टितं ध्मातं वज्रं भस्म भवत्यलम् ॥ ११४ ॥

[चतुर्दशः प्रकारः।]

मातुलुङ्गगतं वज्रं रुध्वा लिम्पेन्मृदा बहिः ।
पुटे पचेत्समुद्धृत्य तद्वच्छतपुटे पचेत् ॥ ११५ ॥

वज्रौदनम्–वज्रमृदूकरणं वा ॥

[प्रथमः प्रकारः।]

नागपर्णीद्रवैर्लिप्तं तत्पत्रेणैव वेष्टितम् ।
जानुमध्ये स्थितं यामं तद्वज्रं मृदुतां व्रजेत् ॥ ११६ ॥

[द्वितीयः प्रकारः।]

मातृवाहकबीजस्य मध्ये वज्रं विनिक्षिपेत् ।
जम्बीरोदरगं वाऽथ दोलायन्त्रे दिनं पचेत् ॥ ११७ ॥
कुलुत्थकोद्रवकाथे त्रैफले वा कषायके ।
अहोरात्रात्समुद्धृत्य जम्बीरान्तः पुनः क्षिपेत् ॥११८॥
मातृवाहकबीजे वा पचेत्प्रक्षिप्य पूर्ववत् ।
पुनः क्षेप्यं पुनः पाच्यं त्रिदिनान्ते समुद्धरेत् ॥११९॥
बदरीवटनिम्बानामङ्कुराणि समाहरेत् ।
पिष्ट्वा तद्गोलके वज्रं पूर्वपक्वं विनिक्षिपेत् ॥ १२० ॥
अश्वत्थपत्रके वेष्ट्य तद्गोलं जानुमध्यगम् ।
दिनं वा धारयेत्कक्षे मृदुर्भवति निश्चितम् ॥ १२१ ॥

[तृतीयः प्रकारः।]

पारदं तीक्ष्णचूर्णं च दिनमम्लेन मर्दयेत् ।

तद्गोले निक्षिपेद्वज्रं सूत्रेणावेष्टयेद्बहिः ॥ १२२ ॥
नागवल्लीदलैश्चैव वेष्टितं धान्यराशिगम्।
मासान्ते तत्समुद्धृत्य लिंपेन्नागलताद्रवैः ॥ १२३ ॥
तद्दलैर्वेष्टितं जानुमध्यस्थं मृदुतां व्रजेत्।

[चतुर्थः प्रकारः।]

कान्तपाषाणवक्त्रं वा चूर्णं वा कान्तलोहजम् ॥१२४॥
ससूतमम्लयोगेन दिनमेकं विमर्दयेत्।
तद्गोले निक्षिपेद्वज्रं निम्बकार्पासकोद्रवैः ॥ १२५ ॥
पत्रैः पिष्टैस्सुसंपेष्य नागवल्लीदलैस्ततः।
वेष्टितं जानुमध्यस्थं दिनान्ते मृदुतां व्रजेत् ॥ १२६ ॥

[पञ्चमः प्रकारः।]

एरण्डवृक्षमध्ये तु तत्फले वा क्षिपेत्पविम्।
मासमात्रात्समुद्धृत्य जानुमध्ये च पूर्ववत् ॥ १२७ ॥
कोमलं जायते वज्रं दिनान्ते नाऽत्र संशयः।

[षष्ठः प्रकारः।]

वज्रं तित्तिरिमांसेन वेष्टितं निक्षिपेन्मुखे ॥ १२८ ॥
अतिस्थूलस्य भेकस्य मुखं सूत्रेण वेष्टयेत्।
निखनेद्धस्तमात्रायां क्षोण्यां मासात्समुद्धरेत् ॥१२९॥
मण्डूकं सम्पुटे रुध्वा सम्यग्गजपुटे पचेत्।
तद्वज्रं पूर्वगोलस्थं जानुमध्यगतं दिनम् ॥ १३० ॥
भवेद्वज्रौदनं साक्षात्पश्चादाहार्य योजयेत्।
सर्ववज्रौदनानां तु मारणं पूर्ववद्भवेत् ॥ १३१ ॥

वज्रद्रुतिः ॥

क्षारत्रयं रामठं च चणकाम्लाम्लवेतसम् ।
ज्वालामुखीं चेक्षुरकं स्थलकुम्भीफलानि च ॥ १३२ ॥
स्नुह्यर्कपयसा श्लक्ष्णं पिष्ट्वा तद्गोलके क्षिपेत् ।
वज्रं विशोधितं सम्यग्वस्त्रे बध्वा हठात्पचेत् ॥ १३३ ॥
डोलायन्त्रेण धान्याम्ले द्रुतं मासाष्टकाद्भवेत् ।
वज्रवल्ल्यन्तरस्थं वा कृत्वा वज्रं निरोधितम् ॥ १३४ ॥
अम्लभाण्डगतं सेच्यं सप्ताहाद्द्रवतां व्रजेत् ।
भस्मौदनं द्रुतिश्चेति त्रिविधं वज्रमारणम् ॥ १३५ ॥
रसबन्धकरं प्रोक्तं नागार्जुनपुरस्सरैः ।

वज्रगुणाः ॥

वज्रं च षड्रसोपेतं सर्वरोगापहारकम् ॥ १३६ ॥
सर्वाघशमनं सौख्यं देहदार्ढ्यं रसायनम् ।
वज्रं रत्नोत्तमं पुण्यं श्रीसौभाग्यविवर्धनम् ॥ १३७ ॥
आयुष्यं धन्यमोजस्यं यशस्यं सर्वपाप्मजित् ।
आयुर्बलं देहसौख्यं रूपं कान्तिं करोति च ॥१३८॥
सेवितं हन्ति रोगांश्च मृतं वज्रं न संशयः ।

नीलम् ॥

नीलस्तु सौरिरत्नं स्यान्नीलाश्मा नीलरत्नकः ॥१३९॥
नीलोपलस्तृणग्राही महानीलस्सुनीलकः ।
इन्द्रनीलमणिस्तत्र चतुर्धा जातिभेदतः ॥ १४० ॥
सितच्छायो भवेद्विप्रो रक्तः क्षत्रियजातिकः ।

पीतस्तु वैश्यजातिर्यो वृषलः कृष्णदीधितिः ॥ १४१ ॥

[नीलस्य गुणा दोषाश्च ।]

नीलीरससमाभासा वैष्णवीपुष्पसन्निभा ।
लवलीपुष्पसङ्काशा नीलेन्दीवरसप्रभा ॥ १४२ ॥

अतसीपुष्पसङ्काशा चाष(भस्म)पक्षसमद्युतिः ।
कृष्णत्रिकर्णिकापुष्पसमानद्युतिधारिणी ॥ १४३ ॥

मयूरकण्ठसच्छाया शंभोः कण्ठनिभा तथा ।
विष्णुदेहसमाभासा भृङ्गपत्रसमप्रभा ॥ १४४ ॥

एताश्छायाश्शुभकरा इन्द्रनीलमहामणेः ।
गुरुत्वं स्निग्धकान्तित्वं सुरागं पार्श्वरञ्जनम् ॥ १४५ ॥

तृणग्राहित्वमित्येते गुणाः पञ्च प्रकीर्तिताः ।
न विम्लो(निम्नो)निर्मलो गात्रो मसृणो गुरुदीप्तिकः ॥

तृणग्राही मृदुर्नीलो दुर्लभो लक्षणान्वितः ।
इन्द्रनीलं शुभं वर्ण्यं सर्वपापनिवर्हणम् ॥ १४७ ॥

आयुर्यशो बलं लक्ष्मीमारोग्यं च प्रयच्छति ।
नीलस्सतिक्तकोष्णश्च कफपित्तानिलापहः ॥ १४८ ॥

यो दधाति शरीरेऽस्य सौरिर्मङ्गलदो भवेत् ।

गोमेदकः ॥

गोमेदकस्तु गोमेदो राहुरत्नं तमो मणिः ॥ १४९ ॥

स्वर्भानवष्षडाह्वोऽयं पिङ्गस्फटिक इत्यपि ।

गोमूत्राभं यन्मृदु स्निग्धमुष्णं
शुद्धच्छायं गौरवं यच्च धत्ते ।
हेमारक्तं श्रीमतां योग्यमेतत्
गोमेदाख्यं रत्नमाख्याति सन्तः ॥ १५० ॥

मधुबिन्दु(धूच्छिष्ट)समच्छायं गोमूत्राज्यसमप्रभम् ॥

हेमरक्तं गुरु स्वच्छं स्निग्धं गोमेदकं शुभम् ।
श्वेतं कृष्णं रङ्गहीनं त्रासरेखादिदूषितम् ॥ १५२ ॥

कर्कशं पाटलाकारं दुष्टं गोमेदकं त्यजेत् ।

[गोमेदकगुणाः ।]

मेध्यं गोमेदकं रत्नं यशस्यं श्रीविवर्धनम् ॥ १५३ ॥

मङ्गल्यं कान्तिजननं स्निग्धं सर्वविषापहम् ।
गोमेदकोऽम्लमुष्णं च वातकोपविकारजित् ॥ १५४ ॥

दीपनं पाचनं चैव धृतोऽयं पापनाशनः ।

वैडूर्यम् ॥

वैडूर्यं केतुरत्नं च खशब्दाङ्कुरजं तथा ॥ १५५ ॥

विडूरभूमिजं रत्नं प्रावृष्यं पञ्चनाम च ।

कल्पान्तकालक्षुभितांबुराशि-
निदाह(ह्राद)कल्पाद्दितिजेन्द्रनादात् ।
वैडूर्यमुत्पन्नमनेकवर्णं
शोभाभिरामद्युतिरत्नवर्यम् ॥ १५६ ॥

अविदूरे विडूरस्य गिरेरुत्तुङ्गरोधसः ॥ १५७ ॥

कोङ्कचोलकसीमान्ते मणेस्तस्याकरस्स्मृतः ।
तत्र दैत्येन्द्रनिनदं प्रति मेघसुगर्जितैः ॥ १५८ ॥

समुद्भवन्ति वैडूर्यमणयः प्रावृडागमे ।
सिताभ्रधूमसङ्काशमीषत्कृष्णं सितं तु यत् ॥ १५९ ॥

वैडूर्यं नाम तत्प्रोक्तं रत्नवर्णपरीक्षकैः ।
वेणुपत्रबिडालाक्षिशिखिकण्ठसमद्युति ॥ १६० ॥

स्निग्धगात्रं गुरु स्वच्छं वैडूर्यं गुणवन्मतम् ।
रेखाभिन्नं लघु स्पष्टं शिलाङ्गारककर्दमम् ॥ १६१ ॥
विवर्णं परुषं कृष्णं वैडूर्यं दोषवत्त्यजेत् ।

[वैडूर्यस्य गुणाः।]

वैडूर्यं विशदं स्निग्धं प्रीत्यायुर्बलवर्धनम् ॥ १६२ ॥
मङ्गल्यं धारणात्तद्धि सर्वग्रहविषापहम् ।
वैडूर्यमम्लमुष्णं च कफमारुतनाशनम् ॥ १६३ ॥
गुल्मशूलप्रशमनं भूषितं च शुभावहम् ।

पञ्चरत्नानि ॥

माणिक्यं मौक्तिकं वज्रं नीलं मरकतं तथा ॥ १६४ ॥
पञ्चरत्नमिति प्रोक्तं पाप्मालक्ष्मीविषापहम् ।

नवरत्नानि ॥

गोमेदकं पुष्परागं वैडूर्यमपि विद्रुमम् ॥ १६५ ॥
पञ्चरत्नैस्सहैतानि नवरत्नानि निर्दिशेत् ।

उपरत्नानि ॥

सूर्यकान्तः ॥

अथ भवति सूर्यकान्तः
　　तपनमणिस्तापनश्च रविकान्तः ।
दीप्तोपलोऽग्निगर्भो
　　ज्वलनाश्माऽर्कोपलश्च वसुनामा ॥ १६६ ॥

श्वेताभ्रकसमं वर्णैर्हिमाद्रौ चन्द्रसन्निभम् ॥ १६७ ॥
निर्मलं च प्रभायुक्तं स्फटिकं श्रेष्ठमुच्यते ।
हिमालये सिंहले च विन्ध्ये रेवातटे तथा ॥ १६८ ॥

पद्मरागोद्भवे स्थाने विविधं स्फटिकं भवेत् ।
सूर्यकान्तं च तत्रैकं चन्द्रकान्तं तथाऽपरम् ॥ १६९ ॥

सूर्यांशुस्पर्शमात्रेण वह्निं वमति तत्क्षणात् ।
सूर्यकान्तं तदाख्यातं स्फटिकं रत्नवेधितम् ॥ १७० ॥

[सूर्यकान्तस्य गुणाः ।]

सूर्यकान्तो भवेदुष्णो निर्मलश्च रसायनम् ।
वातश्लेष्महरो मेध्यः पूजनाद्रवितुष्टिदः ॥ १७१ ॥

चन्द्रकान्तः ॥

इन्दुकान्तश्चन्द्रकान्तश्चन्द्राश्मा संस्रवोपलः ।
शीताश्मा चन्द्रिकाद्रावः शशिकान्तश्च सप्तधा ॥१७२॥

स्निग्धं श्वेतं पीतमत्वाऽऽसमन्ताद्-
धत्ते चित्तं स्वस्थतां यन्मुनीनाम् ।
यच्च द्रावं याति चन्द्रांशुसङ्गे
जात्यं रत्नं चन्द्रकान्ताख्यमेतत् ॥ १७३ ॥

[चन्द्रकान्तस्य गुणाः ।]

चन्द्रकान्तस्तु शिशिरः स्निग्धः पित्तास्रदाहनुत् ।
शिवप्रीतिकरः स्वच्छो ग्रहालक्ष्मीविषापहः ॥ १७४ ॥

स्फटिकम् ॥

स्फटिकस्सितोपलस्स्या-
दमलमणिस्तारकोपलस्स्वच्छः ।
शीतोष्णवीर्यमक्ष्णः
पित्तं वातं निहन्ति शोफघ्नम् ॥ १७५ ॥

पुरा प्रोक्तं हि कान्तस्य मया ते लक्षणादिकम् ।

वैक्रान्तम् ॥

वैक्रान्तं चैव विक्रान्तं नीलवज्रं कुवज्रकम् ॥ १७६ ॥
गोनाशं क्षुद्रकुलिशं चूर्णवज्रं च गोनसम् ।
श्वेतो रक्तश्च पीतश्च नीलः पारावतच्छविः ॥ १७७ ॥
श्यामलः कृष्णवर्णश्च कर्बुरश्चाष्टधा हि सः ।
वज्राभावे तु वैक्रान्तं रसवीर्यादिके समम् ॥ १७८ ॥
अष्टास्रश्चाष्टफलकष्षट्कोणो मसृणो गुरुः ।
शुद्धमिश्रितवर्णैश्च युक्तो वैक्रान्त उच्यते ॥ १७९ ॥

[वैक्रान्तशुद्धिः ।]

कुलुत्थकाथसंस्विन्नो वैक्रान्तः परिशुध्यति ।
त्रिक्षारैः पञ्चलवणैर्वसामूत्राम्लकोद्रवैः ॥ १८० ॥
मत्स्यतैलघृतैस्तुल्यैः कुलुत्थैः काञ्जिकान्वितैः ।
सप्ताहं डोलिकायन्त्रे व्याघ्रीकन्दगतं पचेत् ॥ १८१ ॥
तप्तवर्णं तु वैक्रान्तं शुद्धिमायाति निश्चितम् ।

[वैक्रान्तभस्म ।]

हयमूत्रेण तत्सेच्यं तप्तं तप्तं द्विसप्तधा ॥ १८२ ॥
ततश्चोत्तरवारुण्याः पञ्चाङ्गैर्गोलके क्षिपेत् ।
रुध्वा मूषां पुटे पक्त्वा पुनरुद्धृत्य गोलके ॥ १८३ ॥
क्षिप्त्वा रुध्वा पुटेदेवं सप्तधा भस्मतां व्रजेत् ।

वैक्रान्तसत्वम् ॥

[प्रथमः प्रकारः ।]

वैक्रान्तस्य पलैकं तु पलैकं टङ्कणस्य च ॥ १८४ ॥
रविक्षीरे दिनं भाव्यं मर्द्यं शिग्रुद्रवैर्दिनम् ।

पद्मरागोद्भवे स्थाने विविधं स्फटिकं भवेत् ।
सूर्यकान्तं च तत्रैकं चन्द्रकान्तं तथाऽपरम् ॥ १६९ ॥

सूर्यांशुस्पर्शमात्रेण वह्निं वमति तत्क्षणात् ।
सूर्यकान्तं तदाख्यातं स्फटिकं रत्नवेधितम् ॥ १७० ॥

[सूर्यकान्तस्य गुणाः ।]

सूर्यकान्तो भवेदुष्णो निर्मलश्च रसायनम् ।
वातश्लेष्महरो मेध्यः पूजनाद्रवितुष्टिदः ॥ १७१ ॥

चन्द्रकान्तः ॥

इन्दुकान्तश्चन्द्रकान्तश्चन्द्राश्मा संस्रवोपलः ।
शीताश्मा चन्द्रिकाद्रावः शशिकान्तश्च सप्तधा ॥१७२॥

स्निग्धं श्वेतं पीतमत्वाऽऽसमन्ताद्-
धत्ते चित्तं स्वस्थतां यन्मुनीनाम् ।
यच्च द्रावं याति चन्द्रांशुसङ्गे
जात्यं रत्नं चन्द्रकान्ताख्यमेतत् ॥ १७३ ॥

[चन्द्रकान्तस्य गुणाः ।]

चन्द्रकान्तस्तु शिशिरः स्निग्धः पित्तास्रदाहनुत् ।
शिवप्रीतिकरः स्वच्छो ग्रहालक्ष्मीविषापहः ॥ १७४ ॥

स्फटिकम् ॥

स्फटिकस्सितोपलस्स्या-
दमलमणिस्तारकोपलस्स्वच्छः ।
शीतोष्णवीर्यमक्ष्णः
पित्तं वातं निहन्ति शोफघ्नम् ॥ १७५ ॥

पुरा प्रोक्तं हि कान्तस्य मया ते लक्षणादिकम् ।

वैक्रान्तम् ॥

वैक्रान्तं चैव विक्रान्तं नीलवज्रं कुवज्रकम् ॥ १७६ ॥
गोनाशं क्षुद्रकुलिशं चूर्णवज्रं च गोनसम् ।
श्वेतो रक्तश्च पीतश्च नीलः पारावतच्छविः ॥ १७७ ॥
श्यामलः कृष्णवर्णश्च कर्बुरश्चाष्टधा हि सः ।
वज्राभावे तु वैक्रान्तं रसवीर्यादिके समम् ॥ १७८ ॥
अष्टास्रश्चाष्टफलकः षट्कोणो मसृणो गुरुः ।
शुद्धमिश्रितवर्णैश्च युक्तो वैक्रान्त उच्यते ॥ १७९ ॥

[वैक्रान्तशुद्धिः ।]

कुलुत्थक्वाथसंस्विन्नो वैक्रान्तः परिशुध्यति ।
त्रिक्षारैः पञ्चलवणैर्वसामूत्राम्लकोद्रवैः ॥ १८० ॥
मत्स्यतैलघृतैस्तुल्यैः कुलुत्थैः काञ्जिकान्वितैः ।
सप्ताहं डोलिकायन्त्रे व्याघ्रीकन्दगतं पचेत् ॥ १८१ ॥
तप्तवर्णं तु वैक्रान्तं शुद्धिमायाति निश्चितम् ।

[वैक्रान्तभस्म ।]

हयमूत्रेण तत्सेच्यं तप्तं तप्तं द्विसप्तधा ॥ १८२ ॥
ततश्चोत्तरवारुण्याः पञ्चाङ्गैर्गोलके क्षिपेत् ।
रुध्वा मूषां पुटे पक्त्वा पुनरुद्धृत्य गोलके ॥ १८३ ॥
क्षिप्त्वा रुध्वा पुटेदेवं सप्तधा भस्मतां व्रजेत् ।

वैक्रान्तसत्वम् ॥

[प्रथमः प्रकारः ।]

वैक्रान्तस्य पलैकं तु पलैकं टङ्कणस्य च ॥ १८४ ॥
रविक्षीरे दिनं भाव्यं मर्द्यं शिग्रुद्रवैर्दिनम् ।

गुञ्जापिण्याकवह्नीनां प्रतिकर्षं वियोजयेत् ॥ १८५ ॥

अनेन गुलिकां कृत्वा कोष्ठीयन्त्रे धमेद्दृढम् ।
शङ्खकुन्देन्दुसङ्काशं सत्वं वैक्रान्तजं भवेत् ॥ १८६ ॥

[द्वितीयः प्रकारः ।]

वैक्रान्तं वज्रकन्दं च समं स्नुक्पयसा सह ।
महिषीनवनीतं च सक्षौद्रं मर्दयेद्दिनम् ॥ १८७ ॥

पूर्ववद्धमनात्सत्वमिन्द्रगोपनिभं भवेत् ।

[तृतीयः प्रकारः ।]

वन्ध्याचूर्णं सवैक्रान्तं छायायां मर्दयेत्समम् ॥ १८८ ॥

अजामूत्रैर्दिनैकं तु सत्वं रजतवद्भवेत् ।

[चतुर्थः प्रकारः ।]

म्रियतेऽष्टपुटैर्गन्धनिम्बुकद्रवसंयुतः ॥ १८९ ॥

सत्वपातनयोगेन मर्दितश्च वटीकृतः ।
मूषायां वटिकां ध्मातो वैक्रान्तस्सत्वमुत्सृजेत् ॥१९०॥

[वैक्रान्तद्रुतिः ।]

श्वेतवर्णं तु वैक्रान्तमम्लवेतसभावितम् ।
सप्ताहान्नात्र सन्देहः खरे घर्मे द्रवत्यलम् ॥ १९१ ॥

केतकीस्वरसं तुत्थं सैन्धवं स्वर्णपुष्पिकम् ।
इन्द्रगोपसमं युक्तं सर्वं भाण्डे विनिक्षिपेत् ॥ १९२ ॥

सप्ताहं स्वेदयेत्तस्मिन्वैक्रान्तं द्रवतां व्रजेत् ।

[वैक्रान्तगुणाः ।]

आयुःप्रदश्च बलवर्णकरोऽतिवृष्यः
प्रज्ञाप्रदः सकलदोषमदापहारी ।
दीप्ताग्निकृत्पविसमानगुणस्तरस्वी
वैक्रान्तकः खलु वपुर्बललोहकारी ॥ १९३ ॥

राजावर्तः ॥

आवर्तमणिरावर्तो राजावर्तोऽनलाह्वयः ॥ १९४ ॥

राजावर्तरसस्याथ लक्षणं कथयाम्यहम् ।
वर्णेन भ्रमराभस्स्याद्द्विःप्रकारः प्रकर्मतः ॥ १९५ ॥

एकश्चूर्णाकृतिर्ज्ञेयो द्वितीयो गोलकात्मकः ।
स्वर्णबिन्दुसमायुक्तः स्थिररागस्स्थिरत्वदः(व्यधः) ॥

रसदो(जतो)द्भवरागस्य(श्च) वर्णोत्कर्षेऽतिदक्षिणः ।
नागस्य रञ्जने श्रेष्ठस्तारे रञ्जनकर्मणि ॥ १९७ ॥

सर्वेषां चलरागाणां रागबन्धनकृन्मतः ।
राजावर्तोऽल्परक्तोरुनीलिकामिश्रितप्रभः ॥ १९८ ॥

गुरुश्च मसृणः श्रेष्ठस्तदन्यो मध्यमः स्मृतः ।

[राजावर्तादिशुद्धिः ।]

निम्बुद्रवैस्सगोमूत्रैस्सक्षारैस्स्वेदिताः खलु ॥ १९९ ॥

द्वित्रिवारेण शुध्यन्ति राजावर्तादिधातवः ।

[राजावर्तभस्म ।]

लुङ्गाम्बुगन्धकोपेतो राजावर्तो विचूर्णितः ॥ २०० ॥

पुटनात्सप्तवारेण राजावर्तो मृतो भवेत् ।

[राजावर्तसत्वम् ।]

राजावर्तमयःपात्रे पाचयेन्माहिषैर्घृतैः ॥ २०१ ॥

पयोभिश्च दिनं चैकं मित्रपञ्चकमिश्रितम् ।
रजन्या पञ्चरात्रेण पिण्डीभूतं तु कारयेत् ॥ २०२ ॥

खादिराङ्गारयोगेन कोष्ठ्यां सत्वं विमुञ्चति ।

[राजावर्तगुणाः ।]

प्रमेहक्षयदुर्नामपाण्डुश्लेष्मानिलापहः ॥ २०३ ॥

दीपनः पाचनो वृष्यो राजावर्तो रसायनः ।

गरुडोद्गारः ॥

सस्यको गरुडोद्गारः कालजिद्विषसा(मा)रकः ॥२०४॥

कालकूटविषं पीत्वा गरुडस्सोढुमक्षमः ।
तदा निर्गत्य तच्चंचोर्बहुधा सस्यकोऽभवत् ॥ २०५॥

महारसस्सस्यकस्स्यात्प्रभाभिः पञ्चभिर्युतः ।
धवलो मेचकः पीतो हरितश्चातिलोहितः ॥ २०६ ॥

अतिस्थितो वीतिहोत्रस्सर्वतस्सर्वरूपभाक् ।

[गरुडोद्गारगुणाः ।]

धवलो हरितश्चैव शस्यते तारकर्मणि ॥ २०७ ॥

लोहितो मेचकः पीतश्शस्यते हेमकर्मणि ।
सस्यकस्सर्वरोगघ्नो विषमृत्युभयापहः ॥ २०८ ॥

विमलः ॥

विमलो निर्मलस्स्वच्छो विमलस्स्वच्छधातुकः ।
बाणसंख्याभिधं शस्तं तारहेम द्विधाकृतः ॥ २०९ ॥

विमलस्त्रिविधः प्रोक्तो हेमाद्यस्तारपूर्विकः ।
तृतीयः कांस्यविमलस्तत्र कान्त्या स लक्ष्यते ॥२१०॥
वर्तुलः कोणसंयुक्तः स्निग्धश्च फलकान्वितः ।

[विमलगुणाः ।]

मरुत्पित्तहरो वृष्यो विमलोऽतिरसायनः ॥ २११ ॥
पूर्वो हेमक्रियासूक्तो द्वितीयो वृष्यकर्मणि ।
तृतीयो भेषजे तेषु पूर्वपूर्वो गुणोत्तरः ॥ २१२ ॥

[विमलशुद्धिः ।]

आटरूषरसे स्विन्नो विमलो विमलो भवेत् ।
कदलीकन्दतोयेन विमलं प्रथमं पचेत् ॥ २१३ ॥
अम्लवेतसधान्याम्लमेषीमूत्रे ततः पचेत् ।
डोलायन्त्रे चतुर्यामं शुद्धिरेषां महोत्तमा ॥ २१४ ॥
कार्कोटीमेषशृङ्ग्युत्थैर्द्रवैर्जम्बीरजैर्दिनम् ।
भावयेदातपे तीव्रे विमला शुद्ध्यति ध्रुवम् ॥ २१५ ॥

[विमलसत्वम् ।]

विमलं शिग्रुतोयेन कांक्षीकासीसटङ्कणैः ।
वज्रकन्दसमायुक्तैर्भावयेत्कदलीरसैः ॥ २१६ ॥
मोक्षकक्षारसंयुक्तमन्धमूषागतं धमेत् ।
सत्वं चन्द्रार्कसङ्काशं पतत्यस्य न संशयः ॥ २१७ ॥

पेरोजः– हरिताश्मा ॥

हरिताश्मा च पेरोजो विषारातिर्हरिन्मणिः ।
रसवीर्यविपाकेषु सस्यकस्य गुणानुगः ॥ २१८ ॥

इति श्रीभैरवोक्ते आनन्दकन्दे क्रियाकरणविश्रान्तौ अष्टमोल्लासः ॥

॥ नवम उल्लासः ॥

दिव्यौषधिमहौषधिप्रशंसा ॥

श्रीभैरवी—

कीदृशी ओषधी नाथ! रसकर्मकरी शुभा।
केन वा भस्म सूतश्च केन वा खोटबन्धनम्॥ १॥

निर्जीवत्वं गतस्सूतः कथं जीवं ददाति सः।
निर्जीवेन तु जीवत्वं कथं जीवति शङ्कर!॥ २॥

एतन्मे संशयं ब्रूहि यथा जानाम्यहं शिव!।

श्रीभैरवः—

शृणु भैरवि! तत्सर्वमपूर्वं कथयामि ते॥ ३॥

ब्रह्मविष्णुसुरेन्द्राद्यैर्न ज्ञातं वीरवन्दिते!।
वलीपलितरोगघ्ना मृत्युदारिद्र्यभञ्जनाः॥ ४॥

रसकर्मकरा दिव्याः कुलौषध्यस्सुसिद्धिदाः।
भ्रमन्ति पशवो मूढाः कुलौषधिविवर्जिताः॥ ५॥

तृणौषधिरसानां च नैव सिद्धिः प्रजायते।
तस्मात्सर्वप्रयत्नेन ज्ञातव्या तु कुलौषधिः॥ ६॥

दिव्यौषध्यश्चतुष्षष्टिः कुलमध्ये व्यवस्थिताः।
नैव जानन्ति मूढास्ताश्शिवमोहेन मोहिताः॥ ७॥

अदिव्यास्तु तृणौषध्यो जायन्ते गिरिगह्वरे।
तृणौषध्या रसे सूतं नैव बन्धं कदाचन॥ ८॥

अक्षयं नैव तिष्ठेत्तु कुलौषधिविवर्जितम्।
कुलौषध्या विहीनास्तु गगनं च न हन्ति ते॥ ९॥

स रसस्तु वरारोहे वह्निमध्ये न तिष्ठति ।
न खोटो न च वा भस्म नैव द्रव्यं करोति सः ॥१०॥

किञ्चिद्द्रव्यं प्रकुर्वन्ति धाम्यमानं न तिष्ठति ।
पत्रे पाके कषे छेदे नैव तिष्ठति काञ्चनम् ॥ ११ ॥

नैव वेधं शतादूर्ध्वं करोति स रसः प्रिये ! ।
यावन्न चाब्दमेकं तु विक्रीतं तत्तु काञ्चनम् ॥ १२ ॥

धर्मार्थकाममोक्षेषु नैव दद्यात्तु तत्प्रिये ! ।
दिव्यौषध्या यदा देवि ! रसेन्द्रो मर्दितो भवेत् ॥१३॥

कालिकारहितस्सूतस्सदा भवति पार्वति ! ।
परस्य हरते कालं कालिकारहितो रसः ॥ १४ ॥

अष्टानां चैव लोहानां मलं शमयति क्षणात् ।
महामूर्च्छागतं सूतं को वाऽपि कथयेन्मृतम् ॥ १५ ॥

दिव्यौषध्या रसेनैव जायते नष्टचेतनः ।
पञ्चभूतात्मकस्सूतस्तिष्ठते च सदाशिवः ॥ १६ ॥

रसौषध्यो महौषध्यस्सिद्धौषध्यस्तथाऽपराः ।
दिव्यौषध्य इति प्रोक्ता मया प्रोक्ताश्चतुर्विधाः ॥१७॥

दिव्यौषध्यो निगद्यन्ते तासु ता गुणवत्तराः ।
वृक्षवल्लीलतागुल्मतृणवन्दानिका इति ॥ १८ ॥

रसबन्धकरौषध्यष्षड्विधा परिकीर्तिताः ।

चतुष्षष्टिर्दिव्यौषध्यः ॥

१. सोमवल्ली ।

सोमवल्ली महागुल्मा यक्ष(ज्ञ)श्रेष्ठा धनुर्लता ॥ १९ ॥

सोमाह्वा गुल्मवल्ली च यज्ञवल्ली द्विजप्रिया ।

सोमक्षीरा च सोमा च यज्ञा दिव्यलता स्मृता ॥ २० ॥

सोमवल्ली कटुश्शीता मधुरा पित्तदाहनुत् ।
तृष्णाविशेषशमनी पाचनी च रसायनी ॥ २१ ॥

पञ्चाङ्गका पञ्चदशच्छदाढ्या
सर्पाकृतिश्शोणितपर्वदेशा ।
सा सोमवल्ली रसबन्धकर्म
करोति राकादिवसोपनीता ॥ २२ ॥

कृष्णे पक्षे प्रगलति दलं प्रत्यहं चैकमेकं
शुक्ले पक्षे प्रभवति पुनर्लम्बमाना लता स्यात् ।
तस्याः कन्दः कलयति तरां पूर्णिमायां गृहीतो
बध्वा सूतं कनकसहितं देहलोहं विधत्ते ॥

इत्थं सोमलता नाम वल्ली परमदुर्लभा ।
अनया बद्धसूतेन्द्रो लक्षवेधी प्रजायते ॥ २४ ॥

चतुर्विंशतिसोमानां लक्ष्म व्यक्तं रसायने ।

२. सोमवृक्षः—महिषवल्ली च ।

करोति सोमवृक्षोऽपि रसबन्धवधादिकम् ॥ २५ ॥

पूर्णिमादिवसानीतस्तयोर्वल्ली गुणाधिका ।
प्रोक्ता महिषवल्ली च प्रतिसोमाऽन्त्यवल्लिका ॥२६॥

अपत्रवल्लिका प्रोक्ता काण्डशाखा पयस्विनी ।
रसवीर्यविपाकेषु सोमवल्ली समा स्मृता ॥ २७ ॥

३. स्थलपद्मिनी ।

अथातस्स्थलपद्मिन्या दिव्यौषध्या विधिं शृणु ।
पद्मिनीसदृशा पत्रैः पुष्पैरपि च तादृशी ॥ २८ ॥

भङ्गे चैव स्रवेत्क्षीरं रक्तवर्णं सुशोभनम् ।
आक्रम्य वामपादेन पश्येद्गगनमण्डलम् ॥ २९ ॥

पश्येच्च तारकायुक्तं ग्रहनक्षत्रमण्डलम् ।
लक्षयोजनतो देवि ! सा ज्ञेया स्थलपद्मिनी ॥ ३० ॥

४. गोनसा ।

गोनसाकारवल्ली स्याच्चित्रमण्डलमण्डिता ।
जरारुङ्मृत्युशमनी रसबन्धवधक्षमा ॥ ३१ ॥

५. उच्चटा ।

अथोच्चटां प्रवक्ष्यामि रसबन्धकरीं प्रिये ! ।
एकमेव भवेन्नालं तस्या रोमप्रवेष्टनम् ॥ ३२ ॥

तस्याग्रे च भवेत्पुष्पं शुकतुण्डस्य सन्निभम् ।
तत्पत्राणि च देवेशि ! शुकपिञ्छनिभानि च ॥ ३३ ॥

तत्कन्दं कूर्मसंस्थानं क्षीरं सिन्दूरसन्निभम् ।
जलं स्रवेन्मधूच्छिष्टे तत्समादाय पार्वति ! ॥ ३४ ॥

वेधयेत्सर्वलोहानि काञ्चनानि भवन्ति च ।

६. ईश्वरी ।

ईश्वरीत्युच्यते काचिदीश्वरीतुल्यरूपिणी ॥ ३५ ॥
भूरिक्षीरपरिस्रावा सबीजरसबन्धिनी ।

७. भूतकेशी ।

निम्बपत्रसदृक्पत्रा भूतकेशीति कथ्यते ॥ ३६ ॥
न व(ब)ध्यते यया सूतस्सूतोऽसौ भि(हि)निबन्धकः ।

८. कृष्णलता ।

भिन्नकज्जलसङ्काशा लता कृष्णलतेत्यसौ ॥ ३७ ॥

निर्बीजमपि वध्नाति रसं सर्वविषापहा ।

९. लशुनवल्ली ।

नाम्ना लशुनवल्ली च तद्दलैस्सदृशच्छदा ॥ ३८ ॥
क्षरत्क्षीरा सुकन्दा च रसं बध्नाति वेगतः ।

१०. रुदन्ती ।

चणपत्रोपमैः पत्रैः पुष्पैरपि च तादृशी ॥ ३९ ॥
रुदन्ती नाम विख्याता ह्यधस्ताज्जलवर्षिणी ।
रुदन्तीव जनान्दृष्ट्वा मृत्युदैन्यजराकुलान् ॥ ४० ॥
चतुर्विधा तु सा ज्ञेया पीता रक्ता सिताऽसिता ।
जारिताभ्रं रसं हन्याद्बध्नाति च रसायनी ॥ ४१ ॥

११. वाराही ।

मुसलीकन्दवत्कन्दा तद्दलाकारवद्दला ।
सुक्षीरा रोमशा सोक्ता वाराही रसबन्धनी ॥ ४२ ॥

१२. सप्तपत्री ।

सप्तपल्लवसंपूर्णा सप्तपत्रीत्यसौ मता ।
रसायनी जराघ्नी च बध्यते पारदस्तया ॥ ४३ ॥

१३. नागिनी ।

नागिनीत्युदिता वल्ली नागभोगसमाङ्गिका ।
सर्पादिकविषघ्नी च सा स्वच्छरसबन्धिनी ॥ ४४ ॥

१४. सर्पिणी ।

सर्पिणी लतिका चान्या सर्पवद्वक्रयष्टिका ।
सक्षीरा स्निग्धपत्रा च बालपारदबन्धिनी ॥ ४५ ॥

१५. छत्रिणी।

छत्रवद्दण्डपत्रा या नातिनीचा न चोन्नता।
सुक्षीरा छत्रिणी नाम रसबन्धकरी मता ॥ ४६ ॥

१६. गोशृङ्गी।

पर्वतेऽश्मसमुद्भूता गोकन्दाकृतिकन्दयुक्।
क्षता मुञ्चति सा क्षीरं गोशृङ्गी रसबन्धिनी ॥ ४७ ॥

१७. ज्योतिर्लता।

ज्योतिर्नाम्नी त्रिधा प्रोक्ता वृक्षकन्दतृणात्मिका।
गिरौ ज्वलति सा रात्रौ लतापारदबन्धिनी ॥४८ ॥

१८. रक्तवल्ली।

रक्तक्षीरदलाङ्गा या नातिविस्तरवल्लिका।
रक्तवल्लीत्यसौ दिव्या निर्दिष्टा रसबन्धिनी ॥ ४९ ॥

१९. पद्मवल्ली।

या पद्मपत्राकृतिपत्रवल्ली
सा पद्मवल्लीत्युदिता रसज्ञैः।
सक्षीरकन्दा सलिलोद्भवा च
क्षितौ न तिष्ठेद्रसबन्धनी सा ॥ ५० ॥

२०. काकिनी।

स्थूलकण्टकवर्णाढ्या सा प्रोक्ता काकिनी लता।
रसबन्धकरी सैषा जरामृत्युविनाशिनी ॥ ५१ ॥

२१. चाण्डाली।

चाण्डालीति विनिर्दिष्टा त्रिचतुःपलधारिणी।
सा च रक्ता क्षीरकन्दा तया सूतो निबध्यते ॥ ५२ ॥

प्रोक्तश्चण्डालकन्दस्स्यादेकपत्रो द्विपत्रकः ।
त्रिपत्रोऽथ चतुःपत्रः पञ्चपत्रश्च भेदतः ॥ ५३ ॥

२२. ताम्रवल्ली ।

ताम्रवर्णलतापत्रपुष्पक्षीरसमन्विता ।
सा ताम्रवल्लिका प्रोक्ता रसलोहादिसाधनी ॥ ५४ ॥

२३. पीतवल्ली ।

पीतपत्रलतापुष्परसयुक्ताऽतिदुर्लभा ।
सा पीतवल्लिकेत्युक्ता रसबन्धविधौ हिता ॥ ५५ ॥

२४. विजया ।

सितक्षीराऽऽढकीपत्रच्छदना नाऽतिविस्तृता ।
विख्याता विजयेत्येषा रसबन्धविधौ हिता ॥ ५६ ॥

२५. महौषधी ।

त्रिकोणकन्दसंयुक्ता चिल्लकच्छदनच्छदा ।
महौषधीति सा प्रोक्ता रसबन्धे परं हिता ॥ ५७ ॥

२६. देवदाली ।

शिखिकण्ठाभपत्राऽऽढ्या चन्दनामोदमेदुरा ।
देवदालीत्यसौ दिव्या रसं बध्नाति सा क्षणात् ॥५८॥

२७. नवनीतकगन्धी ।

नवनीतकगन्धीति तिक्ता मृक्षणगन्धिनी ।
सक्षीरा रक्तपुष्पा च रसेन्द्रो बध्यते तया ॥ ५९ ॥

२८. गरुडवल्ली ।

सक्षीरा रक्तपुष्पा च बदरीदलवद्दला ।
उक्ता गारुडवल्लीति शीघ्रं बध्नाति पारदम् ॥ ६० ॥

२९. तुंबिनी।

तुम्बिनीत्युदिता वल्ली तत्पत्रकुसुमान्विता।
तिक्तरक्तपयोयुक्ता तत्फला रसबन्धिनी ॥ ६१ ॥

३०. भूतुम्बिनी।

या तुम्बिनीपत्रसमानपत्रा
भूतुम्बिनी नातिविसर्पिणी सा।
निंबूसमानैश्च फलैरुपेता
सर्वामयघ्नी रसबन्धनी च ॥ ६२ ॥

३१. गन्धर्वा।

एरण्डपत्रवत्पत्रा सक्षीरा नातिविस्तृता।
गन्धर्वेत्युदिता सा हि तया बन्धं रसो व्रजेत् ॥६३॥

३२. व्याघ्रपादी।

व्याघ्रांघ्रिसमपत्रा या रक्तपुष्पा पयस्विनी।
व्याघ्रपादीति निर्दिष्टा रसं बध्नाति निश्चितम् ॥६४॥

३३. महौषधी।

सप्तच्छदसदृक्पत्रा कृशाङ्गी नातिविस्तृता।
महौषधीत्यसौ प्रोक्ता रसं बध्नाति हन्ति च ॥६५ ॥

३४. गोमारी।

गोमारीनामिका वल्ली वेणुपत्रसमच्छदा।
तस्या मूलं समासाद्य शस्तस्सूतो निबध्यते ॥ ६६ ॥

३५. त्रिशूली।

त्रिशूलाकारपत्रा या शम्याकफलवत्फला।
त्रिशूलीति समाख्याता विख्याता रसबन्धने ॥ ६७ ॥

३६. रुतसी।

रुतसीपत्रवत्पत्रफला सा क्षीरकन्दयुक् ।
रुतसी वल्लिकेत्युक्ता गिरिजा रसबन्धनी ॥ ६८ ॥

३७. त्रिदण्डी।

सुपुष्पा तिलकोपेता रक्तत्यत्रि(त्वक्त्रि)फलान्विता ।
रसबन्धविधौ प्रोक्ता त्रिदण्डीति कृताभिधा ॥ ६९ ॥

३८. भृङ्गवल्ली।

भृङ्गवद्वर्णपत्राऽऽढ्या क्षीरिणी पीतपुष्पिका ।
भृङ्गवल्लीति सा प्रोक्ता प्रयुक्ता रसबन्धने ॥ ७० ॥

३९. चमरिका।

चमराकारपत्राऽऽढ्या क्षीरयुक्चन्द्रधारिणी ।
लता चमरिका नाम सा च बध्नाति पारदम् ॥ ७१ ॥

४०. करवीरलता।

हयमारसमाकारदलपुष्पवती लता ।
करवीरलतेत्युक्ता नितरां सूतबन्धिनी ॥ ७२ ॥

४१. वज्रवल्ली।

कोरण्डपत्रच्छदनोपमान-
प्रसूनपत्रा च सदुग्धकन्दा ।
सा वज्रवल्ली कटुतिक्तसारा
वज्राङ्कपत्रा रसबन्धिनी च ॥ ७३ ॥

४२. वारवल्ली।

रक्तक्षीरवती बिल्वदलोपमदलान्विता ।
वारवल्लीति सा सूतबन्धनी रोगनाशिनी ॥ ७४ ॥

४३. रोहिणी।

शणपुष्पदलाकारदशपुष्पा च दुग्धयुक्।
सा रोहिणीति निर्दिष्टा रसराजस्य बन्धनी ॥ ७५ ॥

४४. विल्विनी।

ज्योतिष्मतीदलाकारवर्णपर्णा यश(पय)स्विनी।
रसबन्धविधौ प्रोक्ता विल्विनीति निगद्यते ॥ ७६ ॥

४५. गोरोचनलता।

गोरोचनप्रभायुक्तदलवल्लीसमन्विता।
गोरोचनलता भूतमोचनी रसबन्धनी ॥ ७७ ॥

४६. करीरी।

श्रीशैलशिखरोद्भूता मार्कण्डीसदृशौषधी।
रक्तं क्षीरं क्षता मुञ्चेत्करीरी रसबन्धिनी ॥ ७८ ॥

४७. अक्षरा।

पलसीसा(?) पलवत्पत्रा त्रिवर्षात्फलदायिनी।
अक्षरेति समाख्याता रसस्यातिनिबन्धिनी ॥ ७९ ॥

४७. अपत्रा।

सोमवल्लीव निष्पत्रा कज्जलाभरसान्विता।
अपत्राऽसौ भवेद्विन्ध्ये नात्युच्चा रसबन्धिनी ॥ ८० ॥

आद्ये वर्षे भवेदम्ला भवेत्तिक्ता द्वितीयके।
तृतीयेऽब्दे च मधुरैः फलैर्युक्ता प्रजायते ॥ ८१ ॥

पित्तज्वरहरा सद्यः सुपत्रफलसंयुता।

४९. कुटजवल्ली।

लता कुटजवल्लीति तत्फला तद्दलान्विता ॥ ८२ ॥

मधुरा रुधिरग्रन्थिस्सूतराजनिबन्धिनी ।

५०. मूलकन्दा ।

मूलकन्देति विख्याता मूलवत्फलपत्रिणी ॥ ८३ ॥
लता क्षीरान्विता सूतबन्धनं कुरुते ध्रुवम् ।

५१. ब्राह्मणी ।

पारिजाताद्रिजा वल्ली शतपुष्पदलच्छदा ॥ ८४ ॥
कृष्णक्षीरफला प्रोक्ता ब्राह्मणी रसबन्धिनी ।

५२. मुनिवल्ली- घृतगन्धा ।

अगस्तिपत्रतत्पत्ना तद्रूपाऽरुणपुष्पिणी ॥ ८५ ॥
घृतगन्धा रसघ्नी सा मुनिवल्लीति कथ्यते ।

५३. निंबवल्ली ।

दलैः पुष्पैः फलैर्वल्ली निंबवृक्षस्य सन्निभा ॥ ८६ ॥
तन्मूलैर्बध्यते सूतस्सा प्रोक्ता निम्बका लता ।

५४. तिलकन्दा ।

तिलकन्देति विख्याता मूलवत्फलपत्रिणी ॥ ८७ ॥
लता क्षीरवती सूतं निबध्नात्यातपे खरे ।

५५. अतसीवल्ली ।

अतस्य इव पुष्पाणि फलानि च दलानि च ॥ ८८ ॥
अतसीवल्लिका सा हि पारदस्य निबन्धिनी ।

५६. बोधिलता ।

उक्ता बोधिलता बोधिपत्रदुर्गन्धेन संयुता ॥ ८९ ॥
बध्नाति रसराजं सा दानवेन्द्रमिवाच्युतः ।

५७. मद्यगन्धा।

मद्यगन्धेति विख्याता निष्पत्रा फलपत्रयुक् ॥ ९० ॥
तस्याः कन्दो रसं शीघ्रं बन्धनं नयति ध्रुवम्।

५८. कूर्मलता।

उक्ता कूर्मलता कूर्मरूपकन्दा पयोऽन्विता ॥ ९१ ॥
मल्लिकोपमतत्पत्रप्रसवा रसबन्धिनी।

५९. माधवी।

माधवीमूलवन्मूला नागवल्लीदलान्विता ॥ ९२ ॥
माधवीत्युदिता वल्ली तन्मूलैर्बध्यते रसः।

६०. विशाला।

श्वेतपत्रतया वल्ली श्वेतपुष्पफला तथा ॥ ९३ ॥
विशालेति विनिर्दिष्टा साऽपि पारदबन्धिनी।

६१. महानागा।

नागकुण्डलवत्कन्दा तत्फणासदृशच्छदा ॥ ९४ ॥
महानागेत्यसौ वल्ली विनिबध्नाति पारदम्।

६२. मण्डकलता।

मण्डूकाकारवत्कन्दा मण्डूकीदलवद्दला ॥ ९५ ॥
मण्डूकलतिकेत्येषा तन्मूलैर्बध्यते रसः।

६३. उदुम्बरलता।

उदुम्बरफलाकारफलवद्दलवद्दला ॥ ९६ ॥
सोदुम्बरलतेत्युक्ता सूतराजस्य बन्धिनी।

६४. चित्रवल्ली ।

या दुग्धकंदा वटपत्रपत्रा
विचित्रपर्णोरुफला सुदीर्घा ।
सा चित्रवल्लीत्युदिता रसेन्द्रो
निबध्यते तत्फलमध्यसंस्थः ॥ ९७ ॥

चतुष्षष्टिदिव्यौषधिनामसङ्ग्रहः ॥

चतुष्षष्टिरिति प्रोक्ता दिव्यौषध्यो महाबलाः ॥ ९८ ॥

आभिर्बद्धो रसो नृणां देहलोहार्थसाधकः ।
सोमवल्ली सोमवृक्षः स्थलपद्मिनिका ततः ॥ ९९ ॥

गोनसाकारवल्ली च उच्चटा ईश्वरी ततः ।
भूतकेशी कृष्णलता ज्ञेया लशुनवल्लरी ॥ १०० ॥

रुदन्ती चैव वाराही सप्तपत्री च नागिनी ।
सर्पिणी छत्रिणी चैव गोशृङ्गी सर्वसिद्धिदा ॥ १०१ ॥

ज्योतिर्नाम्नी त्रिधा रक्तवल्लरी पत्रवल्लरी ।
काकिनी चैव चाण्डाली वल्लरी ताम्रवल्लरी ॥ १०२ ॥

पीतवल्ली च विजया विज्ञेया च महौषधी ।
ज्ञातव्या देवदाली च स्यान्नवानीतगन्धिनी ॥ १०३ ॥

ज्ञेया गरुडवल्ली च तुंबिनी भूमितुंबिनी ।
गन्धर्वा व्याघ्रपादी च विज्ञेया च महौषधी ॥ १०४ ॥

गोमारी च त्रिशूली च रुतसी च त्रिदण्डिका ।
भृङ्गवल्ली चमरिका करवीरलता ततः ॥ १०५ ॥

वज्रवल्ली वारवल्ली रोहिणी बिल्विनी तथा ।
गोरोचनलता चैव करीरी चाक्षरा तथा ॥ १०६ ॥

अपत्री कुटजा वल्ली मूलकन्दा च ब्राह्मणी ।
घृतगन्धा निंबवल्ली तिलकन्दाऽतसी तथा ॥ १०८ ॥

बोधिवल्ली मद्यगन्धा कूर्मवल्ली च माधवी ।
विशाला च महानागा ज्ञेया मण्डूकवल्लरी ॥ १०९ ॥

उदुम्बरलता चित्रवल्ली चैव सुरार्चिते ! ।
चतुष्षष्टिरिति प्रोक्ता दिव्यौषध्यो महाबलाः ॥११०॥

इति श्रीभैरवोक्ते आनन्दकन्दे क्रियाकरणविश्रान्तौ नवमोल्लासः ॥

॥ दशम उल्लासः ॥

महौषध्यः ॥

श्रीभैरवः—

१. हिमजा ।

हिमजा काञ्चनक्षीरी यवचिञ्चा(त्रा) महाद्रिजा ।
हिमावती पीतदुग्धा रेचनी पट्टपर्णिका ॥ १ ॥

तद्दुग्धं हेमकङ्कुष्ठं पुलकं रेचनं तथा ।

तेजोवती बहुरसा कनकप्रभाऽन्या
तीक्ष्णाग्निगर्भा सुरवल्लरी च ॥ २ ॥

हिमजा कटुका तिक्ता रेचनी सर्ववातनुत् ।
क्रिमिशोषो(फो)दरघ्नी च पित्तज्वरहरा तु सा ॥ ३ ॥

२, कारवी ।

कारवी कारवल्ली च कषायोष्णा कफापहा ।
कासश्वासहरा बल्या ज्ञेया रसनियामिका ॥ ४ ॥

३. कटुतुंबी।

कटुतुंबी कटुफला राजपुत्री महत्फला ।
कटुतुंबी कटुस्तिक्ता वान्तिकृच्छ्वासवान्तिजित् ॥ ५ ॥
कासघ्नी शोधनी शोफव्रणशूलविषापहा ।
तिक्ततुम्बी तु तिक्ता स्यात्कटुका कटुतुम्बिका ॥ ६ ॥
तुम्बी च कटुतिक्तादितुम्बीपर्यायगा स्मृता ।

४. ज्योतिष्मती।

ज्योतिष्मती नाम लताऽनलप्रभा
ज्योतिर्लता सा कटभी सुपिङ्गला ।
दीप्या च मेध्या मतिदा च दुर्जरा
सारस्वती स्यादमृतार्कसंख्या ॥ ७ ॥

५. लिङ्गिनी।

लिङ्गिनी बहुपुत्री स्यादीश्वरी शैववल्लरी ॥ ८ ॥
स्वयंभूर्लिङ्गसंभूता लैङ्गी चित्रफलान्विता ।
अयस्तम्भकरी लिङ्गबीजा च शिववल्लरी ॥ ९ ॥
लिङ्गिनी कटुरूक्षा च दुर्गन्धा च रसायनी ।
सर्वसिद्धिकरी दिव्या रसराजनियामिका ॥ १० ॥

६. पातालगरुडी।

पातालगरुडी तार्क्ष्यी सौवर्णी गरुडी तथा ।
वत्सादनी दीर्घकाण्डा दृढकाण्डा महाबला ॥ ११ ॥
दीर्घवल्ली दृढलता दशनामानि पार्वति ! ।
सर्ववश्यकरी सैषा सर्पादिविषनाशनी ॥ १२ ॥

७. गिरिकर्णी।

गिरिकर्णी च कटभी गर्दभी दधिपुष्पिका।
सितपुष्पी विषघ्नी च श्वेताश्वखुरपुष्पिका ॥ १३ ॥

गिरिकर्णी हिमा तिक्ता पित्तोपद्रवनाशिनी।
चक्षुष्या विषदोषघ्नी त्रिदोषशमनी च सा ॥ १४ ॥

नीलपुष्पा महानीला स्यान्नीलगिरिकर्णिका।

नीलाद्रिकर्णी शिशिरा सतिक्ता
रक्तातिसारज्वरदाहहन्त्री।
प्रतर्दिकोन्मादमदश्रमार्ति-
श्वासार्तिहा स्याद्विषहारिणी च ॥ १५ ॥

८. आखुकर्णी।

आखुकर्णी भूमिचरा द्रवन्ती बहुपादिका ॥ १६ ॥

सुतश्रेणी द्रवन्ती च न्यग्रोधा माक्षिकाह्वया।
चित्रा मूषकपुच्छी च प्रत्यक्श्रेणी च शंबरी ॥ १७ ॥

सुतश्रेणी च चक्षुष्या कटुकाऽऽखुविषापहा।
व्रणदोषहरा चैव नेत्रामयविनाशिनी ॥ १८ ॥

कृष्णिका बहुपर्णी च प्रत्यक्शोणी च शंबरी।
पूतिपर्णी शिवा चाखुकर्णवत्पर्व(र्ण)शालिनी॥ १९ ॥

आखुकर्णी कटूष्णा च कफपित्तहरा सरा।
आनाहशूलजूत्यर्तिनाशनी पाचनी परा ॥ २० ॥

९. वाराही।

वाराही स्यात्सूकरी क्रोडकन्या
गृष्टिर्विष्वक्सेनकान्ता कुमारी।

कौमारी स्याद्ब्रह्मपत्री त्रिनेत्रा
क्रौडीकन्या गृष्टिका माधवेष्टा ॥ २१ ॥

वाराही तिक्तकटुका विषपित्तकफापहा ।
कुष्ठमेहकृमिहरा वृष्या बल्या रसायनी ॥ २२ ॥

१०. देवदाली ।

देवदाली त्रिधा प्रोक्ता श्वेता कृष्णा च पीतला ।
सा श्वेता व्याधिशमनी कृष्णा पीता रसायने ॥२३॥

देवदाली कोशफला दाली लोमशपत्त्रिका ।
कृष्णबीजा कटुफला वृत्तकोशाऽम्लवल्लरी ॥ २४ ॥

जीमूतं कण्टकफला वेणी चाखुविषापहा ।
तुरङ्गिका जालफला गरारिस्सारमूषिका ॥ २५ ॥

देवदाली तु तीक्ष्णोष्णा कटुः पाण्डुकफापहा ।
दुर्नामश्वासकासघ्नी कामिलालूतिकापहा ॥ २६ ॥

सर्वलोहद्रुतिकरा पीनसाहिविषापहा ।

११. ऐन्द्री ।

ऐन्द्रीन्द्रवारुण्यरुणा मृगादिनी
गवादनी क्षुद्रसहेन्द्रचिद्भटा ।
सूर्या विषघ्नी रु(गु)णकर्णिकाऽमरा
सुपर्णिका स्यात्फलतारका च ॥ २७ ॥

वृषभाक्षी गवाक्षी च पीतपुष्पेन्द्रवल्लरी ॥ २८ ॥

हेमपुष्पी क्षुद्रफला वारुणी बालकप्रिया ।
रक्तोर्वारुर्विषलता चक्रवल्ली विषापहा ॥ २९ ॥

अमृता च विशाला च ज्ञेयोनत्त्रिंशदाह्वया ।

इन्द्रवारुणिका तिक्ता कटुश्शीता च रेचनी ॥ ३० ॥

गुल्मपित्तोदरश्लेष्मकृमिकुष्ठज्वरापहा ।
महेन्द्रवारुणी रम्या चक्रवल्ली महाफला ॥ ३१ ॥

सा महेन्द्री वृत्तफला त्रपुसी त्रपुसा तथा ।
आत्मरक्षा विशाला च दीर्घवल्ली महाफला ॥ ३२ ॥

स्याद्बृहद्वारुणी सौम्या नामान्यस्याश्चतुर्दश ।
माहेन्द्रवारुणी ज्ञेया पूर्वोक्ता गुणवाहिनी ॥ ३३ ॥

रसे वीर्ये विपाके च किञ्चिदेषा गुणाधिका ।

१२. गोजिह्वा ।

गोजिह्वा क्षुरपत्री स्यादधोपुष्पा त्वधोमुखी ॥ ३४ ॥

गोजिह्वा कटुका तीव्रा शीतला पित्तनाशिनी ।
व्रणप्रशमनी चैव सप्तदन्तविषापनुत् ॥ ३५ ॥

१३. काकतुण्डी ।

काकतुण्डी काकनासा काकसिंही च रक्तला ।
काकदन्ती काकपीलुर्वृत्तरक्तफला तथा ॥ ३६ ॥

काकप्राणा वल्कशल्या कृष्णबीजा च रञ्जकी ।
काकतुण्डी च मधुरा शिशिरा पित्तहारिणी ॥ ३७ ॥

रसायनी दार्ढ्यकरी विशेषात्पलितापहा ।

१४. रक्तपादी ।

रक्तपादी शमीपत्रपत्रा खदिरपत्रिका ॥ ३८ ॥

सङ्कोचनी समङ्गा च नमस्कारी प्रसारणी ।
लज्जालुस्सप्तपर्णी स्यात्खदिरी मण्डमालिका ॥ ३९ ॥

रक्तमूला ताम्रमूला स्वगुप्ताऽञ्जलिकारिका ।

१७. कर्कोटकी ।

कार्कोटकी द्विधा वन्ध्या श्रेष्ठाऽन्या फलमारिणी ।
मृदुकण्टकिनी वृत्तफला सा वनवासिनी ॥ ५१ ॥

वन्ध्या देवी वन्ध्यकार्कोटकी स्या-
न्नागारातिर्नागहन्त्री मनोज्ञा ।
पथ्या दिव्या पुत्रदात्री त्रिकन्दा
श्रीकन्दा सा कन्दवल्ली विषघ्नी ॥ ५२ ॥

योगीश्वरी व्याघ्रपादी कन्या स्यात्षोडशाह्वया ।
वन्ध्या कर्कोटकी तिक्ता कटूष्णा च कफापहा ॥५३॥

स्थावरादिविषघ्नी स्याद्रसबन्धे रसायने ।

१८. शरपुङ्खा ।

शराभिधानपुङ्खा स्याच्छरपुङ्खीति कथ्यते ॥ ५४ ॥

शरपुङ्खी त्रिधा श्वेता रक्ता कृष्णा च कण्टका ।
श्वेताऽप्येषा गुणाऽऽढ्या स्यात्प्रयोगे च रसायने ॥

अन्या तु कण्टपुंखा स्यात्कण्टसायकपुंखिका ।
कण्टम्पृशेव कुण्डी कण्टकशरपुङ्खमूलनिर्यूहः ॥ ५६ ॥

नूर्णमजीर्णविषूचीमहापरतिक्तशानुकार्श्यं च ।
सर्वाश्च शरपुङ्खास्तु कटूष्णाः कफवातहाः ॥ ५७ ॥

अजीर्णशूलकृमिघ्ना ग्रहणीशमनाः परम् ।

१९. भृङ्गराजः ।

मार्कवो भृङ्गराजस्स्याद्भृङ्गाह्वः केशरञ्जकः ॥ ५८ ॥

पितृप्रियो ब्रह्मपत्री केश्यः कुन्तलवर्धनः ।
पीतोऽन्यः स्वर्णभृङ्गारो हरिवासो हरप्रियः ॥ ५९ ॥

लज्जालुश्च कटुश्शीता पित्तातीसारनाशिनी ॥ ४० ॥

शोफदाहज्वरश्वासव्रणकुष्ठकफार्तिनुत् ।
लज्जालुर्वैपरीत्याह्वः कटुरुष्णः कफामनुत् ॥ ४१ ॥

रसे नियामकेऽत्यन्तं नानाविज्ञानकारकः ।

१५. पुनर्नवा ।

पुनर्नवा त्रिधा प्रोक्ता श्वेता रक्ता च मेचका ॥ ४२ ॥

पुनर्नवा विषहरा कठिल्ला नेत्ररोगहा ।
पृथ्वीका सितवर्षाभूर्दीर्घपत्रा सिताङ्गका ॥ ४३ ॥

श्वेता पुनर्नवा सोष्णा तिक्ता कफविषापहा ।
कासहृद्रोगशूलास्रपाण्डुशोफानिलार्तिनुत् ॥ ४४ ॥

पुनर्नवाऽन्या रक्ताख्या क्रूतमण्डलपत्रिका ।
वैशाखी रक्तसर्वाङ्गा शोफघ्नी विषहा परा ॥ ४५ ॥

पुनर्नवो नवो नव्या प्रावृषेण्या च सारिणी ।
रक्ता पुनर्नवा तिक्ता सारणी शोफनाशिनी ॥ ४६ ॥

रक्तप्रदरदोषघ्नी पाण्डुपित्तप्रमर्दनी ।
श्यामाख्या नीलवर्षाभूर्दीर्घपत्रा पुनर्नवा ॥ ४७ ॥

नीला पुनर्नवा तिक्ता कटूष्णा च रसायनी ।
हृद्रोगपाण्डुश्वयथुश्वासवातकफापहा ॥ ४८ ॥

१६. अत्यम्लपर्णी ।

अत्यम्लपर्णी तीक्ष्णाम्ला कण्डूला वल्लिसारसा ।
वनस्थाऽरण्यवासी च कन्दाढ्या कर्कशच्छदा ॥ ४९ ॥

अत्यम्लपर्णी तीक्ष्णाम्ला प्लीहशूलविनाशिनी ।
वातहृद्दीपनी रुच्या गुल्मश्लेष्मामयापहा ॥ ५० ॥

१७. कर्कोटकी ।

कार्कोटकी द्विधा वन्ध्या श्रेष्ठाऽन्या फलमारिणी ।
मृदुकण्टकिनी वृत्तफला सा वनवासिनी ॥ ५१ ॥

वन्ध्या देवी वन्ध्यकार्कोटकी स्या-
न्नागारातिर्नागहन्त्री मनोज्ञा ।
पथ्या दिव्या पुत्रदात्री त्रिकन्दा
श्रीकन्दा सा कन्दवल्ली विषघ्नी ॥ ५२ ॥

योगीश्वरी व्याघ्रपादी कन्या स्यात्षोडशाह्वया ।
वन्ध्या कर्कोटकी तिक्ता कटूष्णा च कफापहा ॥५३॥

स्थावरादिविषघ्नी स्याद्रसबन्धे रसायने ।

१८. शरपुङ्खा ।

शराभिधानपुङ्खा स्याच्छरपुङ्खीति कथ्यते ॥ ५४ ॥

शरपुङ्खी त्रिधा श्वेता रक्ता कृष्णा च कण्टका ।
श्वेताऽप्येषा गुणाऽऽढ्या स्यात्प्रयोगे च रसायने ॥

अन्या तु कण्टपुंखा स्यात्कण्टसायकपुंखिका ।
कण्टम्पृशेव कुण्डी कण्टकशरपुङ्खमूलनिर्यूहः ॥ ५६ ॥

तूर्णमजीर्णविषूचीमहापरतिक्रशानुकार्श्यं च ।
सर्वाश्च शरपुङ्खास्तु कटूष्णाः कफवातहाः ॥ ५७ ॥

अजीर्णशूलकृमिहा ग्रहणीशमनाः परम् ।

१९. भृङ्गराजः ।

मार्कवो भृङ्गराजस्स्याद्भृङ्गाह्वः केशरञ्जकः ॥ ५८ ॥

पितृप्रियो ब्रह्मपत्री केश्यः कुन्तलवर्धनः ।
पीतोऽन्यः स्वर्णभृङ्गारो हरिवासो हरप्रियः ॥ ५९ ॥

नीलस्तु भृङ्गराजोऽन्यो महानीलस्तु नीलकः ।
महाभृङ्गो नीलपुष्पश्श्यामलस्तु षडाह्वयः ॥ ६० ॥

भृङ्गराजास्तु चक्षुष्यास्तिक्तोष्णाः केशरञ्जकाः ।
कफशोफविषघ्न्यश्च तत्र नीलो रसायनः ॥ ६१ ॥

२०. गुडूची ।

गुडूची द्विविधा प्रोक्ता कन्दाऽऽढ्या कन्दवर्जिता ।
पूर्वा श्रेष्ठा रसघ्नी सा रुग्वलीपलितापहा ॥ ६२ ॥

अपरा व्याधिशमनी तयोस्सामान्यलक्षणम् ।
कञ्चुकाढ्या स्निग्धपर्णी विशल्या भूरिवल्लरी ॥ ६३ ॥

कन्या कन्दगुडूची च पिण्डालुः कन्दरोहिणी ।
कन्दामृता बहुरुहा ज्ञेया पिण्डगुडूचिका ॥ ६४ ॥

कु(क)न्दोद्भवा गुडूची च कटूष्णा सन्निपातहा ।
ज्वरघ्नी विषभूतघ्नी वलीपलितनाशिनी ॥ ६५ ॥

छिन्नोद्भवा गुडूची स्यादकन्दाऽमृतवल्लरी ।

ज्ञेया गुडूचीद्वयमुष्णवीर्या
तिक्ता कषाया ज्वरनाशिनी च ।
दाहार्तितृष्णावमिरक्तवात-
प्रमेहपाण्डुभ्रमहारिणी च ॥ ६६ ॥

२१. मूर्वा ।

मूर्वा च द्विविधा प्रोक्ता महती च कनीयसी ॥ ६७ ॥

मूर्वाऽमरा दिव्यलता गोकर्णी च त्रिकर्णिका ।
भिन्नच्छदा मधुरसा दाहनी दिव्यपर्णिका ॥ ६८ ॥

रक्तला गोपवल्ली च गुञ्जपुष्पा पयस्विनी ।

मूर्वा तिक्ता कषायोष्णा हृद्रोगकफवातहृत् ॥ ६९ ॥

वमिप्रमेहकुष्ठानि विषमज्वरनाशिनी।
रसकर्मणि सा श्रेष्ठा गर्भघ्नी वर्तियोगतः ॥ ७० ॥

२२. शङ्खपुष्पी।

शङ्खपुष्पी सुपुष्पी च शङ्खाह्वा कम्बुमालिनी।
सितपुष्पी च भूलग्ना मेध्या वनविलासिनी ॥ ७१ ॥

शङ्खपुष्पी हिमा तिक्ता मेधाकृत्स्वरकारिणी।
भूतग्रहादिदोषघ्नी वशीकरणसिद्धिदा ॥ ७२ ॥

२३. काकजङ्घा।

काकजङ्घा वायसी च पारावतपदी तथा।
काकजङ्घा तु तिक्तोष्णा कृमिव्रणकफापहा ॥ ७३ ॥

बाधिर्याजीर्णजीर्णादिविषमज्वरनाशिनी।

२४. शतावरी।

शतावरी शतपदी शताह्वा सूक्ष्मपत्रिका ॥ ७४ ॥

बहुमूला जटामूला तैलवल्ली च वैष्णवी।
शस्त्रा च शतमूला च केशिका शतनेत्रिका ॥ ७५ ॥

महाशतावरी वीरा तुङ्गिनी बहुपत्रिका।
सहस्रवीर्या सुरसा महापुरुषदन्तिका ॥ ७६ ॥

दग्ध(ऊर्ध्व)कणा(ण्टा)महावीर्या फणिजिह्वा महाशना।
शतावरीद्वयं वृष्यं मधुरं पित्तजिद्धिमम् ॥ ७७ ॥

महती कफवातघ्नी तिक्ता श्रेष्ठा रसायनी।

२५. गोक्षुरः।

गोकण्टकः कण्टफलो गोक्षुरो व्यालदंष्ट्रकः ॥ ७८ ॥

त्रिकण्टकश्चेक्षुरकः श्वदंष्ट्रो बहुकण्टकः ।
वनशृङ्गाटकश्चैव स्थलशृङ्गाटकस्तथा ॥ ७९ ॥

स्यातामुभौ गोक्षुरकौ सुशीतलौ
बलप्रदौ तौ मधुरौ च बृंहणौ ।
कृच्छ्राश्मरीमेहविदाहनाशनौ
रसायनौ तत्र बृहद्गुणोत्तरः ॥ ८० ॥

२६. काकमाची ।

काकमाची बहुफला वायस्यर्कफला च सा ।
काकमाता गुच्छफला स्वादुपाकरसायनी ॥ ८१ ॥

२७. आदित्यभक्ता ।

आदित्यभक्ता वरदा सूर्यकान्तार्कवल्लरी ।

आदित्यभक्ता शिशिरा सतिक्ता
कटुस्तथोग्रा कफहारिणी च ।
त्वग्दोषकण्डूव्रणकुष्ठभूत-
ग्रहोग्रशीतज्वरहारिणी च ॥ ८२ ॥

२८. नाकुली ।

नाकुली सर्पगन्धा च सुगन्धा रक्तपत्रिका ॥ ८३ ॥

ईश्वरी नागगन्धा च ह्यहिभुक्स्वरसा च सा ।
अन्या महासुगन्धा च सुवहा गन्धनाकुली ॥ ८४ ॥

सर्पाक्षी फणिहन्त्री च नकुलाख्याऽरिवल्लरी ।
सर्पाक्षी सर्वरोगघ्नी पुत्रोत्पादकरी च सा ॥ ८५ ॥

२९. क्षीरकन्दः।

क्षीरकन्दो द्विधा प्रोक्तो विनालस्तु सनालकः।
विनालो रोगहन्ता स्याद्वयःस्तंभे सनालकः ॥ ८६ ॥

चतुर्वर्णे विषं तत्र रक्तकन्दं च शस्यते।
भग्नात्तस्मात्स्रवेत्क्षीरं रक्तवर्णं सुशोभनम् ॥ ८७ ॥

मेघानां तु निनादेन सञ्जाते सुरशोभिते ! ।
स्नुहीपत्रसमैः पत्रैस्सप्तभिर्हेमसप्रभैः ॥ ८८ ॥

क्षीरकन्दस्तु सूतेन्द्रमारणे बन्धने हितः।
गुल्मशोफोदरप्लीहनाशनस्तु विरेककृत् ॥ ८९ ॥

३०. सिन्दुवारः।

सिन्दुवारश्श्वेतपुष्पस्सिद्धकश्चाध्वसिद्धिदः।
सुगन्धाऽन्या शितसहा निर्गुण्डी नीलसिन्दुकः ॥९०॥

इन्द्राणी सूतकेशी च नीलपुष्पा च नीलिका।
सिन्दुवारः कटुस्तिक्तः कफवातक्षयापहः ॥ ९१ ॥

कुष्ठकण्डूतिशमनश्शूलहृद्देहसिद्धिदः।
कटूष्णा नीलनिर्गुण्डी तिक्ता रूक्षा च कासजित् ॥

श्लेष्मशोफसमीरार्तिप्रदराध्मानहारिणी।

३१. अरण्यकार्पासी।

वनजाऽरण्यकार्पासी भारद्वाजी त्रयाभिधा ॥ ९३ ॥

भारद्वाजी हिमा रुच्या व्रणशस्त्रक्षतापहा।
तृतीया रक्तका स्तन्या वातपित्तकफापहा ॥ ९४ ॥

तृष्णादाहश्रमभ्रान्तिमूर्च्छाहृद्बलकारिणी।
तृतीया रक्तकार्पासी रक्तकार्पासकस्स्मृतः ॥ ९५ ॥

३२. कोकिलाक्षः ।

किलाक्षश्शृङ्खली च शृङ्खलो वज्रकण्टकः ।
ुम्भपत्रो वज्रास्थि तिलपुष्पस्तु शोफहा ॥ ९६ ॥

ालकण्ठी क्षुरक इक्षुरः पविकण्टकः ।
किलाक्षस्तु मधुरश्शीतः पित्तातिसारजित् ॥ ९७ ॥

यश्शोफहरो वल्यो रुच्यस्सन्तर्पणः परः ।

३३. बृहती ।

ती बृहती सिंही वार्ताकी राष्ट्रकाकली ॥ ९८ ॥

क्ष्णकण्टकसर्वाङ्गा बहुपत्री च डोरली ।
ण्डकी वनवृन्ताकी गुद्रसंख्याभिधानका ॥ ९९ ॥

ती कटुतिक्तोष्णा वातजिज्ज्वरहारिणी ।
ोचकामकासघ्नी श्वासहृद्रोगनाशिनी ॥ १०० ॥

दा श्वेतबृहती श्वेतपुष्पफला शुभा ।
ज्ञेया श्वेतबृहती वातश्लेष्मविनाशिनी ॥ १०१ ॥

ऱ्या चाञ्जनयोगे च नानानेत्रामयापहा ।
ा द्रव्यविशेषेण पारदस्तम्भसिद्धिदा ॥ १०२ ॥

३४. कण्टकारी ।

टकारी कण्टकिनी दुःस्पर्शा च निदिग्धिका ।
ा व्याघ्री चित्रफला ज्ञेया सर्वाङ्गकण्टका ॥१०३॥

टकारी कटुस्तिक्ता दीपनी श्वासकासजित् ।
श्यायत्रिदोषघ्नी कफवातज्वरार्तिनुत् ॥ १०४ ॥

ष्या दीपनी पुत्रप्रदा रसनियामिका ।

३५. गुञ्जा ।

गुञ्जा च द्विविधा प्रोक्ता श्वेता रक्ता च कृष्णला ॥

गुञ्जा चूडामणिस्सेवा शिखण्डी कृष्णलाऽरुणा ।
कृष्णचूडा रक्तिका च कांभोजी भिल्लभूषणा ॥१०६॥

गुञ्जात्रयं तु तिक्तोष्णं वान्तिकृद्रेचनी शिवा ।
शूलघ्नं विषहृत्पत्रं तत्तैलं सर्वकुष्ठजित् ॥ १०७ ॥

द्रावणे सर्वलोहानां रक्ता पथ्ये सिताऽपरा ।

३६. वृद्धदारकः ।

वृद्धदारुक आवेगी जुङ्गको दीर्घवालुकः ॥ १०८ ॥

वृद्धः कोटरपुष्पी स्यादजान्त्री क्षगलान्त्रिका ।
जीर्णदारु द्वितीयं स्याज्जीर्णभञ्जी सुपुष्पिका ॥१०९॥

अजरा सूक्ष्मपर्णी च विज्ञेया च षडाह्वया ।
वृद्धदारुद्वयं गौल्यं पिच्छिलं कफवातहृत् ॥ ११० ॥

बल्यं कासामदोषघ्नं द्वितीयं स्वल्पवीर्यदम् ।

३७. बाकुची ।

बाकुची सोमराजी च शशिरेखा च कुष्ठहा ॥ १११ ॥

कांभोजी पूतिगन्धा च कालमेषी तथैन्दवी ।
बाकुची कटुतिक्तोष्णा कृमिकुष्ठकफापहा ॥ ११२ ॥

त्वग्दोषविषकण्डूतिखर्जूप्रशमनी च सा ।

३८. अपामार्गः ।

अपामार्गश्शेखरिको मर्कटी दुरभिग्रहः ॥ ११३ ॥

खरमञ्जरिका नन्दी खब्जो मर्कटपिप्पली ।
अवाक्पुष्पी च वशिरः क्षवकः पङ्क्तिकण्टकः ॥११४॥

अपामार्गस्तु तिक्तोष्णः कटुश्च कफनाशनः ।
अर्शःकण्डूदरामघ्नो रक्तहृद्ग्राहि वान्तिकृत् ॥ ११५ ॥
रक्तापामार्गकः पीतः कटुकः कफवातनुत् ।
व्रणकण्डूविषघ्नश्च सङ्ग्राही वान्तिकृत्सरः ॥ ११६ ॥

३९. प्रपुन्नाटः ।

प्रपुन्नाटश्चक्रमर्दो दद्रुघ्नश्च कुलादनः ।
व्यावर्तकश्चैडगजः खर्जूघ्नो दृढबीजकः ॥ ११७ ॥
चक्रमर्दः कटुस्तीक्ष्णो मेदोवातकफापहः ।
व्रणकण्डूतिकुष्ठार्तिदद्रुपामादिदोषनुत् ॥ ११८ ॥

४०. विषमुष्टिः ।

विषमुष्टिः केशमुष्टिस्सुमुष्टी रणमूषिका ।
विषमुष्टिः कटुस्तिक्तो दीपनः कफवातहृत् ॥ १२० ॥
कण्ठामयहरो रुच्यो रक्तपित्तार्तिदाहनुत् ।

४१. काण्डीरः ।

काण्डीरः काण्डकटुको नाम(सा)संवेदनः पटुः ॥१२१॥
उग्रकाण्डस्तोयवल्ली कारवल्ली सुकाण्डकः ।
काण्डीरः कटुतिक्तोष्णः सरदुष्टव्रणार्तिनुत् ॥ १२२ ॥
लूतागुल्मोदरप्लीहशूलमन्दाग्निनाशनः ।

४२. हस्तिकन्दः ।

हस्तिकन्दो हस्तिपलः स्थूलकन्दोऽतिकन्दकः ॥१२३॥
बृहत्पत्रोऽतिपत्रश्च हस्तिकर्णस्सुकर्णिकः ।
त्वग्दोषारिः कुष्ठहन्ता गिरिवासी नगाश्रयः ॥ १२४ ॥

हस्तिकन्दः कटूष्णस्यात्कफवातामयापहः।

४३. समुद्रशोषी।

समुद्रशोषी च महालता च
महाबला धूसरपत्रिका च।
स्यात्कामवृद्धिस्वरवृद्धिसंज्ञः
कन्दर्पजीवी च जितेन्द्रिया च ॥ १२५ ॥

कामवृद्धेस्तु बीजं स्यान्मधुरं बलवर्धनम् ॥ १२६ ॥
कामवृद्धिकरं रुच्यं बहलेन्द्रियवृद्धिदम्।

४४. गोरक्षदुग्धी।

गोरक्षदुग्धी गोरक्षी ताम्रदुग्धी रसायनी ॥ १२७ ॥
तिलक्षीरिणिका धन्या बहुपत्रा तिलांकिता।
गोरक्षदुग्धी मधुरा वृष्या च ग्राहिणी हिमा ॥१२८॥
सर्ववश्यकरी चैव व्रणसिद्धिगुणप्रदा।

४५. भूपाटली।

भूपाटली च कुम्भी च भूनाली रक्तपुष्पिका ॥१२९॥
भूपाटला कटूष्णा च पारदे सुप्रयोजिता।

४६—५३. अष्टवर्गः

द्विमेदोभयकाकोली वृद्धयृद्धिर्जीवकर्षभम् ॥ १३० ॥
अष्टवर्गमिदं वातपित्तजिद्बृंहणं परम्।
नखत्वग्दृष्टिकर्णाघ्रिघ्राणजिह्वाङ्गुलीनिभाः ॥ १३१ ॥
समूलाश्च सतूलाश्च दुर्गन्धाश्चाष्टवर्गकाः।

अपामार्गस्तु तिक्तोष्णः कटुश्च कफनाशनः ।
अर्शःकण्डूदरामघ्नो रक्तहृद्ग्राहि वान्तिकृत् ॥ ११५ ॥
रक्तापामार्गकः पीतः कटुकः कफवातनुत् ।
व्रणकण्डूविषघ्नश्च सङ्ग्राही वान्तिकृत्सरः ॥ ११६ ॥

३९. प्रपुन्नाटः ।

प्रपुन्नाटश्चक्रमर्दो दद्रुघ्नश्च कुलादनः ।
व्यावर्तकश्चैडगजः खर्जूघ्नो दृढबीजकः ॥ ११७ ॥
चक्रमर्दः कटुस्तीक्ष्णो मेदोवातकफापहः ।
व्रणकण्डूतिकुष्ठार्तिदद्रुपामादिदोषनुत् ॥ ११८ ॥

४०. विषमुष्टिः ।

विषमुष्टिः केशमुष्टिस्सुमुष्टी रणमूषिका ।
विषमुष्टिः कटुस्तिक्तो दीपनः कफवातहृत् ॥ १२० ॥
कण्ठामयहरो रुच्यो रक्तपित्तार्तिदाहनुत् ।

४१. काण्डीरः ।

काण्डीरः काण्डकटुको नाम(सा)संवेदनः पटुः ॥१२१॥
उग्रकाण्डस्तोयवल्ली कारवल्ली सुकाण्डकः ।
काण्डीरः कटुतिक्तोष्णः सरःदुष्टव्रणार्तिनुत् ॥ १२२ ॥
लूतागुल्मोदरप्लीहशूलमन्दाग्निनाशनः ।

४२. हस्तिकन्दः ।

हस्तिकन्दो हस्तिपलः स्थूलकन्दोऽतिकन्दकः ॥१२३॥
बृहत्पत्रोऽतिपत्रश्च हस्तिकर्णस्सुकर्णिकः ।
त्वग्दोषारिः कुष्ठहन्ता गिरिवासी नगाश्रयः ॥ १२४ ॥

हस्तिकन्दः कटूष्णस्यात्कफवातामयापहः ।

४३. समुद्रशोषी ।

समुद्रशोषी च महालता च
महाबला धूसरपत्रिका च ।
स्यात्कामवृद्धिस्वरवृद्धिसंज्ञः
कन्दर्पजीवी च जितेन्द्रिया च ॥ १२५ ॥

कामवृद्धेस्तु बीजं स्यान्मधुरं बलवर्धनम् ॥ १२६ ॥
कामवृद्धिकरं रुच्यं बहलेन्द्रियवृद्धिदम् ।

४४. गोरक्षदुग्धी ।

गोरक्षदुग्धी गोरक्षी ताम्रदुग्धी रसायनी ॥ १२७ ॥
तिलक्षीरिणिका धन्या बहुपत्रा तिलांकिता ।
गोरक्षदुग्धी मधुरा वृष्या च ग्राहिणी हिमा ॥१२८॥
सर्ववश्यकरी चैव व्रणसिद्धिगुणप्रदा ।

४५. भूपाटली ।

भूपाटली च कुम्भी च भूनाली रक्तपुष्पिका ॥१२९॥
भूपाटला कटूष्णा च पारदे सुप्रयोजिता ।

४६—५३. अष्टवर्गः

द्विमेदोभयकाकोली वृद्ध्यृद्धिर्जीवकर्षभम् ॥ १३० ॥
अष्टवर्गमिदं वातपित्तजिद्बृंहणं परम् ।
नखत्वग्दृष्टिकर्णाङ्घ्रिघ्राणजिह्वाङ्गुलीनिभाः ॥ १३१ ॥
समूलाश्च सतूलाश्च दुर्गन्धाश्चाष्टवर्गकाः ।

[मेदा ।]

मेदा वसा मणिश्छिद्रा जीवनी शल्यपर्णिका ॥१३२॥

मेदस्सारा स्नेहवर्ती नखी पुरुषदन्तिका ।
मेदा तु मधुरा शीता पित्तदाहार्तिकासनुत् ॥ १३३ ॥

[महामेदा ।]

महामेदा वसुश्छिद्रा जीवनीया च रागिणी ।
देवेष्ट्यसुरमेदा च दिव्या त्वग्रूपिणी तथा ॥ १३४ ॥

देवगन्धा देवमणिर्वृक्षहारि(रु)द्रसम्मिता ।
महामेदा हिमा रुच्या कफशुक्रविवर्धनी ॥ १३५ ॥

[काकोली ।]

काकोली दीर्घसदृशा क्षीरशुक्रा च मेदुरा ।
कालिका च वयस्था च जीवनी च नवाह्वया ॥१३६॥

काकोली शीतमधुरा क्षयपित्तानिलार्तिनुत् ।
रक्तदाहज्वरघ्नी च कफशुक्रविवर्धनी ॥ १३७ ॥

[क्षीरकाकोली ।]

द्वितीया क्षीरकाकोली क्षीरशुक्रा पयस्विनी ।
वयस्था कर्णसदृशा क्षीरवल्ली विषाणिका ॥ १३८ ॥

रसवीर्यविपाकेषु काकोलीसदृशा च सा ।

[वृद्धिः ऋद्धिश्च ।]

वृद्धिस्तुष्टिः पुष्टिदा तुष्टिदात्री
मङ्गल्या स्यादंघ्रिरूपा च भद्रा ।
ऋद्धिस्सिद्धिः प्राणदा जीवदात्री
प्राणाकारा चेतनीया रथाङ्गी ॥ १३९ ॥

वृद्धिर्ऋद्धिश्च मधुरा सुस्निग्धा रक्तदा हिमा ॥१४०॥
रुचिमेधाकरी श्लेष्मकुष्ठक्रिमिहरा परा ।

[जीवकः ।]

जीवको जीवनो जीव्यः प्राणदश्चिरजीविकः ॥१४१॥
ह्रस्वाङ्गः कूर्चशीर्षश्च जिह्वाकारः सुमङ्गलः ।
जीवको मधुरश्शीतो रक्तपित्तानिलार्तिहृत् ॥ १४२ ॥
दाहज्वरक्षयं हन्ति शुक्रश्लेष्मविवर्धनः ।

[ऋषभः ।]

गोपतेस्तु यथा नाम ऋषभश्चाङ्गुलीनिभः ॥ १४३ ॥
ओषधी वनवासी च दुर्गन्धः प्राणदश्शुभः ।
जीवके ये गुणास्सन्ति ते गुणास्सन्ति गोपतेः ॥

५४. आदित्यपुत्रः ।

आदित्यपुत्रः कुष्ठानि सुपुत्रश्चार्कपत्रकः ।

आदित्यपुत्रः कटुरुष्णवीर्यः
कफापहा वातरुजापहश्च ।
सन्दीपको जाठरगुल्महारी
ज्ञेयस्स चारोचकनाशनश्च ॥ १४५ ॥

५५. हस्तिकर्णी ।

हस्तिकर्णी हस्तिकर्णच्छदनो दीर्घकन्दकः ॥ १४६ ॥
बृहन्नालो दण्डपुष्पः कण्डूलोद्यानभूषणः ।
हस्तिकर्णी प्लीहगुल्मशोफज्वरविनाशनः ॥ १४७ ॥

५६. कपिकच्छूः ।

कपिकच्छूरात्मगुप्ता मर्कट्यङ्गारवल्लरी ।

कपिरोमफला चण्डा दुःस्पर्शा दूरविग्रहा ॥ १४८ ॥

कच्छूरश्शूकशिंबी च शिंबिबीजा महाफला ।
कपिकच्छूस्स्वादुरसा वृष्या वातक्षयापहा ॥ १४९ ॥

शीतपित्तास्रहन्त्री च विक्षतव्रणनाशनी ।

५७. कर्णस्फोटा ।

कर्णस्फोटा कटुस्तिक्ता हिमा सर्वविषापहा ॥ १५० ॥

ग्रहभूतादिदोषघ्नी सर्वव्याधिनिकृन्तनी ।

५८. रुद्रजटा ।

रुद्रा रुद्रजटा सौम्या सुगन्धा सुवहा घना ॥ १५१ ॥

पत्रवल्ली जटावल्ली रुद्राणी पिङ्गला जटा ।
जटा कटुरसा श्वासकासहृद्रोगनाशनी ॥ १५२ ॥

भूतविद्रावणी चैव रक्षसां च निबर्हणी ।

५९. नीलिका ।

नीलिका भृङ्गपत्री स्यान्नीलिपुष्पी च रञ्जनी ॥१५३॥

कालिका हारवाही च रङ्गपुष्पी महाफला ।
नीली कटुकतिक्तोष्णा केश्या कासकफामनुत् ॥१५४॥

मरुद्विषोदरव्याधिगुल्मागन्तुज्वरापहा ।
अन्या चैव महानीली अमला राजनीलिका ॥ १५५॥

महानीली गुणाढ्या स्याद्रङ्गश्रेष्ठा सुवीर्यदा ।

६०. कोशातकी ।

कोशातकी कृतच्छिद्रा जालिनी कृतवेधनी ॥ १५६ ॥

षोढा(क्ष्वेडा)सुतिक्ता घण्टाली मृदङ्गफलिनी तथा ।

कर्कशच्छदना पीतपुष्पा बहुवितानका ॥ १५७ ॥

कोशातकी तु शिशिरा कटुकाऽल्पकषायका।
वातपित्तकफघ्नी च मलाध्मानविनाशिनी ॥ १५८ ॥

दुर्नामविषभूतघ्नी श्वासकासहरा शुभा।
तिक्तकोशातकी पीतपुष्पा धूसरपत्रिका ॥ १५९ ॥

कटुकोशातकी तिक्ता दुर्नामविषभूतहा।
पीनसश्वासकासार्शोलूतादिव्रणनाशिनी ॥ १६० ॥

६१. जीवन्ती।

जीवन्ती स्याज्जीवनी जीवनीया
जीवा जीव्या जीवदा जीवदात्री।
शाकश्रेष्ठा जीवभद्रा च भद्रा
मङ्गल्या च क्षुद्रजीवा यशाख्या ॥ १६१ ॥

सुजीवन्ती बृहत्पूर्वा पत्रभद्रा प्रियङ्करी।
मधुरी जीववृक्षश्च ब्रह्मजन्मा यशस्करी ॥ १६२ ॥

जीवन्ती मधुरा शीता रक्तपित्तानिलापहा।
क्षयदाहज्वरान्हन्ति कफवीर्यविवर्धनी ॥ १६३ ॥

एवमेव महत्पूर्वा जीवन्ती बहुवीर्यदा।
सूतविद्राविणी ज्ञेया वेगाद्रसनियामिका ॥ १६४ ॥

हेम हैमवती सौम्या तृणगन्धा हिमप्रिया।
स्वर्णवन्ती सुजीवन्ती स्वर्णजीवा सुपर्णिका ॥ १६५ ॥

हेमपुष्पा स्वर्णलता स्वर्णजीवन्तिका च सा।
स्वर्णजीवन्तिका वृष्या चक्षुष्या मधुरा तथा ॥ १६६ ॥

शिशिरा वातपित्तास्रदाहजिद्बलवर्धनी।

६२. जतुका ।

जतुका जन्तुकारी च जीमूता चक्रवर्तिनी ॥ १६७ ॥
तिर्यक्फला विषा(निशा)न्धा च बहुपत्रा सुपत्रिका ।
राजकृष्णा दिनेष्टा च कपिकच्छुफलोपमा ॥ १६८ ॥

राजनी सूक्ष्मवल्ली च भ्रमरी कृष्णवल्लिका ।
तरुवल्ली दिव्यफला विज्ञेया षोडशाभिधा ॥ १६९ ॥

जतुका शिशिरा पित्तरक्तपित्तकफापहा ।
दाहतृष्णावमिघ्नी च रुचिकृद्दीपनी परा ॥ १७० ॥

६३. मुण्डी ।

श्वेता रक्ता च पीता च कृष्णा मुण्डी चतुर्विधा ।
सावर्णी स्यन्मुण्डिनिका भिक्षुः श्रवणशीर्षिकः ॥१७१॥

श्रावणी च प्रजविका परिव्राजी तपोधना ।
स्रावणी तु कषाया स्यात्कटूष्णा कफपित्तनुत् ॥१७२॥

अर्शोविकारकासघ्नी विषच्छर्दिविनाशिनी ।
महास्रावणिकाऽन्या स्यान्महामुण्डी च लोचनी ॥१७३॥

कदंबपुष्पी विकचाऽलंबुषा लोहिनी तथा ।
महामुण्डी च तिक्तोष्णा ईषद्गौल्या मरुच्छदा ॥

स्वरकृद्रेचनी चैव मेहकृच्च रसायनी ।

६४. विष्णुक्रान्ता ।

विष्णुक्रान्ता नीलपुष्पा नीलक्रान्ताऽपराजिता ॥१७५॥

विष्णुक्रान्ता कटुस्तिक्ता कफवातामयापहा ।

६५. कुमारी ।

नदीतीरेऽथवा ग्रामे नगरेऽद्रितटेऽथवा ॥ १७६ ॥

मृदुकण्टकपत्राणि पीतान्यहिसमानि च ।
प्रवालसमपुष्पाणि सक्लेदहरितानि च ॥ १७७ ॥

यस्याः पत्राणि तिष्ठन्ति सा कुमारीति कथ्यते ।
गृहकन्या कुमारी च दीर्घपत्रा जरामरा ॥ १७८ ॥

गृहकन्या हिमा तिक्ता मदगन्धिः कफापहा ।
पित्तकासविषश्वासकुष्ठघ्नी च रसायनी ॥ १७९ ॥

६६. भूम्यामली ।

भूम्यामली तमाली च भूधात्री दृढपादिका ।
भूधात्री तु कषायाम्ला पित्तमेहविनाशिनी ॥ १८० ॥
शिशिरा मूत्ररोगार्तिशमनी विषनाशिनी ।

६७. बर्हिचूडा ।

बर्हिचूडा शिखिशिखा मयूराद्यभिधा शिखा ॥१८१॥
बर्हिचूडा शिवा स्वादुर्मूत्रकृच्छ्रविनाशिनी ।
बालग्रहादिशोफघ्नी विषकर्मणि शस्यते ॥ १८२ ॥

६८. ब्राह्मी ।

ब्रह्मा सरस्वती सौम्या सुरश्रेष्ठा सुवर्चला ।
कपोतवेधा वैधात्री दिव्यतेजा महौषधी ॥ १८३ ॥

स्वायंभुवी सोमलता सुरेज्या गृहकन्यका ।
मण्डूकी सुरसा मेधा विज्ञेया षोडशाह्वया ॥ १८४ ॥

ब्राह्मी हिमा कषाया च तिक्ता वातास्रपित्तजित् ।
बुद्धिं मेधां च प्रज्ञां च कुर्यादायुष्यवर्धनी ॥ १८५ ॥

ब्राह्मी तु सूक्ष्मपत्राऽन्या लघुब्राह्मी जलोद्भवा ।
ब्राह्मी तिक्ता मदोष्णा च रसो वातामशोफहा ॥१८६

६९. तण्डुलीयकः ।

तण्डुलीयस्तु भण्डीरो ग्रन्थिलो बहुवीर्यकः ।
मेघनादस्सुशाखश्च पथ्यशाकश्च सप्तधा ॥ १८७ ॥
तण्डुलीयस्तु शिशिरो मधुरो विषनाशनः ।
रुचिकृद्दीपनः पथ्यः पित्तदाहभ्रमापहः ॥ १८८ ॥

७०. पाषाणभेदनः ।

पाषाणभेदनोऽश्मघ्नो नगजिच्छैलगर्भजः ।
पाषाणभेदी मधुरस्तिक्तो वातविनाशनः ॥ १८९ ॥
सदाहमूत्रकृच्छ्रघ्नो शीतलश्चाश्मरीहरः ।

७१. हस्तिशुण्डी ।

हस्तिशुण्डी नागशुण्डी शुण्डी धूसरपत्रिका ॥ १९० ॥
हस्तिशुण्डी कषाया स्यात्सन्निपातज्वरापहा ।

७२. क्षुद्राम्लिका ।

क्षुद्राम्लिका तु शार्ङ्गेरी चुकाम्ला चुक्रिका च सा ॥
क्षुद्राम्ली च रसे चाम्ला सोष्णा वह्निप्रवर्धनी ।
रुचिकृद्ग्रहणी दोषदुर्नामघ्नी कफापहा ॥ १९२ ॥

७३. ब्रह्मदण्डी ।

ब्रह्मदण्ड्यजदण्डी च कण्टपत्रफला च सा ।
ब्रह्मदण्डी कटूष्णा स्यात्कफशोफानिलापहा ॥ १९३ ॥

७४. ताली ।

ताली तमाली ताम्रा च ताम्रवल्ली तमालिका ।
सूक्ष्मवल्ली सुलोमा च शोधनी तालिका नव ॥१९४॥

ताम्रवल्ली कषाया स्यात्कफदोषविनाशनी ।
मुखकर्णाऽऽस्यरोगघ्नी श्लेष्मशुद्धिकरा परा ॥१९५॥

७५. खवल्ली ।

खवल्ली वासवल्ली स्याद्दुस्पर्शा व्योमवल्लरी ।
आकाशनामपूर्वा स्याद्वल्लिपर्यायगा स्मृता ॥ १९६ ॥

आकाशवल्ली कटुका मधुरा पित्तनाशनी ।
वृष्या रसायनी बल्या दिव्यौषधिवरा स्मृता ॥१९७॥

७६. सहदेवी ।

सहदेवी देवसहा देवी दण्डोत्पलाह्वया ।
सहदेवी ज्वरहरा रक्तपित्तप्रसादनी ॥ १९८ ॥

७७. लक्ष्मणा ।

लक्ष्मणा पुत्रिकन्दा च पुत्रदा नागिनी तथा ।
नागाह्वा नागपर्णी च कुलिनी मल्लिका च सा ॥

अस्रबिन्दुच्छदा चैव पुंस्कन्धा दशदाह्वया ।
वृष्या रसायनी बल्या नारीबन्धविनाशिनी ॥ २०० ॥

७८. भूकदम्बः ।

भूकदंबस्त्रिधा प्रोक्तश्श्वेतो रक्तश्च मेचकः ।
कदम्बपल्लवत्पत्रः पञ्चषड्दलसंयुतः ॥ २०१ ॥

भूलग्नश्च जटामध्ये तिक्तस्सूक्ष्मैकदण्डकः ।
भूकदंब इति प्रोक्तः सूक्ष्मगन्धोग्रगन्धवान् ॥ २०२ ॥

भूकदम्बोऽहिविषहा वीर्यवृद्धिकरः परः ।

७९. तैलकन्दः ।

अथ तैलकन्द उक्तो
द्रावककन्दस्तिलांकितदलश्च ।
करवीरकन्दसंज्ञो
लोहद्रावी विषापहारी च ॥ २०३ ॥

अश्वारिपत्रसङ्काशस्तिलबिन्दुसमन्वितः ॥ २०४ ॥

सस्निग्धा चैव भूमिश्च तैलकन्दो हि विश्रुतः ।
शोफापस्मारहा सूतबन्धनो देहसिद्धिदः ॥ २०५ ॥

८०. विष्णुकन्दः ।

विष्णुकन्दो विष्णुगुप्तस्सुपुटो बहुसंपुटः ।
जलवासी बृहत्कन्दो दीर्घपत्रो हरिप्रियः ॥ २०६ ॥

सर्पादिविषहारी स्याद्रसबन्धकरो हिताः ।

८१. त्रिकर्णिका ।

त्रिकर्णिका बृहत्पत्रा छन्नग्रन्थिनिका च सा ॥२०७॥

विश्वगन्धा कीटमारी हंसांघ्रिस्सूतरञ्जनी ।

८२. नागदन्ती ।

नागदन्ती श्वेतकणा मधुपुष्पा विशोधनी ॥ २०८ ॥

नागस्फोटा विशालाक्षी नागच्छत्री विचक्षणा ।
सर्पपुष्पी शुक्लपुष्पी स्वादुका सा च दन्तिका ॥

नागदन्ती कटुस्तिक्ता रूक्षा वातकफापहा ।
मेधाकृद्विषदोषघ्नी भावि(पाच)नी शुभदायिका ॥

८३. द्रोणपुष्पी।

द्रोणपुष्पी दीर्घपत्रा चित्रपत्रा कुतुंबिका।
द्रोणपुष्पी कटुस्सोष्णा रुच्या वातकफापहा॥ २११॥

अग्निमान्द्यहरा चैव पथ्या वातापहारिणी।
अन्या चैव महाद्रोणी कुतुम्बादेव पूर्वकः॥ २१२॥

दिव्यपुष्पी महाद्रोणी देवी काञ्ची षडाह्वया।
देवद्रोणी कटुस्तिक्ता मेध्या वातार्तिभूतनुत्॥२१३॥

कफवृद्ध्यपहा चैव युक्त्या पारदशोधनी।

८४. अमृतस्रवा।

ज्ञेयाऽमृतस्रवा वृक्षरुहाख्या तोयवल्लिका॥ २१४॥

घनवल्ली सितलता नामभिश्शरसम्मिता।
उक्ताऽमृतस्रवा पथ्या ईषत्तिक्ता रसायनी॥ २१५॥

विषघ्नी व्रणकुष्ठामकामिलाश्वयथूञ्जयेत्।

८५. पुत्रदात्री।

पुत्रदात्री तु वातारिर्भ्रमरी श्वेतपुष्पिका॥ २१६॥

वृत्तपत्रा तु गन्धालुर्वंशी जाता सुवल्लिनी।
पुत्रदात्री तु वातघ्नी कटुरूक्षा कफापहा॥ २१७॥

सुरभिः सर्वदा पथ्या वन्ध्यादोषविनाशनी।

८६. शाल्मलीकन्दः।

शाल्मलीकन्दकश्चाऽथ विजुलो वनवासकः॥ २१८॥

वनवासी मलघ्नश्च मलहन्ता षडाह्वयः।
मधुरः शाल्मलीकन्दो मलसङ्गहरोघजित्॥ २१९॥

शिशिरः पित्तदाहार्तिशोषसन्तापनाशनः ।

८७. आवर्तकी ।

आवर्तकी तिन्दुकिनी विभाण्डी
विषाणिका रङ्गलता मनोज्ञा ।
सा रक्तपुष्पी महदादिजाली
सा पीतकीलाऽपि च पीतरङ्गा ॥ २२० ॥

वामावर्ता च संप्रोक्ता रुद्रसंख्याऽभिधानका ॥ २२१ ॥

आवर्तकी कषायाम्ला शीतला पित्तनाशिनी ।

८८. अम्लपत्री ।

अम्लपत्री दीर्घपत्री रसाम्ला चाम्लिका रसा ॥२२२॥

आम्रातकी काञ्जिका च पर्णवल्ली पलाशिका ।
पलाशी वल्लपत्री च दीर्घवल्ली विषादनी ॥ २२३ ॥

सरपत्री सुवर्णी च स्याच्चतुर्दशधाभिधा ।
अरोचकहरा पथ्या पित्तकोपकरी च सा ॥ २२४ ॥

अष्टाशीतिमहौषधीनां नामसङ्ग्रहणम् ॥

हिमजा कारवी चैव कटुतिक्तादितुंबिका ।
ज्योतिष्मती लिङ्गिनी च पातालगरुडी खरी ॥ २२५ ॥

आखुकर्णी नीलपुष्पी वाराही देवदालिका ।
इन्द्रवारुणिका चैव हैन्द्रवारुणिका तथा ॥ २२६ ॥

गोजिह्वा काकतुण्डी च लज्जालुश्च पुनर्नवा ।
अम्लवल्ली वन्ध्या च शरपुंखी च भृङ्गराट् ॥ २२७ ॥

गुलूची चाथ मूर्वा च काकजङ्घा शतावरी ।

गोक्षुरः काकमाची चादित्यभक्ता च नाकुली ॥२२८॥

क्षीरकन्दस्तु निर्गुण्डी कार्पासी कोकिलाक्षकः ।
बृहती क्षुद्रिका गुञ्जा वृद्धदारुश्च बाकुची ॥ २२९ ॥

अपामार्गश्चक्रमर्दो विषमुष्ट्यंबुवल्लरी ।
हस्तिकन्दश्चाब्धिशोषी गोरक्षी भूमिपाटली ॥ २३० ॥

अष्टवर्गश्चार्कपुत्री हस्तिकर्ण्यग्निवल्लरी ।
कर्णस्फोता रुद्रजटा नीली कोशातकी तथा ॥ २३१ ॥

जीवन्ती जतुका मुण्डी विष्णुक्रान्ता कुमारिका ।
भूम्यामली बर्हिचूडा ब्राह्मी स्यात्तण्डुलीयकः ॥२३२॥

पाषाणभिद्धस्तिशुण्डी शार्ङ्गेरी ब्रह्मदण्डिका ।
ताम्रवल्ली खवल्ली च सहदेवी च लक्ष्मणा ॥२३३॥

भूकदम्बस्तैलकन्दो विष्णुकन्दस्त्रिकर्णिका ।
हंसपादी नागदन्ती द्रोणपुष्प्यमृतस्रवा ॥ २३४ ॥

पुत्रदा शाल्मलीकन्द आवर्तन्यम्लपत्रिका ।
अष्टाशीतिमहौषध्यो रसकर्मणि पूजिताः ॥ २३५ ॥

इति श्रीभैरवोक्ते आनन्दकन्दे क्रियाकरणविश्रान्तौ दशमोल्लासः ॥

॥ इति आनन्दकन्दः समाप्तः ॥

॥ परिशिष्टम् ॥

१. परिभाषाः[1] ॥

रसनियामिका ओषध्यः ।

सर्पाक्षी वह्नि(वन्ध्य)कर्कोटी कञ्चुकी जलबिन्दुना(जम्बुका) ।
शतावरी भृङ्गराजः शरपुङ्खा पुनर्नवा ॥ १ ॥

मण्डूकपर्णी मत्स्याक्षी ब्रह्मदण्डी शिखण्डिनी ।
अनन्ता काकजङ्घा च काकमाची कपोतिका ॥ २ ॥

विष्णुक्रान्ता सहचरा सहादेवी महाबला ।
बला नागबला कृष्णा चक्रमर्दः कुरु(तुर)ङ्गिणी ॥ ३ ॥
पाठा चामलकी नीली ज्वालिनी पद्मचारिणी ।
गोजिह्वा फणिजिह्वा च कोकिलाक्षो घनध्वनिः ॥ ४ ॥

आखुपर्णी त्रिपर्णी च द्विपर्णी चैकपर्णिका ।
तित्तिडी क्षीरिणी रास्ना मेषशृङ्गी च कुक्कुटी ॥ ५ ॥

कृष्णपर्णी च तुलसी श्वेता च गिरिकर्णिका ।
एता नियामकौषध्यः पुष्पमूलदलान्विताः ॥ ६ ॥

दोलास्वेदः प्रकर्तव्यो मूलेनानेन सुव्रते ! ।

रसनिर्जीवकर्य ओषध्यः[2] ।

चाण्डाली राक्षसी व्याघ्री खड्गारी गजकर्णिका ॥ ७ ॥

---

1. अस्मिन्परिशिष्टे एतद्ग्रन्थोद्धृतानां पारिभाषिकपदानां परिभाषोल्लासे यन्त्रादिवर्णनपर उल्लासे चाव्याकृतानां विवरणं रसार्णव–रसरत्नसमुच्चय–रसहृदय–रसरत्नाकर–रसचूडामण्यादिभ्य उद्धृत्य दीयते ।

2. रसार्णवादुद्धृताः ।

शङ्खपुष्प्यग्निधमनी लाङ्गली बालमोचका ।
रक्तस्नुही रक्तशृङ्गी रक्तिका नीलचित्रकः ॥ ८ ॥
शृगालजिह्वा बृहती वज्री चक्री च (प)राजिका(ता) ।
एकवीरा नरकसा रुदन्ती ब्रह्मचारिणी ॥ ९ ॥
उच्चटा मानि(नागि)नीकन्दा कुमारी रक्तचित्रकः ।
लक्ष्मीः शाखोटकश्चैव कञ्चुकी मेषशृङ्गिका ॥ १० ॥
हिमावती सोमलता मोदा व्याघ्रनखी शमी ।
काञ्चनी वनराजी च काकमाची च केशिनी ॥ ११ ॥
अजमारी कोटराक्षी हनूमत्यङ्गनायिका ।
नरजीवा हेमपुष्पी काकमुण्डी च कालिका ॥ १२ ॥
तोयवल्ली गजारी च हंसांघ्री कटुतुंबिका ।
तांबूली सूर्यभक्ता च रसनिर्जीवकारिकाः ॥ १३ ॥

रसमारिका ओषध्यो दिव्यौषधिबीजानि च[1] ।

कटुतुम्बी च गोसन्धी देवदालीन्द्रवारुणी ।
बाकुची ब्रह्मबीजानि कार्पासं कृष्णजीरकम् ॥ १४ ॥
कञ्चुकी कृष्णकनकं श्वेतार्कं च पिपीलुकम् ।
दन्तिनी यवचिञ्चा च कर्कोटी कारवल्लिका ॥ १५ ॥
गोजिह्वा काकजङ्घा च महाकाली च शंबरी ।
श्वेतगुञ्जा सिताङ्कोलः पटोली बिल्वमेव च ॥ १६ ॥
एकैकमौषधीबीजं मारयेद्रसभैरवम् ।

रसबन्धकर्य ओषध्यः[1] ।

रक्तस्नुही सोमलता रुदन्ती रक्तचित्रकम् ॥ १७ ॥

---

1. रसार्णवादुद्धृताः ।

शाखोटकी दग्धरुहा मोदिनी वृद्धदारुकः ।
त्रिशूली कृष्णमार्जारी चक्रिका क्षीरकुक्कुटी ॥ १८ ॥

देवदाली शङ्खपुष्पी काकमाची हनूमती ।
नीलज्योतिस्तृणज्योतिरुत्कटा हेमवल्लरी ॥ १९ ॥

त्रिदण्डी ब्रह्मदण्डी च चक्राङ्की स्थलपद्मिनी ।
नागजिह्वा नागपर्णी वीरा वर्तुलपर्णिका ॥ २० ॥

अर्कपत्री वंशपत्री ताम्रपर्णी तथेश्वरी ।
इन्दुरी देवदेवेशि ! रसबन्धकराः प्रिये ! ॥ २१ ॥

रसद्राविका ओषध्यः[1] ।

सूर्यावर्तश्च कदली वन्ध्या कोशातकी तथा ।
वज्रकन्दोदककणा काकमाची च शिग्रुकः ॥ २२ ॥

देवदाली च देवेशि ! द्राविकाः परिकीर्तिताः ।
दोषान्हरन्ति योगेन धातूनां पारदस्य च ॥ २३ ॥

रसक्रामिका ओषध्यः[1] ।

काकमाची घनरवः कासमर्दः कृताञ्जलिः ।
वराहकर्णी सटिरी हंसपादी शतावरी ॥ २४ ॥

तांबूली नागिनी ब्रह्मी हंसपादी च लक्ष्मणा ।
अर्जुनी क्षीरनाली च कारवेल्लोऽर्कपत्रिका ॥ २५ ॥

व्याघ्री चवी कुरवका क्रामिकाः सुरवन्दिते ! ।

रासायनिकाः ओषध्यः[1] ।

ब्रह्मदण्डस्सुदण्डश्च लोहदण्डस्तृतीयकः ॥ २६ ॥

एते रसायने योग्याः ब्रह्मविष्णुमहेश्वराः ।

---

1. रसार्णवादुद्धृतः ।

पञ्चरत्नम्[1] ।

मन्त्रसिद्धासना देवी तथा कङ्कालखेचरी ॥ २७ ॥

इन्दिरा च क्षमापाली पञ्चमी तु निशाचरी ।
पञ्चरत्नमिदं देवि ! रसशोधनजारणे ॥ २८ ॥

क्षीरवर्गः[2] ।

न्यग्रोधोदुंबराश्वत्थस्नुहीतिल्वकभास्करः ।
दुग्धमुत्तमकन्याश्च क्षीरवर्ग उदाहृतः ॥ २९ ॥

उदुंबरवटाश्वत्थन्यग्रोधार्कस्नुहीद्रुमाः ।
कुरूटका क्षीरकर्णी कण्टकी च सुगन्धिका ॥ ३० ॥

एतेषां क्षीरवृक्षाणां क्षीरवर्ग उदाहृतः ।

क्षारवर्गः[2] ।

क्षारत्रयं समाख्यातं यवस्वर्जिकटङ्कणम् ॥ ३१ ॥

पलाशो मुष्ककक्षारो यवक्षारस्सुवर्चलः ।
तिलानामुद्भवः क्षारस्तदुक्तं क्षारपञ्चकम् ॥ ३२ ॥

तिलापामार्गकदलीचिलकार्द्रकमूलकम् ।
शिग्रुमोक्षपलाशश्च केतकी च स्नुहीत्रयम् ॥ ३३ ॥

चिञ्चात्वगर्कनिष्पावदेवदारुरधोमुखी ।
चलपत्रं लाङ्गली च तालमेघरवं तथा ॥ ३४ ॥

ये चान्ये क्षारवृक्षाश्च सर्वमन्तःपुटे दहेत् ।
तमालोड्य जलैर्वस्त्रैर्बध्वा ग्राह्यमधोजलम् ॥ ३५ ॥

---

1. रसार्णवदुद्धृतः ।

2. सरस्वतीमहालयगतरसरत्नसमुच्चयत उद्धृतः । अयं सरस्वतीमहालये उपलभ्यमानोऽन्यत्र मुद्रितादुपलभ्यमानात् क्वचन कि कुत्रचित्समानश्च विद्यते । (ग्र. सं. 10731.)

शोषयेत्पाचयेदग्नौ मृद्भाण्डेन तु तज्जलम् ।
ग्राह्यं क्षारावशेषं तद्वृक्षक्षारोऽयमीरितः ॥ ३६ ॥

तैलवर्गः[1] ।

कङ्गुणीतुम्बिनीघोषाकरञ्जश्रीफलोद्भवम् ।
कटुवातारिसिद्धार्थसोमराजीविभीतजम् ॥ ३७ ॥

अतसीजं महाकालनिम्बजं तिलजं तथा ।
अपामार्गदेवदालीदन्तितुम्बुरुबीजकात् ॥ ३८ ॥

अङ्कोलोन्मत्तभल्लातपलाशेभ्यस्तथैव च ।
एतेभ्यस्तैलमादाय रसकर्मणि योजयेत् ॥ ३९ ॥

अम्लवर्गः[1] ।

अम्लवेतसजंबीरं निंबुकं बीजपूरकम् ।
शाङ्गेरी चणकाम्लं च साम्लकं कोलदाडिमम् ॥ ४० ॥

अम्बष्ठा तिन्त्रिणीकं च नारं पारावताङ्घ्रिका ।
करमर्दं च मद्यं च अम्लवर्गः प्रकीर्तितः ॥ ४१ ॥

चणकाम्लं च सर्वेषां एकमेव प्रशस्यते ।
रसानां च विशुद्ध्यर्थं जारणाद्रावणे हितः ॥ ४२ ॥

अम्लवेतसमेकं वा सर्वेषामुत्तमोत्तमम् ।

अम्लवेतससन्धानक्रमः[1] ।

तद्बीजरहितं चिञ्चाफलं काञ्जिकसंयुतम् ॥ ४३ ॥

पक्त्वा कुर्याद्वस्त्रपूतं जम्बीराम्लं च तत्समम् ।
शाङ्गेरीमातुलुङ्गाम्लं यथाप्रोक्तं समाहरेत् ॥ ४४ ॥

वस्त्रपूतं तु तत्सर्वं पचेत्पादावशेषितम् ।

---

1. सरस्वतीमहालयगतरसरत्नसमुच्चयत उद्धृतः ।

सौराष्ट्री तुत्थकासीसं त्रिक्षारं पटुपञ्चकम् ॥ ४५ ॥
धूमसारं च तुल्यांशं सर्वं सञ्चूर्ण्य निक्षिपेत् ।
पूर्वपूर्वे तु पादांशं पुनर्मृद्वाग्निना पचेत् ॥ ४६ ॥
घनीभूतं भवेद्यावच्चट्टुनैकेन चालयन् ।
अम्लवेतस इत्येतज्जायतेऽम्लतरं परम् ॥ ४७ ॥

अथवा—

चिञ्चाफलं काञ्जिकेन सम्यगालोड्य गालितम् ।
नारङ्गलुङ्गलिकुचधात्रीवृक्षाम्लसंयुतः ॥ ४८ ॥
शतावर्यैरावताभ्यां सर्वतस्सदृशो भवेत् ।
एतत्सर्वं समालोड्य शनैर्मृद्वग्निना पचेत् ॥ ४९ ॥
पादावशिष्टे तस्मिंस्तु तत्पादं पटुपञ्चकम् ।
सौराष्ट्री तुत्थकासीसं त्रिक्षारगृहधूमकम् ॥ ५० ॥
एतत्सर्वं समावाप्य तद्यावच्चूर्णतां व्रजेत् ।
द्रवेऽवलोड्य पक्त्वैनं योजयेद्रसकर्मणि ॥ ५१ ॥
अम्लवेतसनामाऽयं रसशास्त्रेषु कीर्तितः ।

मलवर्गः[1] ।

कपोतछागगृध्राणां शिखिकुक्कुटयोश्च विट् ॥ ५२ ॥
गोखराश्वाजनागानां शकृद्वर्गः प्रकीर्तितः ।

मूत्रवर्गः[1] ।

नरोष्ट्रहस्तिकरभमहिषीखरवाजिनाम् ॥ ५३ ॥
गोजाविकानां मूत्राणि मूत्रवर्ग इतीरितः ।

---

1. सरस्वतीमहालयगतरसरत्नसमुच्चयादुद्धृतः ।

रक्तवर्गः[1] ।

मञ्जिष्ठा कुङ्कुमं लाक्षा दाडिमं रक्तचन्दनम् ॥ ५४ ॥
बन्धूककरवीराक्षि किंशुकं रक्तवर्गकः ।

श्वेतवर्गः[1] ।

तगरः कुटजः कुन्दो गुञ्जा जीवन्तिका तथा ॥५५ ॥
सितांभोरुहकन्दश्च श्वेतवर्ग उदाहृतः ।

पीतवर्गः[1] ।

वरानिलाग्निकासीसं कदली कारवल्लिका ॥ ५६ ॥
अतः परं निशाद्वन्द्वं कर्णिकारेन्द्रवारुणी ।
मूलकं चापि कौसुम्भं अक्षनारङ्गकिंशुकम् ॥ ५७ ॥
मदयन्ती पुण्डरीकं पीतवर्गं वदन्ति वै ।

कृष्णवर्गः ।

कदली कारवल्ली च त्रिफला नीलिकानला ॥ ५८ ॥
पङ्कः कासीसबालाम्रं कृष्णवर्ग उदाहृतः ।

वसावर्गः[1] ।

जलूकाकालमण्डूककरिप्लाविनराहिजाः ॥ ५९ ॥
शिंशुमारमेषशिखिकर्कटीमीनगोभवाः ।
शूकरस्य वसावर्गो रसकर्मणि कीर्तितः ॥ ६० ॥

पित्तवर्गः ।

महिषीक्रोडमत्स्याक्षिशिखिमार्जालगोनृणाम् ।
नकुलस्य च पित्तेन पित्तवर्ग उदाहृतः ॥ ६१ ॥

---

1. सरस्वतीमहालयगतरसरत्नसमुच्चयादुद्धृताः ।

शोधनत्रयम्[1] ।

सौवीरं टङ्कणं काचमित्युक्तं शोधनत्रयम् ।

मधुरत्रयम्[1] ।

घृतं गुडं माक्षिकं च विज्ञेयं मधुरत्रयम् ॥ ६२ ॥

मित्रपञ्चकम्[1] ।

मध्वाज्यटङ्कणं गुञ्जा गुडं स्यान्मित्रपञ्चकम् ।

लोहपर्पटी[2] ।

लोहस्य कुट्यमानस्य सुतप्तस्य दलानि वै ॥ ६३ ॥

पतन्ति तानि स्वीकृत्य ख्यातोऽयं लोहपर्पटः ।

तुलायन्त्रम्[3] **(मूषायन्त्रं वा)** ।

तुलायन्त्रं तुलाऽऽकारं मूषायन्त्रं तदुच्यते ॥ ६४ ॥

लोहमूषाद्वयं कृत्वा द्वादशाङ्गुलमानतः ।
ईषच्छिद्रान्वितामेकां तत्र गन्धकसंयुताम् ॥ ६५ ॥

मूषायां रसयुक्तायामन्यस्यां तां प्रवेशयेत् ।
तोयं स्यात्सूतकस्याधो गन्धाधो वह्निदीपनम्[4] ॥ ६६ ॥

नियामकं यन्त्रम्[2] ।

भूगे पूरितपूर्ववारिणि रसं निक्षिप्य वस्त्रावृतं
भाण्डे योजितलोहखर्परमुखे चोर्ध्वं पुटे रोधयेत्[5] ।

---

1. सरस्वतामहालयगतरसरत्नसमुच्चयादुद्धृताः ।
2. रसरत्नाकरतः ऋद्धिखण्डात् । 3. रसपद्धतेः ।
4. इदमेव जारणायन्त्रमिति रसरत्नसमुच्चये ।
5. पूरितयवचिञ्चाद्यालोडितारनाले भूम्यन्तर्गते भाण्डे रसं वस्त्रे निक्षिप्य लोहखर्परं मुखे दत्वा ऊर्ध्वं करीषाग्निं दद्यादित्यर्थः ।

विद्याधरयन्त्रम्[1] ।

यन्त्रं विद्याधरं ज्ञेयं स्थालीद्वितयसंपुटात् ।
चुल्लीं चतुर्मुखीं कृत्वा यन्त्रभाण्डं निवेशयेत् ॥ ६८ ॥

तत्रौषधं विनिक्षिप्य निरुद्ध्याद्भाण्डकाननम् ।
यन्त्रं विद्याधरं नाम तन्त्रज्ञैः परिकीर्तितम् ॥ ६९ ॥

सारणायन्त्रम्[2] ।

धूर्तपुष्पसमाकारा मूषाऽष्टाङ्गुलदीर्घिका ।
मुखे सुविस्तृता कार्या चतुरङ्गुलसम्मिता ॥ ७० ॥

मृन्मया साऽपि शुष्का च मध्येऽतिमसृणीकृता ।
अन्या पिधानिका मूषा सुनिम्ना छिद्रसंयुता ॥ ७१ ॥

आवर्तितलोहादिस्वरूपम्[3] ।

आवर्तमाने कनके पीता तारे सिता प्रभा ।
शुल्बे नीलनिभा तीक्ष्णे कृष्णवर्णा सुरेश्वरि ! ॥ ७२ ॥

वङ्गे ज्वाला कपोताभा नागे मलिनधूमका ।
शैले तु धूसरा देवि ! आयसे कपिलप्रभा ॥ ७३ ॥

अयस्कान्ते धूम्रवर्णा सस्यके लोहिता भवेत् ।
वज्रे नानाविधा ज्वाला खसत्वे पाण्डुरप्रभा ॥ ७४ ॥

आवर्तितलोहविशुद्धिलक्षणम्[3] ।

न विस्फुलिङ्गो न च बुद्बुदश्च
यदा न रेखा पटलं न शब्दः ।
मूषागतं रत्नसमं स्थिरञ्च
तदा विशुद्धं प्रवदन्ति लोहम् ॥ ७५ ॥

---

1. रसरत्नसमुच्चयतः । 2. रसप्रकाशसुधाकरतः ।
3. रसार्णवतः ।

प्रतीवाप-निषेकाभिषेकसमयनिर्देशः[1] ।

प्रतीवापः पुरा योज्यो निषेकस्तदनन्तरम् ।
छादनं तु प्रतीवापो निषेकं मज्जनं विदुः ॥ ७६ ॥
अभिषेकं तदिच्छन्ति स्नपनं क्रियते तु यत् ।
वापो निषेकस्स्नपनं द्रुते निर्मलतां गते ॥ ७७ ॥
उष्णेनैव हि वाञ्छन्ति शीतलं न च वाञ्छति ।

मृतरसपरीक्षा[2] ।

अतेजा अगुरुश्शुभ्रो लोहहा चाचलो रसः ॥ ७८ ॥
यदा नावर्तते वह्नौ नोर्ध्वं गच्छेत्तदा मृतः ।

रसबन्धप्रकाराः[3] ।

पञ्चविंशतिसंख्याकान्रसबन्धान्प्रचक्ष्महे ॥ ७९ ॥
येन येन हि चाञ्चल्यं दुर्ग्रहत्वं च नश्यति ।
रसराजस्य संप्रोक्तो बन्धनार्थो हि वार्तिकैः ॥ ८० ॥
हठारोटौ तथाऽऽभासः क्रियाहीनश्च पिष्टिका ।
क्षारः खोटश्च पोटश्च कल्कबन्धश्च कज्जलिः ॥ ८१ ॥
सजीवश्चैव निर्जीवो निर्बीजश्च सबीजकः ।
श्रृङ्खलाद्रुतिबन्धौ च बालकश्च कुमारकः ॥ ८२ ॥
तरुणश्च तथा वृद्धो मूर्तिबद्धस्तथाऽपरः ।
जलबन्धोऽग्निबन्धश्च सुसंस्कृतकृताभिधः ॥ ८३ ॥
महाबन्धाभिधश्चेति पञ्चविंशतिरीरिताः ।
केचिद्वदन्ति षड्विंशो जलौकाबन्धसंज्ञकः ॥ ८४ ॥
स तावन्नेष्यते देहे स्त्रीणां द्रावेऽतिशस्यते ।

---

1. रसार्णवतः । 2. रससङ्केतकलिकातः 3. रसरत्नसमुच्चयतः ।

हठबन्धः ।

हठो रसस्स विज्ञेयस्सम्यक्शुद्धिविवर्जितः ॥ ८५ ॥

स सेवितो नृणां कुर्यान्मृत्युं वा व्याधिमुद्धतम् ।

आरोटबन्धः ।

सुशोधितो रसस्सम्यगारोट इति कथ्यते ॥ ८६ ॥

स क्षेत्रीकरणे श्रेष्ठश्शनैर्व्याधिविनाशनः ।

आभासबन्धः ।

पुटितो यो रसो याति योगं मुक्त्वा स्वभावताम् ॥ ८७ ॥

भावितो धातुमूलाद्यैराभासो गुणवैकृतेः ।

क्रियाहीनबन्धः ।

असंशोधितलोहाद्यैस्साधितो यो रसोत्तमः ॥ ८८ ॥

क्रियाहीनस्स विज्ञेयो विक्रियां यात्यपथ्यतः ।

पिष्टिकाबन्धः ।

तीव्रातपे गाढतरावमर्दात्
पिष्टीभवेत्सा नवनीतरूपा ।
स्यातस्स सूतः किल पिष्टिबन्धः
स्वन्दीपनः पाचनकृद्विशेषात् ॥ ८९ ॥

क्षारबन्धः ।

शङ्खशुक्तिवराटाद्यैर्योऽसौ संसाधितो रसः ॥ ९० ॥

क्षारबन्धः परं दीप्तिपुष्टिकृच्छूलनाशनः ।

खोटबन्धः ।

बन्धो यः खोटतां याति ध्मातो ध्मातः क्षयं व्रजेत् ॥९१ ॥

खोटबन्धस्स विज्ञेयः शीघ्रं सर्वगदापहः[1] ।

पोटबन्धः ।

द्रुतकज्जलिका मोचापत्रके चिपिटीकृता ॥ ९२ ॥
स पोटः पर्पटी सैव बालाद्यखिलरोगनुत् ।

कल्कवन्धः ।

स्वेदाद्यैस्साधितः सूतः पङ्कत्वं समुपागतः ॥ ९३ ॥
कल्कबद्धस्स विज्ञेयो योगोक्तफलदायकः ।

कज्जलीवन्धः ।

कज्जली रसगन्धोत्था सुश्लक्ष्णा कज्जलोपमा ॥ ९४ ॥
तत्तद्योगेन संयुक्ता कज्जलीबन्ध उच्यते ।

सजीवबन्धः ।

भस्मीकृतो गच्छति वह्नियोगात्
रसस्सजीवस्स खलु प्रदिष्टः ।
संसेवितोऽसौ न करोति भस्म-
कार्यं जरारोगविनाशनं च ॥ ९५ ॥

निर्जीवबन्धः ।

जीर्णाभ्रको वा परिजीर्णगन्धो
भस्मीकृतश्चाखिललोहमौलिः ।
निर्जीवनामा हि स भस्मसूतो
निश्शेषरोगान्विनिहन्ति सद्यः ॥ ९६ ॥

---

1. "पिष्टीस्तम्भस्तु खोटकः । ध्मातो द्रुतो भवेत्खोटस्त्वाहतश्चूर्णतां व्रजेत् । पुनर्ध्मातो द्रुतः खोट इति खोटस्य लक्षणम् ।" इति रससङ्केतकलिकायाम् ।

निर्बीजबन्धः।

रसस्तु पादांशसुवर्णजीर्णः
पिष्टीकृतो गन्धकयोगतश्च।
तुल्यांशगन्धैः पुटितः क्रमेण
निर्बीजनामा सकलामयघ्नः॥ ९७॥

सबीजबन्धः।

[1]पिष्टीकृतैरभ्रकसत्वहेम-
तारार्ककान्तैः परिजारितो यः।
हतस्ततष्षड्गुणगन्धकेन
सबीजबद्धो विपुलप्रभावः॥ ९८॥

शृङ्खलाबन्धः[2]।

वज्रादिनिहतस्सूतो हतस्सूतस्समोऽपरः॥ ९९॥

शृङ्खलाबद्धसूतस्तु देहलोहविधायकः।
चित्रप्रभावां वेगेन व्याप्तिं जानाति शङ्करः॥१००॥

द्रुतिबन्धः।

युक्तोऽपि बाह्यद्रुतिभिश्च सूतो
बन्धं गतो वा भसितस्वरूपः।
स राजिकापादमितो निहन्ति
दुस्साध्यरोगान्द्रुतिबद्धनामा॥ १०१॥

बालकबन्धः।

समाभ्रजीर्णश्शिवजस्तु बालः
संसेवितो योगयुतो जवेन।

1. बीजीकृतैः इति रसमञ्जर्यां आयुर्वेदप्रकाशे च पाठः।

2. अयं बन्धप्रकारः आनन्दकन्दे वज्रबन्धप्रकरणे (पृ. ४४५) दश-सङ्क(शृङ्ख)लिकाविधिनिरूपणावसरे मूल एव प्रपञ्चितः।

रसायनो भाविगदापहश्च
सोपद्रवारिष्टगदान्निहन्ति ॥ १०२ ॥

कुमारबन्धः ।

हरोद्भवो यो द्विगुणाभ्रजीर्णः
स स्यात्कुमारो मिततण्डुलोऽसौ ।
त्रिस्सप्तरात्रैः खलु पापरोग-
सङ्घातघाती च रसायनं च ॥ १०३ ॥

तरुणबन्धः ।

चतुर्गुणव्योमकृताशनोऽसौ
रसायनाग्र्यस्तरुणाभिधानः ।
स सप्तरात्रात्सकलामयघ्नो
रसायनो वीर्यबलप्रदाता ॥ १०४ ॥

वृद्धबन्धः ।

यस्याभ्रकष्षड्गुणितो हि जीर्णः
प्राप्ताग्निसख्यः स हि वृद्धनामा ।
देहे च लोहे च नियोजनीयः
शिवादृते कोऽस्य गुणान्प्रवक्ति ॥ १०५ ॥

मूर्तिबन्धः ।

यो दिव्यमूलिकाभिश्च कृतोऽत्यग्निसहो रसः ।
विनाऽभ्रजारणात्स स्यान्मूर्तिबन्धो महारसः ॥ १०६ ॥
अयं हि जार्यमाणस्तु नाग्निना क्षीयते रसः ।
योजितस्सर्वयोगेषु निरौपम्यफलप्रदः ॥ १०७ ॥

जलबन्धः ।

शिलातोयमुखैस्तोयैर्बद्धोऽसौ जलबन्धवान् ।
स जरारोगमृत्युघ्नः कल्पोक्तफलदायकः ॥ १०८ ॥

अग्निबन्धः ।

केवलो लोहयुक्तो वा ध्मातः स्याद्गुटिकाकृतिः ।
अक्षीणश्चाग्निबद्धोऽसौ खेचरत्वादिकृत्स हि ॥ १०९ ॥

संस्कृतबन्धः ।

विष्णुक्रान्ताशशिलताकुंभीकनकमूलकैः ।
विशालानागिनीकन्दव्याघ्रपादीकुरण्टकैः ॥ ११० ॥

वृश्चिकालीभशुण्डीभ्यां हंसपादीसहासुरैः ।
अप्रसूतगवां मूत्रैः पिष्टं बाकुलके पचेत् ॥ १११ ॥

पक्वमेवं मृतैर्लोहैर्मर्दितं विपचेद्रसम् ।
यन्त्रेषु मूर्च्छा सूतानामेष कल्पः सुसंस्कृतः ॥ ११२ ॥

महाबन्धः ।

हेम्ना वा रजतेन वा सहचरो ध्मातो व्रजत्येकतां
अक्षीणो निबिडो गुरुश्च गुटिकाकारोऽतिदीर्घोज्ज्वलः ।
चूर्णत्वं पटुवत्प्रयाति निहतो घृष्टो न मुञ्चेन्मलं
निर्गन्धो द्रवति क्षणात्स हि महाबन्धाभिधानो रसः ॥ ११३ ॥

सृष्टिः ।

गोऽजाविनरनारीणां मूत्रं शुक्रं च शोणितम् ।
सृष्टिरेषा समाख्याता षण्डदोषविनाशिनी[1] ॥ ११४ ॥

स्त्रीपुंसोः शुक्रयुगलमप्रसूतारजस्तथा ।
एतत्सृष्टित्रयं प्रोक्तं गुह्यमेतद्वरानने[2] ! ॥ ११५ ॥

वासनामुखचारणप्रकारः[3] ।

अथ शुद्धस्य सूतस्य जारयेत्पूर्वभावितम् ।
गन्धकं तु तुलायन्त्रे पश्चात्सर्वं पलं पलम् ॥ ११६ ॥

---

1. शक्त्यवतारात् । 2. रसावतारात् । 3. रसरत्नाकरतः ।

मूषा नालान्विता ऊर्ध्ववक्त्रा स्याद्द्वादशाङ्गुला ।
दृढा लोहमयी कार्या त्वनया सदृशी परा ॥ ११७ ॥

एकस्यां निक्षिपेत्सूतमन्यस्यां गन्धकं समम् ।
एकस्या मुखमध्ये तु ह्यपरस्या मुखं क्षिपेत् ॥ ११८ ॥

लिप्त्वा मृल्लवणैस्सार्धं गन्धकोर्ध्वं पुटेल्लघु ।
रसस्याधो जलं स्थाप्यं धूमं गन्धं पिबत्यलम् ॥ ११९ ॥

जीर्णे गन्धे समुद्धाट्य तुल्यगन्धं च दापयेत् ।
इत्येवं षोडशगुणं गन्धं जार्यं पुनः पुनः ॥ १२० ॥

जायते सूतराजोऽयं वासनामुखितो भवेत् ।

ग्राह्याग्राह्यरसलक्षणम्[1] ।

अन्तस्सुनीलो बहिरुज्ज्वलो यो
मध्याह्नसूर्यप्रतिमप्रकाशः ।
शस्तोऽथ धूम्रः परिपाण्डुरश्च
चित्रो न योज्यो रसकर्मसिद्धौ ॥ १२१ ॥

२. प्रकीर्णकम्[2] ॥

सिद्धसारयन्त्रम्[3] ।

चुल्ल्यामारोपयेत्पात्र गंभीरं कल्कपूरितम् ।
तत्पार्श्वनलिकामार्गाद्द्रुतसत्वस्य विप्रुषाः ॥ १ ॥

पतन्ति येन तद्यन्त्रं सिद्धसाराख्यमीरितम् ।

गर्भसारयन्त्रम्[3] ।

तथैव पात्रं गंभीरं सच्छिद्रकपिधानकम् ॥ २ ॥

---

1. रसमञ्जर्याः । 2. इतः परं रससंस्कारोपयुक्तानामन्येषामपि विषयाणामत्र विवरणं दीयते ।
3. रसकामधेनुतः ।

पिधाय पात्रान्तरतो मध्ये खल्पकचोलके।
पातने बाष्पबिन्दूनां गर्भसारं प्रचक्षते ॥ ३ ॥

(परमानन्दमूर्तियन्त्रम्[1]।

तथैव पार्श्वनाली तु दीर्घा पात्रान्तरं गता।
द्रवपातो यतः प्रोक्तं परमानन्दमूर्ति तत् ॥ ४ ॥

(अत्राम्लक्षारकाञ्जिकद्रवसत्वपातनम्।)

पातालयन्त्रम्[1]।

स्निग्धद्रव्यभृतं पात्रं सच्छिद्रमन्यपात्रके।
गर्ते निधायोपर्यग्निर्यन्त्रं पातालसंज्ञकम् ॥ ५ ॥

आकाशयन्त्रम्[1]।

उपर्यग्निर्घटस्यार्धं खर्परं सम्मुखस्थितम्।
न्युब्जमुच्चैर्वस्त्रबद्धमुखं मल्लपिधानकम् ॥ ६ ॥
वस्त्रान्तस्स्थं द्रव्यचूर्णं द्रवीभूय पतेदधः।
अन्यपात्रे काचजादौ यन्त्रमाकाशसंज्ञितम् ॥ ७ ॥
तन्मुखे काचकूपी वा साऽधश्छिद्रा सवस्त्रभृत्।

अथवा—

मृत्तिकादिकूपीवालुकायन्त्रे स्थिता उपरि लम्बमानसकल्कघटाऽधश्छिद्राद्द्रवबिन्दुपरिपतद्रसादिद्रव्या यदि च स्यात्तदाऽप्याकाशयन्त्रमुक्तम्।

रञ्जकयन्त्रम्[1]।

रञ्जकद्रवपूर्णायां स्थालिकायां तु विन्यसेत् ॥ ८ ॥
मृत्तिकाकाचजं पात्रं गंभीरोच्चं मनोहरम्।

---

1. रसकामधेनुतः।

सूक्ष्मच्छिद्रान्वितां तत्र समारोप्य त्रिपादिकाम् ॥ ९ ॥

तत्र क्षिप्त्वा गन्धचूर्णं तप्ततीक्ष्णशलाकया ।
सन्दह्य सद्यस्तत्पात्रोपरि पात्रं च तद्विधम् ॥ १० ॥

तथा पिदध्यात्तत्पात्रधानं मज्जेद्द्रवान्तरे ।
तत्तलान्तर्धूमसत्वं लग्नं स्याच्च तथा चरेत् ॥ ११ ॥

छिद्रान्तराद्द्रुतं तैलं मध्यपात्रे पतेदपि ।
इदं श्रीरङ्गकं यन्त्रं सर्वतन्त्रेषु गोपितम् ॥ १२ ॥

करुणाकरयन्त्रम्[1] ।

सकल्कपात्रं गम्भीरं चुल्लीस्थं च तिरोहितम् ।
स्थाल्यां तत्प्रान्तस्थरसैश्च्युतस्स्यात्करुणाकरम् ॥ १३ ॥

वारुणीयन्त्रम्[1] ।

कूपीद्वयमुखं तिर्यक्कृत्वैकाधोऽग्निदीपनम् ।
ततः क्षारद्रवोऽन्यस्यां पतेद्वारुणिकं च तत् ॥ १४ ॥

ज्योतिर्यन्त्रम्[1] ।

हण्डिकाधस्तु दीपाग्निरूर्ध्वच्छिद्रस्थकूपके ।
तालादिसत्वपातार्थं ज्योतिर्यन्त्रमिदं स्मृतम् ॥ १५ ॥

साध्ययन्त्रम्[1] ।

चुल्लीसंस्थेष्टिकागर्तेऽन्यपात्रेण तिरोहिते ।
तालादिसत्वं निपतेत्साध्ययन्त्रं तदुच्यते ॥ १६ ॥

स्थलकूर्मयन्त्रम्[2] ।

खर्परं पृथुलं सम्यग्विस्तारे तस्य मध्यमे ।

---

1. रसकामधेनुतः । 2. रसदर्पणतः ।

आलवालं मृदा कृत्वा तन्मध्ये पारदं न्यसेत् ॥ १७ ॥
जारणार्थं रसस्योक्तं गन्धादीनामशेषतः ।

जलकूर्मयन्त्रम्[1] ।

दैर्घ्याद्धस्स्थालिकाया मानं स्याद्द्वादशाङ्गुलम् ॥१८॥
षोडशाङ्गुलविस्तारां चतुःकीलयुतां मुखे ।
जलेनापूर्य तां स्थालीं निखनेद्भूमिमध्यतः ॥ १९ ॥
उपरिष्टाच्छरावं तु मुखं कीलेषु निक्षिपेत् ।
अधो भाण्डे जले मग्नं शरावं च तथा भवेत् ॥ २० ॥
जलकूर्ममिदं यन्त्रं शस्तं जारणकर्मणि ।

पञ्चमृत्तिकाः[2] ।

वल्मीकमृत्तिका धूमो गैरिकं खटिका पटु ॥ २१ ॥
इत्येते मृत्तिकाः पञ्च संप्रोक्ता रसकर्मणि ।

लोपाद्यर्थं मृत्तिकासाधनम्[3] ।

मृत्कार्पासककिट्टैश्च मृत्तिका साधिताऽपरा ॥ २२ ॥
लाक्षामृच्चूर्णतृणतो मेषीक्षीरेण मर्दयेत् ।
कार्पासजीर्णतृणतो मेषीक्षीरेण मर्दयेत् ॥ २३ ॥
कुक्कुटाण्डरसेनापि मृत्तिकाऽन्या विमर्दिता ।
काचकूपीविलेपार्थमेते द्वे मृत्तिके वरे ॥ २४ ॥
कासीसचूर्णमण्डूरं टङ्कणं नवसादरम् ।
पटूनि पञ्च निम्बूकरसैस्संमर्दयेन्मृदम् ॥ २५ ॥

---

1. देवीयामलतः । इदमेव सोमानलं यन्त्रमिति यन्त्राध्याये विनिर्दिष्टपूर्वम् ।
2. रसेन्द्रचूडामणितः 3 रसकामधेनुतः ।

फेनतुल्यं च डमरुयन्त्रलेपे मृदुच्यते ।
कुलालकरमृत्कृष्णा पीतमृच्च करंभकम् ॥ २६ ॥

नरकेशाः कागदं च तुषा एतद्विमर्दयेत् ।
द्राक्षागुडादिशुक्तेन वज्रमूषामृदुच्यते ॥ २७ ॥

तुषं भागद्वयं ग्राह्यं भागैकं वस्त्रखण्डकम् ।
मृदं च त्रिगुणीकृत्य जलं दत्वा विमर्दयेत् ॥ २८ ॥

नरकेशं समं कृत्वा किञ्चित्तावत्प्रकुट्टयेत् ।
यावत्सिक्थसमाभासं मृत्पिण्डं जायते तथा ॥ २९ ॥

यथा न शुष्कतामेति तथा यत्नं समाचरेत् ।
एवं सप्तदिनादूर्ध्वं मृदे योगे प्रयोजयेत् ॥ ३० ॥

कूपिकादिविलेपार्थं यन्त्रादेश्च भिषक्क्रमात् ।
जलं बब्बूलनिर्यासं समितां तत्समं कुरु ॥ ३१ ॥

तयोस्तुल्यं लोहकिट्टं शुद्धमञ्जनसन्निभम् ।
मुद्रां वै वारियन्त्रस्य सिद्ध्यर्थं दुर्लभां कुरु ॥ ३२ ॥

जलाग्नियोगतो नैव भिद्यतेऽत्र कदाचन ।
सूतकस्तु न सङ्गच्छेत्प्रलयाग्निजवेन वै ॥ ३३ ॥

[1]रत्नपुष्पाभवं तैलं कुडवे द्वे जलेन वै ।
प्रस्थेन मिश्रितं वह्नौ तैलशेषं तु कारयेत् ॥ ३४ ॥

तन्मध्ये भूर्जपत्रं तु कुट्टितं चाञ्जनोपमम् ।
पांशुशूकादिरहितं पलमेकं प्रयोजयेत् ॥ ३५ ॥

पलैकं लोहकिट्टं च शुद्धाञ्जनसमप्रभम् ।
विमर्द्य निम्बुनीरेण लेपयेद्वा तदर्थकृत् ॥ ३६ ॥

---

1. अतसी ।

काचभागो भवेदेको द्विगुणं मृतभास्करम्।
रसकात्पञ्चभागास्स्युष्षड्भागा धौतमृत्तिका ॥ ३७ ॥
आटरूषजलैः पिष्ट्वा संपुटं तेन कारयेत्।
मूषां विरचयेत्सत्यं रसस्य निगडो भवेत् ॥ ३८ ॥
वह्निमध्याच्च गच्छेद्धि पक्षच्छेदी च तिष्ठति।
काचकूपी द्वितीया च तृतीयो लोहसंपुटः ॥ ३९ ॥

हठमुद्रा।

चुबुकं लोहचूर्णं च क्रोडरक्तेन संयुतम्।
तत्र सर्वं प्रदातव्यं घनघातेन ताडयेत् ॥ ४० ॥
सन्ध्यारभ्योदयो यावत्सूर्यबिंबं च दृश्यते।
हठमुद्रेति विख्याता सर्वसिद्धैर्नमस्कृता ॥ ४१ ॥

अथवा—

त्रिटङ्कं चुंबकं देयं नवटङ्कमयोरजः।
नररक्तेन संयुक्तं मेलयित्वा सकृत्सकृत् ॥ ४२ ॥
घनेन कुट्टितं सर्वं चतुर्यामं च मर्दितम्।
हठमुद्रेति विख्याता सर्वसिद्धैर्नमस्कृता ॥ ४३ ॥

अथवा—

लोहकिट्टं समानीय चूर्णयेद्द्वे पलानि षट्।
गालयेद्वस्त्रमध्ये तु खल्वमध्ये निधाय च ॥ ४४ ॥
अजैडकहृदिस्थं च मांसं संमिश्रितं नयेत्।
कुट्टयेद्दृढहस्तेन मध्ये निक्षिप्य चूर्णकम् ॥ ४५ ॥
सिक्थतुल्यं तु तद्यावत्सिद्धा भवति मृत्तिका।

अथवा—

काचटङ्कणमण्डूरेष्टकासंसाधिता भृशम् ॥ ४६ ॥

वटार्कोदुम्बरक्षीरैर्दिनमेकं हठा भवेत् ।

मदनमुद्रा ।

औदुंबराख्यवटदुग्धपलं पलं च
लाक्षा पलमृषिपलं त्वथ चुम्बकस्य ।
सङ्कुट्यमानमतसीफलतैलमिश्रं
सूतस्य जारणविधौ मदनाख्यमुद्रा ॥ ४७ ॥

अथवा—

चतुर्षु लोहकुण्डेषु क्रमतस्तप्ततोयतः ॥ ४८ ॥

उत्तरोत्तरतः क्षेपात्कटाहे क्वाथयेद्भृशम् ।
यावत्तलस्थितं सिक्थं तावत्तोये भृतं भवेत् ॥ ४९ ॥

तत्सिक्थं जलयन्त्रादौ लेपे प्रवरमीरितम् ।

कूपिकापाकविधिः ।

जीर्णसूक्ष्मस्य वस्त्रस्य कुर्यात्खण्डद्वयं बुधः ॥ ५० ॥

चतुरस्त्रकाचकूप्यामध्यार्धप्रमाणतः ।
पक्वपादांशतो मध्ये द्विधा कुर्वीत विस्तृतम् ॥ ५१ ॥

मग्नं तन्मृत्तिकापङ्के काचकूप्यां नियोजयेत् ।
यवप्रमाणलिप्तायां दृढमृत्तिकया पुनः ॥ ५२ ॥

खण्डमेकं तु वस्त्रस्य मध्ये छिद्रसमन्वितम् ।
निवेश्य कूपिकानालात्समीकुर्यान्मृदाऽभितः ॥ ५३ ॥

खण्डमन्यमधस्तद्वत्काचकूप्यां नियोजयेत् ।
आतपे तां विशोष्याथ मृदा तद्वद्विलेपयेत् ॥ ५४ ॥

पुनस्तथा वस्त्रखण्डद्वयेन विनियोजयेत्।
एवं विशोष्य संयोज्य मृत्तिका कर्पटत्रयम्॥ ५५॥

रसादिपिष्टिं प्रक्षिप्य मुद्रां कुर्यात्प्रयत्नतः।
पिधाय भस्मना कूपीं कण्ठनालविवर्जितम्॥ ५६॥

कण्ठे कोकिलकान्दत्वा पञ्चषाञ्ज्वलितान्भृशम्।
लोहवंशादिनालीभिर्धमेन्मुखसमीरणैः॥ ५७॥

काचकूपीकण्ठगतं यावद्भिर्गलितं भवेत्।
सन्दंशेन समीकृत्य सन्धिरोधं प्रयत्नतः॥ ५८॥

मुद्रां गलितकाचस्य कुर्याद्गोरक्षनिर्मिताम्।
शनैश्शनैः कोकिलकान्सन्दंशेनापसारयेत्॥ ५९॥

शीतीभूतविभूत्यास्तु गृह्णीयात्कूपिकां ततः।
मृत्कर्पटचतुष्केण पूर्ववद्विनियोजयेत्॥ ६०॥

छिद्रवर्ज्यं केशतुषमृद्भिर्लिप्त्वा विशोषयेत्।
यन्त्रे चक्रादिके धृत्वा जारणादिक्रियां चरेत्॥ ६१॥

एवं निर्धूमपाकेन सिद्धिः कोटिगुणोत्तरा।

चुल्लीविधानम्।

भवेदेकमुखी चुल्ली पातनादिक्रियाकरी॥ ६२॥

चुल्ली च द्विमुखी प्रोक्ता स्वेदनादिषु कर्मसु।
महास्वेदादिषु तथा चुल्ली तु त्रिमुखी स्मृता॥ ६३॥

चतुर्मुखी जारणादौ सत्वपाते च कीर्तिता।
श्रीनाथाख्या तथा चुल्ली जारणे बहुभिर्मुखैः॥ ६४॥

भावनामाला।

औषधादीनां रसैर्यावत्कर्दमाभो भवेद्रसः।
संप्लावितः परं मानं भावनायाः प्रकीर्तितम्॥ ६५॥

बिडमात्रा ।

ऊर्ध्वाधश्च बिडं दद्याद्रसेन्द्रादष्टमांशतः ।
न न्यूनाधिकमादद्यादन्यथा दोषकृद्भवेत् ॥ ६६ ॥

औषधं शोधनार्थं यदूर्ध्वाधो दीयते बुधैः ।
बिडसंज्ञां तु लभते तदिति प्रतिबोधितम् ॥ ६७ ॥

स्नेहाम्लादीनां गुणाः ।

सर्वे मृदुकराः स्नेहाः सर्वे चाम्लाः प्रबोधकाः ।
सर्वे मलहराः क्षाराः सर्वे रक्ताश्च रञ्जकाः ॥ ६८ ॥

द्रावकाम्ला हि तीक्ष्णाश्च पाचना ह्यामयापहाः ।
रोचको द्रावयेल्लोहान्क्षीरिणो रसबन्धकाः ॥ ६९ ॥

तैलपातनविधिः[1] ।

तैलानां पातनं वक्ष्ये सूर्यपाकेन चानलात् ।
जलयोगेन तत्तैलं ग्राह्यं योगेषु योजयेत् ॥ ७० ॥

धत्तूरबीजचूर्णानि वस्त्रपूतानि कारयेत् ।
समूलोत्तरवारुण्याः कषायेण विलोडयेत् ॥ ७१ ॥

आलिप्य कांस्यपात्रे तु धारयेदातपे खरे ।
सन्तप्ते स्वच्छवस्त्रेण पीडयेत्तैलमाहरेत् ॥ ७२ ॥

शिग्रुपुष्पार्ककार्पासबीजानामपमार्जनात् ।
ग्राह्यं धत्तूरवत्तैलमेकैकस्य पृथक्पृथक् ॥ ७३ ॥

काकतुण्ड्यास्समूलाया बाकुचीतैलमाहरेत् ।
देवदाल्याश्च जालिन्यास्तिक्तकाकोलितो भवेत् ॥ ७४ ॥

अपामार्गकषायेण तैलं स्याद्विषमुष्टिजम् ।
मूलक्वाथैः कुमार्यास्तु जैपालजं भवेत् ॥ ७५ ॥

---

1. रसरत्नाकरतः ।

रक्तापामार्गक्वाथेन बाकुचीतैलमाहरेत् ।
क्वाथेन चेन्द्रवारुण्यास्तैलमारग्वधं भवेत् ॥ ७६ ॥

कटुतुंबी देवदाली पटोली चेन्द्रवारुणी ।
तिक्तकोशातकी चैषां शुष्कबीजानि कारयेत् ॥ ७७ ॥

काकतुण्ड्या अपामार्गक्वाथे तैलं समाहरेत् ।
बीजानि कटुतुंब्याश्च गोमयेन विलोडयेत् ॥ ७८ ॥

शुष्कधान्यतुषैस्सार्धं कुट्टयेच्च ह्युलूखले ।
निस्त्वगक्षान्विचूर्ण्याथ भृङ्गराजरसैस्सह ॥ ७९ ॥

मर्दयित्वाऽऽतपे तैलं गृह्णीयात्पीडने सति ।
महाकालस्य बीजानि चूर्णितानि विभावयेत् ॥ ८० ॥

धात्रीफलरसेनैव सप्तवारं पुनः पुनः ।
सोष्णं कृत्वा तु तच्चूर्णं तैलयन्त्रेण पीडयेत् ॥ ८१ ॥

कृष्णायाः कटुतुंब्याश्च बीजचूर्णानि कारयेत् ।
कान्तपाषाणचूर्णं च ह्येकीकृत्य विचूर्णयेत् ॥ ८२ ॥

धान्यराशिगतं पक्षादुद्धृत्य तैलमाहरेत् ।
चूर्णं करञ्जबीजोत्थं भृङ्गराजरसैस्सह ॥ ८३ ॥

समालोड्यातपे तप्तं पीडनात्तैलमाहरेत् ।
धात्रीफलरसैर्भाव्यं चूर्णं पालाशबीजजम् ॥ ८४ ॥

दिनैकं वर्तते यन्त्रे तैलं ग्राह्यं च तैलके ।
गुडत्वग्बीजजं चूर्णं नरमूत्रेण भावयेत् ॥ ८५ ॥

सप्तवारं ततो घर्मे लेपयेत्कांस्यभाजने ।
उद्धृतं ढालयेत्तं च तैलं पतति नान्यथा ॥ ८६ ॥

रत्नानामारनालेन पिष्ट्वा चूर्णं विभावयेत् ।

ज्योतिष्मत्याश्च बीजानि चातपे तैलमाहरेत् ॥ ८७ ॥
चूर्णं वरुणबीजोत्थं चिञ्चाबीजत्वगन्वितम् ।
नालिकेराम्बुनाऽऽलोड्य ह्यातपे तैलमाहरेत् ॥ ८८ ॥
गुञ्जाभल्लातबीजोत्थं चूर्णं चित्रकमूलजम् ।
नारिकेलाम्बुनाऽऽलोड्य घर्मे तच्चालयेत्क्षणम् ॥ ८९ ॥
पीडयेत्तं च पट्टाभ्यां तैलं पतति तद्द्रुतम् ।
आम्रातबीजचूर्णस्य दशांशे चित्रमूलकम् ॥ ९० ॥
नारिकेलाम्बुना पिष्टं घर्मे तैलं समाहरेत् ।
पुत्रजीवस्य बीजानि चूर्णं वा तिन्दुबीजजम् ॥ ९१ ॥
आम्रातवत्प्रकर्तव्यं तेषां तैलं पृथक्पृथक् ।
नारिकेलाम्बुना भाव्यं बिल्वबीजस्य चूर्णकम् ॥९२॥
दिनैकं तैलयन्त्रेण तैलमाहृत्य योजयेत् ।
निस्तुषाङ्कोलबीजानां मुखं किञ्चिद्विघर्षयेत् ॥ ९३ ॥
प्ररोहयेत्कांस्यपात्रे पिष्ट्वा चणकलेपितम् ।
तन्मध्ये टङ्कणं स्विन्नं किञ्चित्किञ्चित्प्रलेपयेत् ॥ ९४ ॥
धारयेदातपे तीव्रे मुखात्तैलं समाहरेत् ।
अथवा कांस्यपात्रे तद्धर्मे धार्यमधोमुखम् ॥ ९५ ॥
अधःस्थे कांस्यपात्रे च तैलं पतितमाहरेत् ।
खर्जीयुतं समं पिष्ट्वा छिद्रभाण्डे निवेशयेत् ॥ ९६ ॥
तत्क्षणाद्द्रवरूपं च केशतैलमिदं भवेत् ।
अथवोत्तरवारुण्याः कषायेण समाहरेत् ॥ ९७ ॥
तैलं समस्तबीजानां ग्राहयेदातपे खरे ।
पक्वभाण्डानुमात्राणां रसमादाय भावयेत् ॥ ९८ ॥
समस्तं बीजचूर्णं तु ह्युक्तानुक्तं पृथक्पृथक् ।

आतपे मुच्यते तैलं साध्यासाध्यं न संशयः ॥ ९९ ॥

गर्भबीजास्थिबीजाद्यं शुकविष्ठासनादिकम् ।
सर्वबीजेषु वा तैलं ग्राह्यं पातालयन्त्रके ॥ १०० ॥

शुक्तं सूक्तं वा[1] ।

गुडमधुकाञ्जिकमस्तु-
प्रविभागास्स्युर्यथोत्तरं द्विगुणाः ।
त्रिदिनानि धान्यराशौ
स्थापितमिदमुच्यते शुक्तम् ॥ १०१ ॥

अम्लकाञ्जिकवर्गः[2] ।

वारिणा काञ्जिकं रक्षोहरं स्यात्कुण्डगोलकम् ।
काञ्जिकोत्ग्राहधातुघ्नकुञ्जलानि महारसम् ॥ १०२ ॥

म्लक्ष्णं सोमशुक्लाख्यं कुल्माषाभिषुतं च तत् ।
अवन्तिसोमसंज्ञं तच्चेतण्डुलकृतं भवेत् ॥ १०३ ॥

धान्यैर्धान्याम्लकैः शूकक्षुद्रैः स्याच्च युगन्धरम् ।
दलैः पक्वैर्निस्तुषैस्तु सौवीरं यवजैर्मतम् ॥ १०४ ॥

तुषोदकं तदामैस्स्याद्गोधूमैरारनालकम् ।
बाह्लीकनिर्वृतं शिम्बैस्सुतं कन्दफलादिभिः ॥ १०५ ॥

तत्कर्त(र्च)रीभिः पिण्याकी शाण्डाकी मूलसर्षपैः ।
मधुद्राक्षागुडाद्यैस्तु सूक्तमिक्षुरसेन च ॥ १०६ ॥

कुल्माषधान्यमण्डाद्यैर्गोहांबुकमिति स्मृतम् ।
कलाम्लं वटकाद्यैस्स्याच्चुक्रं नष्टाम्लसन्धितम् ॥१०७॥

---

1. अजीर्णमञ्जरीतः । 2. अभिधानकामधेनुतः ।

लवणवर्गः[1] ।

सिन्धुसामुद्ररुचकैः प्रदिष्टं लवणत्रयम् ।
तदुद्भिदबिडाभ्यां च प्रोक्तं लवणपञ्चकम् ॥ १०८ ॥

पांशुपाक्यबिडाख्यैश्च पटुषट्कं प्रचक्षते ।

सिन्धूत्थगन्धगुटिकं गडकं बिडाह्वं
शाकंभरं रुचककाचरजो जलोत्थम् ।
भौमोषकादिलवणानि तथा द्विभेदाः
क्षाराश्च लावणिकवर्ग इति प्रदिष्टः ॥ १०९ ॥

त्रिगन्धकम्[1] ।

गन्धतालशिलाभिस्तु त्रिगन्धकमितीरितम् ॥ ११० ॥

रङ्गाकृष्टिः[2] ।

रङ्गाकृष्टिं प्रवक्ष्यामि यथाज्ञातं तु तत्वतः ।
न कुत्रचित्प्रयोगोऽस्ति शास्त्रे वाऽपि न दृश्यते ॥ १११ ॥

रसोपरसधातूनां रङ्गद्रावं तु शोभनम् ।
एतद्बौद्धा विजानन्ति भोटदेशनिवासिनः ॥ ११२ ॥

मणैकं लोहचूर्णस्य स्वर्जिकाया मणद्वयम् ।
त्रिभागं चूर्णकं दत्वा ह्येकस्थमतिमर्दयेत् ॥ ११३ ॥

क्षिप्त्वा चूर्णं तु मृद्भाण्डे ह्यजामूत्रेण पूरयेत् ।
चुल्लिकोपरि संस्थाप्य वह्निं प्रज्वालयेत्ततः ॥ ११४ ॥

यदा फेनस्समागच्छेच्छुक्लवर्णस्तदूर्ध्वतः ।
अन्यपात्रे तदा स्थाप्यं यावद्बध्नाति रक्तताम् ॥ ११५ ॥

पश्चात्तं रक्तफेनं च क्षिपेत्पात्रान्तरे पुनः ।
क्षीणे मूत्रजलं दद्यावद्रक्तं च दृश्यते ॥ ११६ ॥

---

1. रसकामधेनुतः । 2. रससारतः ।

तावद्रक्तं तु गृह्णीयात्पुनः पात्रे निधापयेत् ।
यदा रक्तं न दृश्येत तदा वह्निं निवारयेत् ॥ ११७ ॥

रक्तं वस्त्रेण संगाल्य मलशेषं विवर्जयेत् ।
श्वेतफेनेन संयुक्तं तस्यैव जलशोषणम् ॥ ११८ ॥

काचसारितघट्यां च तद्धार्यं तदनन्तरम् ।
बृहद्भाण्डं समादाय कुक्षौ च छिद्रसंयुतम् ॥ ११९ ॥

भाण्डमध्ये घटीं क्षिप्त्वा मुखं छिद्रेण योजयेत् ।
[1]घटी चैका च न्युब्जा स्यात्तस्या नालमधोमुखम् ॥ १२० ॥

रुध्वा तदा तयोस्सन्धि मध्ये चिल्लाणकं भवेत् ।
भाण्डं वालुकयाऽऽपूर्य तस्य द्वारं निरुन्धयेत् ॥ १२१ ॥

वह्निप्रज्वालनं तावद्यावच्चिल्लाणको द्रवेत् ।
शीतं यन्त्रं समुत्तार्य घटीं प्रक्षालयेत्ततः ॥ १२२ ॥

द्रावं क्षिप्त्वा पुनर्दद्यात्पुनः पाको विधीयते ।
एवं रङ्गद्रुतिः प्रोक्ता द्रेगयन्त्रेऽतिशोभना ॥ १२३ ॥

तालो नागः शिला चौरश्शुल्बं हंसश्च गन्धकः ।
एते रङ्गं विमुञ्चन्ति विद्रुमं गैरिकं तथा ॥ १२४ ॥

वालुकाद्रेगयन्त्रेण पिच्छाः केशा द्रवन्ति च ।
अम्लादिद्रावणं कार्यं यन्त्रेणानेन यत्नतः ॥ १२५ ॥

ताराविष्टम् ।

ताराविष्टं रञ्जितं तु कपाल्यादिकरञ्जकैः ।
नाशयेत्तारकं क्षिप्रं सर्वलोहस्य कालिकाम् ॥ १२६ ॥

---

1. तदास्ये काचनालं च तच्च नालमधोमुखम् । इति पाठभेदः ।

कपालीयोगाः[1] ।

शुल्बपत्रपलैकं तु पलार्धं गन्धकस्य च ।
टङ्कणं कर्षमेकं तु कर्षैका रसकज्जली ॥ १२७ ॥
माक्षिकं कर्षमेकं तु सर्वमेकत्र कारयेत् ।
अन्धमूषागतं ध्मातं खोटो भवति तत्क्षणात् ॥ १२८ ॥
तं खोटं सूक्ष्मचूर्णं तु [2]दनुजाम्लेन मर्दयेत् ।
आरण्यगोमयेनैव पुटान्दद्याच्चतुर्दश ॥ १२९ ॥
इन्द्रगोपकसङ्काशं जायते नात्र संशयः ।
तच्चूर्णं मधुना युक्तं शुद्धतारं तु रञ्जयेत् ॥ १३० ॥
रञ्जयेत्त्रीणि वाराणि शोभनं हेम जायते ।
एष कापालिकायोगस्सर्वलोहानि रञ्जयेत् ॥ १३१ ॥
रञ्जयेद्बद्धसूतं च वज्रबद्धं च रञ्जयेत् ।
आरचूर्णपलैकं च मृतनागं पलं तथा ॥ १३२ ॥
वङ्गाभ्रकं पलैकं च तीक्ष्णचूर्णं पलं तथा ।
त्रिशुल्बं नागवङ्गौ च शतैकांशे समन्वितम् ॥ १३३ ॥
त्रिशुल्बं गैरिकैकैकमथवा तीक्ष्णमाक्षिकम् ।
अथवा तीक्ष्णभागौ द्वौ त्रयो घोषात्नवोरगात् ॥ १३४ ॥
ताम्रस्य नव भागास्स्युस्तारभागचतुष्टयम् ।
अथवा देवदेवेशि ! माक्षिकस्य पलद्वयम् ॥ १३५ ॥
मयूरग्रीवतुत्थैकं मृतनागपलं तथा ।
अथवा वङ्गनागाभ्रमेकैकं सुरवन्दिते ! ॥ १३६ ॥
तीक्ष्णद्वयं त्रिशुल्बं च हेमताप्यचतुष्टयम् ।
यद्वा विमलवैक्रान्तं वङ्गं नागस्तृतीयकम् ॥ १३७ ॥

---

1. रसार्णवतः । 2. चणकाम्लेन इति पाठः ।

सशुल्बमथवा हेम विमलं च भुजङ्गमः ।
एषामन्यतमं देवि! [1]पूर्वकल्पसमन्वितम् ॥ १३८ ॥

अन्धमूषागतं ध्मातं खोटो भवति तत्क्षणात् ।
पुटयेत्पूर्वयोगेन रञ्जयेत्पूर्वयोगतः ॥ १३९ ॥

नाग शुल्वं तथा तीक्ष्णं [2]कापालीक्रम उत्तमः ।
तेनैव रञ्जयेत्तारं सप्तवारं पुनः पुनः ॥ १४० ॥

तेनैव रञ्जयेद्धेम सप्तवारं पुनः पुनः ।
पक्वबीजमिदं श्रेष्ठं सर्वकर्मणि योजयेत् ॥ १४१ ॥

[3]वङ्गं तीक्ष्णं कपाली च शुल्बतारं च रञ्जयेत् ।
रञ्जयेत्सह हेम्ना तु भवेत्कुङ्कुमसन्निभम् ॥ १४२ ॥

रक्ततैले निषिक्तं तु लोहसङ्क्रान्तिनाशनम् ।
आरकापालिचूर्णं तु शुद्धतारं तु रञ्जयेत् ॥ १४३ ॥

विमलेन च नागेन कपाली परमेश्वरि! ।
रञ्जयेत्सर्वलोहानि तारं हेम विशेषतः ॥ १४४ ॥

रञ्जयेत्त्रीणि वाराणि जायते हेम शोभनम् ।
तेनैव रञ्जयेद्धेम सप्तवारं पुनः पुनः ॥ १४५ ॥

वङ्गं नागं तथा कान्तं शुल्बं तीक्ष्णं च माक्षिकम् ।
रविनागकपाली च शुल्बतारं च रञ्जयेत् ॥ १४६ ॥

रञ्जयेत्त्रीणि वाराणि तारारिष्टं तु जायते ।
तेनैव रञ्जयेद्धेम सप्तवाराणि पार्वति! ॥ १४७ ॥

---

1. पूर्वकल्पस्तु पलार्धगन्धकं कर्षकज्जलीमाक्षिकटङ्कणैः पूर्वयोगेन पुटयेदारण्यगोमयेनेति रसकामधेनुः ।

2. पूर्ववत्खोटं कृत्वाऽम्लेन मर्दयित्वा चतुर्दशधा पुटनम् ।

3. वङ्गतीक्ष्णकपाल्या चेति पाठः ।

रक्तवर्गनिषिक्तं तु लोहसङ्क्रान्तिनाशनम् ।
लवणोदनिषिक्तं तु लोहसङ्क्रान्तिनाशनम् ॥ १४८ ॥

वङ्गं नागं तथा शुल्बं कपाली सुरवन्दिते ! ।
हिङ्गुलं नीलकाचेन तुत्थाम्ललवणेन च ॥ १४९ ॥

विषपित्ताम्लपिष्टेन हन्यात्सङ्क्रान्तिकालिकाम् ।
गैरिकं गन्धकं सूतं तिलतैलेन पेषयेत् ॥ १५० ॥

लेपयेत्तारपलाणि दत्वा शुल्बकपालिकाम् ।
ऊर्ध्वाधस्त्वन्धमूषायां शुभं हेमदलं भवेत् ॥ १५१ ॥

भागैकं हरितालस्य भागैकं गैरिकस्य च ।
माक्षीककल्कभागैकं चत्वारो [1]गोलकस्य च ॥ १५२ ॥

अन्धमूषागतं ध्मातं हेम रञ्जयति क्षणात् ।
अनेन क्रमयोगेन चतुर्वारं तु रञ्जयेत् ॥ १५३ ॥

पक्वबीजमिदं श्रेष्ठं बालार्कसदृशप्रभम् ।
तेन वर्णद्वयोत्कर्षः षोडशांशेन जायते ॥ १५४ ॥

रक्ततैले निषिक्तं तु लोहसङ्क्रान्तिनाशनम् ।

मूर्तिबद्धरसलक्षणम्[2] ।

गुरुत्वमरुणत्वं च तेजसा सूर्यसन्निभम् ॥ १५५ ॥

शिखिमध्ये द्रुतं तिष्ठेन्मूर्तिबन्धनलक्षणम् !
शलाकाजार(ग्रह)णाद्वाऽपि मूर्तिबन्धत्वमिष्यते ॥ १५६ ॥

पट्टबद्धरसलक्षणम्[2] ।

श्वेतं पीतं गुरु तथा मृदुसिक्थकसन्निभम् ।
अग्निमध्ये यदा तिष्ठेत्पट्टबन्धस्य लक्षणम् ॥ १५७ ॥

---

1. मनश्शिलायाः । 2. रसार्णवे ।

एतल्लक्षणसंयुक्तं सूर्यकोटिसमप्रभम् ।
पट्टबन्ध तु वस्त्राभं खेचरत्वादिकारकम् ॥ १५८ ॥

ोटबद्धरसलक्षणम्[1] ।

कुक्कुटाण्डनिभं यत्तु लक्ष्यते सैन्धवं यथा ।
आवर्तिते रसस्तद्वत्खोटबद्धस्य लक्षणम् ॥ १५९ ॥

अथवा छेदने स्निग्धं रश्मिना मृदुता भवेत् ।
अक्षयं कठिनं श्वेतं खोटबन्धस्य लक्षणम् ॥ १६० ॥

ागजीर्णाशुद्धरसलक्षणम्[1] ।

श्वेतं च विद्धि सुस्निग्धं गुरुभोजनभोजि(भेदि)नम् ।
नागजीर्णं विजानीयाद्रसेन्द्रं कफकोपनम् ॥ १६१ ॥

ारजीर्णाशुद्धरसलक्षणम्[1] ।

आकृष्णश्चपलो रूक्षः कपिलः कालिकावृतः ।
तमारजीर्णं जानीयात्सूतकं वातकोपकम् ॥ १६२ ॥

रसकजीर्णाशुद्धरसलक्षणम्[1] ।

प्रागुक्तलक्षणैर्युक्तं समस्तैर्जीर्णतां गतम् ।
तथा रसकजीर्णं च रसेन्द्रं सान्निपातिकम् ॥ १६३ ॥

तादृशं वर्जयेद्यत्नात्तथा खलु घनं गुरु ।

---

1. रसार्णवे ।

क्रन्दस्य सपरिशिष्टस्य
र्णानुक्रमणिका ॥

पाठशुद्धिः ॥

पृष्ठ-संख्या ।	पङ्क्ति-संख्या ।	अशुद्धः पाठः ।	शुद्धः पाठः ।
५	९	यौगिकश्च	यौगिकाश्च
६	१६	कोविदः	कोविदैः ।
१४	६	प्रतीच्योत्त	प्रतीच्युत्त
२४	२२	अज्ञाना व	अज्ञानाद्भवति
५३	२	दोलाख्ये	तुलाख्ये
७१	३	ताम्रमयं	ताम्रमयः
९०	२३	अन्यः प्रकार इति मास्तु ।	
९३	११	सविड्ये(?)	सविडे
१०१	५	नीलोत्पलानि	नीलोपलानि
१०४	१३	शतांशे	समांशे
१०९	७	आरोटरसः	आरोटरससेवार्थै क्षेत्रीकरणम् ।
१४६	७	वज्राभ्रकरसायनम्	वज्राभ्रकान्तरसायनम् ।
१५०	१३	कान्ताभ्रकजीर्णरस-भस्म	इति तु मुखीकृत इति श्लोकार्धात्प्राक् निधेयम् ।
,,	२०	वैक्रान्तसत्वस्य	वै कान्तसत्वस्य
१६१	२	मारयेत्	जारयेत्
१७६	१०	दिव्यो सिद्ध	दिव्यः सिद्ध
२०४	२०	विनिक्षि	विनिक्षिपेत् ।

पृष्ठ-संख्या ।	पङ्क्ति-संख्या ।	अशुद्धः पाठः ।	शुद्धः पाठः ।
२१५	६	पलत्रयं	फलत्रयम्
२२१	१२	शतफलं	शतपलं
२३२	१६	समान्नं	समन्नं
४२०	१९	निधिं	विधिं
४२१	११	तिलवक्काथ	तिलवत्काथ
४८२	४	हेमपिष्टी तारपिष्टी च	हेमकृष्टी तारकृष्टी च ।
४९२	७	निर्मुख चारणा	निर्मुखजारणा ।
४९७	१७	नताधो	नतायो
५२५	८	मद्य	मर्द्यं